
II. B. 28	भारतचम्पूः (सटीकः)	अनन्तभट्टकविः टीका-नारायणसूरिः	काव्यम्	Bombay, Saka 1756	नागर

अथभारतचंपौप्रथमस्तबकःप्रारभ्यते॥



फणाग्र

कैलासवासी सूर्यवंशी ... १।८

करमशी रणमल्ल

देवालयधर्मशालान्नक्षेत्रशरवापी कूपतीर्थसोपानादिकर्तृक, स्ववा
र्गपरिपालक मनस्व्युदार नीतिधर्मधुरंधर तस्याज्ञांकित सद्गुणसंपन्न
सुपुत्र

शेट हंसराजं प्रति

तस्या ।रपेक्ष स्वभावात्संस्कृतभाषाज्ञान वृद्धिभवनोत्कंठां दृष्ट्वा
प्रीतिपूर्वको ऽयंग्रंथः

शोधनांकन प्रकटकर्तृकेन निवेदितः ॥ ५ ॥

श्रीगणेशायनमः॥ वेतंडतुंडगंडाभ्यांभांडाभ्यांमदवारिणः निःसृतापापडिंभस्यरक्ष्यान्मोडाकिनीधुनी १ अथश्रीमदध्वरींद्रधुरीणानंत ८
कविःभारतसमुद्रात्सारमुद्धृत्यचंपूप्रबंधंचिकीर्षुःतस्यनिर्विघ्नसमाप्तिप्रचयगमनार्थंकृतेष्टदेवतास्मरणंशिष्यशिक्षायैनिबध्नन् एतद्ग्रंथसमा
स्वादयतांकल्याणमाशास्ते कल्याणमिति मत्तंपुरातनंवेतंडरत्नंगजश्रेष्ठंगजाननमित्यर्थः रत्नंस्वजातिश्रेष्ठेपीत्यमरः तस्यगजनराकृतित्वेपि
श्रेष्ठेपिसर्वेषुगात्रेषुशिरःप्रधानमित्यभियुक्तोक्तेः महाहस्तादक्षिणेनेतिश्रुतेश्चवेतंडत्वेनग्रहणं वःयुष्माकंकल्याणंकुशलंविधत्तांकरोतु विदधाते

कल्याणंवोविधत्तांकरटमदधुनीलोलकल्लोलमालाखेलल्लोलंबकोलाहलमुखरितदिक्चक्रवा
लांतरालं मत्तवेतंडरत्नंसततपरिचलत्कर्णतालप्ररोहद्वातांकूराजिघ्रार्षादर्वीवृतफणाशृंगभूषाभुजंगं १

करोत्यर्थत्वं युष्मभ्यंकल्याणंददात्वित्यर्थः कीदृशंवेतंडरत्नं करटयोःगंडस्थलयोःमदधुनीनांमदोदकमग्निनां लोलासुचंचलासु कल्लोलमालासुम
हालहरीपरंपरासुखेलतांरोलंबानांभ्रमराणांकोलाहलैःझंकारकलकलैःकृत्वामुखरितंशब्दयुक्तंकृतंदिशांचक्रवालस्यमंडलस्यअंतरालंमध्य-
भागोयेनततू पुनःकीदृशं कर्णौतालाविवझर्झरसंज्ञकतालविशेषाविवकर्णतालौमनतंनिरंतरंयथातथापरिचलंतौयोकर्णतालौताभ्यांसकाशात्प्ररो
हतांउत्पद्यमानानांवातांकुराणांवाय्वंकुराणांअल्पवायूनांइत्यर्थः आजिघ्रार्षयाभक्षयितुमिच्छयादर्वीईषत्विवृतानिप्रसारितानिफणाशृंगाणिफणाग्र

भागाः मुखानीत्यर्थः येस्तथाभूताः भूषाभुजंगाः कटककटिसूत्रके यूरादिभूषणभूताः भुजंगाः नागराजाः यस्यतत् अंकुरशब्दोदीर्घादिरपिपुरुषाःपूरुषान राइतिवत् अन्येषामपिदृश्यतेइतिदीर्घः अत्रोभाभ्यांदिगाणभ्यांवतंडन्तसंमर्थनात् काव्यलिंगमलंकारः समर्नीयस्यार्थस्यकाव्यलिंगंसमर्थनमिति लक्षणात् स्रग्धरावृत्तं अत्रग्रंथप्रारंभमगणानिक्षेपात् मोभूर्भूमिस्त्रिगुरुःश्रियमित्युक्त्याएतद्रसास्वादनादिकुर्वतांलक्ष्मीरूपंफलंसूचितं १ तुहिनेति इ निहासद्वारारसाविर्भावंकरिष्यन्नादौहस्तिनाख्यांराजधानीं वर्णयतिदशभिःपद्यैरेकेनगद्येनच हस्तिनाइति आख्यानामयस्याःसाप्रसिद्धाकुरूणांकुरुदे शानांराजानःकुरवः कुरुशब्दात् कुरुनादिभ्योण्यइतिण्यप्रत्ययस्यतद्राजस्यबहुष्वितिराजकृतबहुत्वेलुक् तेषांराजधानी राजावासनगरी अस्ति राजानाधी

क्षेपक॥नवनीतस्कंधयोनखांकानवनीपांकुर नंदनीयशोभाः कुशलंकलयंतुगोपिकानांकुचवास्तव्यकुटुंबिनाधुरीणाः१ तुहिनकिर णवंशस्थूलमुक्ताफलानांविपुलभुजविराजद्वीरलक्ष्मीविभूम्नां हसितसुरपुरश्रीरस्तिसाहस्तिनाख्यारिपुजनदुरवापाराजधानीकुरूणां॥२॥

यंतेधार्यंते पयेतिकरणाधिकरणयोश्चेतिकरणेल्युट् विहसितास्ववस्मिन्नुत्कर्षेणोपहसितास्वरपुरस्यामरावत्याः श्रीसंपत्शोभावायया सातथारिपुजनैः श त्रुसमूहैः दुरवापादुःखेनापिप्राप्तुमशक्या कीदृशां कुरूणांतुहिनकिरणवंशस्यचंद्रवंशस्यस्थूलमुक्ताफलानांपृथुलमौक्तिकानामितिरूपकं वंशशब्दस्य वेणुवाचकत्वेनमुक्ताफलोत्पत्तिस्थानत्वंयुक्तमेव विपुलयोःस्थूलयोःभुजयोः अधिकरणयोर्विराजन् शोभमानः वीरलक्ष्म्याःविशिष्टोभूमाबाहुल्यंयेषां तेषांभूमेत्यत्रबहुशब्दात् भावार्थे इमनिचिबह्वोर्लोपोभूचबहोःइतिप्रकृतेर्भूभावः प्रत्ययादेर्लोपश्च अत्ररूपकातिशयोक्त्योरेकत्र समावेशात्संसृष्टिः॥२॥ ॥

यस्यामिति यस्यांहस्तिनापुर्यांउदग्रस्यउच्चस्यनृपमंदिरस्ययाचंद्रशालागृहोपरिगृहंतस्योपरिगृहएवशीत्वातिमगृह चंद्रशालाशिरोगृहमित्यमरः तस्यवातायने गवाक्षेगतिवशात्कदाचिद्गमनवशात् यं अमृतं पुष्णातीतिवपुट्तस्मिन् यथा वाप्याःजलोत्पादकत्वं तथाबिंबस्यामृतोत्पादकत्वं शिशिरांशोः चंद्रस्यबिंबेप्रसक्तांलग्नांदीपाग्रस्यघात यनस्यदीपशिखायाःधूममषिकां धूमजन्यकज्जलंकुरंगइतिहरिणाकारत्वात् हरिणोयमितिमुग्धजनाःमोहात् अज्ञानात् हेतोःवदंतियद्वाउहात् तर्कात् मावदंतिचंद्रबिंबस्यायंहरिणोहरिणोनभवतिकिंतुहस्तिनापुरीस्थराजगृ

यस्यामुदग्रनृपमंदिरचंद्रशालावातायनेगतिवशाद्वपुषिप्रसक्तां
दीपाग्रधूममषिकांशिशिरांशुबिंबेमोहात्कुरंगइतिमुग्धजनावदंति २

हवातायनसंबंधिदीपमषिकेयंगतिवशात्बिंबेप्रसक्तेत्यर्थः अत्रमुग्धमोहपदाभ्यांहरिणात्वमपह्नुत्य दीपधूममषिकात्वारोपादपह्नुत्यलंकारः सचापह्नवः उदग्रनृपमंदिरचंद्रशालावातायनगतिवशादिति उक्तिकथनेनकृतइति हेत्वपह्नुतिरलंकारः तदुक्तं स एवयुक्तिपूर्वश्चेदुच्यते हेत्वपह्नुतिरिति यथाचंद्रबिंबे चंद्रशालावातायनदीप धूममषिकाया असंबंधेपिसंबंधकथनात् संबंधातिशयोक्तिरलंकारः तयोरेकत्रसमावेशात् संकरः एवंच अत्युच्चराजमंदिरवैशिष्ट्यकथनेन राजधान्याःलोकोत्तरसौंदर्यंव्यज्यते ॥ २ ॥ ॥५॥ ॥५॥

ग्रीष्मेति ग्रीष्मेषु प्रतिसंवत्सरग्रीष्मर्तुषु पथा आकाशमार्गेण आगतस्य यस्याः नगर्याः गोपुराणां पुरद्वाराणां अग्रिमाः उपरितनाः दरीषु गृहतुल्यगृ
हेषु विश्राम्यतः विश्रांतिमनुभवतः हरिहयस्य हरिद्वर्णाश्वस्य सूर्यस्य विलंबनेषु उदयाचलास्ताचलपर्यंतगतिकालाधिककालेषु चिह्नं ज्ञापकं त
दीयायाः ग्रीष्मीयायाः दिनसंततेः दिनसमूहस्य दीर्घभावः दीर्घत्वं कथंभूतासु गोपुराग्रिमदरीषु शीतकरकांतैः चंद्रकांतमणिभिः कृतानि उदराणि
भूमिभित्त्याद्यंतरीयभागा यासां तासु इदं विश्रांतिहेतुत्वेन विशेषणं यथा कश्चित् पांथो ग्रीष्मर्तौ पथि श्रांतो मध्याह्ने शीतलस्थले घटिचतुष्टयं विश्रांतिसुखम

ग्रीष्मेषु शीतकरकांतकृतोदरासु यद्गोपुराग्रिमदरीषु पथागतस्य विश्राम्यतो हरिहयस्य विलंबनेषु चिह्नं तदीयदिनसं
ततिदीर्घभावः ॥ ४ ॥ यत्रांगनावदनयामवतीशहृष्यच्चंद्राश्मसौधगलितः सलिलप्रवाहः वृंदारकेंद्रनगरीबृहदुत्सवा
यमंदाकिनीतिलभते महतीमभिख्यां ॥ ५ ॥

नुभूय पुनर्गच्छति तथायमादित्योपि मार्गस्थशीतलचंद्रकांतमणिमयगृहेषु प्रतिदिनं विश्रां
तिमनुभूय गच्छति कुत एतदिति चेत् उदयाचलादस्ताचलपर्यंतगमनविषये शरदादिऋतुसंबंधिदिनघटिकापेक्षयैतदृतुसंबंधिदिनघटिकाधि-
क्यदर्शनादनुमीयते इति भावः अत्र गोपुरोपरितनगृहाणामादित्यविश्रांतिस्थानत्वासंबंधेपि संबंधकथनात्संबंधातिशयोक्तिरलंकारः तेषां गृहा-
णां चंद्रकांतमणिमयत्वकथनेन समृद्धिमद्वस्तुकथनादुदात्तालंकारश्चनयोः संसृष्टिः तेन नगरीगोपुरोपरितनगृहाणामत्युच्चत्वं नगर्याः समृद्धिम
द्वस्तुयुक्तत्वं च व्यज्यते ॥ ४ ॥ यत्रेति यत्र यस्यां नगर्यां अंगनानां सुंदरीणां वदनयामवतीशाः मुखचंद्रास्तैः हृष्यंतः तत्किरण [illegible] स्रवंतः चंद्राश्मानः

२

उर्ध्वभागस्थवेदिकासंबंधिचंद्रकांतमणयोयेस्थितस्मात्सौधात्गलित: अधोभागस्थस्वर्गसमीपेपतित: सलिलप्रवाह: चंद्रकांतीयजलप्रवाह: ८

दारकेंद्रस्यनगर्या: अमरावत्या: बृहद्दुलवायमंदाकिनीति महतीं अभिख्यां अभिधानंलभंतेप्राप्नोति अभिख्यानामशोभयोरित्यमर: अत्रय: स्वर्गा

दप्युच्चसौधगतांगनामुखचंद्रकिरणस्पर्शजन्यचंद्रकांतीयजलप्रवाह: स्वर्गसमीपेपतित: सएवमंदाकिनीनाम्नी आकाशनदीति अत्यद्भुतार्थवर्ण-

नादत्युक्तिरलंकार: तेनराजांत: पुरस्त्रीणांलोकोत्तरसौंदर्यंव्यज्यते॥ ५॥ दीप्रैरिति यत्रयस्यांनगर्यांयुवान: गृहांतस्थिततरुणपुरुषा: दीप्रै: स्वत:

सिद्धप्रकाशै: अगारमणिभि: गृहसंबंधिहीरकादिरत्नै: कृत्वादिवसायमानांदिवसमिवाचरंतींनिशांरात्रिंमनसिकृतांतंज्योति: शास्त्रमिद्धा

दीप्रैरगारमणिभिर्दिवसायमानांनिश्चिन्वतेमनसियत्रनिशांयुवान:
कांतीनिकैरखिलकालनिवेदनायघंटामणेरभिहतस्यघनारवेण ६

तंविदंतितेकांतीतिका: तद्वेदेत्यर्थेक्रत्वक्थादीत्यनेनठक्तै: अखिलानां समस्तमनुष्याणांकालनिवेदनायसमयज्ञापनाय अभिहतस्य ता

डितस्यघंटामध्ये: घंटामध्यवर्तिमणे: घनारवेणनिबिडशब्देनमहाशब्देनेतियावत् यद्वाघनवत् घनगर्जनवत् आरव: तेन कृत्वानिश्चिन्व-

तेदिवसोगत: इदानीमियंनिशेतिनिश्चयंकुर्वतिनतंधकारेणेत्यर्थ: प्रौढानामपिसंशय: किंपुनर्वक्तव्यंस्त्रीबालानामितिध्वनयितुंपुर्वपदंय

दांनिशांअगारमणिभि: दिवसायमानामितिविधिविशेषणतेनान्वय: अत्रोक्तार्थेनस्वयंप्रकाशमणिविशिष्टागारवैशिष्टयेननगर्याअलौकिकत्वंव्यज्यते ६

वक्त्रमिति यस्यांनगर्यां वामाःस्त्रियः प्रदीपदर्शिनीवामेत्यमरः विलासार्थेयत् मणिदर्पणं हीरकरत्नदर्पणं तेनधार्यमाणं स्वस्मिन् स्थाप्यमानं दर्पणेप्रतिबिंबितमित्यर्थः वक्त्रंस्वमुखं अयंहिमांशुःचंद्रइत्यवधार्यमत्वातस्यस्रुधांशोःआदर्शेदर्पणे बिंबधृतिः अथच दर्शे अमावास्यामभि व्याप्यबिंबस्थितिःश्रुताचासौदृष्टाचश्रुतदृष्टापूर्वंश्रुतदृष्टाश्रुतदृष्टपूर्वातथानभवति अश्रुतदृष्टपूर्वा कदापिन श्रुतानदृष्टेत्यर्थः इतिपश्र्याद्विचा

वक्त्रंविलासमणिदर्पणधार्यमाणंवामाहिमांसुरयमित्यवधार्ययस्यां ॥
आदर्शबिंबधृतिरश्रुतदृष्टपूर्वातस्येतिनादृशधियंविनिवारयंति ॥७॥

रेणतादृशां धियं स्रुधांशुरयमिति बुद्धिंविनिवर्तयंति दूरीकुर्वंति मिथ्येतिमन्यंतेइत्यर्थः दर्पणेस्वमुखप्रतिबिंबंदृष्ट्वाइदंचंद्रबिंबमितिम
त्वाततःचंद्रबिंबस्यस्थितिराकाशेदृष्टादर्पणेनश्रुतानदृष्टाच तत्रापिदर्शमभिव्याप्यनैवश्रुतादृष्टाचेतिविचारेणनायंचंद्रइतिनिश्चिन्वंतीत्य २
र्थः अनेनपौरस्त्रीणामलौकिकसौंदर्यंव्यज्यते ॥ ७॥ ॥ ६॥ ॥ ६॥ ॥ ६॥ ॥ ६॥ ॥ ६॥

आलापेति यवनगर्यासमितोसभायामुखध्वनिनाकेवलरागस्वरूपदर्शनं आलापः तस्योच्चारणकालेनसमं यथातथापल्लविता पल्लववतीकृताबा
दनार्थमंगुलीयुक्ताकृतेनेत्यर्थः उपमानवाचकपल्लवशब्देनोपमेयांगुलीग्रहणं अत्रपल्लववतीशब्दात्तत्करोतीतिणिच् इष्टवद्भावात् पुंवद्भावमतुब्
लुकौ या अंकवीणाउत्संगस्थवीणा आलापार्थप्रसृतमुखसंबंधिनिसौरभ्येसौगंध्येविषयेपतंतितच्छीलाः भ्रमराश्चतेषां आरवैः शब्दैः संकुलस्यापि

आलापकालसमपल्लवितांकवीणासौरभ्यपातिमधुपारवसंकुलस्य
तंत्रीस्वनस्यरमितातरुणीस्वनस्यजानातियत्रचतुरोपिनतारतम्यं ८

श्रितस्यतंत्रीस्व-
नस्य तंतुवाद्यविशेषस्वनस्यतरुणीस्वनस्य चतारतम्यं न्यूनाधिकभावंचतुरोपिगानवादनकलायामत्यंतनिपुणपुरुषोपिनजा- ति इतरोनजानातीति-
किमुवक्तव्यमितिद्योतनार्थमपिशब्दः अथवापूर्णरागस्वरूपवेदिनादीपकल्याणरागेगीयमानेदीपस्थानेदीपाः प्रादुर्भवंति वसंतरागेगीयमानेकाष्ठेपुष्पपल्ल
वाः प्रादुर्भवंतीत्येतिह्यमाश्रित्य आलापकालसमंपल्लवितासंजातपल्लवायाअंकवीणापल्लवेत्युपलक्षणपुष्पाणांतस्याः सौरभ्येइतिव्याख्येयं ॥ ८ ॥ ॥

शालीनतामिति यस्यांनगर्यांमुग्धाःअप्रौढाःस्त्रियःसर्वीनांसमाजेप्रणयप्रकोपात्प्रेमकलहजन्यकोपात्हेतोःशालीनतांसाधुतां अविगणय्य अगणयि-
त्वान्यक्तेत्यर्थःपश्चात्कृतस्य आत्मनःपराङ्मुखावस्थानेन पृष्ठतःकृतस्यकामितुःकामुकस्यछायांप्रतिबिंबंकामितुःपृष्ठतःकरणेन अग्रतोजातायांमुकु-
रायितायांमुकुरवदाचरंत्यांरत्नभित्तौसमीक्ष्यसम्यग्दृष्ट्वाक्षणानुतपनंकामुकविरहासहिष्णुतयाक्षणमात्रंजातायःव्यर्थंमयाप्रियःपश्चात्कृतइ-
तिपश्चात्तापःतंशमयंतिशांतिंनयंतिएतेननगर्याःरत्नभित्तिवैशिष्ट्यंतेनवसंपदतिशयोद्योत्यते ९. चित्रमिति यस्यांनगर्यांचित्रं आश्चर्यंदिदर्शा-

शालीनतामविगणय्यसर्वीसमाजेपश्चात्कृतस्यकमितुःप्रणयप्रकोपात् मुग्धाःसमीक्ष्यमुकुरायितरत्नभित्तौ-
छायांक्षणानुतपनंशमयंतियस्यां॥ ९॥ चित्रंदिदर्शयिषुणाजनितस्ययस्यांमध्यंविनैवविधिनामहिलाजनस्य॥
अंगंनितंबजघनादियतोयतोधस्तुंगंकुचाद्युपरियातिततोनुकूलं॥ १०॥ ॥ ॥

यिषुणालोकान्प्रतिदर्शयितुमिच्छुनाविधिनाब्रह्मणामध्यंमध्यमावयवंविनैवजनितस्योत्पादितस्ययतःगच्छतःइणःशतरिरूपंमहिलाजनस्यवधू-
जनस्यांगनितंबजघनादिकटिपश्चाद्भागपुरोभागादिअंगंअवयवःजातिमभिप्रेत्यैकवचनं अधोभूभागेयतःयस्यांदिशियातिगच्छतिततःतस्यांदि-
शिउपरिनितंबजघनादेरूर्ध्वभागेतुंगंउच्चंपृथुलमित्यर्थःकुचाद्यंगं अनुकूलंयथातथायाति महिलाजनस्यमध्यभागमदृष्ट्वाकटेरधोभागोर्ध्वभागोसां ४
तरालेसहैवगच्छंतौदृष्ट्वालोकआश्चर्यमन्यतइतिभावःअनयोत्प्रेक्षयावधूजनमध्यभागस्यतनुत्वंप्रतिपाद्यते॥ १०॥ ॥ ७॥ ॥ ७॥

पंकेरुहाणीति पंकेरुहाणिकमलानि आत्मभासास्वकांत्या अंतःनगर्यामध्यभागेस्थितिं विदधतां कुर्वतां अबलाजनानां अखिलानि आस्यानि मुखानि जेतुंकिलजेतुमिवयस्यानगर्याःपरिखां अवतीर्यपरिखोदकेप्रविश्यप्राकारभित्तिं अभितःसर्वतःपरिवेष्टयंति अत्रकमलकृत प्राकारवेष्टनस्य अंतर्गतवधूमुखजयःफलंनभवतीत्यफलस्य फलत्वेनोत्प्रेक्षणात् फलोत्प्रेक्षालंकारः यद्यपिपर्यभिभ्यांचेतिनमिलूविधायकेसूत्रेसर्वोभयार्थाभ्यामेवेति नियमात् अभितइत्यस्योभयतइत्यर्थतायुक्तानयापि अभितःशीघ्रसाकल्यसंमुखोभयतोंतिके इतिमेदिनीकोशानुसारेण साकल्यार्थेप्रयोगः ॥ ११ ॥

पंकेरुहाणिपरिखामवतीर्ययस्यांप्राकारभित्तिमभितःपरिवेष्टयंति अंतःस्थितिंविदधतामबलाजनानामास्यानिजेतुमखिलानिकिलात्मभासा ॥ ११ ॥ गद्यं ॥ याखलुपुराकुरुधराधिपापराधसमेधितक्रोधेन हलधरेणनिजायुधेनहठात्कर्षणशिक्षयातत्क्षणंसमुत्क्षिप्तदक्षिणक्षितिभागातदीयभुवनभूषणायमानांभोगावतीमात्मनाविजेतुंभागीरथीपाथःपथेनावतीर्यकृतप्रस्थानेवाद्यापिदृश्यते ॥ १ ॥ गद्यं ॥ येति याहस्तिनापुरीपुराखलुपूर्वकालेखल्विति इतिहाससूचकं कुरूणां-धराधिपाराजादुर्योधनः तस्यदुर्भाषणरूपापराधेनसमेधितःसम्यक्वृद्धिंप्राप्तःक्रोधोयस्यतेन हलधरेणबलरामेण निजायुधेनस्वीयलांगलायुधेनकृत्वायाहठात्कर्षणरूपाशिक्षातयातत्क्षणंअपराधक्षणेइत्यर्थः अत्यंतसंयोगेद्वितीयासमुत्क्षिप्तऊर्ध्वभागंनीतःदक्षिणःक्षितिभागःभूमिभागोयस्यास्तयाभूतासतीतदीयभुवनस्यबलरामीयलोकस्यबलरामस्यशेषावतारत्वात् पाताललोकस्येत्यर्थः भूषायमाणांभूषावदाचरंतीं भोगावतीं

एतन्नाम्नीनागानांराजधानीं आत्मनास्वयंविजेतुं पराजेतुं अवतीर्य भागीरथीपात्रे अवतरणंकृत्वाभागीरथ्याः पाथः पथेनजलमार्गेणकृतप्रस्थानेवक्र
नगमनप्रारंभेव अद्यापिदृश्यतेलोकेरितिशेषः अत्रनगर्याप्रस्थानकरणरूपधर्मोत्प्रेक्षणाद्धर्मोत्प्रेक्षालंकारः पुरादुर्योधनोनिजकन्यास्वयंवरे बलात्क
न्याहर्तारं श्रीकृष्णपुत्रंसांबं द्रोणकर्णादिभिः षड्भिः रथिभिर्जित्वाकारागृहेबंदीकृतवान्तच्छ्रुत्वाक्रुद्धान् यादवान् निवार्यसाम्नातंमोचयितुंगतंबहिः रु
द्यानस्थंसामवदंतं बलरामंप्रति पूजार्थमागतोदुर्योधनो दुर्भाषणानिकृत्वागतवान् ततः क्रुद्धेनरामेणपुरींभागीरथ्यांन्युब्जांविक्षेप्तुंदक्षिणभागेलांग
लाग्रेणविदार्योन्नीयाकृष्टा तदानींशरणागतभीष्मदुर्योधनादिभिः कन्यामुपायनीकृत्यसांबमुन्मुच्यतत्सांत्वंकृतमिति श्रीभागवतस्यकथात्रानुसंधे

॥ पद्यं ॥ उपेत्यतांपांडुरुदारविक्रमः प्रजामनः पल्लवयन्प्रशासनात् ॥ यशः
प्रकाशैर्यमुनासखीसखैर्निनायलोकंनिजनामवाच्यतां ॥१२॥ ॥

या ॥१॥ पद्यं ॥ उपेत्येति उदारविक्रमः महापराक्रमः पांडुः एतन्नामाराजातांउक्तरूपांहस्तिनापुरींउपेत्यप्राप्यप्रशासनात्दुष्टनिग्रहशिष्टानुग्रहरूपात्प्रकृष्टेनोः
प्रजानांमनः पल्लवयन्प्रफुल्लंकुर्वन् आल्हादयन्नितियावत् यमुनासख्याः भागीरथ्याः सखायः शुभ्रगुणसादृश्यात् मित्राणितैः यशःप्रकाशैः लोकंभू
लोकंनिजनाम्नः पांडुइतिस्वीयनाम्नः योवाच्यः शुभ्रइत्यर्थस्तत्तांशुभ्रत्वंनिनायनयतिस्म अत्रलोकंशुभ्रंचकारेत्यर्थस्यनिजनामवाच्यतांनिनायेतिरी ५
त्यंतरेणकथनात्पर्यायोक्तमलंकारः तदुक्तं पर्यायोक्तंतुगम्यस्यवचोभंग्यंतराश्रयमिति ॥१२॥ ॥६७॥ ॥६८॥

॥ गद्यं ॥ यमिति मनागितरत् बहु आश्चर्यं यस्यास्तथाभूताया तपश्चर्यातस्याः अलंकर्मीणः कर्मकर्तुंसमर्थ इत्यर्थः कर्मणे अलमित्यर्थकालंकर्मशब्दात् – अषडक्षेत्यनेनस्वार्थेखप्रत्ययः पराशरसुतोव्यासः निजजनन्याः व्यासस्यकानीनत्वात् शंतनुपत्न्याः सत्यवत्याः निदेशो आज्ञायांवशंमनोयस्यतथाभूतः सन् निखिलपृथ्वीरक्षणायसत्यवतीपुत्रस्यविचित्रवीर्यस्यपत्न्यांअंबालिकायांयंपांडुं संपादयामास अजीजनत् संतत्यभावेदेवरात्सुतोत्पत्तिः कर्तव्येतिशास्त्राधारेणमहातपस्विव्यासपुत्रोयंपांडुरितिभावः ॥ २ ॥ पद्यं ॥ चित्रमिति सः स्वयं पांडुरपि अर्थांतरे शुभ्रोपि स्वकेनगुणेन शुभ्रतयासम

॥ गद्यं ॥ यंपराशरसुतो निखिलावनिदेशावनायनिजजननीनिदेशवशमनामनागितराश्चर्यतपश्चर्यालंकर्मीणः समानीदर्यस्यविचित्रवीर्यस्यकुटुंबिन्यामंबालिकायांसंपादयामास ॥ २ ॥ पद्यं ॥ चित्रंचरित्रंजगतीतलेस्यनश्लाघयामासनरेषुकोवा सयत्स्वयंपांडुरपिस्वकेनगुणेनरक्तानकरोत्समस्तान् ॥ १२ ॥ ॥ ॥

स्तान् जनान् रक्तान् लोहितान् अकरोत् इतियत् तत् चित्रं आश्चर्यकारकं अस्यचरित्रं जगतीतले नरेषु कोवापुरुषः नश्लाघयामास अपितु सर्वोपि श्लाघयामासेत्यर्थः अत्रविरोधाभासालंकारः आभासत्वेविरोधस्य विरोधाभास इष्यते इतिलक्षणात् गुणेन दयादाक्षिण्योदार्यादिना रक्तान् स्वस्मिन्ननुरक्तान् इतिविरोधपरिहारः ॥ १२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अंतर्गत धात्राब्रम्हणा अन्तर्भवत् कृष्णामृगस्य अजिनंवधः चर्मचनदृप : अंक : कलंक : येषुते : अजिनंवधचर्मणोर्गतिरत्नकोशः स्फतरांनिर्मलेः अ
मुष्यराज्ञः षोडशदानानांतुलापुरुषरत्न धेन्वादिषोडशमहादानानांकीर्तेः खंडेः इंदुः अकारिकृतः अयंइंदुः अब्धेः सकाशात् अजनिजातइतिवार्ता
मृषामिथ्या षोडशमहादानेषु कृष्णामृगाजिनदानं वर्तते तत्र अजिनशब्दस्यवधवाचकत्वेनमृगवधेनचर्मणोलाभेनन्वनदानस्यपापजन्यत्वात् पापस्य-
कृष्णात्वानृतदानकीर्तिखंडस्य कृष्णमृगचर्माकारकलंकत्वेनपरिणामात् इतर खंडानांशुभ्रत्वाच्चसकलंकश्चंद्रोजातइतिभावः अत्र अंतर्भवत्कृष्णामृगा

अंतर्भवत्कृष्णामृगाजिनांकैः स्फनिर्मलैःषोडशदानकीर्तेः खंडैरमुष्येंदुरकारिधात्रामृषाय
मब्धेरजनीतिवार्ता १४ जग्राहनिग्राहपरःपरश्रियांकरंकराग्रेणकरेणुचंक्रमः कुंतीं
शकुंतेशरथोयथारमांसमुद्रकांचींचसमद्रकन्यकां १५ ॥ ॥ ॥

जिनांकैरित्यनेन हेतुकथनपूर्वकं मृषापदेनाब्धिजातत्वंनिन्हुत्यकीर्तिखंडजातत्वारोपणात् हेत्वपन्हुतिरलंकारः ॥ १४ ॥जग्राहेतिपरश्रियांशत्रुसं
पदांनिग्राहपरःनिग्रहकारीकरेणोःगजस्यचंक्रमइवचंक्रमोगगनंयस्यतथाभूतःसःपांडुःकराग्रेणकुंतीकुंतिदेशराजस्यपोषककन्यांवसुदेवभगिनीपृथां
मद्रकन्यांमद्रराजकन्यांमाद्रींच करेजग्राह परिणीतवानित्यर्थः कः केइव शकुंतेशः पक्षींद्रो गरुडः रथोवाहनंयस्यसःविष्णुःरमांलक्ष्मींसमुद्रः कां
चिः रचनायस्यास्तां पृथ्वींचयथापरिणीतवान् तद्वत् अत्रानुप्रासोनामशब्दालंकारः ॥१५॥ ॥६॥ ॥६॥ ॥६॥

गद्यं॥अथेति अथानंतरं कदाचन मृगयया उपलालितं वशीकृतं हृदयं मनो यस्य सोयं नरेश्वरो राजा पांडुः सिद्धगणानां गणनीया माननीया यो महिमा प्र
भावः सोस्यास्तीति तस्य हिमवतः हिमाचलस्य महतीं अटवीं तटानां विधिकां परंपरां अवजगाहे प्रविवेश कीदृशो राजा शशीव श्वेतं तेजो यस्य तस्मिन्
निजगति कौशलेन विश्वस्मिन्नतिशेते अतिशयेन वर्तते तस्मिन् प्रभंजनत्या विजितः मातरिश्वा वायुर्येन तस्मिन् अश्वे कृताधिरोहः तयापार्श्वयोः धृताः

गद्यं॥ अथ कदाचन मृगयोपलालितहृदयो नरेश्वरो यमश्वे शशिश्वेततेजसि विश्वातिशायिनि विजित
मातरिश्वनि कृताधिरोहः पार्श्वधृतैर्विश्वकद्रुभिरनेकवागुरोपकरणानुरोधैर्याधैरनुद्रुतो मृदुमद्रविनयाभ्यां
यदुमद्रतनयाभ्यामनुविद्धः सिद्धगणगणनीयमहिम्नो हिमवतोवजगाहे महतीमटवीं तटवीथिकां ३

विश्वकद्रवो मृगयाकुशलाः श्वानो येस्ते श्वाविश्वकद्रुर्मृगयाकुशल इत्यमरः अनेकानि वागुरोपकरणानि मृगबंधनसाधनानि अनुरुंधंति मृगयानुकूलत
या मृह्णंतीति तैः याधैः अनुद्रुतः अनुगतः तया मृदुमद्रः सुमः विनयाय याभ्यां ताभ्यां यदुमद्रयोः यादवमद्रराजयोः तनयाभ्यां कुंतीमाद्रीभ्यां अनुविद्धः युक्तः अत्रत्य सर्वे गद्येषु प्रायो वृत्त्यनुप्रास छेकानुप्रासादयः शब्दालंकाराः संत्येव क्वचित्क्वचित् उत्प्रेक्षाद्यर्थालंकारा अपि वर्तंते ॥ ३॥ ॥९२॥

॥गद्यं॥तत्रेति तत्रवनतटपरंपरासु सः पांडुः तावादिति वाक्यालंकारे क्रमेणविविधाः ये मृगाः अरण्यपशवः पशवोपिमृगाइत्यमरः तेषांचक्रस्यस
मूहस्य वधं विधातुं कर्तुं उपचक्रमे आरेभे कीदृशः सः यशस्तावनमल्लिका: वनसंबंधिमल्लिकाकुसुमानि वनमल्लिकामतल्लिका प्रशंसावचनेम्बे
तिमतल्लिकाशब्देन समासः अतिस्फल्लुकाभिः अतिसूक्ष्माभिः वनमल्लिकामतल्लिकाभिरुद्वेल्लितः गुंफितः धम्मिल्लः संयतकचाः यस्य सः तथाबल

॥गद्यं॥तत्रसतावदतिस्फल्लुकवनमल्लिकामतल्लिकोद्वेल्लितधम्मिल्लो वलग्नदृढलग्नकच्छपुटविस्फुरितछुरिकोनिषं
गानुषंगमांसलिततमांसललितः परनिरासपरंशरासवरंकरेकुर्वाणोगीर्वाणगणचक्रवर्तिविक्रमः क्रमेणविविधमृगचक्रवधंविधातु
मुपचक्रमे॥४॥

ग्नेमध्यभागेदृढंयथातथालग्नः संबद्धोयःकच्छ
पुटः शंबरमृगचर्ममयकटिहृदयवेष्टकं पडदाळइतिप्रसिद्धंतत्रविस्फुरिता अंतःस्थापिताछुरिकालघुखड्गोयेनसः तथामांसलोमांसविशिष्टौ कृतौमां
सलितौ अतिशयेनतौमांसलिततमौ निषंगयोः तूणीरयोः अनुषंगेनसंबंधेनमांसलिततमौयौअंसौस्कंधौताभ्यांललितः सुंदरः तथापरेषांशत्रूणांनिरासनपरंश ७
रासनवरंकरेकुर्वाणः धर्तागीर्वाणगणानांचक्रवर्तीराजाइंद्रः तत्तुल्यपराक्रमः अत्रमृगयाकर्तुःस्वभावकथनात्स्वभावोक्तिरलंकारः॥४॥ ॥७॥ ॥

पद्यं॥ भूभुजइति अस्यभूभुजःराज्ञःसविधेसमीपेविचरंत्योः कुंतीमाद्र्योःनेत्रशोभांजेतुकाममिवजेतुमिच्छुरिव मृगयूथंमृगवृंदंसर्वेषांसमष्ट्या ए
कीभावेनपुरतःप्रादुरासप्रादुर्बभूव यथावृक्षाणांव्यष्ट्याग्रहणेवृक्षाः इतिबहुत्वंसमष्ट्याग्रहणेवनमित्येकत्वं भासतेतथामृगाणांसमष्ट्यायूथमितिभा-
वः एवंचसर्वेमृगाएकीभूय ऐकमत्यं कृत्वानेत्रशोभाजयेच्छया आगताःकिमितिहेतूत्प्रेक्षा॥१६॥ क्षोणीपतावितिति अस्मिन्क्षोणीपतौराज्ञि मदेनकलंआ
विष्टंस्कंदं वाकृष्णासारंप्रतिउद्दिश्यशरग्रहणार्थंतूणीमुखेपतिताःपाणिनखांकुराःयस्यतस्मिन्सति हरिणीकुलानिचंचलैःअक्ष्णांवलनैःदर्शनपरंपरा

भूभुजोस्यसविधेविचरंत्योर्भोजमद्रतनयोर्दृशिशोभां जेतुकाममिवसर्वसमष्ट्याप्रादुरासपुरतोमृगयूथं १६ क्षोणीपतौमदकलंप्रतिकृ
ष्णासारंतूणीमुखेपतितपाणिनखांकुरेस्मिन् एणीकुलानितरलैर्यमुनाजलानांवेणीमिवाक्षिवलनैर्विपिनेवितेनुः१७ कुरंगयूनांकुरु
तेस्मभीतिं गुरोःकुलस्यामृतदीधितेर्नः सजातिरेषांननुतेकलंकमितीवरोषादिषुभिःसपांडुः॥ १८॥ ॥ ॥

भिःयमुनाजलानांवेणीमिवप्रवाहमिवविवितेनुःरचयामासुः अत्रकविसंप्रदायेदर्शनवलनानां कृष्णत्वेन तत्रयमुनाप्रवाहोत्प्रेक्षणात्स्वरूपोत्प्रेक्षालंका
रः॥१७॥ कुरंगेति सःपांडुःएषांहरिणानांसजातिःसमानजातिःहरिणःनःअस्माकं कुरूणांकुलस्य गुरोःउत्पादकस्य अमृतदीधितेः चंद्रस्यकलंकं
ननुतेकुरुते इतिरोषादिवइषुभिःकुरंगाश्चतेयुवानःकुरंगयुवानःविशेषणविशेष्यभावेकामचारात्कुरंगशब्दस्यविशेषणत्वं कुरंगेषु युवानइतिवातेषां
भीतिंकुरुतेस्मचकारेत्यर्थः अत्रकुरंगभीतिकरणंप्रतिउक्तरोषस्याहेतुत्वेपि हेतुत्वकथनात् हेतूत्प्रेक्षालंकारः॥ १८ ॥ ॥५॥ ॥

प्रजवमिति पतिताः शल्ली शलालिकाः शल्यसंज्ञकपशोः स्थूलरोमरूपशल्लीसंज्ञकशलाकाः श्वाविन्तु शल्यस्तल्लोम्नि शललीशललंशल-
मित्यमरः ततस्ततः तत्तत्स्थले हयंगमयते नृपाय गहने दुर्गमे वनेपि वराहकुलानां वर्तनीभुवां मार्गभूमीनां ग्रहणे स्वाकारविषयेपि पिशुनत्वं सूच
कत्वं आचरन् नगरे खलाः पिशुनत्वमाचरंतु अत्राचेतना अपि निर्जने वनेपि पिशुनत्वमाचरन्नित्याश्चर्यद्योतनार्थ अपिशब्दः वराहेभ्य आत्मनो र
क्षणार्थं शल्यपशुभिः स्वशरीरमुक्ताः शरतुल्य शलल्लीशलाकाः वराहगमनमार्गपतिताः ताभिरनेन मार्गेण वराहा गता इति राज्ञा ज्ञानमिति भावः

प्रजवं हयंगमयते ततस्ततः पतिता नृपाय शलल्लीशलालिकाः गहने वनेपि पिशुनत्वमाचरन्
ग्रहणे वराहकुलवर्तनीभुवां १९ वेशंतपंकविहृतेर्विनिवृत्य सद्यः प्रत्युद्यतां ध्वनिषु मत्सरि
णां हयस्य भूदार एष वनपोत्रवतामतानीत् भूदारशब्दमसहिष्णुरिवांतमेषां २० ॥

॥१९॥ वेशंत इति भूः दाराः जाया यस्य स भूपतिः एष पांडुः हयस्य ध्वनिषु मत्सरिणां अत एव वेशंतानां अल्पसरसां पंकेषु विहृतेः क्रीडायाः
निवृत्य सद्यः ध्वनिश्रवणसमय एव प्रत्युद्यतां सन्मुखमापततां वनपोत्रवतां वनसूकराणां भूदार इति शब्दवाचकं नाम मन्नाम एतेषु वर्तते इति
मत्सरेण असहिष्णुः सन्निव एषां सूकराणां अंतं वधं व्यतानीत् अकरोत् क्रोडो भूदार इत्यपीत्यमरः अत्र सूकरवधे असहिष्णुत्व हेतुकल्पना-
त् हेतूत्प्रेक्षा सा च वराहवाचकभूदारशब्दस्यान्यार्थकल्पनात् निरुक्त्यलंकारोत्थापितेति तयोरंगांगिभावेन संकरः ॥ २० ॥ ॥६७॥ ८

असौपांडुः स्वयं अन्यस्मिन्देशे तुरंगं तूर्णंप्रधाव्यशीघ्रंगमयित्वामहिषयूनां कुलं परिववार रुरोध कीदृशां लुलाययूनां अग्रेसुखपुरोभागेविषाणेदंतौ करधूननंशुंडाचालनंचतेषुदुर्विधत्वं दारिद्र्यं अभावइतियावत् तस्मात्धेतोः संत्यापितः सत्यत्वेनप्रतिपादितः द्विरदभावविपर्ययः गजत्वाभावोयेस्तेषां यान् दृष्ट्वा उच्चत्व स्थूलत्व नीलत्वधर्मैः इमेगजाइतिबुद्धिर्जातानतोदंतसुंडादंडाभावदर्शनेनमेगजाअपितुवनमहिषाइति

तूर्णंप्रधाव्यतुरगंस्वयमन्यतोसौपांडुःकुलंपरिववारलुलाययूनां अग्रेविषाणकर
धूननदुर्विधत्वात्सत्यापितद्विरदभावविपर्ययाणां २१ आकर्ण्यक्षितिपहयारवानसह्या
नामूलंकुपितधियस्तिरोविषाणं व्याधूयांतिकतरुषुक्षणान्निचख्नु र्व्याक्रष्टुंपुनरथतच्चिरंनशेकुः
२२

बुद्धिरुत्पन्नेतिभावः अनेनवनमहिषाणां अतिस्थूलत्वंव्यज्यते २१ आकर्ण्येति महिषाश्चेवरान् असह्यान् गजाश्वशब्दान् आकर्ण्यकुपितधियोमहिषाः विषाणंशृंगंतिरः तिर्यक्व्याधूयकंपयित्वासमीपवृक्षेषुक्षणात् अतित्वरयेत्यर्थः आमूलंमूलपर्यंतंनिचख्नुः आरोपयामासुः अथानंतरंनतत्शृंगंतरुभ्यः आक्रष्टुंचिरंनशेकुः शक्तानबभूवुः महिषाणांवलातिरेकाद्बुद्धिमांद्याद्दवैराच्चायंस्वभावः तत्कथनात्स्वभावोक्तिरलंकारः ॥ २२ ॥

कुरुतेति ततः स्वस्य कुलस्य कूटस्थं आदिप्रवर्तकं यत्कृतांतस्य यमस्य वाहनं महिषः तेन वासं स्थितिं कुरुत इतीव मदेन धूतं कंपितं विषाणमंड
लाग्रं येन तस्मिन्महिषौघे मंडलाग्रं करवालं निचखान रोपयामास मृतप्राणिनो यमलोकं गच्छंतीति पुराणादिवचनैरियमुत्प्रेक्षा यथाक्रूरराजा कुल
वृद्धं मुंचतो बालान्संताड्योपदिशति वृद्धस्य समीपं वासं कुरुतेति तद्वत् ॥ २३॥ तदिति ततो महिषवधानंतरं अवनीपते राज्ञः चंद्रहासस्य खड्गस्य प
तनं वनमध्ये अरण्यमध्ये चर्यया संचारेण पोषितेषु पुष्टिं नीतेषु पुंडरीकानां व्याघ्राणां निवहेषु मीलनं मरणं चकारेति यत् तन्न चित्रं न यतो महाशूर

कुरुतेति ततः सहैव वासं कुलकूटस्य कृतांतवाहनेन मदधूतविषाणमंडलाग्रे महिषौघे निचखान मंडलाग्रं ॥ २३॥ त
न्न चित्रमवनीपतेस्ततश्चंद्रहासपतनं चकार यत् पोषितेषु वनमध्यचर्यया पुंडरीकनिवहेषु मीलनं ॥ २४॥ गहनमस्त
शरारुमृगव्रजं कृतवताप्यमुनाजविवाजिना मम्रृगिरे हरयो मदशालिनो मनुजपेन गिरीशदरीशयाः ॥ २५॥ ॥

स्य खड्गपतनेन व्याघ्रमरणं भवेदेव तर्हि किं चित्रं कविसांप्रदाये राज्ञश्चंद्र इव यो हासः तस्य पतनं उदकमध्यचर्यया पोषितेषु पुंडरीकाणां सितकमला
नां निवहेषु मीलनं संकोचं चकारेति यत् तच्चित्रं हासस्य चंद्रकार्यकारित्वेनाश्चर्यं दृष्टमिति भावः अथवा इदमपि चित्रं नेत्यर्थः अत्रोभयार्थयोर्वर्ण्यत्वा
त्त्वात् प्रकृतश्लेषालंकारः २४ गहनमिति गहनं घनं अस्तो हतः शरारूणां व्याघ्रवृकादिघातुकानां मृगाणां पशूनां व्रजो यस्मिन् तत्कृतवता जवेन तुरगेण
अमुना मनुजपेन राज्ञा गर्वशालिनो गिरीशस्य दरीषु गुहासु शेरते तथाभूताः हरयः सिंहाः मम्रृगिरे अन्विष्टाः सर्वे घातुका हताः परंतु सिंहा अवशिष्टा इति मन
सि निधाय तेषामन्वेषणं चक्रे इति भावः २५

विस्फारेति सराजाविस्फारघोषं धनुषःशब्दं श्रुत्वागुहाभ्योविनिर्गतानांरोषेणहुंकुर्वतांतरुणसिंहानांआननेषुयापंचताकेवलमासीत् तांपंचतांबाणैः कृत्वासकलेपिदेहेविदधेचकार पंचंविस्तृतंआस्यंयस्यसपंचास्यःसिंहइतिविग्रहेआस्येपंचतानामविस्तारःसकलेपिदेहेतांपंचतांनामपंचत्वंमरण- मित्यर्थः अत्र एकनालावलंबि फलद्वयवत् एकपंचताशब्दवाच्यार्थद्वयस्याभेदाध्यवसायमाश्रित्येयमुक्तिः पर्यायालंकारभेदविकासावगाहिनी- एकावयवस्थितवस्तुनासर्वावयवव्यापनात् ॥ २६॥ गद्यं ॥ एवमिति मातरिश्वानोवायवःएवं अश्रांतयानिरंतरयामृगययापरिश्रांतं अपरिमितैः-

विस्फारघोषमवकर्ण्यविनिर्गतानांहुंकुर्वतांतरुणकेसरिणांगुहाभ्यः यातेकलंप्रथममाननएवम
हेलांपंचतांसविदधेसकलेपिदेहे २६ ग० एवमश्रांतमृगयापरिश्रांतमपरिमितस्वेदशीकरनिकरकोरकित
फालमूलमातेनिरेतमाश्यानंतुहिनगिरिदेश्यानंदनीयमंदिमानामानससरोरविंदमकरंदबिंदुसंदोहसौरभीपार
दृश्वानोमातरिश्वानः ५

स्वेदबिंदुसमूहैः कोरकितं संजातकोरकं फालमूलं भालोर्ध्वभागोयस्य तंराजानं आश्यानं शीतलत्वेनगतश्रमं आतेनिरेचक्रुः कीदृशावायवः तुहिनगिरिभवाः श्लाघनीयमंदिमानःमानससरोवरसंबंध्यरविंदानांमकरंदबिंदुसमूहस्यसौरभ्याःसौगंध्यस्यपारदृश्वानःपारंदृष्टवंतःएतेनविशेषणत्रयेणक्रमेणशीतत्वमंदत्वसुगंधित्ववैशिष्ट्यमुच्यते ॥ ५॥ ॥ ७॥

अनंतरमिति अनंतरं किंचिच्छ्रमापगमानंतरं परान् शत्रून् तापयति परंतपः असौ पांडुः कस्यचिच्चमूरोः मृगविशेषस्य सरणिं गमनमार्गं अनुसरमाणः सन् दूरं अतिपपात जगाम कीदृशस्य चमूरोः समंततः शकुनानां पक्षिणां रवैः निरंतरं भारतं दिशामंतरं यस्य तस्मात् अखिलमृगकुलानां शरण्यात् रक्षणे साधुनः अरण्यात् उत्प्लवमानस्य उड्डीयमानस्य तथा अनुप्लवनेन पश्चात्धावनेन मंदिताः मंदाः कृताः जविनश्च भूनां उरवो येन तस्य कीदृ

सू० अनंतरमसौ परंतपः समंततः शकुंतरवैर्निरंतरा दिगंतरादखिलमृगकुलशरण्यादरण्यादुत्प्लवमानस्य कस्यचिदनुप्लवनमंदितजविनश्चमूरोश्चमूरोः सरणिमनुसरमाणस्तदीयतनूरुहचित्रबिंदुरुचिनिकरैरिव गगनमुत्पतद्भिः खुररजोभिरनुमीयमानतुरगगतिर्दूरमतिपपात॥ ६॥ गद्यं॥ तत्र तावत्कंचनलतागुल्मपरिसरे स नरनाथः परिकथित तरुणिमप्रथिमकलेवरमशिथिलरतिरभसवसनाथं हरिणमिथुनं नयनपथस्यातिथीचकार ७

शं राजा तदीयानां च भूरुसंबंधिनां तनूरुहचित्रबिंदूनां रुचिनिकरैः कांतिसमूहैरिव इत्युत्प्रेक्षा गगनमुत्पतद्भिः खुररजोभिः अनुमीयमानातुरगगतिर्यस्य सः॥ ६॥ तत्रेति तत्र दूरदेशस्थले स नरनाथः क्वचनकुंजं चितृवनलतागुल्मस्य परिसरमध्यभागे हरिणमिथुनं नयनमार्गस्य अतिथीचकार ददर्शेत्यर्थः कीदृशं मृगमिथुनं परिकथितः प्रकटीकृतः तरुणिमप्रथिमा तारुण्यातिशयो येन तादृशं कलेवरं यस्य तत् अशिथिलेन निबिडेन रतिरभसेन सनाथं युक्तं॥७॥ ॥

पद्य॥ तिग्मेनेति नराणामधिपः तिग्मेन तीक्ष्णेन बाणेन तस्मिन्मृगयुग्मे पुमांसं जघान जातः आयुषः अंतो यस्य सोसौ वातायुर्मृगः सहसा तस्मिन्नेव
क्षणे महर्षेः आकारं आललंबे दध्रे अत्र प्रतिचरणमक्षरद्वयावर्तनात्सभंगयमकालंकारः॥ २७॥ गद्यं॥ ततइति ततो बाणघातानंतरं कृपायां मंदं मनो
यस्य सः निष्कृपः स्यंदमानं गलत् रुधिरं यस्मात्तेन महता अरुषा व्रणेन संदानिना बद्धा युक्तेत्यर्थः तनुर्यस्य सः किंदमनामधेयो महर्षिः कल्परविकल्पांत

पद्यं॥ तिग्मेन बाणेन जघान तस्मिन्युग्मे नराणामधिपः पुमांसं वातायुराकारमसौ महर्षेर्जातायुरंतः
सहसाललंबे॥ २७॥ गद्यं॥ ततः कृपामंदमनाः किंदमनामधेयः संदानिततनुः स्यंदमानरुधिरेण म
हारुषा कल्परविकल्पमहारुषा तस्मिन्महीभृति संभोगसंभेदकं संभोगभेदकं मत्तगजदृशां दंभोलिमिव सहस्राक्षः शापमुदस्रा
क्षीत् ८॥ तदनु तापसशापेन विरचित मनस्तापेन तेन धरणीपतिना चतुरंगबलमिव सप्तांगराज्यमपि व्यसृजत ९

त्यांतर विसदृशी या महारुट् महाक्रोधः तया तस्मिन् महीभृति राज्ञि कमलनयनानां स्त्रीणां संभोगस्य संभेदकं शापं महीभृतिपदे सहस्राक्षः दंभोलिं
वज्रमिव उदस्राक्षीत् उत्ससर्ज॥ ८॥ गद्यं॥ तदन्विति तदनंतरं तापसशापेन विरचितः मनस्तापो यस्य तेन धरणीपतिना चतुरंगं हस्त्यश्वरथपदात्यव
यवं सैन्यमिव स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलरूपसप्तावयवं राज्यमपि व्यसृजत त्यक्तं वैराग्यावलंबेनो भयं त्यक्त्वा वनवासं चकारेति भावः॥ ९॥ ॥

पद्यं॥सप्तांगराज्यपालनसमये घृतशर्करायुक्तमिष्टान्नादीनि भोग्यवस्तूनि यथासन्नथाधुनापि अष्टांगयोगपालनसमयेमिष्टान्नादीन्याह अ
ष्टेति अष्टांगयोगान् पालयतोस्यराज्ञः मृदुकंदमूलमितिसमाहारः मिष्टान्नंस्वाद्वन्नमासीत् वनस्यगर्भोमध्यः क्रीडासौधोजातः दर्भोपिसिंहासन
त्वंजगाहप्रापेत्यर्थः॥२८॥ गद्यं॥अहोइति अहोआश्चर्यंनरपतितापसयोः इदमाचरितं आचरणंसमानरूपंतुल्याकारंफलंयस्यतथाविधंनदेवो

पद्यं॥अष्टांगयोगानवतोस्यराज्ञोमिष्टान्नमासीन्मृदुकंदमूलं गर्भोवनस्याजनिकेलिसौधोदर्भोपिसिंहासनतां
जगाह२८ग॰अहोनरपतितापसयोःसमानरूपफलमिदमाचरितं॥१०॥प॰बाणशापप्रयोगाभ्यांबाधितौताबुभाव
पि तपस्वितांयतःसद्यस्तादृशीमुपजग्मतुः९ग॰क्रमादतिपतितेचावरोधवधूजनानुरोधगुणदात्रेगणरात्रे ११

पपादयति तथाहीति॥१०॥प॰यतः बाणप्रयोगशापप्रयोगाभ्यांबाधितौपीडितौउभावपिसद्यः तत्क्षणेमृगदेहत्यागेनाष्टांगयोगधारणेनचतादृशींतपस्वि
तांतापसतांउपजग्मतुःप्रापतुःउभावपि तापसौजातावितिभावः॥२९॥ग॰क्रमादितिदिनपक्षमासादिक्रमात् अवरोधवधूजनस्यअंतःपुरस्त्रीजन ११
स्यअनुरोधगुणःअनुकूलतागुणःतस्यदात्रेलवित्रेगणरात्रेअतिपतितेसतिगणरात्रंनिशाबहुत्वइत्यमरःस्त्रीसंभोगप्रतिबंधिकासुबहुषुरात्रिषुगतास्वित्यर्थः

ऊहदक्षः विचारनिपुणः सः पांडुः जातुचित्कदा। चत्‌उप ह्वरे रहासदेवा पट्टराज्ञी कुंतीउचितपद्यातथा उवाच किंकरिष्यन्नुवाचेत्यपेक्षायामाह अपेति-
अनपत्यभावं अपुत्रत्वं अपाकरिष्यन् दूरीकरिष्यन् तया भुवनं भूलोकं नविद्यते पत्युः पालयितुः राज्ञः अभावो यस्मिन्तथाविधं करिष्यन् स्वदोषपरिहा
रपूर्वकं परहितं करिष्यन्निति भावः ॥ ३० ॥ परिपालयतइति तदेवयचनं सप्तभिः पद्यैराह ननु अस्य पुत्रस्य दुर्गतिः दारिद्र्यात्थनोः महीं पालयतोपि मेममपि पू-
र्तिः पूर्णता नास्ति हि यस्मात्कारणात् प्रजया मनुष्यः पूर्णो भवतीत्यर्थका प्रजया हि मनुष्य इत्याकारिका असौ श्रुतेः वर्णपद्धतिः अक्षरपरंपरा अक्षरश्रेणी वा प्रथ

अपाकरिष्यन्ननपत्यभावमपत्यभावं भुवनं करिष्यन् उवाच देवीमुचितं स पांडुरुपह्वरे जातु विदूहदक्षः ॥ ३० ॥ परिपालयतोपि मम
क्ष्मां परिपूर्तिर्न तनूजदुर्गतेः प्रजया हि मनुष्य इत्यसौ प्रथते हि श्रुतिवर्णपद्धतिः ॥ ३१ ॥ गात्रं न केवलमशेषबुधोपलाल्यं गोत्रं च तत्र
भवतः कुमुदैकबंधोः आपांडु वर्तत इति स्वयमेव मन्ये यस्मात् प्रजां न लभसे यदुवीर कन्ये ॥ ३२ ॥

नेमसिद्धावर्तते अनः अपुत्रत्वान्मयि पू
र्णमनुष्यत्वं नास्तीति भावः अत्र श्रुतिप्रमाणोपन्यासेना पूर्णतायाः समर्थनात् शब्दप्रमाणालंकारात्स्थापित काव्यलिंगमलंकारः ॥ ३१ ॥ गात्रमिति तत्र भवतः
पूज्यस्य कुमुदानां एकबंधोः मुख्यस्य मित्रस्य चंद्रस्य अमृतमयत्वात् अशेषैः बुधैः देवैः उपलाल्यं लोभनीयं गात्रं शरीरं केवलं एकं आपांडु आममंतात्पांडु
शुभ्रं न वर्तते अपितु अशेषैः बुधैः पंडितैः उपलाल्यं गोत्रं च कुलमपि पांडुमर्यादीकृत्य आपांडु वर्तत इत्यहं अद्य स्फुटं व्यक्तं मन्ये तर्कयामि हे यदुवीरकन्ये कुंति य
स्मात्कारणात्त्वं पुत्रसंततिं न लभसे न प्राप्नोषि मत्सकाशात्त्वयि पुत्रसंतत्यभावात् पांडुपर्यंतं सोमवंश इत्यहं तर्कयामीति भावः आपांडुशब्दार्थयोरेकवाचकत्वेनाभेदा

ध्यवसायाद्यर्थश्चकारद्वयमुक्तिसंगीच॥३२॥ नह्यीतिविधिरपिश्रुतिस्मृतिविहितकर्मापि अस्कृतानामपुत्राणां अतीवफलंनहिनह्यतेनददातीत्य
र्थः इत्यर्थस्यनापुत्रस्यलोकोस्तीतिश्रुत्यासिध्येः परलोकःस्वर्गलोकः ममजीवनःसतःयथाआहवेनयज्ञेनसाध्यःतथामीलतःप्राणत्यागंकुर्वतःसतःसा-
ध्योनभवति मरणानंतरं अयथाभावादपुत्रत्वाच्च अधनपरलोकः जीवतःसतःयथा आहवेनयुद्धेनसाध्यःतथामीलतःसतःसाध्योनभवति मरणानंतरं
युद्धाभावादितिभावः आहवःसमरेयज्ञेइतिहेमचंद्रः॥३३॥ अहमिति पुत्रिणांभाग्योत्कर्षमाह हेशिशोनव अभीष्टतापदे दृष्टतास्यानेकिमहंकिं

॥ नह्यतीवविधिरप्यस्कृतानांनह्यतेफलमितिश्रुतिसिध्येः जीवतोममयथाऽऽहवसाध्योमीलतोपिनतथा
परलोकः॥३३॥अहंकिमंबाकिमभीष्टतापदंतवेतिमातुर्धुरितातपृच्छया प्रलोभतुल्यंप्रवदंतमर्भकंमु
दाहसन्जिघ्रतिमूर्ध्निपुण्यभाक्॥३४ निंद्यंतेपितृभिस्तैर्निरपत्यधनःपुमान् अध्वनीनैर्गतिश्रांतैरवकेशीवपादपः ३५

वाअंबाइतिमातुर्धुरिअग्रभागेतातस्यपृच्छयाप्रश्नेनप्रलोभतुल्यंप्रकृष्टलोभानुरूपंयथातथाप्रवदंतमर्भकंपुण्यभाक्पुण्यवान् भाग्यवानित्यर्थः म
नुष्यःमुदाहसन्सन्मूर्ध्निजिघ्रति यद्वा अर्भकंयःमुदाहसन्मूर्ध्निजिघ्रतिसभाग्यवानितियत्तच्छब्दाध्याहारेणसंबंधः३४स्वनिंदांप्रकटीकुर्वन्सामान्येनाह॥ १२
निंद्यतइति इतःपरंभाविश्राद्धीयकव्याद्यभावात्तैःसंतप्तैःपितृभिःनिरपत्यधनःअपत्यरूपधनरहितःपुमान्निंद्यते कैःकइव अध्वनीनैःअतिश्रांतैःअध्वगत्या

मार्गगमनेनअध्वगैः अवकेशीवंध्यः पादपइव ॥ ३५ ॥ स्वस्यपुत्रवत्तान्र्हतामाह कदेति नरवाहनसन्निभः कुबेरतुल्योहंकदापिकल्पवृक्षाणामिवतातशब्दस्य अर्थीभवितुंनार्हामि योग्योनभवामि अयंभावः संपदाकुबेरतुल्यत्वात्कल्पवृक्षाणांअर्थीभवितुं याचकोभवितुंयथानार्हामितथाअनपत्यत्वात् तातशब्दस्यअर्थीवाच्योतद्वान् भवितुंनार्हामीति अर्थद्वयेपि अर्थार्थिशब्दाभ्यांच्विप्रत्ययेरूपंतुल्यं ॥ ३६ ॥ इदानींमुनिशापात् अपुत्रत्वशोकापनोदनेममसामर्थ्याभावात् त्वमेवयत्नं कुरुष्वेत्याह किंमिति भोगोविषयसुखानुभवंवैभवं भसुतायशः कीर्तिःक्षितिः पृथिवीजीवितंपरमायुः इत्यादीनिममसंतितैः

कदापितातशब्दस्यकल्पभूमिरुहामिव नार्थीभवितुमर्हामिनरवाहनसन्निभः ३६ किंभोगवैभवयशः
क्षितिजीवितादैरंभोरुहाक्षिनियमैरनघैस्त्वमेव शापातिरेकदवपावकशायिनोमेतापापनोदविधयेतनयंप्रसूष ३७ ॥० इत्यसंकोचतःशोचतःपत्युरग्रभुविसमग्रमंदाक्षरमणीयंमंदाक्षरमणीयंत्रितमिदंवचनंपृथापिकथयामास
१२

किंप्रयोजनंनकिमपीत्यर्थः हेअंभोरुहाक्षित्वमेव अनघैःनिर्दोषैःनियमैःव्रतोपवासदेवताराधनादिभिः शापातिरेकः शापतीव्रतैवदवपावकः तच्छांतेसोतस्यमेतापापनोदविधयेतापनाशकर्मकर्तुंतनयंप्रसूष ॥ ३७ ॥ इतिअसंकोचेनशोचतःपत्युःअग्रभागेपृथापिकुंत्यपिसमग्रमंदाक्षेणासंपूर्णलज्जयारमणीयंमंदानि अल्पस्वरेणोच्चारितानि अक्षराणिमणयइवरत्नानीवतैःयंत्रितंगुंफितं इदंवक्ष्यमाणंवचनंकथयामास ॥ १२ ॥ ॥ ७ ॥ ॥

·मा· गद्यं॥हेराजन्पुरारवलुममपितामुनेःदुर्वाससःउपांतस्यसमीपमागस्यपरिचरणायसेवनायअनुशासितंपालितंशैशवराज्यंबाल्यराज्यंययातामपि टी·रत्न·
।२ बालामपीत्यर्थःमांनियोज्यांभृत्यामकरोत् कीदृशस्यमुनेःवरदानेपितामहेनब्रह्मणासमस्यतयानिशांतंअस्मद्गृहंअधिवसतःगृहेतिष्ठतइत्यर्थःतथात १
पसाकृशांतनुलतांशरीरलतांवहतोपिदिशांतिषुसमूहेषुदशादिक्ष्वित्यर्थःनिशांतेप्रातःकालेरविकांतस्यभृशांतरंगाणांअत्यंतमित्राणांतत्सदृशानामित्य

॥गद्यं॥राजन्पुरारवलुपितामपितामहसमानस्यनिशांतमधिवसतःकृशांतनुलतांतपसावहतोपिदि
शांततिपुनिशांतरविकांतभृशांतरंगरूचांतरंगपरंपरांतरलयितुरशांतमनसोमुनेरुपांतपरिचरणायमा
मनुशासितयौवराज्यामपिनियोज्यामकरोत्॥ १३॥ पद्यं॥ततोनिदेशान्समयेषुलब्धुंमयामहायत्न
जुषामहर्षेः आरामवल्लीरपहायतस्यभ्रूवल्लिमेवप्रतिहायतस्थे॥ ३८॥ ॥ ॥

र्थःरुचांकांतीनांतरंगपरंपरांलहरीपंक्तिंतरलयितुःचंचलांकर्तुःतथाअशांतंमनोयस्यतस्यकिंचिदप्यपराधमसहिष्णोरितिभावः॥१३॥पद्यं॥ततो
महायत्नेनसेवनमाह॥ततइति यत्नकर्त्र्यामयासमयेषुपदार्थापेक्षाकालेषुनिदेशान् आज्ञाःलब्धुंआरामवल्लीःअपहायबाल्यात्क्रीडार्थवल्लीनांजलसे १३
कपुष्पावचयादित्यक्त्वेत्यर्थःतस्यऋषेःभ्रूवल्लीमेवप्रतिपाल्यभ्रूवल्लिचालनसंज्ञयाफलपुष्पाद्यानयनादिसूचयेदितितत्रदृष्टिंन्यस्येत्यर्थःतस्थेस्थितं ३८

यथात सेवनयायलस्तस्माज्जन्म यस्यतेन निदाघतोयेन घर्मोदकेन अलंअंग अंगकं यथायथानिषिक्तं सिक्तं तथात यातापसांतिके ऋषिसमीपे इंगुदीवृक्षनिकटेच इंगुदीतापसतरुरित्यमरः महाविकासाममभक्तिवल्लरी अंवर्धत वृक्षसमीपेस्थिताकाचवल्लीजलेनसिक्तासतीयथावर्द्धतेतद्वत् ॥ ३९ ॥ तपस्विन इति तपःकृशस्य तस्य तपस्विनः मुनेः सरूपतांप्राप्तुमिवश्रयद्भिः आश्रयद्भिः मुनिमितिशेषः दयनीयानिद्याविषयाणि रूपाणि आकृतयो- येषांतैः मेममअशेषैः अंगैः अवयवैः कार्श्यं आपेप्राप्तं तत्सेवनयासेवनेन ममातीवकार्श्यमासीदितिभावः ॥ ४० ॥ आपादनेनेति तापसेंद्रः समिधां अ

यथायथासेवनयत्नजन्मनानिदाघतोयेननिषिक्तमंगकं तथातयावर्द्धततापसांतिकेमहाविकाशाममभक्तिवल्लरी ३९ तपस्वि
नस्तस्यतपःकृशस्यसरूपतामाप्तुमिवश्रयद्भिः दिनेदिनेमदयनीयरूपैरंगैरशेषैरतिकार्श्यमापे ४० आपादनेनसमिधाममिषे
कवारामभ्यर्चनाकुसुमनसामपितापसेंद्रः मय्येवशिष्यजनतामम तांवितन्वन्नंतेवसंतमपिकोपमपाचकार ४१ ॥ एकांसमां
तत्रवसन्कदाचिदेकांसमांपार्श्वगतामवेक्ष्य समाधिवृत्त्यासहमौनमुद्रांसमापयामासतपोधनेंद्रः ४२ ॥ ॥ ॥

भिषेकार्थवारांजलानां अभ्यर्चनार्थंपूजार्थं सुमनसांपुष्पाणामपि आपादनेनसंपादनेनमय्येवशिष्यजनतायांशिष्यसमूहे याममतांवितन्वन्कुर्वन् सन् अंतेवसंतंनिकटेस्थितमपिशिष्यमपीतिध्वनिः कोपं अपाचकार दूरीचकार तत्याजेत्यर्थः ॥ ४१ ॥ एकामिति सः तपोधनेंद्रः तत्रतातगृहे एकांसमांसंवत्सरं वसन्सन्कदाचित्पार्श्वगतांएकांमां अवेक्ष्यसमाधिवृत्त्यासहमौनमुद्रांसमापयामास समाधिवृत्तिंमौनमुद्रांचविसर्जयामासेत्यर्थः समाधिविसर्जनानंतरउवाचेति भावः ४२

गद्यं ॥ धन्येति हेवत्से बाले भवत्याः सेवासंप्रदायेन सेवारीत्या संप्रति भृशं प्रसीदामि इति व्याहृत्य उक्त्वा अनुकंपितं कृपायुक्तं चेतो यस्य स मुनिः मह्यं अत्यर्थं अभीप्सितार्थस्य इष्टार्थस्य समर्पणे दाने परतंत्रं परवशं अत्यर्थमित्यस्य परतंत्रमित्यनेन संबंधः इष्टार्थस्यावश्यदातारमित्यर्थः कमपि मंत्रं उपादिक्षत् उपदिष्टवान् ॥१३॥ पद्यं ॥ अपीति क्रुधां क्रोधानां आवसतेः स्थितिस्थानस्य अमुष्मात् दुर्वाससः वररूपं मंत्रस्य श्रेष्ठमंत्रस्य यो लाभस्तस्मिन् सति गुरुत्वं मुनेः उपदेष्टृत्वं मयि महतः शिष्यत्वेन महत्त्वं च मत्वा अपुष्पवत्यां पुष्पं स्त्रीरजः तदभाववत्यामपि मे दशायां बाल्यावस्थायामित्यर्थः आमोदभारः हृ

॥गद्यं॥ वत्से भवत्सेवासंप्रदायेन संप्रति भृशं प्रसीदामीति व्याहृत्य मुनिरनुकंपितचेता मह्यमत्यर्थम
भीप्सितार्थसम र्पणपरतंत्रं कमपि मंत्रमुपादिक्षत् १३ पद्यं ॥ अपि क्रुधामावसतेरमुष्मान्मत्वा
गुरुत्वं वरमंत्रलाभे अपुष्पवत्यामपि मे दशायामामोदभारोधिकमाविरासीत् ४ २ग० अधुना तस्य प्रभावे
न शतमखमुखा सुनिखिलाखिलखेचरा ये ये परार्ध्यास्ते ते रहसि ध्यानमात्रसाध्यसान्निध्याः स्वस्वानुरूपगुणविभवा
नात्मभवान्मयि धिकसदनुकंपाः संपादयिष्यंति १५

र्षातिशयः अथ च कुसुमाभावदशायामपि सुगंधातिशयः अधिकं यथा तथा आविरासीत् ॥४२॥ ग० अधुनेति अधुना तस्य मंत्रस्य प्रभावेन शतमखमुखाः इंद्रादिषु निखिलाः सकलेखलेचराः देवपंक्तिषु ये ये परार्ध्याः श्रेष्ठाः देवाः ते ते रहसि १४
ध्यानमात्रेण साध्यं सान्निध्यं येषां ते धिकं सती अनुकंपा दया येषां ते तथाभूताः संतः मयि स्वस्य स्वस्य अनुरूपाः गुणाः विभवः ऐश्वर्यं च येषां तान् आत्मसंभवान् और

सपुत्रान् संपादयिष्यति जनयिष्यति।।१४।। पद्य।। इतीति यदुसुता कुंती कृपया आयतविकसितं चेतो यस्य तस्य मुनीनां नेतुः नायकस्य इति उक्तप्रकारमनुग्रहं नृपाय अभिदधे उवाच परंतु दक्षाध्वरे धीरभद्रेण पूष्णो दंतानां पातितत्वात् न विद्यते दशनव्रणानां चुंबने दंतक्षतानां पीडा यस्मिन् तत् अहस्पतेः सूर्यस्य रतिसंगमनं अभिदधे अयं भावः भर्तुः स्वस्मिन् व्यभिचारिणीत्वशंकया तदानीं मंत्रपरीक्षार्थं सूर्याह्वानं कृतं तेन तत्समागमात् कर्णपुत्रो जात इति न कथितमिति।।४४।। इतीति इति वचनमयीं सुधां किरंतीं वर्षतीं यदुनृपतेः तनयां कुंतीं प्रशंसमानः पौरवाणां पतिः तेषु श्रेष्ठः पांडुः प्रकृतो यो महोत्सवः

।।पद्यं।। इति नृपाय कृपायतचेतसो यदुसुता मुनिनेतुरनुग्रहं अदशनव्रणपीडमहस्पतेरभिदधे रतिसंगमनं विना ४४
इतिवचनमयीं सुधां किरंतीं यदुनृपतेस्तनयां प्रशंसमानः पतिरनुमनुते स्म पौरवाणां प्रकृतमहोत्सवपारदर्शनाय ४५
धर्मात्प्राप युधिष्ठिरं पवनतो भीमं च भीमं द्विषां जिष्णोर्जिष्णुमतीव धृष्णुमनघा कुंती मुनेर्विद्यया अन्यासापि तयैव तत्र नकुलं रूपास्पदं गीष्पतेः सच्छात्रं सहदेवमप्यजनयन्नासत्ययोरंतिकात् ४६

पुत्रोत्पाद[illegible]सवः तस्य पारदर्शनाय अनुमनुते स्म अनुमोदितवान्।।४५।। धर्म इति कुंती मुनेर्विद्यया देवाह्वानमंत्रेण धर्मात् कटिलंबितवल्कल इत्यादिवक्ष्यमाणस्वरूपात् धर्मसंज्ञकदेवविशेषात् युधिष्ठिरं प्राप पवनतः वायोः सकाशात् द्विषां भीमं भयोत्पादकं भीमं प्राप जिष्णोः इंद्रात् अतीव धृष्णुं प्रगल्भं जिष्णुं अर्जुनं प्राप अन्या सा माद्र्यपि तयैव विद्यया तत्र स्थले नासत्ययोः अश्विनीकुमारयोः अंतिकात् लावण्यास्पदं नकुलं गीष्पतेः बृहस्पतेः सच्छात्रं सच्छिष्यं सहदेवमपि अजनयत्।।४६।।

मदिनि तदनुतज्जन्मानंतरंसुमनसः पुष्पाणिदेवाश्चयथोचितं आत्मनोयथायोग्यंभुविजन्मभूमौनिपतनं अंतरिक्षात्पतनं दिवि अंतरिक्षेनृत्यविधिं आचरन् अकुर्वन् कथंभूताः सुमनसः वासवस्यनंदनात्वनात्संभृताः संपादिताः अथचवासवनंदनेनजयंतेनसंभृताः युक्ताः तयापटुगीतिरवैः सुंदरगीतिशब्दैः सहिताः प्रमदाः प्रकृष्टमदाः अलयोभ्रमराः यासुताः अथचसपटुगीतिरवाः प्रमदालयः स्त्रीपंक्तयोयेषुते देवैः पुष्पवृष्टिः कृता अंतरिक्षेदेवीसहितादेवाश्चननृतुरितिभावः॥४७॥जन्मेति एषांपुत्राणांमहान्जन्मोत्सवः अतिस्वच्छंजलं आवहन्कुर्वन्कुंभभुवः अगस्त्यस्य अन्यैस्सामान्या

तदनुवासवनंदनसंभृताः सपटुगीतिरवप्रमदालयः सुमनसस्सुयथोचितमाचरन्निपतनंभुविनृत्तविधिंदिवि ४७
जन्मोत्सवोमहानेषांजलमत्यच्छमावहन् विद्यामनन्यसामान्यांव्रीडांकुंभभुवोनयत् ४८ स्वस्यचक्रगतिसरव्युः
स्वयमप्याश्रिताइव जवात्प्रदक्षिणज्वालाजज्वलुर्यज्वपावकाः॥ ४९॥

समानभवतीत्यनन्यसामान्यातां अव्यभिचारिणींविद्यांजलानांस्वच्छीकरणशक्तिंव्रीडांलज्जां अनयत्प्रापयामासनयतिर्द्विकर्मा श्रावणेमासि अगस्त्योदयेसतिजलानिस्वच्छानिभवंतीतिपुराणादावुक्तत्वात्तच्छक्तेर्जलानांस्वच्छताकर्तृत्वंतेषांजन्मोत्सवेशुभसूचकत्वात्जलानिस्वच्छानिजातानितानिदृष्ट्वामत्तोन्यएतज्जन्मोत्सवोपिमत्कार्यकारीयतेतेइतिमत्वासाविद्यालज्जांतेस्मेत्यर्थः॥४८॥स्वेति यज्वनांअग्निहोत्रिणांपावकाः स्वस्यसख्युः मित्रस्यवात्यारूपपायोः चक्रगतिंचक्राकारक्रमणंस्वयमप्याश्रिताइवेत्युत्प्रेक्षाजवात्प्रदक्षिणाःज्वालाःयेषांतथाभूताःसंतःजज्वलुःतत्समयेऽग्नयःप्रदक्षिणार्चिषआसन्नितिभावः॥४९॥ ॥

सामोदइति सामोदः सहर्षः ससुगंधश्च समीरः वायुः भीमस्य स्वपुत्रस्य संभूत्या जन्मना संभृता जाता या अशोचवत्ता अननाशोचवत्ता न या ऋष्यादीनां संस्पर्शे संकुचन्निव मनसि संकोचं कुर्वन्निव मंदं शनैः स्वल्पं च यथा तथा ववौ तदानीं मंदसुगंधिवायव आसन् इति भावः ॥५०॥ कन्यकेति अहस्करः सूर्यः एषा कुंती कन्यकात्वेपि मयि कामुकी रत्यर्थमिच्छावती आसीत् इति स्मरन्निव कुंत्याः प्रसूतिदिवसं प्रादिद्युतत् अतिप्रकाशितवान् तदानीं सूर्योपि स्वच्छप्रभः शयु

सामोदो भीमसंभूतिसंभृताशोचवत्तया संकुचन्निव संस्पर्शे समीरो मंदमाववौ ५० कन्यकात्वेपि मय्येषा कामुकीति स्म
रन्निव प्रसूतिदिवसं कुंत्याः प्रादिद्युतदहस्करः ५१ पुष्पात्प्रागेव सुषुवे पुत्रमेषेति वीरुधः फले ग्रहय एवासन् प्रसू
नात्पाकृ पृथावने ५२ गद्यं ॥ तदनु गुणगणैरभंगुरशुभंयुना विकाससमयसमये ॥ १५ ॥

कोमर्वादिति भावः ॥५१॥ पुष्पादिति पृथायाः वनेनि
वासारण्ये वीरुधः लताः एषा कुंती पुष्पात् स्त्रीरजसः कुसुमाच्चेति ध्वनिः प्रागेव पुत्रं सुषुवे इति हेतोरिवेति स्तुप्रेक्षा प्रसूनात् पुष्पात् प्रागेव फलेग्रहयः अ
वंध्याः सफला एवासन् स्याद्वंध्यः फलेग्रहिरित्यमरः इत्यादिकपदाभावे गूढोत्प्रेक्षा प्रत्यक्षेते इति वीरुध इत्युपलक्षणं तेन नंदाद्रुमलताः सफला आसन्नि
ति भावः ॥५२॥ गद्यं तदिति तदनु तदनंतरं गुणगणैः शुभानि धैर्यादिभिः अभंगुराः अनश्वराया शुभंयुना शुभान्वितेन शुभंयुस्तु शुभान्वित इत्यमरः तस्याः विकास

टी·भा· मयेघृन्हि मान्तुर्यविशिष्टसमये॥ १५॥ प० प्रजेति असौप्रजाधिपोराजानेजस्विषुतेषुपंचस्ऽमध्ये यतश्चनिर्धारणमित्यनेननिर्धारणेषष्ठीसप्तम्योर्विधाना टी·का·
१६ नात्सप्तमी। उन्नतेश्रेष्ठेयुधिष्ठिरेप्रथमंचक्षुर्द्वयंप्रपातयामास न्यस्तवान् कः कस्मिन्निवपंचाग्निसाध्यंतपोयस्यसपंचतपामुनिः उन्नतेउच्चेप्रभाकरेसूर्येइव १
समुनिर्यथाचत्वारोग्नयः पंचमः सूर्यः तेषुमध्येसमीपस्थानग्नीनत्यस्यानितेजस्वित्वानदूरस्थेसूर्येदृष्टिंन्यस्यतितद्वदितिभावः ५३ तपस्विनीति ऋषिपत्नी
नांस्तनदुग्धपायिनः तेवसुधेंद्रपुत्राः दरं ईषत् क्वणद्भिर्वायुनाशब्दायमानेभ्यः कीचकेभ्योवेणुविशेषेभ्यादत्ताः तच्छब्दश्रवणार्थमर्पिताः कर्णायैस्तथा

प्रजाधिपोसौप्रथमंयुधिष्ठिरेस्तेषुतेजस्विषुतेषुपंचसु प्रभाकरेपंचतपाइवोन्नतेप्रपातयामासविलोचनद्वयं ५३ तपस्विनीनांस्तनपायिन
स्तेदरक्वणत्कीचकदत्तकर्णाः दिनेवनांतेवसुधेंद्रपुत्रावल्केषुनिद्रासुखमन्वभूवन् ५४ क्षुत्पीडयास्तनरसेकलहंशिशूनांकुंतीतदाशमयितुं
कुचकुंभयुग्मे एकंयुधिष्ठिरधनंजययोश्चभागमेकंसमीरणसुतस्यचसंविभेजे ५५ निशाचरैःसमंबाल्येनियोद्धुमिवकौतुकी उत्तानशयनेमु
ष्टिमुदग्रामारुतिर्दधौ ५६ भूताःसंतःदिनांतेसायंकालेवल्केषुवल्कलेषुनिद्रासुखंअन्वभूवन् अनुभूतवंतः सार्वभौमराजपुत्राणामिंद्रादिभ्योजातानामपी
यमवस्थेतिभावः॥ ५४॥ क्षुदिति कुंतीतदापुत्राणांबाल्यावस्थासमयेशिशूनांक्षुत्पीडयास्तनरसेकलहंशमयितुंयुधिष्ठिरधनंजययोःकुचकुंभयोर्युग्मयुग्म
मध्येएकंस्तनंभागंसमीरणसुतस्यच एकंस्तनंभागंसंविभेज एतादृशंविभागंकृतवती अत्रस्तनयोःकुंभोपमानत्वेनतेषांक्षुच्छामसूचकत्वंसूच्यते ५५ निशे १६
तिमारुतिः भीमःउत्तानंशयनंयस्मिन्तस्मिन्पर्यस्तिनिशाचरैःसमंनियोद्धुंबाहुयुद्धंकर्तुंकौतुकीवउदग्रांउच्चांमुष्टिंदधौबालस्वभावान्मुष्टिबंधइयमुत्प्रेक्षा ५६

॥गद्यं॥ ततइत्यादिस्पष्टं॥ प॰ पदिति बालाः सुतेयुधिष्ठिरादयः पांडोः महीपतित्वात् आत्मनः पितुः योषितिभार्यायांभूमौपङ्क्तिचरणैः स्पर्शनंपरिहरंतः
वर्जयंतइव करकमलयुतैः जानुभिः चंक्रमणंगमनंचमदकुर्वतस्कंदरंयथानथाअकुर्वतयद्वाचमनंस्कंदरंगमनमकुर्वततिसंबंधः॥५७॥आदायेति आश्रमसमीपे
जानुभ्यांकृतःचंक्रमोगमनंयेनतं अतिशयेन मांसलंपुष्टंर्भामंआदाय उत्तमांगमस्तकेपि आघ्रायतापसीनां ऋषिपत्नीनांबाहालतैवबाहुलतैवचवहनात् हृताः

॥गद्यं॥ ततःक्रमेणगतेषुकतिपयेषुवासरेषु॥ पद्यं॥ पाङ्डरात्मापितृयोषितिभूमौस्पर्शनंपरिहरंतइवैते जानुभिः
करसरोजसहायैश्चंक्रमंचमदकुर्वतबालाः ५७ आदायर्भाममतिमांसलमुत्तमांगेप्याघ्रायजानुकृतचंक्रममाश्रमांत
बाहालतैववहनाद्धिररामशश्वत्कौतूहलंनतुकदाचनतापसीनां ५८ वृत्थतापसपुरःप्रसारितंवेणुदंडमवलंब्यशैशवे भा
वयन्निवगदापरिग्रहंभाविनंपवनभूश्चचारसः ५९ मुनिस्फैतरविशेषजुषोवनमुहुरमीनवशैशवकेलिषु मलिननामरुरंतकलेव
रंमदकलाःकलभाइवधूलिभिः ६०

शश्वत्विरराम कौतूहलंवहनोत्कंठातुकदाचनाविरराम हृत्ताःश्रांताःवहनोत्कंठातुकदापिनविरतेतिभावः भुजा
बाहाचबाहोस्यादितित्रिकांडशेषः ५८ वृद्धइति सपवनभूःभीमःशैशवेवृत्थतापसेनपुरःअग्रभागेप्रसारितंवेणुदंडं अवलंब्यगृहीत्वाभाविनंगदायाःपरिग्र
हंस्वीकारंभावयन्निवमानयन्निवसूचयन्निवेतिवाचचारइतस्ततोजगाम ५९ वनेमुनिस्फैतैःसमानवर्तिनःअमीकुमाराःनवास्फनूतनास्फ शैशवकेलि

षु पद्मानवशैशवसंबंधिकेलिषु मदनकला: सुंदरा: कलभा: करिशावकाइव धूलिभि: अंगंमलिनतां अनयंत॥ ६०॥ तत्रेति आश्रमभूमि: मृदुषु पांसुषु तत्रतत्रस्थलेषु पांडो: पुत्रपादतलानां विन्यसनेन हेतुना स्फुटा: आकारसूचका: रेखायेषां तै: छत्रध्वजकुलिशै: कृत्वा चित्रवती अभवत् अनेन बालानां साम्राज्यलक्षणं सूच्यते॥ ६१॥ लीलेति ते बाला: सृक्किणो: ओष्ठप्रांतयो: युगात् गलद्भि: कांतिरूपेण पतद्भि: प्रांतावोष्ठस्य सृक्किणी इत्यमर: लीलास्मितैर्ललितै: लालाजलानां पृषद्भि: बिंदुभिश्च कृत्वा हृदि उरस्थले धुनानि गतानि उल्लेखनरंध्रसूत्राणि याभ्यस्ता: शाणोल्लेखनरंध्रसूत्ररहिता इत्यर्थ: मौ

तत्रतत्र मृदुपांसुषु पांडो: पुत्रपादतलविन्यसनेन छत्रकेतुकुलिशै: स्फुटरेखैश्चित्रवत्यभवदाश्रयभूमि: ६१ लीलास्मिते सृक्कियुगाद्गलद्भिर्लालाजलानां ललितै: पृषद्भि: बालादधुस्ते हृदि मौक्तिकानां मालाधुतोल्लेखनरंध्रसूत्रा: ६२ अत्यंतबाल्यादमृतायिताभिरन्योन्यमर्धोक्तिभिराह्वयत्सु सर्भीमसेनाजनि पांडुसूनुष्वर्धोक्तनामापि च पूर्णनामा ६२

क्तिकानां माला: दधु: रंध्रसूत्रादिकारणाभावेपि मौक्तिकमालारूपकार्यकथनाद्विभावनालंकार: विभावना विनापि स्यात्कारणं कार्यजन्मचेदितिलक्षणात् ६२ अत्यंतेति पांडुसूनुषु अत्यंत बाल्यात् अमृतायमानाभि: कर्णयो: अमृतवदाचरंतीभि: नाम्नां अर्धोक्तिभि: अन्योन्यं आह्वयत्सु आह्वानंकुर्वत्सु सत्सु स भीमसेनो अर्धोक्तनामापि भीम इत्युक्तोपीत्यर्थ: पूर्णनामा अभवत् उत्तरपदलोपेन भीम इत्यस्यापि पूर्णत्वात्॥ ६३॥ ॥ ६३॥ ॥ १७

॥गद्यं॥ तदेति तदानीमयमंबालिकासूनुः पांडुः अविलंबितं द्रुतं संक्रंदन इव इंद्र इव नयापंचानानंदनानां पुत्राणां आगमेन प्राप्त्या या संपत् तया अन्यत्र पंचानानंदनायमानानां नंदनवनसंबंधिकल्पवृक्षाणां संपदा संपत्त्या अमितं पंचांबहुलां मुदं बभार दधे अमितं पंचाग्न्यादो योगेना परिमितधान्यपचनक र्याऽस्यास्त्यां वर्ततेतस्यस्थूलत्वगुणयोगादत्रप्रयोगः॥ १७॥ पद्यं॥ पुत्रइति क्रमेणपोषितेषु विहरत्सु तेषु पुत्रेषु मध्ये माद्रीसुतौ यमत्वं अंतकत्वं प्राप्यापि

॥गद्यं॥ तदानीमयमंबालिकासूनुरविलंबितं संक्रंदन इव पंचनंदनागमसंपदा तयामितं पञ्चांबभार॥ १७॥ प० पुत्रेषु तेषुक्रमपोषितेषु विलोकयंत्या विहरत्सु कुंत्याः आप्याययामासतुरंतरंगं प्राप्यापि माद्रीतनयौ यमत्वं॥ ६४॥ तैरादराद्वन लतासु दृढीकृतासु दोलाविधेः परिचितस्य महर्षिपुत्रैः पर्यायलब्धमसकृत् पवमानसूनोरारोहणं द्रुतमभूदवसानभूमिः ६५

लोकयंत्याः कुंत्याः अंतरंगं आप्यायया-मासतुः तुष्टिं पुष्टिं वानिन्यतुरिति विरोधाभासः यमत्वं यमलत्वं प्राप्येति विरोधपरिहारः॥ ६४॥ तैरिति ऋषिपुत्रैः सहतैः युधिष्ठिरादिभिः परिचितस्य अभ्यस्तस्य दोलाविधेः दोलाकर्मणः वनलतासु बहूनां रज्जूकरणेन दृढीकृतासु सर्तासु पर्यायेण लब्धं पवमानसूनोः भीमस्यारोहणं असकृत् वारं वारं च अवसानभूमिः समाप्तिस्थानं अभूत् भीमस्यातिमांसलत्वेन बहुभारत्वात् आरोहणे लतानां त्रोटनात् शीघ्रं दोलाकर्म समाप्तिरभूदिति भावः॥ ६५॥ ६७ ॥

।पा।
१७ भीमइति अन्येयुधिष्ठिरादयःसगर्भ्याःबंधवःभीमेनदंतयुगुले विधृतं अद्रितुल्यंपंवन्येभंवनगजं आरूरुहुः मानीशौर्याभिमानवान्विजयःअर्जुनः टी०स०
तंगजंस्वयमेवशुंडांप्रगृह्यधृत्वालीलयारदपथेन दंतमार्गेणसमारुरोह अर्जुनस्यरदपथेनारोहणस्योक्तत्वात् अन्यबंधूनांपश्चान्मार्गेणारोहणंज्ञायते १
सांम्राल्लीलैकदेशउक्तः॥ ६६॥ गद्यं॥ तदिति तदनुविधिवत् यथाशास्त्रंउपनीतानां कृतोपनयनानांक्रमेण मधुरेण मनोहरेण वयसातारुण्येन-
अयमः...ैः ल

भीमेनदंतयुगुलेविधृतंपमन्येवन्येभमारुरुहुरद्रिनिभंसगर्भ्याः शुंडांप्रगृह्यविजयःस्वयमेवमानीतंलीलया
रदपथेनसमारुरोह॥६६॥गद्यं॥तदनुविधिवदुपनीतानांक्रमेणमधुरेणशिरसावयसाचविधृतवपुषांविनयगौ
रवपुषांसर्वकलासुकौशलमुन्मीलयतांतेषांयशांसिबलभेदनमदावलस्यधाम्नायुगलमपियुगपदुल्लंघयामासुः॥१७॥

...विधृतंस्वीकृतंवपुर्येषांशिरसानमनादौशिरोनमनेन विनयस्यनम्रतायाःगौरवं आधिक्यंपुष्णंतितेषांसकलासु
कलासुगीत्यादिषुकौशलंउन्मीलयतांप्र...यतांतेषांकुमाराणांयशांसिबलभेदनमदावलस्य इंद्रगजस्यऐरावतस्य धाम्नोःस्वर्गस्थानशुभ्रतेज
सोर्युगंयुगुलमपियुगपदुल्लंघयामासुः परमशुभ्रानियशांसिस्वर्गादप्युपरिगतानीतिभावः॥१७॥ ॥७॥ ॥७॥ ॥ १८

नवतरुणिभिः नूतनतारुण्यस्यलक्ष्म्याशोभयानंदनीयंदर्शनीयंश्लाघनीयंवाकुरुवृषभस्यकुरुश्रेष्ठस्यसुतानांशरीरंनेत्रपात्रंनेत्रविषयंकुर्वतीमुनि
नांनिःकर्त्रीसःकामोपिस्वविशिखइवस्वबाणइवपंचधा अभूत्किं इतिवाक्यात्मकंकर्ममेनेमनुतेस्मयथाकामबाणाःअरविंदाशोकादिरूपेणपंचस्वरू

पद्यं॥नवतरुणिमलक्ष्मीनंदनीयंशरीरंकुरुवृषभसुतानांकुर्वतीनेत्रपात्रं मुनिनतिरितिनिमेनेमोहनायत्रिलोक्याःस्ववि
शिखइवकामःसोपिकिंपंचधाभूत्॥६७॥म॰ अथकदाचिदखिलहरिदंतरनिरंतरवलयमानमलयपवमानकंपितचंप
कसंपादितसौरभसंपदनुकंपितनिखिलनिलिंपपथाःकेसरकुसुमकेसरशिखरभासुरधूलिधूसरदिशोमनसिजविज
यसहकारचतुरसहकारपल्लवनकुजपरिचर्वणगर्वायमाणकलकंठयुवकंठोक्तपथिकजनसंदोहजीवितसंदेहाःवनदेव
तावदनतिलकायमानतिलकावलीकलिकापलितंभावुकनभोविभागामदनहुतभुगंगारसदृशाकमलभृंगारमधुरस
संगारचितमदभृंगारवविभवतुंगाअरहिर्तमिथुनशृंगाररसाःसमुन्मिष हासंतिकामिषेणसीमंतिनीरतेरुदंतंदुरंतं
मनसिविचिंत्यरहसिवसंतनृपंतमिवहसंतोवसंतोदयवासरामंदमंदमरण्यांगणधरण्यांकमपिश्रिकासमापादयामासुः१८

पोजातःतथाकामोपिपंचस्वरूपोभूत्किमितिमेनेइत्यर्थःतारुण्ययोगात्स्वरूपेणमदनतुल्याअभूवन्निति भावः॥६७॥ग॰ अथशापवशात्पांडोःदेहा
वसानंकथयिष्यन्तद्धेतुत्वेनवसंततुर्थमवमाह अथेत्यादिगद्यपद्यैः अथकदाचित्वसंतोदयवासराःवसंताविर्भावदिवसाःमंदात् मंदंअतिमंदंअ

रण्यांगणासंबंधिधरण्यांकमपिवाचामगोचरं अतिसुंदरमितियावत् विकासंवैभवर्द्धिं आपादयामासुः संपादितवंतः कथंभूताःवासराः - अखिलेषुसर्वेषुहरिदंतरेषुदिशांमध्यभागेषुनिरंतरंचलमानेनगंत्रामलयपवमानेनमलयाचलादागतेनपवमानेनदाक्षिणात्यवायुनेत्यर्थः कं पिता येऽब्जप्रकारास्तेभ्यः संपादितयासौरभसंपदा अनुकंपितःयुक्तइत्यर्थः निखिलःनिलिंपपथःदेवमार्गःआकाशोयेषुते तथाकेसरकुसुमानांब कुलपुष्पाणां केसरशिखरेषुकिंजल्काग्रभागेषुभासुराकांतिमतीयाधूलिःपरागःतेनधूसराःईषत्पांडवोदिशोयेषुते तथामनसिजविजयस्यसहका रेसाहाय्यकरणेचतुराणांकुशलानां सहकाराणां आम्रवृक्षाणां येपल्लवतल्लजाः प्रशस्तपल्लवाःतेषांपरिचर्वणेनभक्षणेनगर्वायमाणैःगर्वंकुर्व- द्भिःकलकंठयुवभिः कोकिलयुवभिःकंठोक्तःस्पष्टमुक्तइत्यर्थःपथिकजनानांसंदोहस्यसमूहस्य जीवितसंदेहःप्राणधारणसंशयोयेषुते ए तद्दिवसेषुविरहिणोमध्वगानांप्राणधारणंभवतिवानवेतिकोकिलाःकथयंतिकिमितिभावः तथावनदेवतावदनेषुतिलकायमानाभिःतिल कवदाचरंतीभिःतिलकावलिकलिकाभिःतत्कांतिभिःपलितंभावुकाःशुभ्रीभवंतःनभोविभागाःयेषुतेपलितंभावुकेत्यत्रकर्तरिभुवइत्य नेनखुकञ्प्रत्ययः तथामदनहुतभुजःमदनाग्नेःअंगारैःसदृशायेकमलान्येवभृंगाराःहेमसुखपात्राणितत्संबंधिमधुरसेमकरंदरूपेमद्यरू पे इतिध्वनिःसंगेनआरचितःकृतःमदोयेषांतेषांभृंगाणांआरवविभवेनशब्दैश्वर्येणतुंगाःमहांतः तथाअरहितःविद्यमानःमिथुनानांस्त्रीपुं सानांशृंगाररसोयेषुते तथासीमंतिनीरतेःउदंतंवृत्तांतंदुरंतंदुष्टःअंतःपरिणामोयस्यतथाभूतंमनसिविचिंत्यरहसिएकांतेप्रिययासहवसं तं तंनृपंसमुन्मिषंतीनांविकसत्कुसुमानांवासंतिकानांमल्लिकालतानांमिषेणहसंतइवेत्युत्प्रेक्षांकितवापद्धुतिगर्भा॥१८॥ ॥७॥ ॥७॥

॥पद्यं॥ किमिति किंसुकस्य पलाशवृक्षस्य कुसुमेषु नदंती शब्दं कुर्वंती मधुपानां भ्रमराणां मद्यपानामिति ध्वनिः आ॰ लं॰ पं॰ कः [illegible]
कस्य कीरस्य वदने रुचिरत्वं किं न किमपीत्यर्थः तथा सुकस्य मुनेः हृदये मनसि वशित्वं स्वाधीनत्वं किं एतद्दर्शनेन तन्मनोपि निरंकुशं भवेदिति भा
वः इति शंसति स्मेव कथयामास किं॥ ६८॥ कुरवइति पवनेन ईरिताः कंपिताः पादपाः यस्मिन् तस्मिन् नृपस्य वने कुरबके वृक्षे रवं कलिं द

किंसुकस्य वदने रुचिरत्वं किंसुकस्य हृदयेपि वशित्वं किंसुकस्य कुसुमेषु नदंती शंसति
स्म मधुपालिरितीव ॥ ६८॥ कुरवकरवकलिभृतः सुधासमधुरं मधुरं मधुषट्पदाः पपु
रवापुरवार्यमपि स्मयं नृपवने पवनेरितपादपे॥ ६९॥ ॥ ॥

क्रीडां बिभ्रति तथाभूताः षट्पदाः भ्रमराः सुधया समाधूः भारो यस्मिन् तत् माधुर्येण मनःप्रीतिकरत्वे सुधामधुनोः साम्यात् सुधया समधुरत्वं अत एव मधु
रं मधु मकरंदं मद्यमिति ध्वनिः पपुः अवार्यं स्मयं मदकार्यं गर्वमपि अवापुः अत्र यमकालंकारे रवके रवके इत्यत्र बवयोरभेदस्वीकाराद्यमकत्वं॥ ६९

भा ॥गद्यं॥ अथेति अथवा संत्यां माधर्वीलतायां इति अर्थांतरमपि उक्तवाक्यस्यार्थद्वयमपीत्यर्थः अलिगिराभ्रमरशब्देन बोधयंत्यां सत्यामिव अपक्षि टी॰स्त॰
० तिपतिः क्षणादेव इक्षुधन्वनः मदनस्य लक्ष्यतां शरव्यतां अध्यरुक्षत् आरोहणं कृतवान् मदनवशो जात इति भावः इतीतिकिं अस्मिन् कुटीरस्य प १
र्णशालायाः परिसरे आसमंताद्भागे अमुना पटीरगिरिबंधुना मलयाचलसंबंधिना गंधवहस्य स्तनंधयेन लघुबालेन मंदवायुनेत्यर्थः सन्निधिनी

॥गद्यं॥ अथास्मिन्नमुनातपोवनकुटीरपरिसरेपटीरगिरिबंधुनागंधवहस्तनंधयेनसन्निधिनीयमानोम
द्रजः परिग्रहस्तपस्यंतमपिमनस्यंतः कंपरितापसंपदानिर्लिंपेदित्यर्थांतरमप्यलिगिराबोधयंत्यामिववासंत्या
मियं क्षणादेवक्षितिपतिरिक्षुधन्वनोलक्ष्यतामध्यरुक्षत् १९प॰ परिहृत्यतनुंचित्तेबाणंकामोमुमोचयत् अंतरेवातिर
क्तोभूदव्रणस्तद्बहिर्नृपः ७०

यमानो मद्रजः परिग्रहः मत्पराग रूपपरिजनः अथ च मद्रान् मद्रराजात् जातः परिग्रहः पत्नी माद्रीत्यर्थः पत्नीपरिजनादानमूलशापाः परिग्रह इत्यम
रः तपस्यंतमपि कं पुरुषं अंतः मनसि तापसंपद्यन् निर्लिंपेत् अपितु सर्वमपि मनसि तापसंपदा लिंपेदिति १९ परिहृत्येति यत् यस्मात् कामः तनुं परिहृत्य वर्जयि २०
त्वा चित्ते बाणं मुमोच तत् तस्मात् नृपः अंतरेव चित्ते एव अतिशयितं रक्तं पस्य सः अतिरक्तो भूत् बहिर्भागे अव्रणो भूत् अनिरक्तः माद्र्यामत्यंतमनुरक्तो भूदित्यर्थांतरं ७०

कमिति असौनृपः तावत् आदौ अधुनाकंकेलिदेशंक्रीडास्थलं उपयामिगच्छामि इतिविचार्यमाद्यासाकंकुरबकवृक्षलतानांनिकुंजंतदाछादितस्थानं गूढंयथातथाययौ कीदृशंनिकुंजं कंकेलिवृक्षाणांसंवलनेनवेष्टनेनकल्पिताविचित्रा अद्भुताशोभायस्यतं कः क इव करेणवा हस्तिन्यासाकंकरेणुः हस्तीव अनयोपमयामदशान्त्यादिवैशिष्ट्यंद्योत्यते॥७१॥शापमिति अग्रजातेः ब्राम्हणस्यमृत्युप्रदंशापंपत्युः स्मरजंमदनजनिततापंदुःखंचनिरीक्ष्यविचार्यदूरेतरस्मिन् अतिप्रत्यासन्नेसुरतेसत्यपिहृदयंमनः दोलायमानंदोलवत् आसीत् यथादोलावारंवारंपूर्वपश्चिमदिग्भागंगच्छतितन-

कंकेलिदेशमुपयाम्यधुनेतितावत्कंकेलिसंवलनकल्पितचित्रशोभं माद्याकरेणुरिवसाकमसौकरेण्वागूढंययौकुरबकद्रुलतानिकुंजं ७१ शापंचमृत्युप्रदमग्रजातेस्तापंचपत्युःस्मरजंनिरीक्ष्य दूरेतरस्मिन्सुरतेपिदेव्यादोलायमानंहृदयंतदासीत् ७२ चाटुप्रयोगेचतुरःसपांडुःप्रसूनतल्पेप्रविवेशितायाः क्षौमंबिभेदस्मरराजधान्याःक्षौमंकराभोजदलेनतन्व्याः ७३

थामाद्रीमनोपिब्राम्हणशापंपतितापंचागच्छदितिभावः ७२ चाटुरिति चाटुप्रयोगेप्रियभाषणेचतुरःसःपांडुःप्रसूनतल्पेपुष्पशय्यायांप्रविवेशितायाःनीतायाःमाद्र्याः क्षौमंदुकूलंकराम्भोजदलेनकरकमलपत्रेणबिभेदविस्रंसयामासेत्यर्थःकीदृशंक्षौमंस्मरस्यराजधान्याःवरांगस्यक्षौमं अट्टापरपर्यायंउच्चमाकारोपरितनस्थानं स्यादट्टःक्षौममस्त्रियामित्यमरःकठिनपदार्थभेदनेतीक्ष्णशस्त्रस्यहेतुत्वंअत्रकमलपत्रेणक्षौमभेदकथनेनहेतूनामसमग्रत्वेपिकार्योत्पत्तिकथनाद्विभाव

नालंकारभेदः॥७२॥ग॰ तन्नेति तन्नतौजायाचपतिश्चदंपतीराज्ञीचराजाचराजानौचतौदंपतीचेतिकर्मधारयः मुनिशापबलस्यपरिचिचीषयापरि
चेतुमिच्छयेवअतिचिरंमुषितंशापभयाद्रहितं असमशरसमरंमदनयुद्धंउन्मीलयामासतुःप्रवर्तयामासतुः कथंभूतंसमरं मुहुःअभंगुराणिदृढानि
आलिंगनान्येवमंगलतरंगाः तेसंजाताः यथोस्तौमंगलतरंगितौयौकुचकुंभौताभ्यांसंभृतेनसंपादितेन घर्मजलेननिर्मितः मदनस्ययौवराज्याभिषेकोय
स्मिन्तं तथाअधरितःमधुररसस्यक्षौद्ररसस्यमधुरिमामाधुर्ययेनतस्याधरबिंबस्यचुंबनाडंबरेणचुंबनव्यापारेणविडंबितंउपहसितंअंबरचरकुटुंबि

ग॰ तन्नतौराजदंपतीमुनिशापबलपरिचिचीषयेवमुहुरभंगुरालिंगनमंगलतरंगितकुचकुंभसंभृतघर्मजलनिर्मितम
दनयौवराज्याभिषेकमधरितमधुरसमधुरिमाधरबिंबचुंबनाडंबरविडंबितांबरचरकुटुंबिजीवनमतिजवपंफुल्यमानध
म्मिल्लविगलदविरलबकुलमुकुलपुनरुक्तपुष्पतल्पमवगणितवीणागुणक्वणितभणितमसृणितमतिचिरमुषितमसम
शरसमरमुन्मीलयामासतुः २०

नांदेयानांजीवनंअमृतंयस्मिन्तं तथाअतिजवेनपंफुल्यमानात् भृशंविस्रंसतः धम्मिल्लात् बद्धकेशात्-
विगलद्भिःअविरलबकुलमुकुलैःपुनरुक्तंपुष्टमित्यर्थःपुष्पतल्पंयस्मिन्तंतथाअवगणितंधिक्कृतंवीणागुणानांक्वणितंशब्दोयेनतेन भणितेनरति
कूजितेनमसृणितंस्निग्धपदार्थभरितंव्याप्तमित्यर्थः पंफुल्यमानेतिञिफलाविशरणे इत्यस्यपङंतस्यरूपं॥२०॥ ॥६॥ ॥

...आयुषः दीर्घसंततिपरंपरां आवहन्नपि ... आरुरोह अगमत् इति विरोधाभासः आयुः एनतृ
र्वजायुर्नामकस्य संततिं वंशं वहन् आयुषो जीवितकालस्य संततेः परंपरां आरुरोहेति विरोधपरिहारः कस्याइव रतेरिव यथा रतेः रंतं आरुरोहन
येत्यर्थः ॥ ७४ ॥ नृपइति दूरीकृतः पशुसंगमः संसारपाशसंगो येन तं एकं यमं अहिंसादिरूपं विहाय त्यक्त्वा भोगार्थपुष्पपल्लवाद्यवचयेन हिंसासंभ

॥ पद्यं ॥ आयुषः संततिं दीर्घामावहन्नपि पौरवः आयुषः संततेरंतमारुरोह रतेरिव ॥ ७४ ॥ नृपस्य
दूरीकृतपाशसंगमं यमं विहायैकमुपेयुषो वधूं अजस्रमूरीकृतपाशसंगमो यमोऽपरः सन्निदधे लतागृहे ॥ ७५

वादिना तत्त्यागः अथवा यमं साहचर्याद् ब्रह्मचर्यादिनियमं विहाय वधूं उपेयुषः संगच्छमानस्य लतागृहे अजस्रं ऊरीकृत स्वीकृतः पाशहस्तत्वात् पाशसं
गमो येन सः अपरो यमः कृतांतः सन्निदधे समीपस्थो बभूव यथा कस्यचिद् शस्त्रं पुरुषं दृष्ट्वा पलायमानस्य पुरुषस्य पुरस्ताद् परः सशस्त्रः पुरुषो भवति न ह्यज्ञातमि
तिभावः ७५

आलिंगनमिति सर्व एवकुरबः कुरबकवृक्षः भुवि हरिणेक्षणानां आलिंगनेन आमोदस्यसौगंध्यस्यगौरवेण आधिक्येनभृतः पूर्णः आसीत् तदुक्तंपादा हतःप्रमदयाविकसत्यशोकः शोकंजहाति बकुलोमुखसीधुसिक्तः आलिंगितःकुरबकः कुरुतेविकासमालोकितस्तिलकउत्कलिकोविभाति अथ च सर्वे एवकुरवः बवयोरभेदात् कुरुवंशोत्पन्नाः प्रियालिंगनेन आमोदस्य हर्षस्य गौरवंबिभ्रतितेनयाभूता आसन् तन्मध्यभागपिश्लेषणकुरबधा-

आलिंगनेनकुरवोहरिणेक्षणांनामामोदगौरवभृतोभुविसर्वएव तन्मध्यभागपतदासकथंनुपांडुरालिं
ग्यमद्रतनयामवधिंप्रपेदे ७६ निद्रयाकिलनिमीलितंमृतेर्मुद्रयानिजमुदीक्ष्यवल्लभं उद्रयाकरमुदस्यविह्वलामद्रा
जतनयारुरोदसा ॥ ७७ ॥

वृक्षवाच्यवृक्षमध्यगतोपिसःपांडुःतदामद्रतनयांमाद्रींआलिंग्यअवधिंआयुषःसमाप्तिंकथंनुप्रपेदेप्राप्तनुवितर्केसर्वकुरवशब्दवाच्यानांप्रमदालिंग नेनामोदप्राप्तंतत्रत्यैकस्यैवतदालिंगनेनकथंनुनाशइतिप्रश्नोवा ॥ ७६ ॥ निद्रेति मृतेर्मुद्रयामरणचिह्नविशिष्टयानिद्रयामीलितंकिलसत्यंनि श्चेष्टंनिजंवल्लभंउदीक्ष्यउच्चैःरवोयस्याःसाउद्रवाविह्वलाम्लानासामाद्रीकरंउदस्यउत्क्षिप्यरुरोद ॥ ७७ ॥ ॥ ७॥ ॥ ७॥

तदिति तत्रोदनाक्रंदनं निशाम्य श्रुत्वा कुमारैः युधिष्ठिरादिभिः समवेत्य तादृशां मृतिमुद्रया युतं पतिं अवेक्ष्य रुदंत्याः भोजपुंगवभुवः यादवविशेष
भोजश्रेष्ठकन्यकायाः कुंत्याः अश्रुविपातैः भूरपि स्वयं बाष्पं अश्रु उष्माणं च अमुंचत् कुंतीरोदनेनाचेतना भूरपि बाष्पं मुमोच किंपुनः सचेतनेनावक्तव्या

तन्निशम्य समवेत्य कुमारैस्तादृशं पतिमवेक्ष्य रुदंत्याः भोजपुंगवभुजोऽश्रुविपातैर्भूरपि
स्वयममुंचत बाष्पं ॥ ७८ ॥ माद्र्यानतोनुमृतया सह तस्य राज्ञो निर्वर्तितास्तनयैर्निखि
लक्रियास्ते भूयोपितौ स्मनसां पुरतः प्रकाशं जायापती तु स्मरतोत्सवमन्वभूतां ॥ ७९ ॥

इति द्योतयितुमपिशब्दः ॥ ७८ ॥ माद्र्येति ततः तन-
यैः अनुमृतया सहगमनविधिना पश्चान्मृतया माद्र्या सह तस्य राज्ञः सकलास्ता और्ध्वदैहिकक्रियास्ते निर्वर्तिताः कृतास्ततो युतौ जायापती स्मनसां देवा
नां पुरतः अग्रे पुरतः पुरे अमरावत्यां स्मरतोत्सवं भूयोपि प्रकाशं प्रकटं यथा तथा अन्वभूतां अनुभूतवंतौ सुराणां देवानां भावः सुरता तत्संबंधि उत्सवं तत्सुखमुपभो

आलि हतः
...नुः गौ स्वर्गलोकं गतावितिभावः॥७९॥ गद्यं॥ तदिति तदनुनवव्यैधव्येन बहुविधाः बहुप्रकाराः व्यथायस्याः तस्याः पृथायाः पुरतः निर्म
र्यादेनापितृशोकेनविदार्यमाणंधैर्यंयषांते सोदर्यजनैः बंधुभिः परिवार्यमाणाय हृदि निवृत्तविदितं धर्मजातं धर्मसमूहायेनतस्मैधर्मजातायधर्मपु
त्रायमहत्यामपिविपत्यांवैयात्येन धार्ष्ट्येनभावितव्यंभाव्यंइतिराजनयस्यराजनीतेः नियमरूपमंकुशं नियमनकर्तारमंकुशंचाप्रकाश्यप्रकटयुक्त

गद्यं॥ तदनुनवव्यैधव्यबहुविधव्यथायाः पृथायाः पुरतोनिर्मर्यादपितृशोकविदार्यमाणधैर्यसोदर्यजनपरिवार्यमाणायहृदि
विदितनिखिलधर्मजातायधर्मजातायमहत्यामपिविपत्यांवैयात्येनभवितव्यमितिराजनियमांकुशंप्रकाश्यकाश्यपादयो
दयोपेताः शतशृंगस्थमुनिपुंगवास्तुंगमणिसौधशृंगसंकुलंकुलक्रमागतंकुरुनगरमेतानवतारयामासुः॥२१॥

दयोपेताः काश्यपादयः शतशृंगपर्वतसंबंधिमुनिपुंगवाः एतान्पृथासहितकुमारान्कुरुनगरंहस्तिनापुरंअवतारयामासुः प्रवेशयामासुः कीदृशंनग
रं तुंगैः उन्नतैः मणिमयसौधशिखरैः संकुलंव्याप्तं...याकुलक्रमेणागतंपूर्वजानांपुत्रपौत्रप्रपौत्रादि...मेणप्राप्तं॥२१॥ ॥६७॥ ॥६७॥ २३

प०मंदमिति सदयः आंध्यात्प्रेम्णापुरःप्रसारिते करो येनसः कौरवः धृतराष्ट्रः यत्रधर्मादयः स्थितास्तत्रमंदंमंदं उपेत्यममपांडोः पुत्ररूपाः अंकुराः क्व संतीत्युक्त्वा दृढालिंगनंकुर्वन्सन् निजांकं समीपभागंगमिनान् प्रापितान् इमान् धर्मादीन् स्पर्शस्पर्शस्पृष्ट्वाभ्रातुः स्मरन् भ्रातरंस्मरन्नित्यर्थः चोनाङ्गः गलङ्गः नयनांबुभिः लोकंतदा मित्यर्थः नदीमातृकंवृष्टिंविना उदकसमृद्धं विदधेचकार यथारोदनाश्रुभिः सदेशोजलमयोजातस्तावद्भ्रातृदुःखन रोदितिभावः ॥८०॥ पांडवेष्विति दृशा अंधः धृतराष्ट्रः पांडवेषु दृढतापरिणाहयोः प्रायः बाहुल्यंरूपबलयोः संपच्चतयोः इयत्तां एतावत्त्वं तत्रपरिणा

पद्यं॥ मंदंमंदमुपेत्यतत्रसदयोमत्पांडुपुत्रांकुराः क्वेतिप्रेमपुरःप्रसारितकरः कुर्वन्दृढालिंगनं स्पर्शस्पर्शमिमान्निजांकगमितान्भ्रातुःस्मरन्कौरवः स्त्रोतङ्गैर्नयनांबुभिः सविदधेलोकंनदीमातृकं॥८०॥ पांडवेषुदृढतापरिणाहप्रायरूपबलसंपदियत्तां स्पर्शनंविदधदेवदृशांधः पाणिनापरिममेधृतराष्ट्रः॥८१॥ दत्वातत्तत्प्रत्यहंयद्यदिष्टंयावत्स्वेषामात्मजानांशतेपि पांडोः पुत्रेष्वंबिकासूनुरेतेष्वेकैकस्मिन्प्रेमताबद्धबंध॥८२॥ ॥६७॥ ॥६७॥ ॥६७॥ ॥

होविशालतारूपंसौंदर्यप्रायोभूम्न्यंतगमनेत्यमरः स्पर्शनंविदधता कुर्वता पाणिना हस्तेनेव परिममेपरिमितविषयां चक्रेप्रज्ञाचक्षुष्वात् हस्तस्पर्शेनैवज्ञातवानितिभावः॥८१॥ दत्वेति अंबिकासूनुः धृतराष्ट्रः प्रत्यहंदिनेदिनेयत्यत्वस्तुइष्टंतत्तद्दत्वास्वेषांस्वकीयानां आत्मजानांशतेपिसर्वेष्वित्यर्थः यावत्प्रेमास्तितावत्प्रेम एतेषुयुधिष्ठिरादिषुमध्ये एकैकस्मिन्कुमारेबबंधदधारेत्यर्थः॥८२॥ ॥६७॥ ॥६७॥

ग॰एवमिति एवंवत्सभावेपिबाल्येपिभक्तिमत्स्कृतेषुपांडवेषुनिजपितुःवत्सलतांप्रेम असकृत्वारं वारंसमीक्ष्यमत्सरेणपरोत्कर्षासहिष्णुतयादुर्मनायमानःदुर्म-
नाभवन्सुयोधनःहृदयरूपे आलवालेवृक्षमूलायजलाधारेविरोधरूपांविषवीरुधंविषवल्लींएधयांचक्रेवर्धयामास कीदृशींवीरुधंराधेयप्रधानाःकर्णमुख्याः
येदुर्बोधाःदुर्बोधस्यकर्तारःतेषांमेधांत्सेधःवृध्यांन्नत्यंतदेवसर्वविधधरणीरुहःसमीपवृक्षःतं अधिरूढांकर्णादिदुर्बुध्याश्रयेणवृत्धिंगतामित्यर्थःनथानविद्यते
कुतोपिरोधःप्रतिबंधायस्यास्तांपांडवेषुमत्सरेणविरोधंचक्रेइतिभावः२२प॰नीव्रोदेति भीमःदुर्योधनादीनांअसकृद्दांगात्रूणांफालभागेललाटावयवेपट्टाभिषे

ग॰एवंवत्सभा॰ ...पिभक्तिमत्स्कृतेषुनिजपितृवत्सलतामसकृत्समीक्ष्यमत्सरेणदुर्मनायमानोहृदयालवालेसुयोधनोराधेयप्रधानदुर्बोधमेधोत्से
धसर्वविधधरणीरु... ...मधिरूढामकुतोरोधांविरोधविषवीरुधमेधांचक्रे २२प॰नीव्रोद्यानविनयानुद्धतांक्रमेणदुर्योधनाद्यसकृद्दांदुरहंकृती
नां पट्टाभिषेकमा... ...भिलष्यतिफालभागेकुट्टाकभावकुतुकंकुरुतेस्मभीमः ८३ पंचधाप्रवहंतीनांपवनात्मज एवसः कौरवक्रोधसिं
धूनांक्रमात्संगमभूरभू... ॥८४॥ कंअभिलष्यतिइच्छतिसतितत्रकुट्टाकभावःताडनकर्तृभावःताडनमित्यर्थःतद्रूपंकुतुकंकौतुकंकुरुतेस्म ताड
नरूपमांगलिकस्रगादिबंधनंचक... ...रेतिभावःकीदृशांअसकृद्दांतीव्रउद्योयेषांतान् अविनयान् अन्यायान्दधतांकुर्वतांतथादुष्टाअहंकृतिःअभिमानोयेषां
तेषां ८३ पंचधापंचप्रकारैःपंचस्वरूपैःप्रवहंतीनां...कौरवक्रोधसिंधूनांदुर्योधनादिक्रोधनदीनांक्रमात्सःपवनात्मजःभीमएवसंगमभूःअभूत्कौरवक्रोधःपूर्वंपांड २४
वोपरिपृथक्पृथक्स्वतन्त्र आसीत्ततःसःताडनकर्तृ... भीमेएवएकमहारूपेणावर्ततेतिभावः ८४॥ इत्यनंतभट्टकृतचंपूभारतटी॰प्रथमस्तबकःसमाप्तः॥ ७
क्षेत्रापूर्तादिकृत्येषुयःपूर्वंख्यातिमन्वगात् लक्ष्मीपज्ञातिजोनाम्ना... एसीधार्मिकःपरःतत्कृतोहं... ...मीत्यापवादात्वेनदत्तोहंकरकारिणा ॥ ॥ ॥

॥ अथचंपुभारतसटीकद्वितीयस्तवकः प्रारभ्यते

श्रीगणेशायनमः ॥ अथ चंपूभारतसटीकद्वितीयस्तबक प्रारंभः ॥ ॥ पूर्वस्तबकांते दुर्योधनादीनांविशेषेणद्वेषपात्रंभीमो बभूवेत्युक्तम् तद्विशदयि
तुं कुमाराणां भागीरथीजलतटगतक्रीडामाह एकदेत्यादिगद्यपद्यैः एकदातुस्फपर्व सरितःदेवनद्याः भागीरथ्याःसलिलेषुविहृत्य क्रीडित्वासमु
त्तीर्णाः जलाद्बहिर्निर्गताः अनीचीभिःमहतीभिः धातोश्चेदुगित्कार्यं तद्धंचेतरं वर्तिनियमान् नीचपर्यायन्यकुशब्दादुगितश्चेतिङीप् न्यङ्नीचस्त्र
र्यङ्स्वास्युरित्यमरः नीचीभिः लहरीभिः उत्कूलितेषु ऊर्ध्वकूलंप्रापितेषु फेनानांकूटेषुराशिष्विवेत्युत्प्रेक्षा पटगृहवाटीषु पटमंडपसमूहेषुपरिगृ

॥गद्यम् ॥ एकदातुतेसर्वेपिस्फपर्वसरितःसलिलेषुचिरंविहृत्यसमुत्तीर्णाअनीचीभिरुत्कूलितफेनकूटेष्वि
वपटगृहवाटीषुपरिगृहीतमनोहरांबरपटीरहाराभ्यवहाराःकुमाराःकुशलकुशीलवबालककुलशीलितविचित्र
वादित्रकलघोषविवशीकृतमनसःसुखमासामासुः ॥ १ ॥ ॥ ॥ ॥

हीताः स्वीकृताः मनोहराःअंबरादयोयैः अंबराणिवस्त्राणि पटीरश्चंदनःहाराःमुक्ता रत्नानांहाराःअभ्यवहारोभोजनंच तेसर्वेकुमाराःयुधि
ष्ठिरदुर्योधनादयःकुशलाःयेकुशीलवानां चारणानां बालकास्तेषांकुलेनसमुदायेन शीलिताःवादिताःविचित्रवादित्राणि मृदंगवेणुतूर्यादीनि १
कलघोषाघटाश्च तेषांरवैःविवशीकृतंस्वायत्तीकृतंमनोयेषांतथाभूताःसंतःसुखं यथातथा आसामासुर्निषेदुः ॥ १ ॥ ॥६७॥ ॥६७॥

गद्यं॥दिनविरति समीरैः सायंकालसंबंधिवा[illegible]युभिः सेव्यमानः सः भीमः तटभुवि भागीरथीतीरभूमौ रहसि एकांते रत्नपर्यंक सदृशे नलिनतल्पे कमल
शय्यायां अधिकं गाढं यथा तथा निद्द्रौ [illegible] निद्रां चकार कीदृश्यां तटभुवि कुसुमानां तादृशैः अनुपमैः गंधपूरैः सुगंधसमूहैः अलसतया निद्राविषये
आलस्यस्य हानिदाः नाशका[illegible] द्रुमाः यस्यां तस्यां अथवा आलस्यस्य हानिदाः हानिनाशकाः द्रुमाः यस्यां दो अवखंडने देवादिकः आलस्येन नि
द्रा आयातीति तत्कराद्इत्यर्थः १ ॥गद्यं॥ अथ स्वापानंतरं निशीथे मध्यरात्रे तथाभूतस्य गाढनिद्रायुतस्य तस्य भीमस्य जिघांसया हंतुमिच्छया कुरुनरें

॥पद्यम्॥ रहसिनलिनतल्पे रत्नपर्यंककल्पे दिनविरतिसमीरैः सेव्यमानः सभीमः तटभुवि कुसुमानां तादृशैर्गंधपूरै
रधिकमलसताया हानिदद्रौ निदद्रौ १ ॥गद्यम्॥ अथ निशीथे तथाभूतस्य तस्य जिघांसया कुरुनरेंद्रनंदनेन चोदितैर्न
रेंद्रैः रूपम्[illegible] युगपदेव झटिति निभृतं समुद्घाटितेषु नियंत्रणपटकेषु २ पं० सुतैः पितृस्वादिमसंप्राय शुश्रुत्सयेव श्वसनाशनें
द्राः समीरसूनुं समुपेत्य जिह्वा बहिः प्रसारान् बहुशो वितेनुः २ द्रस्य धृतराष्ट्रस्य नंदनेन दुर्योधनेन चोदितैः प्रेरितैः नरेंद्रैः विषवैद्यैः नरेंद्रो वा
र्तिके राज्ञि विषवैद्येपि कथ्यते इति त्रिकांडशेषः उपेत्य समीपं गत्वा युगपदेव झटिति शीघ्रं निभृतं गुप्तं यथा तथा नियंत्रणपटकेषु सर्पकारागृहभूतपेटकेषु
समुद्घाटितेषु सत्सु २ प० श्वसनाशनेंद्राः नागश्रेष्ठाः समीरसूनुं भीमं समुपेत्य स्फुतपुत्रोपि पितुः वायोः स्वादिमास्वादुत्वं तस्य संप्रदायः रीतिः तस्याः शुश्रुत्सये
वशोधनेच्छयेवेत्युत्प्रेक्षा बहुशः जिह्वानां बहिः प्रसारान् वितेनुः चक्रुः भीमं प्रति प्रथमं चंचलजिह्वाभिः परस्पृशन्निति भावः अत्र वायुभक्षकत्वाभिप्रायकत्वम्

सनाशनसमीर सूनुमितिच विशेष्यस्य साभिप्रायत्वात्परिकराङ्कुरः तदुक्तं साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुर इति २ सुयोधनस्य भृत्यैर्मुक्ताः पे
टान् बहिर्निष्कासिताः याताशनाः नागाः वनदेवताश्च सुमस्य तस्य भीमस्य वपुषि देहे आयुषि च आशिषोः द्वयं प्रतेनुः प्रयुयुजुः तत्र पूर्वा आशीः
अहिदंष्ट्रा वीर्यसामर्थ्यं नपुपोष चरमैव आशीः देवतानामाशीः एव वीर्यं पुपोष स भीमः नागकृतदंष्ट्रादंशनेन मृतः अपितु वनदेवताप्रयुक्ताशीर्वा

सुमस्य तस्य तु सुयोधनभृत्यमुक्ता वाताशनाश्च सपदि लायनदेवताश्च आशीर्द्वयं वपुषि चायुषि च प्रतेनुः पूर्वा न तत्र
चरमैव पुपोष वीर्यं २ मर्मदत्तरशना भुजंगमा मारुतेर्वपुषि यस्य भूरुहः सुप्तिमप्यतनवोविरं जिरं मूलिका इव बहिर्विनिर्गताः ५

देन तस्यायुर्वृद्धिर्जातेति भावः आशीर्हिताशंसा हि दंष्ट्रयोरित्यमरः आ
शीरस्यात्सुगता जिह्वा यया स्पृष्टो न जीवतीत्यभिधानं च ३ मारुतेः भीमस्य वपुषि मर्मसु मर्मस्थानेषु दत्ताः रसनाः जिह्वाः येषु मुकुटीभूताः मूलिकाः -
अल्पमूलानीवेत्युत्प्रेक्षा सुप्तिमेयाः परिमातुं योग्याः तनवो येषां ते भुजंगमाः सुप्तिरव निद्रेव भूरुट् वृक्षः तस्य बहिर्विनिर्गताः वटादिवृक्षाणामिव
बहिः प्रकटीभूताः मूलिकाः अल्पमूलानीवेत्युत्प्रेक्षा चिरंजिरं शुश्रुभिरे ॥ ५ ॥ ॥ ६७॥ ॥ ६७॥ ॥ ६७॥

२

॥गद्यं॥ अपरे द्युरपि तदुत्तरदिनेपि मुग्धधीः मूढ धीः सः दुर्योधनः स्निग्धइव मित्रमिव पुनः आजीवंतं पूर्ववत् सजीवं निद्रया अरुणेलोहिते नयनकमले
यस्य तं जघि केलिकायां सहभोजनक्रियायां आरालिकानां बल्लवानां करैर्दापितेषु कवलेषु मोदकादिग्रासेषु निचोलितं आछन्नं कालकूटं तीक्ष्णं गर
लं तेन विव्हलं व्याकुलं अतएव प्रव्हलंबि अधोलंबि शिरो यस्य असुहृदां शत्रूणां हृदि मनसि स्थूलं शूलमिव दुःखप्रदं तं गाढं परिणाहिनीभिः दी
र्घाभिः रज्जुभिः परिणाहवर्त्तकैः बंधयित्वा शूलकीलितैर्निजरनरैर्नरोमार्गारथ्याः अंतर्जले जलमध्ये विसर्जयामास तत्याज ७ ॥पद्यं॥ तदानीं-

॥गद्यं॥ अपरेद्युरपि पुनराजीवंतं निद्रारुणनयनं राजीवंतं समुग्धधीः स्निग्धइव जघि केलिकायामारालिकप्र
दापित कवलनिचोलितकरालगरलविव्हलं प्रव्हलं बिशिरसं रज्जुभिः परिणाह्य परिणाहिनीभिरसुहृदां हृदि
शूलस्थूलं कीलितैर्निजरसारैर्दंतर्जले विसर्जयामास ॥पद्यं॥ तेषां तदा धृतराष्ट्रजानां तैरश्चतीरैर्दिवि
षत्तटिन्याः मरुत्सुतं मारयितुं प्रवीरं सारागुणाः साधनतामवापुः ५ ॥ ॥ ॥

धृतराष्ट्रजानां तेषां दुर्योधनादीनां प्रवीरं महावीरं मरुत्सुतं भीमं मारयितुं हंतुं दिविषदां देवानां तटिन्याः मार्गारथ्याः तीरैस्तीरैश्च क्रमेणामाराः अ
रेणाविशेषणसहिताः गुणाः सूदाः साराः दृढाः गुणाः रज्जवश्च साधनतां सहायतां अवापुः सूदा औदानिका गुणा इत्यर्थः यद्वा मरुत्सुतं मारयितुं प
ताललोकस्यामृतपानेन मारं मदनतुल्यं कर्तुं सारागुणाः सहायतामवापुः ५ ॥ ॥७॥ ॥७॥ ॥७॥ ॥७

॥ गद्यं ॥ ततः गंगाजले भीमविसर्जनानंतरं पातालस्लोके भागीरथ्यंतर्गतमार्गेण तस्य भीमस्यागमनेन यत्कौतुकं आश्चर्यं तद्विशिष्टेन वासु-
किना नागराजेन भाशनार्थामृतदानादिना संमानितः धृतिमान् धैर्यवान् सर्वसमायामपि प्रोप्यभीत इति भावः प्रभंजनभूः भीमः ततस्ततः तस्मिं तस्मि
न्स्थले अष्टासु दिशासु तस्याः अष्टसंख्यायाः अनुगुण अनुरूपं परिगणनं यस्य तस्य दिनगणस्य दिनाष्टकस्य अत्ययेन अतिक्रमेण शां
किते तन्मरणादिशंकायुते इतरैः अपत्यैः युधिष्ठिरादिभिश्चतुर्भिः पुत्रैः सह विचित्य भीमान्वेषणं कृत्वा हे वत्स हे रिपुमर्दनशत्रुपराजयकारिन् हे

गद्यं ॥ पातालभुवि तदागमनकौतुकिना वासुकिना संमानितः सधृतिमानितस्ततो ष्टासु दिशासु तदनुगुणपरिगण
नदिनगणात्ययशंकितैरितरैरपत्यैः सह विचित्य वत्स रिपुमर्दन भीम क्व वा निषीदसीति निषीदंत्याः कुंत्याः नवमम
पि वासरमनवममेव संजनयन्प्रभंजनभूरमृतांजनैरिव दृशौ रंजयामास ४ आगतस्य तस्य मदावलाग्रतवलावह्नानं
गृदाकुपरिघदुपदापितदशफलशपीयूषाणांपानाद्विशेषपरिपोषगात्रं सवित्री भुजांतर इव कोर वहृदये पिमोदविषादसं
पदोनममतुः ५ भीम क्व वा निषीदसि निषण्णोसि इत्याक्रोशेन विषीदंत्याः खेदं कुर्वत्याः कुंत्याः दृशौ अमृतांजनैरिवेत्युत्प्रेक्षा रंजयामास स्व
स्मिन् अनुरक्ते चकार यथा कश्चित्सिद्धामृतांजनैः दृशौ रंजयित्वा सुखयति तद्वत् किं कुर्वन् अनवममपि वासरं दिनं नवमं नभवति इत्यनवममेवं संज
नयन् कुर्वन्निति विरोधः नअवमं अनवमं अनिंद्यमित्यर्थेन तत्परिहारः ४ पातालादुपरि आगतस्य तस्य भीमस्य गात्रं शरीरं सवित्र्या मातुः कुंत्याः

भुजयोः अंतरे मध्यभागे इव सोदराणां युधिष्ठिर... दीनां कौरवाणां दुर्योधनादीनां च हृदये पिक्रमेण मोदविषादानां हर्षखेदानां संपदोन मममतुः यथा आ
लिंगनसमये मातुर्भुजांतरे न ममौ गदा... नागजानां पीयूषाणां अयुतस्य दशसहस्रस्य बलावहानां बलसमर्पकाणां पृदाकुपरिषदा सर्पसभया उप
दार्पितानां दशकलशपरिमितानां पीयूषाणां पानात् प्राशनतः विशेषितः पूर्वस्माद् निशापितः परिपोषः पुष्टिर्यस्य तत् इदं भुजयोर्मध्ये अमानस्य हृदये
हर्षविषादयोरमानस्य च हे तुगर्भ विशेषणं ५ पद्यं ॥ तदनंतरं ॥ प्रज्ञादृक् ज्ञानचक्षुः धृतराष्ट्रः तानपि पांडवानपि कार्मुककौशलस्य धनुषि पटुत्वस्य प

प० तदनंतरं ॥ काष्ठां परां कार्मुककौशलस्य काष्ठाः परास्तानपि तद्यशोपि प्रज्ञादृगारोपयितुं प्रवृत्तो व्यज्ञापयद्विष्णुपदीतनूजं ६ ॥ ग० सोपि कृत्यविदामग्रणीरपरेणेव शरजन्मना कृपेण बहुकृपेण निरवद्यवीरयशां निषद्यां चापविद्यामापाद्यार्पितां पुनरुक्तयितुं दिशि दिशि जैत्रगुणं पौत्रगणं महता धननिवहेन सह विविधधनुरागमप्राणस्य द्रोणस्य चरणयोरुपहारी चकार ॥ ५ ॥

शं काष्ठां अवधिं आरोपयितुं नेतुं तेषां पांडवानां यशोपि पराः काष्ठाः दिशः आरोपयितुं नेतुं प्रवृत्तः सन् विष्णुपद्याः भागी... ग्याः तनूजं पुत्रं भीष्मं व्यज्ञापयत्
विज्ञापितवान् ६ गद्यं ॥ कृत्यविदां कार्यविदां अग्रणीः श्रेष्ठः सः भीष्मोपि अपरेण शरजन्मनेव स्कंदेनेव बहुकृपेण कृपेण कृपाचार्येण निरवद्यानां निर्दोषाणां
वीरयशसां निषद्यां आपणरूपां चापविद्यां आपाद्य संपाद्य अर्पितां चापविद्यां पुनरुक्तयितुं अधिकां कर्तुं दिशि दिशि जैत्राः जयनशीलाः गुणाः यस्य तं पौ
त्राणां धर्मादीनां दुर्योधनादीनां गणं समूहं महता धननिवहेन सह विविधो नानाप्रकारो यो धनुरागमः धनुर्वेदः तस्य प्राणस्य द्रोणस्य द्रोणाचार्यस्य चरणयो

रूपहारीचकार चापविद्यापूर्णतार्थपौत्रान् द्रोणाचार्यनिकटेस्थापितवानितिभावः ६ तयोः प्रस्तुतयोः सिंधुजातोनदीपुत्रोभीष्मः कलशीभूः द्रोणज-न्माद्रोणः तयोः अस्मिन्ग्रंथेद्रोणकलशपोः पात्रत्वसामान्यात् द्रोणघटकलशकुंभशब्दप्रयोगः तादृशंलोकाविलक्षणंस्नेहभारंस्नेहातिशयंअवलोक्यपौराणांनिकरः समूहः तत्रतस्मिन् चित्रपूरजठरे आश्चर्यपूरमध्येनिमज्जनंसमाचरत् अकरोत् इति प्रस्तुतार्थः सिंधूनांसमुद्राणांजातंसमूहः कलशीभूः घटजन्मा अगस्त्यः तयोः परस्परशात्रवयोः स्नेहभारं अवलोक्य जनः आश्चर्यपूरे निमज्जनंचकारेति अप्रस्तुतार्थस्यापिस्फुरणात् पौरनिकरइतिकर्तृपदेश्लेषाभावाच्चसमासोक्तिरलंकारः तदुक्तं समासोक्तिः परिस्फूर्तिः प्रस्तुते ऽप्रस्तुतस्यचेदिति ७ गुणिनः गुणविशिष्टास्तेकुमाराः कुं

पद्यं॥ सिंधुजातकलशीभुवोस्तयोः स्नेहभारमवलोक्यतादृशं तत्रपौरनिकरः समाचरच्चित्रपूरजठरेनिमज्जनं ७ कुमारास्तूर्णमारुक्षन्कुंभयोनेरनुग्रहात् कोटिंकोदंडसारस्यगुणिनस्तेगुणाइव ८ ॥ ॥

भः द्रोणः योनिः उत्पत्तिस्थानं यस्यतस्य द्रोणाचार्यस्य अनुग्रहात् तूर्णंशीघ्रंगुणाइवकोदंडसारस्य कोटिं आरुक्षन् आरोहणं कृतवंतः अत्रगुणगुणिनोः सामा नाधि करण्यं एक... दंडमारकोटौ जातमित्यर्थोकिं संभवस्तु गुणाः शौर्यनम्रतादयः तद्विशिष्टाः कुमाराः कोदंडसारस्य चापविद्यासारांशस्य कोटिंउत्कर्षं आरुक्षन् के इव गुणाइव यथागुणाः मौर्व्याः कोदंडश्रेष्ठस्यकोटिं चापाग्रभागंआरोहंतितद्वत् कोटिः स्त्रीधनुषोऽग्रेश्रेणौसंख्याभेदप्रकर्षयोरितिमेदिनी ८ ॥६२॥ ॥६२॥ ॥६२॥ ॥६२॥ ॥६२ ४

कदाचित् कूलस्थस्य भागीरथीतीरस्थस्य कुरुकृतानां धर्मादीनां सदसः समूहस्य अनुकुर्वन् अनुकुर्वता सिंधुभुवि नद्या भूमौ वर्धमानः सिंधुभु
वा भीष्मेण हेतुना वर्धमानस्य। पक्षे सदसः विभक्तिविपरिणामेन संबंधः कश्चिद्ग्राहः नक्रः जलानां मध्ये स्नातुं चिरं कृतावसतिर्येन तस्य कुं
भयोनेः द्रोणस्य स्फुटाकमलस्य रुगिव रुक् तिर्यस्तौ पादौ आदौ निपीड्य नितरां पीडयित्वा पक्षे वंदित्वा अंतेवसत्वं समीपस्थत्वं पक्षे शिष्यत्वं च
बिभ्रत् सन् स्वयमपि महांतं विजयस्य अर्जुनस्यास्त्यागमेन अस्त्रप्राप्त्या अंतं मृत्युं पक्षे विजयप्रापकास्त्राणां आग्नेयवायव्यब्रह्मास्त्रादीनां आगमस्य

कूलस्थस्यानुकुर्वन् कुरुकृतसदसः कुंभयोनेः कदाचित्स्नातुं मध्ये जलानां चिरकृतवसतेः सिंधुभूवर्धमानः आदौ पादौ
निपीड्य स्फुटकमलरुचौ बिभ्रदंतेवसत्वं ग्राहो जग्राह कश्चित्स्वयमपि विजयास्त्यागमांतं महांतं १ ग॰ ततस्ते सर्वोत्तरा अपि
शरासेषु दक्षिणा गुरुदक्षिणां कुरुत महं द्रुह्यतो द्रुपदस्य युधिबला गृहीतस्य समर्पणमिति गुरुणा चोदिताः सर्वेप्यहंपूर्विक
या विमतेषु कृतावज्ञसेनं याज्ञसेनं पुरं निरुध्याचिरमयुध्यंत ८

प्राप्तेः अंतं पारं जग्राह स्वीचकार ग्राहेण शिष्यत्वमानीतमिति चमत्कारः १
गयं॥ ततः विद्याभ्यासानंतरं सर्वेभ्य उत्तरा उत्तरदिक्स्थाः अपि शरासेषु चापेषु दक्षिणाः दक्षिणादिक्स्थाः इति विरोधः उत्तराः श्रेष्ठाः दक्षिणाः कुशला इति
विरोधपरिहारः महं द्रुह्यतः द्रोहं कुर्वतः अतएव युधि बलाद्गृहीतस्य द्रुपदस्य समर्पणं गुरुदक्षिणां कुरुत इति गुरुणा द्रोणाचार्येण चोदिताः प्रेरिताः सर्वेपि
ते पांडवाः कौरवाः कर्णादयश्च शिष्याः अहंपूर्विकया अहंपूर्वमहंपूर्वमिति भावेन कृता अवज्ञा कुंठता यस्याः सेना यस्य स याज्ञसेनः यज्ञसेनस्य द्रुपदस्य संबंधि पुरं-
निरुध्यावेष्ट्याचिरमयुध्यंत ८॥ ॥

।।पद्यं।। गुरुवेद्द्रुह्यतीति गुरुद्रो ही नस्यद्रुपदस्य धनुषिभल्लैः बाणैः कृत्तेछिन्नेसतिर्जीवग्राहे जीवतः ग्रहणविषयेस्कबलनाम्नोराज्ञःदुहितुःकन्यायाः-
गांधार्याःपुत्रावल्यां पुत्रपंक्तौ पूर्वपक्षीभवंत्यां पूर्वपक्षत्वं स्वीकुर्वन्त्यांसत्यांजीवग्राहे भारंभंकुर्वत्यां सत्यामित्यर्थः सव्यसाची अर्जुनःसिद्धांतःसिद्धां
तोत्तरतुल्यःजीवतोग्रहणकर्तायुद्धसमाप्तिकारीचाभवत् यथाशास्त्रिसभायां अनेककृतपूर्वपक्षोप मर्दकःसिद्धांतोभवति तथार्जुनोजातइति
भावः कथंभूतःसव्यसाची बाहायाःभुजस्य अंचले अग्रेहस्तेइत्यर्थः परिचलंती खड्गवल्लीवसहायोयस्यसः दिविस्वर्गे भुविलोकेच बुधैःदेवैःपंडि

कृत्ते भल्लैर्धनुषिसगुरुद्रोहिणस्तस्यजीवग्राहेबाहांचलपरिचलत्खड्गवल्लीसहायः पुत्रावल्यांस्कबल दुहितुःपूर्वपक्षीभ
वंत्यांसिद्धांतोभूद्दिविभुविबुधैःश्लाघितःसव्यसाची १० पार्थमेवपुरतोनिधायतेपौरवास्तदनुसन्निधौगुरोः भक्तिभिर्व्य
नमयन्निजंशिरःपार्षतस्तपरिभूतिलज्जया ११ अथोगुरुर्नीतमधिज्यधन्वनापुरःप्रदेशंपुरुहूतसूनुना तरंगिताक्षंतम
वेक्ष्यविद्विषंवचोगभीरं वदतिस्मसास्मितः १२

तैश्चश्लाघितः १० तदनुतेपौरवाःपार्थं अर्जुनमेवपुरोनिधायगुरोःसन्निधौभक्तिभिःनिजं
शिरःव्यनमयन् पार्षतःद्रुपदस्तपरिभूत्यास्वपराभवेनयालज्जातयानिजंशिरःव्यनमयत् इतिवचनविपरिणामेनान्वयः अत्रपौरवाणांद्रुपदस्यचवर्ण्या
नामेवशिरो नमनैकक्रियान्वयित्वेनतुल्ययोगितालंकारः तदुक्तं वर्ण्यानामितरेषांवाधर्मैक्यंतुल्ययोगितेति ११ अथोसस्मितःईषद्धास्यसहितःगुरुः अधिज्य
धन्वनापुरुहूतसूनुना अर्जुनेनपुरःप्रदेशंनीतंस्थापितंतरंगितेनयनेचंचले अक्षिणीयस्यतंविद्विषंशत्रुंद्रुपदंअवेक्ष्यगभीरंवचःवदतिस्मउवाच १२।। ६२।। ५

गद्यं॥ अथतंव्याजस्कृत्याह गद्यपद्याभ्यां अरेइति अरेक्षत्रियसत्तममहत्तरं अतिमहांतं अग्निदेश्यं अग्निसदृशं अग्निवेश्यनामानंमुनिं अस्त्र
परिश्रमाय अस्त्रविद्याभ्यासाय प्रश्रयेण नम्रतयासहशुश्रूषमाणस्त्वं मत्कृते मदर्थेपितुः अनंतरं ममाधिराज्यपदस्य प्रथमं अर्धं आदौभवतेतु-
भ्यंवितीर्यदत्वाततःपरं अवशिष्टं अर्धंअहं अनुभविष्यामीतियत् यथायेनप्रकारेण प्रत्यशृणुथाःप्रतिज्ञामकरोः तत्तथातेनप्रकारेणधिग्विप्रमि
तिस्फुरप्रवरप्रायेणतीक्ष्णत्वेनक्षुरतुल्यवाणविशेषश्रेष्ठतुल्येनविप्रियवचनेनप्रथीयसीं अतिमहतीं ममममनसिव्यथांवितीर्णवतादत्तवतामहा

गद्यं॥अरेक्षत्रियसत्तमपुरामहत्तरमग्निदेश्यमग्निवेश्यंमुनिमस्त्रपरिश्रमायप्रश्रयेणसहशुश्रूषमाणस्त्वंमत्कृतेपितुरनंतरंम
माधिराज्यपदस्यप्रथममर्धंभवतेवितीर्यततःपरमर्धमहमनुभविष्यामीतियद्यथाप्रत्यशृणुथास्तत्तथानिर्वर्तितंखलुधिग्विप्रमि
तिक्षुरप्रवरप्रायेणाविप्रियवचनेनप्रथीयसींममममनसिव्यथांवितीर्णवतामहार्णवरशनेवतींवसुमतींस्वयमेवानुभवताभव
ता १ पद्यं॥आबालवृद्धंजडसक्तमेवजनाःसमस्ताद्द्रुपदंयदाहुः तस्मात्त्वयास्वीकृततादृशाख्येकथंनुभ्यःन्येतनमित्रतेजः १२

र्णवएवरशनाकांचीतद्वतींसमुद्रसहितामित्यर्थः वसुमतींस्वयमेवानुभवताभवतानिर्वर्तितंखलुकृतंखलुनिश्चयेन १ पद्यं॥ यद्यस्मात् आबालवृ
द्धं बालवृद्धानभिव्याप्य समस्ताःजनाःद्रोःवृक्षस्यपदंमूलंजडसक्तंजडलयोरभेदाज्जलेसक्तं आसक्तमेवमूर्खेसक्तमेवच आहुःवदंतिविपश्चितइति
शेषःतस्मात्स्वीकृतातादृशी आख्यानामयेनतस्मिन् त्वयिद्रुपदे मित्रतेजःसूर्यतेजःसुहृत्तेजश्चकथंनभज्येत अपितुभज्येतैव यथाजलसक्तेवृक्षमू

ले सूर्यतेजः नप्रसरति तथाजडसक्तपुरुषेसकृहत्तेजः नप्रसरतीतिभावः अत्रयोगेन द्रुपदेतिनाम्ना करणात् निरुक्त्यलंकारः १२ व्याजस्तुतिव
चनेननिंदापर्यवसायिवचनेन पौर वाणां अंतेसमीपेवसताभार्गवस्यपरशुरामस्य अंतेवसताशिष्येणप्रधर्षितः कृत्यविदां ककुदः प्रधानः पा
र्षतः द्रुपदः तेन द्रोणेनसार्धं अर्धराज्यस्यपरि वर्तनन विनिमयेनपरं केवलं पूर्वोक्तंवचनं अंगीकृत्यस्वीकृत्यतोउभावपि कुंभजंभरिपुभ्यां घ
टमेहेंद्राभ्यांसंभवोजन्मययोस्तौदोणार्जुनौ उपयममेव प्रथमं द्रोणं यमसमीपमेव प्रवर्तयितुंप्रेषयितुं द्वितीयमर्जुनं उपयमं विवाहमेवप्रवर्त

गद्यं॥ इतिव्याजस्तुतिवचनेनपौर वांतेवसताभार्गवांतेवसताप्रधर्षितः पार्षतस्तेन सार्धमर्धराज्यपरि वर्तनेन परमंगी
कृत्यकृत्यविदांककुदस्तौजंभरिपुकुंभसंभवावुभावप्युपयममेवप्रवर्तयितुंकृतक्रतुनिर्वर्तनः सोमकांतिकोपा
स्योपुत्रोभागीरथीतटवनावसथस्ययाजस्यमुनिराजस्ययाजनानुग्रहेणपरिजग्राह ॥ १० ॥ ॥ ॥

यितुं प्रापयितुं कृतंनिर्वर्तनं क्रतुसमापनं येनतथाभूतः सन् सोमकांतिः चंद्रकांतिश्च कोपश्चताभ्यां युक्तेआस्येययोस्तौसोमकैः द्रुपदसेवक
विशेषैः अंतिकेसमीपे उपास्योसेव्योच पुत्रीच पुत्रश्चपुत्रौद्रौपदीधृष्टद्युम्नौ भागीरथीतटवनं आवसथः स्थानं यस्यतस्यमुनिराजस्य य
अस्य याज नाम्नः याजनमेव हस्तेनपुत्रेष्टीकरणमेवानुग्रहः तेनपरिजग्राह स्वीचकार वीरोर्जुनोजामाताभवतुद्रोणस्तु मत्पुत्रहस्ता
त् म्रियतामिति कन्यापुत्रौ यज्ञकर्मणासंपादयामासेतिभावः १० ॥ ६२॥ ॥ ६२॥ ॥ ६२॥ ॥ ६

॥पद्यं॥ ततोऽपि धृतराष्ट्रोपितपोभिः लब्धंचक्षुरिवेत्युत्प्रेक्षा अमुं धर्मतनयं धर्मराजं तपनीयपीठं सुवर्णसिंहासनं आरोप्य आवर्जितैः भागीरथ्यादि-
भ्यः संपादितैः कलशवारिभिः अभ्यषिंचत् पौराः पुरःसंबंधिजनाश्च आनंदबाष्पसलिलैः अवनिं भूमिं अभ्यषिंचन् तस्य यौवराज्याभिषेकेण सर्वे
षामानंदोजातइतिभावः १४ अंगदेन केयूरेण निर्विशेषं तुल्यं यथा तथा धरणिं आबिभ्रतः धारयतः स्वभुजबलेन भूमिं पालयतः वासवसन्निभस्य पराक्रमे

॥पद्यं॥ ततोऽपि धर्मतनयं तपनीयपीठमारोप्य चक्षुरिव लब्धममुं तपोभिः आवर्जितैः कलशवारिभिरभ्यषिंच
दानंदबाष्पसलिलैरवनिं च पौराः १४ आबिभ्रतो धरणिमंगदनिर्विशेषं नानाधनायतिभिरस्य नयोदिता-
भिः पस्त्यं समस्तमपि वासवनंदनस्य कोशीबभूव कुतुकैः सह कौरवाणाम् ॥ १५ ॥ ॥ ॥

इंद्रतुल्यस्य धर्मराजस्य येन नीत्या उदिताभिः उत्पन्नाभिः नानाधनानां आयतिभिः धनाद्यागमैः समस्तमपि पस्त्यं गृहं कौरवाणां कुतुकैः आल्हा
दैः सह कोशीबभूव तत्र गृहं कोशीबभूव द्रव्यैः परिपूर्णबभूव कौतुकं तु कोशीबभूव कुड्मलीबभूव संकोचं भापेत्यर्थः कुतुकैः सह कोशीबभूवेति-
जनरंजनसाहित्योक्तेः सहोक्तिरलंकारः तदुक्तं सहोक्तिः सहभावश्चेद्भा सते जनरंजन इति॥१५॥ ॥६५॥ ॥६५॥ ॥६

चं·भा· ७ अथ-धर्माभिषेकानंतरं पारे सिंधुसमुद्रपरतीरे मथितं प्रसिद्धं प्रत्यहं वर्धमानं तं पार्थानां अभ्युदयं कीर्तिधनागमादिरूपं सोढुमपटोः असमर्थस्य दी·म· १
स्वात्मजस्य स्वपुत्रस्य दुर्योधनस्य अनुरोधात् मनोरथानुरूपव्यापारात् प्रीतो राजा धृतराष्ट्रोपि अनुजस्य कनिष्ठबंधोः पांडोः तनयानां प्रेममार्गं प्रया
तुं गंतुं मातुः अंबिकायाः दोषात् पुत्रार्थं देवरं व्यासं प्रतिगमनसमये स्वनेत्रबंधनापराधात् बहिरिव बहिरिंद्रिय चक्षुषीव अंतरपि अंतःकरणेपि अं-

पारे सिंधुमथितमथ तं प्रत्यहं वर्द्धमानं सोढुं पार्थाभ्युदयमपटोः स्वात्मजस्यानुरोधात् प्रीतो राजाप्यनुजतनयप्रे
ममार्गं प्रयातुं मातुर्दोषादिव बहिरगादंतरप्यंधभावं १६ ॥ गद्यं ॥ तदनु सौबलीजानिरसौ बलीयसामर्षेणध
र्षितः सहजविनयं धर्मतनयमाहूय कृतावहित्थो गिरमित्थमुत्थापयामास ॥ ११ ॥ ॥ ॥

धभावं अंधत्वं अगात् प्राप्तवान् यथा बहिश्चाक्षुषज्ञानाभाववान् तथांतःकरणेपि विचारशून्यो जात इति भावः १६ ॥ गद्यं ॥ तदनु बलीयसा
अतिबलवता अमर्षेण क्रोधेन धर्षितः पराभूतः सौबली गांधारी जाया यस्य सोसौ धृतराष्ट्रः सहजः स्वतःसिद्धः विनयो यस्मिन् तं धर्मतनयं धर्मरा ७
जं आहूय कृता अवहित्था आकारगोपनं येन तथाभूतः सन् इत्थं वक्ष्यमाणप्रकारेण गिरं उत्थापयामास उवाचेत्यर्थः ॥ ११ ॥ ॥७॥ ॥७॥

हेवत्स संप्रति वारणावतनामकं पुरं उपेत्य गत्वा विपदां वारणाय नाशाय वारणाननस्य गजाननस्य गुरोः पितुः शिवस्य उत्सवं निषेव्य अनुभूय तत्र वार-
णावते वास्तव्यः वसन् वसेस्तव्यत्कर्तरीति कर्तरि तव्यप्रत्ययः पौरजनेभ्यः भवा उत्पद्यते तया गिरा वाण्या स्तव्यः स्तुत्यः त्वं वसुधां निरवधि सुखं अप
रिमितसुखं यथा तथा अनुशाधि पालय इति १२ ॥पद्यं॥ तस्य धृतराष्ट्रस्याशयं केनचिन्निमित्तेन पांडवाः ग्रामांतरे स्थाप्या इत्यभिप्रायं हृदि स्वमनसि
विदन्नपि जानन्नपि धर्मसूनुः तातस्य वाचं अविलंब्य विलंबमकृत्वा तथेति तथास्त्वित्युक्त्वा अगृण्हात् स्वीचकार तादृशेषु गुरुशासनानां गुर्वाज्ञानां-

॥गद्यं॥ वत्स संप्रति वारणावतं पुरमुपेत्य वारणाननगुरोरुत्सवं वारणाय विपदां निषेव्य सहानुजैस्तत्र वास्तव्यो निरवधिसुखम
नुशाधि वसुधामिति १२ प० तस्याशयं हृदि विदन्नपि धर्मसूनुस्तातस्य वाचमविलंब्य तथेत्यगृण्हात् तादृशेषु गुरुशासनपाल
नेषु कूलंकषं गुणगणेन कुलं हि पूरोः १७ धर्मभूरनुजैः साकं तद्गिरा तत्पुरं ययौ कर्मचोदनया जीवः कायमन्यमिवेंद्रियैः ॥१८

पालनेषु तनू प्रसिद्धं पूरोः कुलं गुणानां गणेन समूहेन कूलंकषं परिपूर्णं अत्र पूर्वार्धोक्तविशेषस्योत्तरार्धोक्तसामान्येन समर्थनादर्थांतरन्यासोलंकारः तदु
क्तं उक्तिरर्थांतरन्यासः स्यात्सामान्यविशेषयोरिति १७ धर्मभूः धर्मराजः अनुजैः बंधुभिः साकं तस्य धृतराष्ट्रस्य गिरा तत्पुरं वारणावतनगरं ययौ जगाम कः
कैः सह कमिव जीवः लिंगदेहविशिष्टः इंद्रियैः सह कर्मणः पुण्यपापरूपस्य चोदनया प्रेरणया अन्यं कायं देहमिव १८॥ ॥६७॥ ॥६७॥

अथपार्थाः तत्र वारणावते शत्रोः दुर्योधनस्य सचिव वरेण अमात्यश्रेष्ठेन पुरोचनेन सविनयं यथातथा दर्शितंमहीयः अतिविशालं विशेषवस्तु भिःपदार्थैः पूर्णं जतुगृहं लाक्षानिर्मितं गृहं नूलं नूतनंजग दिव अभजंत १९ तत्रतस्मिन् जतुधाम्नि लाक्षागृहे तेपांडवाः सुबलायाः देवमातुः अपत्यंपुमान् सौबलेयःसचासौ शतमन्युःक्रोधः हेतुर्यस्य तेन धनंजयस्य अर्जुनस्यप्रापणेन प्राप्त्या स्वेषांएका पंचतापंचत्वं संख्या अस्ति अथविदुरभृत्य भाषितैः विदुरप्रेषित भृत्यभाषणैः सौबलेयानां गांधारेयाणां दुर्योधनादीनां शतमन्युःइंद्रः हेतुःकारणंयस्यतेनधनंजयस्य अग्नेःप्रापणेन अन्यामपि पंचतां मरणं मेनिरे

सविनयमथदर्शितंमहीयःसचिववरेणपुरोचनेनशत्रोः जतुगृहमभजंततत्रपार्थाजगदिवतुलमशेषवस्तुपूर्णं १९ तत्रते
विदुरभृत्यभाषितैःसौबलेयशतमन्युहेतुना पंचतामपिपरांधनंजयप्रापणेनजतुधाम्निमेनिरे २० शिशमयिषुरपि
द्विषांसमंत्रीनिभृतशारारुरिमान्निगूढभावान् अवसरमनलावृतेनिकेतेप्रतिदिनमेधयितुंप्रतीक्षतेस्म २१ मानितवंतः धनंजयप्राप्त्या एकापंचतास्तितथैवान्यापिस्यादितिनिश्चितवंतइतिभावः २० निभृतःगुप्तःशारारुःघातुकः द्विषांशत्रूणांमंत्रीसः पुरोचनः निगूढःगुप्तःभावःस्ववधकरणरूपोभिप्रायोयेषांतान् इमान् पांडवान् शिशमयिषुःशमयितुमिच्छुरपि अनलावृते अनलोद्दीपकलाक्षादिवस्त्वावृते निकेतेगृहे एधयितुं वर्धयितुं प्रतिदिनंअवसरं प्रतीक्षतेस्म प्रतीक्षांचक्रे इतिविरोधःशिशमयिषुःमारयितुमिच्छुःअनलआवृते अनल व्याप्ते गृहे एधयितुं एधान् काष्ठानि कर्तुं दग्धुं अवसरं तेषां असावधानतायुक्तसमयं प्रतीक्षतेस्मेतिविरोधपरिहारः २१॥ ॥८॥ ॥८॥ ॥८॥ ८

गद्यं ॥ जातुचित् कदाचित् अपत्यैः पंचभिः पुत्रैः सह मृत्यभावमिषात् सेवकत्वकपटात् हेतोः अमीषां पांडवानां आमिषफलेषु भक्ष्यफलेषु भक्ष्यमांस
फलेषु या विषं निनीषंत्याः गुप्तं स्थापयितुमिच्छंत्याः निषादयोषित इव तस्य पुरोचनस्य निद्रायामपि द्राघिमाणं दीर्घत्वमरणमित्यर्थः दातुकामः इच्छा
यस्य तेन जननी सोदरजनानां नीचैतरन् बहुलं यन् संवेशास्फरवं निद्रास्फरवं तदर्थं मणिमचायमाना रत्नमयमंचकवदाचरंती भुजशिखरयोः स्कं
धयोः सीमा यस्य तेन भीमेन तत्र तस्मिन् सद्मनिक्षणदायां रात्र्यां आशुशुक्षणिं अग्निं क्षणान्निक्षिप्य विदुरकिंकरेण कृतं लिंगं गुप्ताकारो यस्याः

॥ गद्यं ॥ जातुचिदपत्यैः सह मृत्यभावमिषादमीषामामिषफलेषु विषं निनीषंत्या निषादयोषित इव तस्य पुरोचनस्य नि
द्रायामपि द्राघिमाणं दातुकामेन तत्र सद्मनि क्षणदायामाशुशुक्षणिं क्षणान्निक्षिप्य जननीसोदरजननीचैतरसुखसंवे
शा मणिमंचायमान भुजशिखरसीमेन भीमेन विदुरकिंकरकृतलिंगया सुरंगया निर्जग्मे १२ प० पार्थो ०षां विग्रहमेकमेकं वि
भज्य सप्तापि शिखाः कृशानोः स्वीकृत्य तृप्ताः स्वशिरःप्रकंपैः संश्लाघिरे तत्र समीरसूनुं २२ तया सुरंगया विवरेण निर्जग्मे बहिर्निर्गतं जतुगृ
हाग्निना सपुत्र निषादी पुरोचनौ दग्धुं तत्राग्निं प्रक्षिप्य गुप्तमार्गेण जननी बंधुभिः सह भीमो जगामेति भावः १२ प० कृशानोः अग्नेः सप्तापि शिखाः जिह्वारू
पाः ज्वालाः पार्थद्विषां निषादी तत्पुत्र पुरोचनानां सप्तानां एकं एकं विग्रहं शरीरं विभज्य स्वीकृत्य च तृप्ताः सत्यः स्वशिरःप्रकंपैः स्वाग्रचालनैः समीरसूनुं
स्वमित्रपुत्रं भीमं संश्लाघिरे श्लाघितवत्य इवेति इवादिकपदाभावात् गूढोत्प्रेक्षालंकारः ॥ २२ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥

प्रभातेज्वलद्गृहं अपश्यतां अतएव सांक्रामिकं संसर्गजन्यं खर्जूप्रभृति रोगमिव अभितापं आबिभ्रतां धारयतां अग्नेस्तापो दाहेन लाक्षागृहे वर्तते
तद्गृहदर्शनसंसर्गेण प्रपश्यतां तापो जात इत्यर्थः पौरजनाभितापो दुःखजन्यः पौरनृणामश्रुभिः रोदनजन्यनेत्रोदकैरेव तत्र गृहे अग्नेः हठात्क्रि
यायाबलात्कारेण दाहक्रियायाः शांतिः आपादि संपादिता पौरजनैः स्वापायैरग्निशांतेरभावाद्धुदितमिति भावः २३ अथ सुयोधनाद्याः सभायां
निजचाराणां स्वकीयदूतानां वाचा तत्र तस्मिन् आलये जतुगृहे एतान् पार्थान् दग्धतनून् निश्चित्य दुःखापदेशेन दुःखमिषेण संमोद बाष्पं आनं

प्रपश्यतां पौरनृणां प्रभाते सांक्रामिकं रोगमिवाभितापं आबिभ्रतामश्रुभिरेव शांतिरापादि तत्राग्नि हठात्क्रियायाः
२३ तत्रालये दग्धतनूनथैतान्निश्चित्य पार्थान्निजचार वाचा दुःखापदेशेन सुयोधनाद्याः संमोदबाष्पं ससृजुः सभायां
२४ गद्यं॥ तावत्सोपि गंधवहसूनुरंधतमसधुरंधरं सक्थिजवसमुत्थितमरुदुत्पाटिततरुविटपविघट्टनसमुद्भ्रांतशकुं
तकुलबद्धनिध्वानमध्वानं विलंघ्य कस्यचित्काननकासारतीरतरोरधिपरिसरमेतानवतार्य तदीयपरिरक्षणविचक्षण
जागरः क्षणमवतस्थे १४

दजन्यनेत्रजलं ससृजुः तत्यजुः मनस्यानंदो जातो बहिर्दुःखाभिनयः कृत इति भावः २४ गद्यं॥ यावद्गृहदाहादिव
लितं तावत् सः गंधवहसूनुः भीमोपि अंधतमसानां गाढतमसां धुरंधरं भारवाहकं तद्व्याप्तमित्यर्थः अध्वानं मार्गं विलंघ्य कस्यचित्काननकासारस्य वन
संबंधितडागस्य तीरतरोः अधिपरिसरं समीपभागे एतान् जननीसहितबंधून् अवतार्य तदीयपरिरक्षणे विचक्षणः कुशलः जागरो यस्य तथाभूतः सन्

क्षणं अवतस्थे तस्थौ कीदृशं अध्वानं सक्थ्नोः ऊर्वोः जवात् वेगात् समुत्थितेन मरुता उत्पाटितानां तरूणां विटपविघट्टनेन स्वस्थितिशाखाभ्रंशेन समुड्डीने उत्कटभ्रमवद्भिः शकुंतकुले पक्षिसमूहे बहुः आरब्धः निध्वानः शब्दो यस्मिन् तं १४ प० तत्र तटाकवृक्षसमीपे तडितः प्रभेव मभा अंगकांतिर्यस्याः सा कापि तरुणी तं भीमं ययौ तामुत्प्रेक्षते वनमार्गे तमसां चूषणाय पानाय नाशायेत्यर्थः जतुगृहे स्फुरितेन गृहभक्षणात्तृप्तेन हुतवहेन चोदिता प्रेषिता स्वकीया शिखेव २५ अस्याः सुदृशः सुलोचनायाः उत्तरोष्ठात् सकाशात् अधरोष्ठविभागः तस्य रेखिकारेखा रूपं चिन्हं अस्तिवा नास्ति इति तस्य भीमस्य हृदि संशयं परिमार्ष्टुं दूरीकर्तुमिव सा स्त्री मौनं अत्यजत् भाषणसमये ओष्ठविभागो जातः एवंच संवृतमुखत्वं सुल

तत्र कापि तरुणी तडिदाभा तं ययौ जतुगृहे स्फुरितेन चूषणाय तमसां वनमार्गे चोदिता हुतवहेन शिखेव २५ अधरोष्ठविभागरेखिका रुद्दशोस्या वदने स्तिवा नवा इति साहृदि तस्य संशयं परिमार्ष्टुं किल मौन मत्यजत् २६ एनां प्रशास्ति भुजया वनराज्यसीमामेकः स्वयं नरभुजामृषभो हिडिंबः अर्धांशभाग् जनवधे सममंतकेन तुल्याभिधानपदया स्वसृमान्मयायः २७ ॥

क्षणं मुखं भीमं प्रत्यवोचदिति भावः एको वा वाक्यालंकारे २६ नरभुजां राक्षसानां मध्ये ऋषभः श्रेष्ठः एकः हिडिंबः स्वयं भुजया बाहुबलेनेत्यर्थः एतां वनराज्यस्य सीमां प्रशास्ति रक्षति यः जनानां वधे मरणे अंतकेन यमेन समं अर्धांशं भजति स्वीकरोति तथाभूतः तुल्यं अभिधानपदं वाचकशब्दो यस्यास्तया मया स्वसृमान् भगिनीयुक्तश्च वर्तते यः प्राणिवधे यमात् दायादइवार्धांशग्राही हिडिंबानाम्न्या मया भगिन्या युक्तश्च वर्तत इति भावः २७ ॥

इह वने अद्य वीत शंकं निःशंकं तिष्ठतः ते कीदृशं ककुदं प्राधान्यं धैर्यमित्यर्थः वर्तते इत्ययं चित्रलासकः आश्चर्यनटः मम चित्तमेव रंगभूः सभाभूमिः तस्यां नृत्तकौशलीं नृत्यकौशलं उत्तरंगयति प्रकटयति अस्मिन् भयंकरारण्ये रात्रौ निर्भयस्तिष्ठसि तेन मे मनसि आश्चर्यं जायते इति भावः २८ रुधिरं पातुकामेन तेन हिडिंबेन वः युष्मान् हंतुं ईरिता प्रेरिता अहं ते नवरूपसंपदा सौंदर्यातिशयेन अधरं पातुका

वीतशंकमिह ते ऽद्य तिष्ठतः कीदृशं ककुदमित्ययं मम चित्तरंगभुवि नृत्तकौशलीमुत्तरंगयति चित्रलासकः २८
रुधिरं पातुकामेन तेन वो हंतुमीरिता अधरं पातुकामाहमस्मि ते रूपसंपदा २९ अद्य ते सविधमापतेदसौ हृद्यमेतदुचितं वचः शृणु मारणं रिपुषु तन्वता मुना मा रणं कुरु महान्बलेन सः ॥ ३० ॥ ॥ ॥

मास्मि त्वत्सौंदर्यमोहिता त्वयि कामुक्यस्मीत्यर्थः २९ मम वचनानुसारेण वर्तसे चेत्तर्हि ते जीवनं भवेत् नान्यथेत्याह द्वाभ्यां अद्येति असौ हिडिंबः अद्य ते सविधं समीपं आपतेत् जवेनागच्छेत् अतः मे हृद्यं प्रियं उचितं हितं वचः शृणु तदेवाह रिपुषु मारणं तन्वता शत्रून् निघ्नते १०
त्यर्थः अमुना राक्षसेन रणं युद्धं मा कुरु यतः सः राक्षसः बलेन महान् सर्वापेक्षया अधिको वर्तते ॥ ३० ॥ ॥ ६२ ॥ ॥ ६५ ॥

त्वं कृपया मे उपयामविधौ विवाहकर्मणि त्वर स्वत्वरां कुरु त्वरायां हेतुमाह मारेति मारशराः मदनबाणाः शरारवः घातुकाः नममाणहराः वर्तंते द्रुतिमा
वः मत्स्वीकारेण ते स्मरवं भविष्यतीत्याह दिवीति दिवि अंतरिक्षे भुवि पृथिव्यां वा दिक्षु दूरदेशे वा रंहसा वेगेन उपनीय रमये वर्तमानसामीप्येल
ट् विवाहानंतरं सद्य एव रमयिष्ये इत्यर्थः ३१ रजनीचरपतिः हिडिंबः इति भाषमाणां एनां हिडिंबां क्रोधलिंगैः अनघातेषां मारणे किमिति विलंबः
कृत इति तदुपरि क्रोधस्तदनुमापकैः अक्ष्णोः स्फुलिंगैः क्रोधाग्निकणैः दग्धेव इह वने त्वं मृत्युवक्त्रे अर्धजग्धः अर्धभक्षितः कोवससि हे दुर्बुद्धे इति

उपयामविधौ त्वरस्व मे कृपया मारशराः शरारवः दिवि वा भुवि वाथ दिक्षु वा रमये त्वामुपनीय रंहसा ३१ इत्येनां भाषमा
णां रजनिचरपतिः क्रोधलिंगैः स्फुलिंगैर्दग्धेवाक्ष्णोरभीक्ष्णं स्फुटघटितभुजास्फोटवाचाटिताशः बिभ्राणो बभ्रुकेश्यं
त्वमिह वससि को मृत्युवक्त्रार्धजग्धा दुर्बुद्धे इति भूयासि कपुनरिति गिरा मेदुरः प्रादुरासीत् ३२ तस्मिन् रक्षसि नेदिष्ठतादृक्ष
परुषाक्षरे अपमृत्युरिवोदस्थादनिलस्यात्मसंभवः ३३

षपुनः पुनः धणासि गच्छसीति गिरा मेदुरः युक्तः सन् प्रादुरासीत् कथंभूतः
अभीक्ष्णं निरंतरं स्फुटं घटिताः कृताः ये भुजास्फोटाः भुजोपरि हस्ततानडनानि तैः वाचाटिताः वाचालाः कृताः आशाः दिशो येन सः तथा बभ्रुपिंगलं
केश्यं केशसमूहं बिभ्राणः ३२ अनिलस्य आत्मसंभवः भीमः तादृक्षाणि तादृशानि उक्तप्रकाराणि परुषाणि रौद्राणि अक्षराणि यस्य तस्मिन् अयं
गर्वपारुष्यं तद्वाचकपदाक्षरेष्वारोप्येयमुक्तिः तस्मिन् रक्षसि नेदिष्ठे अतिसमीपस्थे सति मूर्तिमान् अपमृत्युरिव उदस्थात् उदतिष्ठत् ३३॥ ॥

एतौभीमराक्षसौ घोरं समीकंयुद्धं समं यथातथा आदधाते चक्राते किंकृत्वा परस्परेण अन्योन्येन वृक्षेणवृक्षं गिरिणागिरींद्रं हस्तेन हस्तं वचसा वचश्च प्रतिरुध्य निवार्य स्ववृक्षेणराक्षसवृक्षंनिरुध्य राक्षसोपिस्ववृक्षेण भीमवृक्षंनिरुध्य एवंगिरिणागिरींद्रमित्यादावपिज्ञेयं २४ भीमः स्वयमेव स्वसुः राक्षसभगिन्याः हिडिंबायाः समक्षं वज्रसंख्याक्त्रतुल्ययामुष्ट्याबिडौजाः इंद्रः वज्रेण बलासुरमिव एनंहिडिंबं यमराजधान्यां यमनगर्यां येकुटुंबिनः कुटुंबवत्सलाः तेषुमुख्यं कुरुतेस्म चकार हिडिंबं जघानेतिभावः २५ गद्यं ॥ तदनु हिडिंबवधानंतरं अहर्मुखा-

वृक्षेणवृक्षंगिरिणागिरींद्रंहस्तेनहस्तंवचसावचश्च परस्परेणप्रतिरुध्यघोरंसमीकमेतौसममादधाते २४ स्वसुःसमक्षंस्वयमेवमुष्ट्या बलंबिडौजाइववज्रसंख्या हिडिंबमेनंयमराजधानीकुटुंबिमुख्यंकुरुतेस्मभीमः २५ गद्यं ॥ तदनु तिमिर कदंबेनवाहिडिंबेननिर्मुक्तात्तस्मादहर्मुखादिववनात्संध्ययेवसरागयातयाकमलपालिकयासहतपनभानवइवराजसूनवस्तेनिष्क्रम्यशालिहोत्रमुनेःसदसिवीतिहोत्रभासंव्यासंभगवंतमासेव्यतत्रतन्निदेशादहानिकानिचिदतिवाहयांचक्रुः १५

तु उषःकालादिव सरागया प्रीतिमत्यारक्तिम्नायुक्तयाचतया कमलपालिकया तत्तडागस्थकमलरक्षित्र्याहिडिंबयासहतेराजसूनवः पांडवाः वीतिहोत्रस्य वन्हेःभाइवभाःकांतिर्यस्य तंव्यासं आसेव्य चंदनादिनातत्सेवांकृत्वा तदाज्ञया अतिवाहयांचक्रुर्यापयामासुः अत्रोपमानोपमेयवाक्यावयवेषु पृथगिव शब्दप्रक्षेपात् मालोपमालंकारः ॥ १५ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

पद्यं ॥तत्रसरस्तीरे अनंगातुरामदनपीडिता सा नक्तंचरी राक्षसी हिडिंबा पवनभुवः भीमस्य संगात् घटोत्कचनामानं पुत्रंप्रासूत कीदृशंपुत्रं सर्वगुणैर्मनोजवसनांपितृसाम्यंप्राप्तं मनोजवसः पितृसंनिभइत्यमरः सघटोत्कचः पितॄन् भीमादीन् इत्युक्त्वातयामात्रायुक्तःसन्यथाभिलषितं यथेच्छंनिर्ययौ इतिकिं कर्मसु दुष्कर व्यापारेषु स्मृतएव अहं हरेरपि इंद्रस्यापिशक्तेःसामर्थ्यस्य आयुधविशेषस्यच स्रंसनंव्ययंकुर्यां ३६.गद्यं॥ ततःवन्यानां वनसंबंधिफलादीनां अशनैः भक्षणैः धन्याः स्वस्तिमंतः तेपांडवाः धारितावसुधा सुधाशनानांभूदेवानां ब्राम्हणानां आकृतिर्यैस्ते न

॥पद्यं॥पुत्रंनत्रघटोत्कचंपवनभूसंगादनंगातुराप्रासंसर्वगुणैर्मनोजवसतांप्रासूतनक्तंचरी कुर्यांवःस्मृत एवकर्मसुहरेः शक्तेरपिस्रंसनामित्युक्त्वासौपितॄन्यथाभिलषितंयुक्तस्तयानिर्ययौ ३६.गद्यं॥ततस्तेवन्याशनैर्धन्याधारितवसुधा सुधाशनाकृतयःप्रावृषमिव बकबलाक्रांतांपातालनगरीमिवप्रत्यहंवर्धमान बलिशोकामंगराज्यसीमामिवसूर्यतनयानुकूलप्रतिष्ठांरथिरयाक्षधुरमिवैकचक्रांपुरींक्रमादाक्रम्यकस्यचित्गृहमेधिनोगृहमेत्य सुखमध्यवात्सुः॥ १६॥ याभूतास्संतः एकचक्रांपुरींआ क्रम्य कस्यचिद्गृहस्थाश्रमिणोगृहमध्यमेत्यप्राप्य सुखंयथातथा अध्यवात्सुःवसंतिस्म कीदृशांपुरीं प्रावृषमिव बकबलेन बकराक्षसबलेन बकपक्षिसमूहेनच आक्रांतांपातालजगतीमिवपाताललोकमिव वर्धमानः वृद्धिंगतः शोकोदयभागशोकोयस्यांवर्धमानःक्षीणतांगतःबलिशोको बलिदैत्यशोकोयस्यांतांअंगराज्यसीमामिवसूर्यतनयायाःयमुनायाः अनुकूलंतीरानुरोधेनप्रतिष्ठास्थितिर्यस्याः अन्यत्रसूर्यतनयस्यकर्णस्य अनुकूलाप्रतिष्ठायस्याः तांरथिरथाक्षस्यधुरमिवएकचक्रांतन्नाम्नीं अन्यत्र एकंचक्रंयस्याःतां॥१६॥ ॥

।।पद्यं।। अथतत्र एकचक्रायांभिक्षामटद्भिःगच्छद्भिःपृथाकुमारैः अन्नराशेःपृथक् अर्धंविभज्य अर्पितमन्नं आकंठं अभ्यवहरन् भ
क्षयन् मरुतःपुत्रःनिखिलैःप्रतीकैः अवयवैःपुनरुक्तःद्विगुणितःपोषःपुष्टिर्यस्य तथाभूतोबभूव २७ तत्रतत्रतस्मिंस्तस्मिन्स्थलेद्वि
जैःपृथासुवां पार्थानांनाशं मरणंपृष्टाः एतेपांडवाःवयं अत्रैव अस्यांनगर्यामेव तेषांपांडवानां संस्थितिं मरणं सम्यक्स्थितिंचविद्मः

।।पद्यं।। भिक्षामटद्भिरथतत्रपृथाकुमारैरर्धंविभज्यपृथगर्पितमन्नराशेः आकंठमभ्यवहरन्निखि
लैःप्रतीकैःपुत्रोबभूवमरुतःपुनरुक्तपोषः २७ तत्रतत्रद्विजैरेतेपृष्टानाशंपृथासुवां इत्यूचुर्वयमत्रैव
विद्मस्तेषांतुसंस्थितिम् ।। २८ ।। यक्षेणकेनापिहतोहिडिंबइतिब्रुवाणेषुमिथोद्विजेषु आकू
तगर्भंहसितंसगर्भ्याश्चक्रुर्मुखंवीक्ष्यसमीरसूनोः ।। २९।। ।। ।। ।।

जानीमःइतिऊचुःसत्यस्यहानिर्माभूदितिविद्वत्तयाश्लिष्टमुत्तरंदत्तवंतइतिभावः २८ द्विजेषुकेनापियक्षेणहिडिंबोहतःइतिमिथोब्रुव १२
त्सुसत्सुसगर्भ्याःयुधिष्ठिरादयोभ्रातरःसमीरसूनोःमुखंवीक्ष्यआकूतंएतदस्यकर्मनजानंतीत्यभिप्रायःगर्भेयस्यतत्हसितंहास्यंचक्रुः २९ ।।

॥गद्यं॥ एकदासायंसायंकालेअंतर्गृहेनिर वग्रहं निष्प्रतिबंधं निष्पतद्भिर्बाष्पैः नेत्रोदकैः तरंगितं संजाततरंगं उत्तमांगंशिरो पस्यतन् अपत्यं पुत्रं प
त्युः उत्संगभुवि समीपभूम्यां पुरोधाय अग्रेनिधाय यातुधानात् बकराक्षसात् बहुदिवसैर कोमनुष्यादेयः तद्विषयेपि एषारोदितिक्रुद्धोभवेदि
तियद्भयंतदनुरोधेन मंदितं मंदं रुतं क्रंदितं रुदितशब्दं उत्सृजंती प्रकटयंती विप्रस्य आयताक्षी विपुलनेत्रा पत्नीं प्रति कुंती समुपसृत्य समी
पंगत्वा विषादनिदानं दुःखकारणं अप्राक्षीत् पप्रच्छ सापि विप्रपत्न्यपि रूपालुतया हृदिअंतःकरणेलग्नगद्गदां जायमान दुःखांतांकुंतीं गद्गदाक्षरं

॥गद्यं॥ एकदासायमंतर्गृहेनिर वग्रहंनिष्पतद्भिर्बाष्पैस्तरंगितोत्तमांगमुत्संगभुविपत्युरपत्यंपुरोधाययातुधानापरा
धभयानुरोधेनमंदितंक्रंदितमुत्सृजंतींकुंतीसमुपसृत्यविषादनिदानंविप्रायताक्षीमप्राक्षीत्सापितांकृपालुतयाहृदिल
गद्गदांगद्गदाक्षरमाचचक्षे १७ प०साधयेयमितिधर्मसंग्रहंसंदधातिमिथुनंपरस्परं आधयेपरं[illegible]नेकजन्मनोरावयोर
जनिपापसंग्रहः ४० अयिकिंब्रवीमिपरिपाकमंहसामतिभीषणाबकइतिक्षपाचरः स्वसुरादरा[illegible]वयमुपागतोयमोयमुना
वनांतमवलंब्यवर्तते ४१

दुःखजन्यबाष्पेणकंठरोधात् अव्यक्ताक्षरं आचचक्षे कथयामास दुःखकारणंकर्मार्थात्संबध्यते १७ प० धर्मसंग्रहं सा
धयेयं कुर्यां इतिहेतुना मिथुनंस्त्रीपुंसंपरस्परंस्त्रीपुंसा पुमान् स्त्रियावसंदधातिजायापतित्वेनमिलति परंतु अनेकजन्मनोः बहुजन्मनोः आवयोः दंपत्योः
पापसंग्रहः आधयेविवाहप्रभृतिमनोव्यथार्थं अजनिजातः ४० अयीतिकोमलामंत्रणेव्ययं अयिकुंति अंहसां पापानां परिपाकं परिणामं किंब्रवीमि अ

तिशयेनभीषणः भयंकरः बकइति बकनामाक्षपाचरः राक्षसः स्वसुः भगिन्याः यमुनायाः आदरात् स्वयं आगतः साक्षात् यमइव यमुनावनांतं यमुना
नीरगतवनमध्यं अवलंब्य अधिष्ठायवर्तते ४१ इहनगर्यां जातु कदाचित् भीरुभिः भयशीलैः पूर्वैः पूर्वजैः पुरवासिभिः नः अस्माकं सर्वेषां युगपत्
एकसमयेनाशः माभूत् माभवतु इतिहेतोः असकृत् पुनः पुनः प्रार्थनाभिः अवसरं राक्षसानुमोदनावकाशं लब्ध्वा प्रक्लृप्तं प्रतिदिनं इयत्तयादेय
त्वेननिश्चितंतुंगं उच्चं अन्नस्य राशिंकृत्वा एकैकस्मिन्नहनि एकं एकं पुमांसं पुरुषं बलिं जनः पौरलोकः तस्मैराक्षसायवितरति ददातिजनः प्रतिदि

माभून्नाशोयुगपदिनिनोभीरुभिर्जातुपौरैः पूर्वैर्लब्ध्वावसरमसकृत्प्रार्थनाभिःप्रक्लृप्तं एकैकस्मिन्नहनिवित
रत्येकमेकंपुमांसंकृत्वातस्मैबलिमिहजनस्तुंगमन्नस्यराशिं ४२ तादृशःप्रलयकालकठोरोपासरःसतुममा
लयभूमेः द्वारितिष्ठतिबकात्परितुष्टात्पारितोषिकमिवाद्यजिघृक्षुः ४३॥ ॥ ॥

नं एकंदेयं पुरुषंप्रतिगृहं क्रमेणपर्यायेणददातीत्यर्थः ४२ तादृशः अनुकंपाविषयः क्रमप्राप्तः प्रलयकालवत्कठोरः रौद्रः सः वासरस्तुमम आलयभूमेः
गृहस्थलस्यद्वारितिष्ठति यस्मिन्नस्मत्पुरुषोदेयः सः वासरः क्रमेणकरभागादानार्थेराजपुरुषइवममगृहंप्राप्तः द्वारितिष्ठतीत्यनेनविलंबंनसह १३
तेइतिभावः तं वासरं उत्प्रेक्षते अद्यसमीचीनबलिदानेनपरितुष्टात् बकराक्षसात् पारितोषिकं संतोषेणादेयंधनादिजिघृक्षुरिवगृहीतुमिच्छुरिववर्तते
४३

अयंनराशनः राक्षसः बालानिव प्रवयसोपिवृद्धानपिचेत् भुंजीत भक्षयेत् तर्हि सएव दृढभोजनमेव विधेयाभिप्रायेण पुल्लिंगता ममपुण्य
स्य पाकः फलोदयः परंतु तन्नास्तीत्याह बालेनेति बालेनभाव्यमिति नस्यराक्षसस्य दलिषु व्यवस्थापुनः ममकंठे क्रकचस्य करपत्रस्य धाटी
शैलीं कलयतिकरोति इयंव्यवस्था क्रकचेनकंठच्छेदव्यथांकरोतीतिभावः ४४ त्यजेदेकंकुलस्यार्थे इतिन्यायेनएकमपत्यंदेयमितिचेद

बालानिवप्रवयसोपिनराशनोयंभुंजीतचेन्ममसएव हि पुण्यपाकः बालेनभाव्यमितिनद्दलिषुव्यव
स्थाकंठेपुनः कलयतिक्रकचस्यधाटीं ४४ संतानमूलमिदमेकमपत्यमास्तेसंवर्तकालसहजश्चवसराक्ष
सेंद्रः संभूयनेवसमयः क्षपयामहत्यासंतीर्यतांकथमियंसखिमेविपत्तिः ॥ ४५ ॥ ॥ ॥

तआह संतानेनेति संतानस्यवंशस्य मूलंबीजं एकमपत्यमास्ते कृपयाबालं नभक्षयेदितिचेदतआह संवर्तेति सः प्रलयकालसहोदरः निष्क
पट्त्वर्थः पुत्रदानेविलंबश्चनास्तीत्याह समयः दानकालः दुःखेन महत्यावस्तुतः अल्पयाक्षपयासंभूयतेसंनिधोभवति हे सखि इयं उत्कटरू
पाअतिमहतीमेविपत्तिः कथंसंतीर्यतांनिराक्रियतांकेनापिप्रकारेणनिराकर्तुमशक्येतिभावः ॥ ४५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥गद्यं॥ इतिउदीर्यउक्त्वा सरभसं सवेगं यथातथा अवगाहनं शोकसरसिप्रवेशः तेनहृदयात् समुत्कूलितं ऊर्ध्वंगतं शोकसरसः पूरमिव नयनसलिलं विशृंखलं अप्रतिबंधं खेलयंत्येे तस्यैविप्रपत्न्यै हेसखि ननयेषु द्वितीयः समरेषु अद्वितीयः निरुपमः स्कृतः तेतुभ्यंदीयते मए वतस्य राक्षसस्यप्रीणन प्राणशनयोः तृप्तिप्राणहरणयोः बलीभविष्यतिदेयपुरुषबलिः बलवांश्चभविष्यतिमाभैषीः भयत्यागंकुरु इतिसानर

॥गद्यं॥ इत्युदीर्यसरभसावगाहन हृदयसमुत्कूलितंशोकसरःपूरमिवनयनसलिलंविशृंखलंखेलयंत्यैतस्यैत नयेषुद्वितीयःसमरेष्वद्वितीयःस्कृतःसखितेदीयतेसएवतत्प्रीणनप्रणाशनयोर्बलीभविष्यतिमाभैषीरितिसानरदेवमहिषीप्रत्यश्रौषीत् १८॥प॰ अनयोरथदंपत्योरश्रुहेतोःशुचःपदे आनंदस्यातिरेकोभूदादेशइवतत्क्षणं ४६

देवस्य पांडोः महिषीपट्टराज्ञी कुंती प्रत्यश्रौषीत् प्रतिज्ञातवती १८॥पद्यं॥ अथतत्क्षणं अनयोः दंपत्योः अश्रुणःहेतोः कारणस्यशुचःपदे स्थाने स्कृवंतेपदेच आनंदस्यअतिरेकः अतिशयः आदेशइव अभूत् त्वां युवां इत्यादीनां पदानांत्वावामित्याद्यादेशैर्यथारूपांतरं भवतितद्वत् शोकस्थाने आनंदोजातः शोकाश्रूण्येवानंदाश्रूणिजातानीतिभावः॥ ४६॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ १४

प्रस्रुवामात्रा कुंत्या तं इमं उदंतं वृत्तांतं रहसि एकांते गदितः उक्तः वायुसुतः भीमः बलस्यावलेपात् गर्वात् रात्र्यां मनसा बकं राक्षसं नलिलेह आ स्वादं न जगृहे मनसि नानीतवानित्यर्थः अपितु अनसा शकटेन धारितमन्नराशिमेवलिलेह स्वोदध्योदनादि बहुमिलिष्यतीति वारं वारं म नसा चिंतितवानित्यर्थः यद्यपि प्रसूव त्यत्र तृतीयैकवचने ओः सुपीति यणादेशेन प्रस्वेति भाव्यं तथापि सूते सौ सूः प्रकृष्टा सूः प्रसूरिति वि ग्रहे यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा इत्युक्तत्वात् प्रशब्दस्य सूत्रः क्रियायोगाभावेन तन्निरूपित गतिसंज्ञाभावात् गतिकार

तमिमं प्रस्रुवा रहस्युदंतं गदितो वायुसुतो बलावलेपात् मनसा न बकं लिलेह रात्र्यामनसा धारितमन्नराशिमेव ४७

॥गद्यं॥ अपरेद्युरखिलजनानंदकरे भगवति दिनकरे मंदेहकुलमवस्कंदितुमुदयगिरिशिखरमधिरूढे १९प० सशकटम धिरुह्य भीमसेनो दधिकलशीकुलशीफरान्नराशि बकभवनवनं विवेश शाखानगरमिवांतकवीरराजधान्याः॥४८

केतर पूर्वपदस्य यण्नेष्यते इति यणोभावः ४७ गद्यं॥ अपरेद्युः अपरस्मिन्नहनि अखिलजनानां आनंदकरे दिनकरे मंदेहकुलं सूर्यरथप्रतिरोधका नां एतन्नामकराक्षसानां कुलं अवस्कंदितुं पराजेतुं उदयगिरिशिखरं अधिरूढे प्राप्ते इत्यर्थः शत्रुकुलपराजयाय दुर्गाग्रमारूढे इति भावः १९प० स भी मसेनः दधिकलशीनां दधिघटानां कुलेन शीफरः मिश्रितः अन्नराशिर्यस्मिन् तं शकटं अधिरुह्य बकस्य भवनं यस्मिन् तद्वनं यद्वा बकभवनयुतं व नं विवेश वनमुत्प्रेक्षते अंतकवीरस्य राजधान्याः संयमिन्याः शाखानगरमिव महानगरावयवलघुग्राममिव वाडी इति महाराष्ट्रभाषायां ॥ ४८॥ ॥

तत्र वने सर्भीमः शकटस्थ एव भुंजानः दधिमिश्रितान्नराशिं भक्षयन् सन् तदा महत् क्ष्वेडितं सिंहनादं चक्रे कीदृशे वने कंकालोच्चयेन म नुष्यशरीरास्थिसंघेन कल्पितः कृतः अंतकचम्वाः यमसेनायाः शाटीकुटीविभ्रमः पटमंडपभ्रांतिर्यस्मिन् क्रुद्धो यः तस्य यमस्य औपवाह्यः म हिषः तस्य श्वासइव उग्रः चक्रानिलः वात्यानिलो यस्मिन् गृध्राः ध्वांक्षाः काकाश्च सृगालाः गोमा यवश्च तेषां घोषेण शब्देन विकसन् प्रकटी भवन् रक्षसः अपदानेन वृत्तवीरकर्मणा कलवो यस्मिन् एतेन गृध्राद्यास्तदुच्छिष्टमांसोपजीवनाः अतएव यस्माद्येषामुपजीविका तस्य वर्णनं तेषा

कंकालोच्चयकल्पितांतकचमूशाटीकुटीविभ्रमे तत्र क्रुद्धतदौपवाह्यमहिषश्वासोग्रचक्रानिले गृध्रध्वांक्षसृगाल घोषविकसद्रक्षोपदानक्वणे भुंजानः शकटस्थ एव स तदा चक्रे महत्क्ष्वेडितं ४९ गद्यं॥ सोपि तदिदं निशम्य बलिपुरुषवि शेषभारमर्दितशकटागमनप्रथममेव कृतोन्मेषं रोषं द्विगुणयन् गिरिकंदरमंदिरमुखात्सरभसं विनिर्गत्य॥ २०॥

मुचितं एतेन विशेषणत्रयेण वनस्यातिभयंकरत्वं प्रतिपाद्यते॥ ४९॥ गद्यं॥ सोपि राक्षसोपि तदिदं क्ष्वेडितं निशम्य श्रुत्वा बलिरूपो यो पु रुषविशेषः तस्य भारेण मर्दितं मंदं कृतं यत् शकटागमनं तेन प्रथममेव आदावेव कृतोन्मेषं कृतोदयं रोषं द्विगुणयन् सन् गिरेः कंदरस्य गुहा याः मुखात् द्वारात् सरभसं सवेगं विनिर्गत्य॥ २०॥ ॥ ७॥ ॥ ७॥ ॥ ७॥ ॥ ७॥ ॥ ७॥ १८

यातुधानः राक्षसः अत्रवने अमुं बाहुं अविगणयन् निरस्कुर्वन् कोवापुरुषः एवं अनयारीत्या अपराभोति ममापराधं करोति इति घुष्यन् आ क्रोशन् सन् पवमानभुवं भीमं अभिमाद्रवंत् सन्मुखमापतत् कीदृशो यातुधानः व्यक्ताभिः प्रकटाभिः उरसि रक्तरेखाभिः भुष्कभक्ष्य प्राणि रुधिररेखाभिः कृतं बिरुदं सर्वलोकज्ञानजनकं चिन्हं यस्यास्तथाभूता जगतः घातुकलस्य प्रशस्तिः कीर्तिर्यस्यसः पक्षे व्यक्ता उरोरक्तरेखा कृतबिरुदा जगद्घातुकत्व प्रशस्तिर्यस्येति विग्रहः क्रोशतां आक्रोशतां मर्त्यानां मनुष्याणां अंगानि अवयवाः तेषां खादे भक्षणे विषये त्वर

॥पद्यं॥ एवंकोवापराभोत्यमुमविगणयन्बाहुमत्रेति घुष्यन्व्यक्तोरोरक्तरेखाकृतबिरुदजगद्घातुकत्वप्रशस्तिः॥ क्रोशन्मर्त्यांगखादत्वरणपरिस्खलत्सृक्किलग्नास्थिदंडस्थूलेदंष्ट्रे दधानः पवनभुवमभिप्राद्रवद्यातुधानः॥ ५० निज भुजयुगलीनियंत्रणाभिर्नियमितयत्नपरस्परावुभौतौ निगडितनयनंनिर्लिपपंक्तेर्निरवहतांनिपुणंनियुद्ध शिल्पं॥ ५१॥

णेन त्वरया परिस्खलतोः सृक्किणोः ओष्ठप्रांतयोः लग्नेः शंकुवदासक्ते अस्थिदंडे स्थूले विशाले दधानः आभ्यां विशेषणाभ्यां बीभत्सरसपोषः॥५०॥ निजभुजयोर्युगल्यायुग्मेन यंत्रणाभिः बंधनैर्नियमितः निरुद्धः यत्नो याभ्यां तौ चतौ परस्परोद्ध तौ उभौ भीमराक्षसौ निर्लिपपंक्तेः देवसमुदायस्य निगडितानि बद्धानि नयनानि यस्मिन् तत्तनु निपुणं संपूर्णमित्यर्थः नियुद्धशिल्पं बाहुयु द्धकौशलं निरवहतां अकुरुतामित्यर्थः॥५१॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

वायोः पुत्रस्य भुजयोः दोर्लेलित्यं दुष्वेष्टितत्वं तत्र तस्मिन् वनचिरं संचरंतं बकं राक्षसं पक्षिणं च राक्षस्त्रीणां नेत्रांबुषु विषये वर्षतो र्धि
लासस्य योग्यां कामपि दशा अवस्था निन्ये मरणदशां नित्य इत्यर्थः अत्र बकं जघानेति वक्तव्ये तन्यभंग्यंतरेण कथनात् पर्यायोक्तमलंकारः
५२ मारुतसूनुः निशीथे तं राक्षस पुरसीम्नि नगरसमीपदेशे विकृष्य तत्क्षणात् कुणपमर्शनदोषं शवस्पर्शदोषं मार्ष्टुकामइव परिहर्तुकामइव-
मातुः कुंत्याः अंघ्रिं उपसेवितुं आगात् आगच्छत् निशीथे राक्षस शवं आलोक्य पुरसमीपे निक्षिप्य मातुः समीपं गतवानित्यर्थः ॥ ५३॥ अ

पुत्रस्य वायोर्भुजदोर्ललित्यं बकवनतत्र चिरं चरंतं निन्ये दशां कामपि राक्षसस्त्रीनेत्रांबुवर्षर्तुविलास
योग्यां ५२ तं विकृष्य पुरसीम्नि निशीथे तत्क्षणात्कुणपमर्शनदोषं मार्ष्टुकामइव मारुतसूनुर्मातुरंघ्रिमु
पसेवितुमागात् ५३ आलोक्य यातुशवमेतदशेषपौरैरन्हो मुखे परवशीक्रियते स्म चेतः आश्चर्यपूर
परिमेलनफेनिलाभिरानंदसागरतरंगपरंपराभिः ५४॥ ॥ ॥ ॥

न्हः मुखे प्रातःकाले अशेषैः पौरैः एतत् यातुनः राक्षसस्य शवमालोक्य चेतः आश्चर्याणां पूरस्य महौघस्य परिमेलनेन अंतः प्रवेशेन फेनिला-
भिः फेनविशिष्टाभिः आनंदसागरस्य तरंग परंपराभिः कृत्वा परवशीक्रियते स्म पराधीनं चक्रे अयं च बलवान् केन हतः एतादृशो महान्
आकृष्यात्र केनानीत इत्याश्चर्ययुक्त तत्क्षणनजन्यानंदसमुद्रे पौरजनचेतो ममज्जेति भावः ॥ ५४॥ ॥ ६॥ ॥ ६॥ ॥

तत्र तस्यां पुरि तदा प्रमुदितः महाजनः श्रेष्ठजन गृहमेधिनः गृहस्थाश्रमिणो विप्रस्य भवनं गृहं एत्य प्रवणीकृतो नम्रीकृतो मूर्धा येन तस्मिन् पवनजे भीमे
अक्षतैः समं आशिषं आशीर्वादं प्रयुयुजे आशीर्वादेन सहाक्षतारोपणं कृतवानित्यर्थः ५५ जातु कदाचित् अपररात्रे निशीथोत्तर रात्रिभागे जागरू
कः पथिकः कश्चन पांथिको ब्राम्हणः निशि निकेतस्य गृहस्य वेदिकायाः परिष्कृत भूमेः निकटे समीपे अंगणे स्फातिसुखं निद्रासुखं निषेव्य अनुभूय प्रसं
गात् तत्रत्य तत्रत्य वृत्त कथन प्रसंगात् पार्थान् ईदृशां वक्ष्यमाण प्रकारं बभाषे ५६ अद्य नृपाः राजानः हृदि मनसि पंचालानां राजा पांचालः द्रुपदः तस्यापत्यं

भवनमेत्य तदा गृहमेधिनः पवनजे प्रवणीकृतमूर्धनि प्रयुयुजे समं आशिषमक्षतैः प्रमुदितः पुरि तत्र महाजनः ५५ निशि जातु
निकेतवेदिकाया निकटे स्फातिसुखं निषेव्य पार्थान् पथिकोपररात्रजागरूकः प्रबभाषे गिरमीदृशीं प्रसंगात् ५६ पांचालिकां सु
बमनोरथरत्नसौधपांचालिकां हृदि ममेति ममेति कृत्वा अद्य स्वयंवरमहाय नृपाः प्रयांति दूतैः समं द्रुपद[illegible]पतिराजधानीं ५७ भोक्तु
मन्नमपि सूपसमग्रं दोग्धुमप्यभिनवप्र[illegible]वा गाः लप्स्यते द्विजगणोपि च तस्मात् वत्सलात् दुहितुरुत्सवकाले ५८ स्त्री पांचाली सैव पांचालि
कातां मम मम इति कृत्वा स्वयंवरोत्सवाय द्रुपद नगरीं आव्हानार्थं आगत द्रुपदराज दूतैः समं गच्छंति कीदृशीं पांचालिकां यूनः मनोरथ एव रत्न सौधः तस्य पां
चालिकां पुत्तलिकां अनेन विशेषणेन तस्याः सौंदर्य वैशिष्ट्यं द्योत्यते ५७ तत्र ब्राह्मणानां गमने को लाभ इत्यपेक्षायामाह भोक्तुमिति द्विजगणोपि दुहितुः क
न्यायाः विवाहोत्सवकाले वत्सलात् कन्या स्नेहयुक्तात् तस्मात् द्रुपदराजात् भोक्तुं सूपसमग्रं सूपाढ्यमन्नमपि दोग्धुं नूतनप्रसवाः गा अपि प्राप्स्यति ॥ ५८ ॥ ॥

तत्र अपार्थतानिष्फलता पार्थरहिततावनभवेत् विजयःजयः अर्जुनश्चासिद्धिं स्फुटं उपेष्यति वःयुष्माकं युगपत् महत् सुखमस्तु तत्तस्मात् हेमहौज सः शीघ्रं आगच्छत ५९ तेपार्थाः स्वयमाविर्मितामिव उपश्रुतिरूपां द्विजातेः इति तां पूर्वोक्तां वाचं मनसिकृत्वा पथिब्राम्हणसमुदायमध्येगताःसंतःपांचालपुरं प्रति प्रतस्थिरे तत्र निर्गत्य यत्किंचित् शुभाशुभकरं वचः श्रूयते तद्विदुर्धीरा दैवप्रश्नमुपश्रुतिमिति हारावली ६० गद्यं॥ तेपार्थाःपुनःअनेकदिनैःनीताःलंघिताःजनपदवनानां पथिमार्गेकृताविर्भावेन पराशरस्यदायादेन पुत्रेण व्यासेन वःयुष्माकंजतुगृहात् स्वनिर्गमनेन पार्षतस्य द्रुपद

नहितत्रभवेदपार्थताविजयःसिद्धिमुपैष्यतिस्फुटं युगपत्सुखमस्तुवोमहत् द्रुतमागच्छतहेमहौजसः ५९ इतिवाचमुपश्रुतिं द्विजातेर्हृदिकृत्वास्वयमेवनिर्मितां तां पथिभूसुरयूथमध्यभाजःप्रतिपांचालपुरं प्रतस्थिरेते ६० ग॰ तेपुनरनेकदिननीतजनपदवनसीमानःपथिकृताद्येनभगवतापराशरदायादेनजतुसदनपरिच्यवनेननवोनवोहर्षःपार्षतस्यसमुन्मिषतीतिगिरानुगृहीताःसाक्षात्प्ररोहताभुजप्रतापानलेनेवफाल्गुनकरवल्गितेनमहतालातनेजसानितांतसीमंतितसंतमसया पदव्यात्रिविष्टपतटिनीं प्राविक्षन् २१

स्य नवोहर्षःसमुन्मिषति आविर्भविष्यति वर्तमानसामीप्ये भविष्यतिलट् इतिगिरा अनुगृहीताःकृतानुगृहाःसंतःपदव्यामार्गेण भागीरथीं प्राविक्षन् प्राविशन् कीदृश्यापदव्या साक्षात्प्ररोहता आविर्भवता भुजप्रतापाग्निनेवफाल्गुनकरे अर्जुनहस्ते वल्गितेनतत्रचलेन अलाततेजसाज्वलत्काष्ठतेजसा नितांतं अत्यंतं सीमंतितं उभयभागयोःअपसारितंसंतमसंसमंताद्वर्तमानंतमोयस्यास्तया॥ २१॥ ॥

॥पद्यं॥ तत्रभागीरथींइंदीवरात् सकाशात् प्रतितरंगं प्रविष्टेःलक्ष्म्याःबिंबैरिव तरुणीसमूहेःसहगंगोदकेक्रीडन् चित्ररथनामागंधर्वःपार्थान्वि-
लोक्यकद्मे अस्मद्रहसि गत्रावागता इतिमनस्यानीयकुपितःयुद्धंचिकीर्षुःसन् रुरोध ६१तत्रतस्मिन् युद्धेधनंजयः अर्जुनः आत्मनासमं धनंजयइति ना
मयस्य तादृशंदैवतंयस्यतत् अस्त्रं आग्नेयास्त्रमित्यर्थःसंप्रयुज्य अग्रभागेस्थितं तस्यगंधर्वस्यरथं जतुनःविकारःजातुषःसचासौ आलयःगृहंतस्यस

इंदीवरात्प्रतितरंगमनुप्रविष्टैर्बिंबैरिवाब्धिदुहितुस्तरुणीकदंबैः क्रीडन्समंपयसिचित्ररथोविलोक्य
पार्थान्रुरोधकुपितःप्रधनंचिकीर्षुः ६१ अस्त्रमात्मसमनामदैवतंसंप्रयुज्यसमरेधनंजयः तत्रतस्यरथम
ग्रवर्तिनंजातुषालयसहायमातनोत् ६२ गंधर्वाणांपत्युर्गर्वजुषःसौरसैंधवेतस्मिन् पाथसिभंगःशिशिरोरो
धसिभंगस्कृतापहेतुरभूत् ६३ सख्यस्यलाभात्सपदिप्रहृष्यन्कुशीलवेंद्रःकुरुनंदनानां प्रादर्शयत्स्वां
प्रथमंविनीतिंपश्चादमीषांपदवींचरम्यां ६४॥ ॥ ॥ ॥

हायंमित्रंअकरोत् आग्नेयास्त्रंप्रयुज्यतस्यरथंददाहेत्यर्थः ६२ गर्वयुक्तस्यगंधर्वपतेःसौरसैंधवे सुरनदीसंबंधिनितस्मिन् पयसिभंगःतरंगःशिशि-
रःशीतलःअभूत् रोधसितीरे भंगःपराजयस्तुउष्णःमनःसंतापकारणंचाभूत् ६३ कुशीलवेंद्रःगंधर्वःपांडवानां सख्यस्यलाभात् सपदिप्रहृष्यन् स
न् प्रथमंस्वांविनीतिंविनयं प्रादर्शयत् पश्चादमीषांपांडवानांरम्यंमार्गं प्रादर्शयत् ६४॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

अथधर्मसूनुः अध्वनि प्रसिद्धं धौम्यऋषिं समीक्ष्य अयं धर्मसूनुः प्राणिनां अहिंसकोपि अपीडकोपि सन् सहोदरैः समं अमुष्य पादपीडनं कृतवान् करोतीति विरोधः पादपीडनं पादवंदनमिति परिहारः विरोधाभासोलंकारः ६५ आतिथ्यकरणेप्रीतः सः धौम्यः तान् पार्थान् यथापुरस्कुरुतेस्म सन्मानंच क्रे तथास्नेहाधीनास्तेपार्थाः अपि अध्वगमने तं धौम्यं पुरस्कुर्वतेस्म अग्रतश्चक्रिरे अत्र शब्दछलेन परस्परोपकारात् अन्योन्यमलंकारः अन्योन्यं

धर्मभूरयसहोदरैः समं धौम्यमध्वनिसमीक्ष्यविश्रुतं प्राणिनामयमहिंसकोपिसन् पादपीडनममुष्यकृत
वान् ६५ यथातिथ्यविधौप्रीतः सपुरस्कुरुतेस्मतान् तथाध्वगमनेतेपितंप्रश्रयवशंवदाः ६६ धौम्यस्यसुधामधु
रिमधौरेयीभिः स्वयंवरकथाभिः द्रुपदपुरसरणिरेषांह्रित्राण्यभवत्पदानीव ६७ भूदेवेष्वतिनिबिडेषुम
ध्यभाजां पंचानामपियुगपत्पृथासुतानां पुस्फोर द्रुपदपुरं पुरःप्रदेशेवक्त्राब्जेसरभसमक्षिदक्षिणंच ६८

नाम यत्रस्यादुपकारः परस्परमितिलक्षणात् ६६ सुधायाः मधुरिमा माधुर्य तस्यधौरेयीभिः धूर्वहाभिः अमृततुल्याभिरित्यर्थः धौम्यस्यद्रौप दीस्वयंवरकथाभिः द्रुपदपुरमार्गः एषांपार्थानां द्वेवा त्रीणिवा ह्रित्राणिपदानीव अभवन् कथानुसंधानेनगमनानुसंधानाभावात् मार्गोल्प इवजा तइतिभावः ६७ अतिनिबिडब्राम्हणमध्यस्थानां पंचानामपिपांडवानां पुरोभागे द्रुपदपुरं पुस्फोर चाक्षुषज्ञानविषयंबभूव मुखकमले दक्षिणाक्षि सरभसं सवेगं पुस्फोर स्फुरतिस्म अत्र प्रकृतयोरेव द्रुपदपुराक्ष्णोः स्फुरणक्रियान्वयात् तुल्ययोगितालंकारः ॥ ६८ ॥ ॥ ५ ॥ ॥ ५ ॥

तत्र पुरे कुरूद्वहाः पांडवाः कुतूहलात् द्रुपदराजकुमारिकायाः कुचसदृशाद्व्यमभिवीक्षितुमिव प्रथमप्रवेशक्षणे कुंभकारगृहं प्रविविशुः ६९ अथ ससैन्याः शतशः भूपाः राजानः अद्भुतं अलौकिकं स्मारस्मरसंबंधिनं युगोदय युगकाष्ठप्राप्तिं आवहंत इव प्राप्तं युगं वहंत इवेत्यर्थः यद्वा युगकाष्ठं अवसरंत इव स्मरपदं तत्राः संत इति भावः तां पुरीं अगमन् कीदृशो भूपाः अग्रभागे निबद्धं बिरुदशत्रुंजयः सत्यात्रदाना घद्भुतकर्म तज्जन्यनामादि यस्मिन् न तस्य भुजं उद्यम्य ऊर्ध्वं कृत्वा पठद्भिः बंदिसमूहैः स्तुताः ७० यादवसैन्यसंबंधिरजसा श्रेणिभिः समूहैः द्यौश्च भूमिश्च

कुमारिकाया द्रुपदस्य भूपते कुचोपमाद्व्यमिवाभिवीक्षितुं कुरूद्वहास्तत्र पुरे कुतूहलात् कुलालगेहं प्रथमं समाविशन् ६९ नामागमन्नथ पुरीं शतशः ससैन्याः स्मारं युगोदयमिवाद्भुतम वहंतः भूपास्तता भुजमुदस्य पठद्भिरग्रे पर्यन्तनिबद्धबिरुदं पटुबंदिवृंदैः ७० द्यावाभूमी निरुंधन्य दुबलरजसां श्रेणिभिः सीरपाणिर्वेगादागाल्लवीरः स्वविनय गुरुणा शौरिणान्वीयमानः आहारश्चायुधं च द्विषदवमतये येन संसेव्यमाने तेद्वे हालाहलत्वं रणभुवि वहतो नामतः कृत्यतश्च ७१

तेनि रुंधयन् आच्छादयन् वीरैः प्रद्युम्नादिभिः सहितः सः प्रसिद्धः वीरो वा यस्मिन् यो विनयो नम्रता तेन गुरुणा पूज्येन शौरिणा श्रीकृष्णेन अन्वीयमानः अनुगम्यमानः सीरपाणिः बलभद्रः वेगात् आगात् कीदृशः सीरपाणिः येन शत्रुंजयाय संसेव्यमाने स्वीक्रियमाणे आहारः मद्यं आयुधं मस्त्रं च अस्तां ते द्वे आहारायुधे रणभुवि नामतः हालाहलत्वं मद्यलांगलत्वं हतः धारयतः कृत्यतः परनाशकर्मणा च हालाहलत्वं विषत्वं वहतः ॥ ७१ ॥ ॥

मणिभिः दीप्यमाना देदीप्यमाना नां कुंडलानां धरं धर्तृ अखिलेषु अंगेषु अवयवेषु अंगदेशेषु च अतिमनोज्ञरूपं अतिसौंदर्यविशिष्टं यत्क
र्णत्रयं श्रोत्रे राधेयं च पार्श्वभागयोः अग्रभागेन बिभ्राणः दधानः दुर्योधनः आसीदत् आजगाम कीदृशो दुर्योधनः सेनानां दुंदुभीनां च नादेन
तुंदिलं नभो यस्य सः यथा कस्यचिदुदरं बहुभक्ष्यभक्षणेन तुंदिलं भवति तद्वद्बहुशब्दैर्जातमित्यर्थः तथा स्वस्य प्रतिबिंबवदाचरितैः नव

बिभ्राणो मणिदीप्रकुंडलधरं कर्णत्रयं पार्श्वयोरग्रे चातिमनोज्ञरूपमखिलेष्वंगेषु दुर्योधनः सेनादुंदुभिनादतुंदिल
नभाः स्वस्यानुबिंबायितैरासीदत्र नवाधिकैः परिवृतभ्रांतो नवन्यानुजैः ७२ तदनु परितः कीर्णैः पुष्पैस्तरंगितसौरभम
णिमयमहामंचारूढावनींद्रपरंपरं अगरुजनितैर्धूपैरालिह्यमानवितानकं स्वनितपटहं प्रापुः पार्थाः स्वयंवरमंडपं ॥७३

निर्मितैः अनुजैः परिवृतः समंताद्भागः स्वसदृशानुजानां नवनवत्या वेष्टित इत्यर्थः ७२ तदनु पार्थाः स्वयंवरमंडपं प्रापुः कीदृशं मंडपं आ-
समंतात् प्रक्षिप्तैः पुष्पैः तरंगितः संजातरंगः सौरभः सुगंधो यस्मिन् तं मणिमयमहामंचारूढा अवनींद्रपरंपरा भूपसमूहा यस्मिन् तं धूपैः आ
लिह्यमानानि संबध्यमानानि वितानानि यस्मिन् तं ॥७३॥ ॥ श्रीकृष्ण ॥ ॥७॥ ॥७॥ ॥७॥

ततः द्रुपदकन्यापुरः पश्यतां राज्ञां बुद्धिमिवेत्युपमा यथा बुद्धिं आरूढा तथा शिबिकां नरयानं आरुह्य रंगस्थलीं सभाभूमिं प्राविशत् कीदृशी द्रु
पदसुता जाग्रत् सदा सन्निधानो यः सोमकानां द्रुपदवंशीयराज्ञां कीर्तिसोमः कीर्तिचंद्रः तेन निमिषद्भिः संकुचद्भिः पद्मैः कुलायः अवकाश
त्ययः वासस्थाननाशः तेन प्राप्तः इंदीवरेषु नीलकमलेषु नित्यवासः तेन घटिता जनिता श्यामप्रभा यस्याः सा श्रीरिव लक्ष्मीरिवेत्युत्प्रेक्षा तया
अलौकिकसौंदर्यं व्यज्यते ७४ द्रौपद्याः मुखमेव शशी तस्य द्युतिसंपदेव कौमुदी संज्ञकं महः तेजो यस्मिन् तस्मिन् रंगतटाके सभासरसि नृप

जाग्रत्सोमककीर्तिसोमनिमिषत्पद्मावकाशात्ययात्प्राप्तेंदीवरनित्यवासघटितश्यामप्रभा श्रीरिव पांचालस्य
सुतां ततः परिजनैः सार्द्धं पुरः पश्यतां राज्ञां बुद्धिमिवाधिरुह्य शिबिकां रंगस्थलीं प्राविशत् ७४ द्रौपदीमुखशशिद्यु
तिसंपत्कौमुदीमहति रंगतटाके पक्ष्मचक्रयुगलं नृपतीनां तत्क्षणं द्विजघटं बहु दूरं ७५ तां पश्यतः सदसि तस्य
महीसुराणां वामेतरे महति वासवनंदनस्य अंतर्बलस्य सपदि प्रकटीबुभूषोः रुद्धेत्यानं किल भुजे स्फुरणं बभूव ७६

तीनां पक्ष्मणी एव चक्रयुगलं चक्रवाकद्वंद्वं तत्क्षणं बहुदूरं द्विजघटं वियुक्तं बभूव रात्रौ चक्रवाकमिथुनविघटनं प्रसिद्धं ज्योत्स्नायां सुतरां द्रौपदीसौं
दर्यं दृष्ट्वा नृपलोचनेषु ताटस्थ्यमभूदिति भावः ७५ सदसि महीसुराणां ब्राम्हणानां मध्ये तां द्रौपदीं पश्यतः तस्य वासवनंदनस्य अर्जुनस्य वामे
तरे दक्षिणे महति भुजे स्फुरणं बभूव तदुत्प्रेक्षते सपदि तस्मिन् क्षणे प्रकटीभवितुमिच्छोः अंतर्बलस्य तदंतर्वर्तिपराक्रमस्य उत्थानमिव बहिर्निर्गमनविष
यचेष्टेव ॥७६ ॥

तावत् सरभसं रंगं आगत्य साक्षात् आदेष्टुं प्रत्यक्षमाज्ञापयितुंमनोयस्यसः मदन इव धृष्टद्युम्नः तस्याः भ्राता स्वयंवरं द्रष्टुमिच्छयापरिवारस
हितमागतं नागराजं वासुकिमिव सायकैः सह समीपमानीतं चापं पुरस्कृत्य राज्ञामग्रभागं नीत्वा कन्यावलोकनेन धन्यान् कृतार्थान् क्षत्रिया
न् एवं वक्ष्यमाणमवादीत् ॥ २२॥ पद्यं॥ हे नृपाः संप्रति दिवि आकाशे स्थितं एतत् लक्ष्यं कर्मत छायवत् तस्य लक्ष्यस्य छायामिव अनातप
मिव प्रतिबिंबमिव वा बाणेन भुवि पातयितुं यः क्षत्रियः पटुः समर्थो भवेत् सः स्वस्य सारं बलं अभिदर्श्य मौर्वीमिव दक्षिणपाणावेव ममस्वसा

गद्यं॥ तावत्सरभसमुपेत्य साक्षादादेष्टुमनाः प्रद्युम्न इव धृष्टद्युम्नः सायकैः साकं सकाशमुपनीतं स्वयंवरदिदृक्ष
यासपरिवारं प्रत्यासन्नमिव पन्नगपतिं चापं पुरस्कृत्य कन्यावलोकन धन्यान् राजन्यानेवमवादीत् २२॥ पद्यं॥ बाणेन
संप्रति नृपा दिवि लक्ष्यमेतत्त छायवद्भुवि निपातयितुं पटुर्यः मौर्वीमिमामिव स दक्षिण एव पाणौ कुर्यात्स्वसारमभिदर्श्य
ममस्वसारं ७७ इत्थं प्रगल्भमुदितारभसेन पीठादुत्थाय चापमुपसृत्य करेपि कृत्वा॥ आत्मानमेव कृतयत्नमनेषुरार्तिं मौर्वीलतां न तु
महीपतिपंक्तयस्ताः ७८

रं कुर्यात् एतद्धनुः सज्यं कृत्वेदं लक्ष्यमेकबाणेन यः पातयेत् सः मत्स्वसुः पाणिग्रहणं कुर्यादित्यर्थः ७७ इत्थं प्रगल्भं यथा
तया धृष्टद्युम्नेन उक्ताः ताः महीपतीनां पंक्तयः समूहाः वेगेन आसनादुत्था य चापं उपसृत्य करे कृत्वापि गृहीत्वापि कृतयत्नं आत्मानमेव आर्तिं व्यथां २०
अनैषुः नीतवंतः मौर्वीलतां तु आर्तिं धनुषः कोटिं न अनैषुः धनुः सज्यं केनापि न कृतं कुतो लक्ष्यवेध इति भावः ॥ ७८॥ ॥ ७८॥ ॥ ७८॥

अथनिलिंपपतेः देवेंद्रस्यकुमारः अर्जुनः संसदिसभायां इदं अकृतकार्य राजकं राजसमूहं दृष्ट्वाब्राम्हणसमूहमध्यात् नि र्गत्यकरधृतेतस्मिन्-
चापे शरं भूपेषुलज्जां चद्रौपद्यां कौतुकं आश्चर्यंच समधत्त युगपत्स्थापयामास ७९ तदातेनवीरेण अर्जुनेन बाणेन छिन्नमूलंचक्रवत् भ्रमणेन
पतनशीलं शरव्यं लक्ष्यं अस्मिन् वीरसमाजमंडलेतु अयमेव दोष्मान् प्रशस्तबाहुशालीइति आहिताकृता अभिनयलीला अर्थसूचक चेष्टायेन
तदिव आबभासे भातिस्म यथाकश्चित् अंगुलीभ्रमणचेष्टया एतत्समाजे अयमेवविद्वानिति कंचनसूचयतितद्वत् ८० तदानीं सुरकरांजलिस

दृष्ट्वाथराजकमिदंद्विजमध्यसंघान्निर्गत्यसंसदिनिलिंपपतेःकुमारः चापेशरंकरधृतेसमधत्तलज्जांभूपेषुभूरिकुतु
कंपुरुषेंद्रपुत्र्यां ७९ वीरेणतेनविशिखेनविलूनमूलंचक्रभ्रमेणपतयालुतदाशरव्यं अस्मिन्समाजवलयेलयमेवदोष्मानि
त्याहिताभिनयलीलमिवाबभासे ८० निष्पतत्सुरकरांजलिपुंजात्पुष्पवर्षमभितःकुरुवीरं मंदहासइतिविक्रमलक्ष्म्याः
संदधेसकलचेतसिबुद्धिं ८१ पांचालपुत्रीप्रहिताःकटाक्षाःपांडोस्तनूजंपरितोपवल्गुः मांगल्यमालाचक्लेरादिहेतिमाध्वीलिहः
पूर्वमिवोपयाताः ८२

समूहात् कुरुवीरमभितः अर्जुनस्यआसमंतात् निष्पतन् पुष्पाणां वर्षवृष्टिः भुष्मनयापराक्रमलक्ष्म्याः मंदहासइतिसकल
मनुष्यचेतसिबुद्धिंसंदधेस्थापयामास ८१ द्रौपद्याप्रेषिताः कटाक्षाः इह अस्मिन्स्थले मांगल्यमालावरणपुष्पमाला अवतरेत् आगच्छेत् इतिज्ञात्वापू
र्वमागताः माध्वीलिहः भ्रमराइवपांडोः तनूजं परितः अर्जुनस्यसमंतात् ववल्गुः बभ्रमुः अत्रभ्रमत्व चंचलत्व गुणयोगादुत्प्रेक्षा ॥ ८२ ॥ ॥ ७ ॥ ॥ ७ ॥

तत्रया द्रौपद्या पीतचंपकपुष्पाणां मालिकावरण विषये बलवैरिसुवः इंद्रपुत्रस्य अर्जुनस्य अधिकंठकंठे वितेने आमुक्तास्थापितेतियावत् पीतगुणयोगात् मालामुत्प्रेक्षते जननांतरं पूर्वजन्मनि नेत्रवारिणा नेत्राश्रुणा सृष्टानिउत्पादितानि यानि त्रिपथायां भागीरथ्यां हेमपयोजानि स्रुवर्णकमलानितैः गुंफितेव ग्रंथितेव द्रौपद्याः पूर्वजन्मनि स्वर्गलक्ष्मीरूपया भागीरथ्यां नेत्रपतितदुःखाश्रुबिंदुजन्यहेमकमला

जननांतरनेत्रवारिसृष्टत्रिपथाहेमपयोजगुंफितेव बलवैरिभुवस्तया ऽधिकंठं वरणे चंपक मालिकाधितेने ॥ ८२॥ गद्यं॥ तदनु स महावीराग्रेसरः समग्रगुणशोरवरितां नरपतिसुतामिव शरासनलतामुद्वहन् राज्ञां बलमवज्ञाय सभांगणान्निश्चक्राम॥ २२॥ ॥ ॥

निदृष्ट्वा इंद्रेणत्वं कासि किमिति शोदिषीतिपृष्टेत्यादि भारतीयाद्यपर्वस्थकथानुसंधेया॥ ८२॥ गद्यम्॥ तदनु महावीरेषु अग्रेसरः श्रेष्ठः सोर्जुनः समग्रगुणैः सौंदर्यादिभिः समग्रगुणेन संपूर्णमौर्व्या च शोरवरितां युक्तां नरपतिसुतां द्रौपदीमिव धनुर्लतां समुद्वहन् वहमानः २१
धारयंश्च राज्ञां बलं अगणयित्वा सभांगणात् निर्जगाम॥ २२॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

तदात्वे एव तदानीमेव खलः अयं द्रुपदः अखिलान् अस्मान् अतिस्मयेन अतिगर्वेण विस्मरन् सन् कस्मैचिद्विप्रायकन्यां ददौ इति मन-
स्थानीय द्रुपदाय द्रोहं प्रकटयतः जन्याभिमुखात् युद्धाभिमुखात् कतिचिन् राजन्यान् क्षत्रियान् प्रतिकूल भोदयेन रोषेण सवेगं भुजेभ्यः
उन्नीते ऊर्ध्वं नीते उपवीते यज्ञोपवीते कंठं आवेष्ट्य अयं क्षत्रियः मम यष्टेर्लक्ष्यं अयं मम विष्टरस्य आसनस्य लक्ष्यं इति भाषणेन ब्रा-

॥गद्यं॥ तदात्व एव खलोयमखिलानस्मानतिस्मयेन विस्मरन्कस्मैचिद्दुहितरं विप्राय प्रायच्छदि
ति द्रुतं द्रुपदाय द्रोहमुन्निद्रयतः कतिचन राजन्यान्जन्याभिमुखान्प्रतिकूलभोन्मेषेण सरभसभु
जोन्नीते रूपवीते कंठमावेष्ट्य ममायं यष्टेर्ममायं विष्टरस्य लक्ष्यमिति जातिचापलं कुर्वाणान् भवतां
पुनराशीरेव जय राशीकरणायालमिति सस्मितं निवर्तयन्नमर्त्यपतिकुमारो युधि समारोपितधनु
र्गुणनिरर्गलनिर्गलितेन शरनिकरेण तेषां परेषामधिकां दिशि दिशि कांदिशीकतां दिदेश॥ २५॥

ह्मणजातेः चापलं स्वपरबलयोः अविचारं कुर्वाणान् धरणीगीर्वाणान् ब्राम्हणान् भवतां पुनः आशीर्वाद एव जयानां राशीकरणाय अलं सम
र्थः इत्युक्त्वा सस्मितं यथा तथा निवर्तयन् अर्जुनः युधि युद्धे समारोपितात् धनुर्गुणात् निरर्गलं निष्प्रतिबंधं यथा तथा निर्गलितेन निर्गतेन बाण
समूहेन तेषां परेषां शत्रूणां दिशि दिशि अधिकां अपरिमितां कांदिशीकतां भयेन द्रुततां भयेन पलायनमिति यावत् दिदेश ददौ ॥ २५॥

तावत् अर्णोजबंधौ कमलबंधौ सूर्ये अस्य भयद्रुतस्य जंघालतां अतिजवितां अनुकुर्वाणैः रिवरयस्य अर्वद्भिः अश्वैः अपरार्णवस्य पश्चिमसमुद्रस्य-अभ्यर्णं समीपदेशं अवतीर्णवति सति अस्तंगतवति सतीत्यर्थः तेन सूर्येण निहितां स्वस्मिन् स्थापितां दीप्तिं अपरः धनंजयोऽग्निरिव अयमपि धनंजयः अर्जुनः तां द्रौपदीं अनुरंजयन् सन् तामेव कुलालसंबंधिनीमेव वासभुवं आससाद प्राप ॥ २५ ॥ पद्यं ॥ चापपाणिः अर्जुनः तया द्रौपद्या सह निटिलजैः भालजातैः घर्मोदकैः सवित्रीं मातरं पदयोः आर्द्रीचकार तया सह कुंतीं ननामेत्यर्थः इयं कुंती च अनेन अस्मद्गृहस्थितेन केनचिद्

तावदस्य राजसंघस्य जंघालतामनुकुर्वद्भिरिव रयार्वद्भिरपरार्णवाभ्यर्णमवतीर्णवति तूर्णमर्णोजबंधौ तेन निहितां दीप्तिमपर इवतां दयितामनुरंजयन्नयमपि धनंजयस्तामेव वासभुवमाससाद २५ प॰ स्वेदांबुभिर्निटिलजैः पदयोः सवित्रीमार्द्रीचकार स तया सह चापपाणिः मोदांबुभिर्नयनजैस्तमियं च मौलौ विस्मेरचेतसि कुलालवधूसमाजे ८४ कुवलयदृशः कुंभं जिग्युः कुचैरिति भाषितैः करिवरशिरः कर्मेत्येवं महृष्टमनाश्चिरं द्रुपददुहितुर्दृष्ट्वा तुंगौ कुलालपतिः कुचौ निजमपि घटं निश्चित्यैवं नितांतमलज्जत ८५

रिद्रेण विप्रेण राजन्या लब्धेति विस्मेरं साश्चर्यं चेतो यस्य तस्मिन् कुलालवधूसमूहे तं अर्जुनं मौलौ चूडायां पुत्रस्य महालाभो जात इति नयनजैः आनंदाम्बुभिः आर्द्रीचकार ८४ कुवलयदृशः कमलनेत्राः स्त्रियः कुचैः कुंभं जिग्युः जितवत्यः इति कविलोकभाषणे करिवरशिरः गजेंद्रकटः कर्मनत्स्मत्सृजः कलश इत्येवं निश्चित्य चिरं महृष्टमनाः कुलालपतिः द्रौपद्याः उच्चौ कुचौ दृष्ट्वा निजकुचैः कुंभं जिग्युरिति भाषणे स्मद्घटोऽपि कर्मेत्येवं निश्चित्य अत्यंतं अलज्जत ८५

अथान्येद्युः अन्यस्मिन् दिवसे निशिरात्रौ व्यासोत्स्याःपुरां अरातेः सदाशिवस्यविदितः ज्ञातःपंचभर्तारोभविष्यंतीति द्रौपद्याः पूर्वजन्मीयवरो
येनसः पांचालोद्रुपदः कन्यायाः परिणीतये परिणयार्थं पंचापिक्षितिपतितनयान् पांडुराजपुत्रान् अनुमेने अमुमोदं दत्तवान् लक्ष्यंभित्वाराज
कन्यां गृहीत्वानिवासस्थानगतोर्जुनः जननीवचनेन पंचभिरस्माभिर्भ्रातृभिरियंपरिण.तेतिवचनं दूतमुखेन द्रुपदंप्रतिप्रेषितवान् ततः ए
कस्याःपंचभर्तृत्वं अदृष्टश्रुतपूर्वमिति संदिग्धमनसिराजनि व्यासेनप्रकटीभूय इयंपूर्वजन्मनि ऋषिकन्यासीत् तदादीर्घायुः सर्वगुणैःसंप

अन्येद्युर्गृहमुपनीयपूजितांस्तान्व्यासोन्त्स्यार्धिदितवरःपुरामरातेः पंचापिक्षितिपतिनंदनान्कृतायाः पांचालोभि
शिपरिणीतयेनुमेने ८६॥ गद्यं॥ ततःपरमीदृशोत्सवश्रवणात्परमानंदमनुभवंतीभिरंतःपुरिकाभिः परिवृतां
तांसर्वीजनामंडनमंडपिकामुपनीयप्रसाधयितुमारभंत ॥२६॥

...वरोवरणीयइ:तमनस्यानीयतपस्तेपे तदाब
हुकालेन वृद्धत्वदशायां तुष्टेनशिवेनवरं वृणीष्वेत्युक्ते सासंक्रमेणवरमिति पंचवारं अगाद पंचवारं वरया...नात् तवसकलगुणसंपन्नाःपं
चवरा उत्तरजन्मनिभविष्यंतीतिवरं दत्वाशिवोंतर्हित इत्यादि पर्वस्थेतिहासःप्रोक्तोत्रानुसंधेयः ॥८६॥ गद्यं ॥तदनंतरं सर्वीजनाः ईदृशो-
त्सवस्यधनुःसज्जीकरणपूर्वकलक्ष्यभेदनकर्तृक्षत्रियवरेणसहरान्पुत्रीस्वयंवरोत्सवस्यश्रवणात् अत्यानंदमनुभवंतीभिः अंतःपुरसंबंधि रा
जस्त्रीभिः परिवृतांतां द्रौपदींप्रसाधनस्थलमंडपिकांउपनीयप्रसाधयितुं अलंकर्तुं आरभंत ॥२६॥ ॥८७॥ ॥८७॥ ॥८७॥

॥पद्यं॥ सखी द्रौपद्याः पंचपुरुषपत्नीत्वविषये ब्रह्मणा लिखितां लिपिं द्रष्टुं उत्कंठिता सती वसीमंतकरणकौशलव्याजेन शिरोजान् केशान् व्यभजत् उभयतोपसारयामासेत्यर्थः केशप्रसाधनं चक्रे इतिभावः ८७ तन्व्याः कृशांग्याः द्रौपद्याः मृगमदस्य कस्तूर्याः तिलकं राज लघुत्व श्यामत्व गुणयोगात् तदुत्प्रेक्षते तेजसः पराभवरूपापराधस्य शांत्येनमितनम्रीकृतं मुखचंद्रस्य कांत्या बलेन आहृतायाः चिकुरमिषं केशमिषं जुषतेस्वी करोति तस्याः अंधकाररूपायाः बंद्याः अपत्यमिवार्भक मिवकाचन स्त्रीस्वापराधशांत्यर्थं यथास्वापत्यं प्रभुचरणयोर्नमयतितद्वत् ॥ ८८॥

पद्यं॥ द्रौपद्याः पंचपत्नीत्वे द्रष्टुं लिपिमिवोत्सुका सीमंतशिल्पव्याजेन शिरोजान्व्यभजत् सखी ॥ ८७॥ मृगमदतिलकं राजतन्व्या मुखशशिनो महसा बलाहृतायाः चिकुरमिषजुषोपराधशांत्यैनमितमपत्यमिवांधकारबंद्याः ८८ अधिनासिकाशिखरमाकलितं नवमौक्तिकं नरपतेर्दुहितुः शुशुभे मुखांबुरुहमध्यचरस्मितहंसिकार्भजनितमंडमिव

राजपुत्र्याः नासिकाग्रे स्थापितं नवमौक्तिकं मुखकमलस्य मध्ये चरति मध्यचरी तया स्मितरूपया हंसिकन्याजनितं प्रसूतं अंडमिव शुशुभे इयं शुभ्रत्व वर्तुलत्व धर्मयोगादुत्प्रेक्षा॥ ८९॥ सुदृशः सुंदरनेत्रायाः मौक्तिकरत्ननिर्मितं कर्णपत्रे ताटंके जनाल्हादं सुतरां आदधाते कुर्वाते वर्तुलत्वगुणयोगादुत्प्रेक्षते मुखचंद्रसेवां परिचेतुं अभ्यसितुं समीपस्थितौ परिवेषस्य शिशू इव ॥ ९०॥ ॥७॥ ॥७॥ ॥७ २२

भूषः ताटंकप्रसाधनमाह ताटंकेइतितदानरलाःचंचलाः मणिप्रभा नां रत्नप्रभानां तरंगाः ययोस्ते ताटंकेवर्तुले कर्णभूषणे द्रौपद्याः मुखमभितः मुखस्योभयभागे व्यभातांशुशुभाते अत्रउत्प्रेक्षते मकटंमूर्तत्वंप्राप्यजागरूकेविद्यमानेनयनविपाठयोः दृग्बाणयोः अंत्येद्वे वर्णेठकाराक्षरयोः ताटंकयोश्चवर्तुलत्वगुणसाम्यादियमुत्प्रेक्षा स्यलक्ष्वेडोविपाठश्चत्रिचित्रपुंखः शरःसर इतित्रिकांडशेषः ॥ ९० ॥ द्रौपद्याःने

कृतरांजनमोदमादधातेकृदृशोमौक्तिकरत्नकर्णपत्रे परिवेतुमिवाननेंदुसेवांपरिवेषस्यशिशुभूसमीपभाजो ९० ताटंकेतरलमणिप्रभातरंगेतन्वंग्यामुखमभितस्तदाव्यभातां मूर्तत्वंमकटमुपेत्यजागरूकेवर्णेद्वेनयनविपाठयोरिवांत्ये॥९१॥सख्याःकरोंजनविधौसकृदेवगंतुमापांगभागमपटुःश्रममानशेयः रेखावधेरनवगामितयादृगंशपूर्वोक्तमेवसपुनःपुनरालंबे ॥ ९२ ॥

त्रयोः अंजनप्रक्षेपविधौयः सख्याकरः नयनयोर्विपुलत्वादापांगभागंनेत्रांतभागं अभिव्याप्यसकृदेवएकयत्नेनैवगंतुं अपटुः असमर्थः सन् श्रमं आनशे प्राप अंजनस्यरेखावधेः अनवगामितया अज्ञानपूर्वं अक्तंक्षिप्तांजनमेवदृगंशंनेत्रांशं पुनःपुनः आलंबे स्वीचकार अनयातिशयोक्त्यांजनप्रसाधनद्वारानयनयोर्वैपुल्यंद्योत्यते॥ ९२॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥

विपुले ईक्षणांबुजे यस्यास्तथाभूतापि सखी सपदि तस्मिन्समये द्रौपद्याः सकलमपि वपुः विभूष्य भूषणैर्भूषयित्वा मध्ययष्टिं अदृष्ट्वा करे
धृता कांचिः रशना यया तथाभूतेव चिरतरं तस्थौ यत्र कांचिभूषणं बंधनीयं तस्य मध्यावयवस्यादर्शनात् भूषणहस्तैव तस्थावित्यर्थः अत्र विपु
लेक्षणत्वेपि दर्शनाभावोक्त्या पुष्कलकारणसत्वेपि कार्यानुत्पत्तिरूपविशेषोक्त्यलंकारोत्थापिता मध्यादर्शनायुक्तिरलंकारः कार्याज निर्वि
शेषोक्तिः सतिपुष्कलकारणे अत्युक्तिरद्भुतातथ्यशौर्यौदार्यादिवर्णनमितिलक्षणात्॥ ९३॥ कांचिकलापस्य रशनाभूषणस्य मणिषु रत्नेषु

सकलमपिवपुर्विभूष्यतन्व्याःसपदिसखीविपुलेक्षणांबुजापि चिरतरमनवेक्ष्यमध्ययष्टिंकरधृतकांचनकांचिरे
वतस्थौ ९३ कांचीकलापमणिबिंबितपार्श्वयोषित्कौशेयपंक्तिरवनींद्रसुता बभासे आविर्भविष्यदधिगोष्ठिकटीनिमग्नं
वासःशतंजनदृशामिवसूचयंती ९४ आतंकपीडामददांपुराहमस्याद्भुतंभाविषुवल्लभेषु एवंविचिंत्येवभयेनपादेलाक्षाकृतंधाम
पपाततन्व्याः ९५

बिंबिताप्रतिबिंबिता पार्श्वयोषितां पार्श्वभागस्थितस्त्रीणां कौशेयपंक्तिः कौशेयपीतांबरादिवस्त्रसमूहो यस्याः सा द्रौपदी-
बभासे शुशुभे तासुत्प्रेक्षते अधिगोष्ठिसभामध्ये आविर्भविष्यत् कट्यां निमग्नं निलीय स्थितं वाससां शतं जनदृशां सूचयंतीव ज्ञापयंतीव॥ ९४॥ अ
स्याः भाविषु वल्लभेषु पतिषु आतंकपीडां इदं लाक्षागृहं अस्मान् धक्ष्यतीति शंकापीडां पुरा अहं अददां इत्यं विचार्य लाक्षया कृतं धाम तेजः गृहं च भ
येन द्रौपद्याः पादे पपात कश्चित्स्वापराधभ्रांत्यर्थं यस्यापराधः कृतः तदीयभार्या शरणं गत्वा पादवंदनं करोतीति तद्वत्॥ ९५॥ ॥ ७॥ ॥ ७॥

सकलास्वपि सखीषु तस्याः द्रौपद्याः तत्तदंगं कर्णनासिकाद्यंगं विवाहोचितवेषैः वेगात्त्वरया भूषितवतीषु कुचयोः शिल्पस्य पत्रादिलेख
नशिल्पस्य कर्त्री सखी कालक्षिपां क्रमुहूर्तकालक्षेपं नसहंते तथाभूताः येवृद्धपुरोहिताः तेषां कोपस्य पात्रं स्थानमभवत् कुचयोः पत्रावल्याः शि
ल्पस्यासमाप्तत्वात्कोपस्यपात्रं जातेतिभावः अनेनकुचयोःवैपुल्यं द्योत्यते ॥ ९६॥ पद्यं ॥ एवं अलंकृतां एनां द्रौपदीं अवलोक्य भगवतिभास्व

तस्याः सखीषु सकलास्वपि तत्तदंगं वेगाद्विभूषितवतीषु विवाहवेषैः कालक्षिपासहनवृद्धपुरोहितानां कोप
स्य पात्रमभवत्कुचशिल्पकर्त्री ॥ ९६॥ एवमलंकृतामेनामवलोक्य स्वयमपि संध्यारुणिमसंपादितलाक्षाकृत्या
मंजनतिलकमंजुलमुखभागां परिणेतुमिवप्रतीचीं दिशमुपगतवति भगवति भास्वांनिधौ ॥ २७॥ ॥

निधौ सूर्ये स्वयमपि संध्यारुणिम्नारागेण संपादितं लाक्षाकृत्यं लाक्षारसकृत्यं यस्यास्तां अंजननामा दिग्गजः तिलकइव तेन पद्या अंजनगज
तिलकवृक्षैः मंजुलः सुंदरः मुखभागः पुरोभागो यस्यास्तां स्त्रीपक्षे नेत्रकपोलयोः कज्जलतिलकाभ्यां सुंदरमुखभागाभ्यां प्रतीचीं दिशां परि
णेतुमिव उपगतवतिसति यावत्द्रौपदी विभूषितातावत् समयोजातइतिभावः ॥ २७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

नापद्यं॥ तस्यामेवरात्र्यांशुभयोगशुभयुक्तेमुहूर्तेसपदितत्कालंहिमरुचौचंद्रे निजकुलश्रेष्ठपार्थविवाहोत्सवानां साक्षात् आलोकनायेयद्यां
उच्चदेशं आकाशंप्रतिर्निशतिसति सालंकाराःचंदनभूषणादिभिरलंकृताःकुमाराःवराःपार्थाःमणिरवचितेःरत्नगणविशिष्टैःसोपानैःवेदिं
पाणि गृहणस्थानं अध्यरुक्षन् आरोहणंकृतवंतः कीदृशांवेदिकां पुरोधसाकुलगुरुणा सरभसं सवेगं यथातथानिर्हितैःस्थापितैःसंविधानैः
पाणिग्रहणविधिसामग्रीभिःसामग्रांसंपूर्णांयुक्तामित्यर्थः ९७ तत्रतस्यां वेद्यांदीपपुविवाहस्यमुहूर्तगुणेष्विवसमंतात् ओजायमानेषुअनोजां

पद्यं॥तस्यामेवक्षपायांसपदिनिजकुलोत्तंसपार्थोत्सवानामालोकायेवसाक्षाद्दिशतिहिमरुचौद्यांशुभयोगमुहूर्ते
सोपानैरध्यरुक्षन्मणिगणरचिते वेदिमेतंकुमाराःसालंकाराःपुरोधःसरभसनिहितैःसंविधानैःसमग्रां ॥९७॥
गद्यं॥ तत्रमुहूर्तगुणेष्विवसमंतादोजायमानेषुदीपेषुमंत्रविदांवदनेष्विवशब्दायमानेषुवाद्येषुकुलपालिकाःक
मनीयमणिनिकायकोरकितैःकनकभूषणैरविकृतसहजरमणीयकांकन्यकाममीषांसकाशेनिवेशयामासुः॥ ९८॥

सिओजांसिभवंति ओजायमानाः इतिविग्रहः अनोजस्विनः ओजस्विनःप्रकाशविशिष्टाः ज्योतिःशास्त्रबलविशिष्टाश्च भवंतइत्यर्थः तेषुस
त्सुवाद्येषुभेरीतूर्यादिषुमंत्रविदांब्राम्हणानांवदनेष्विवशब्दायमानेषुशब्दंकुर्वत्सुसत्सुकुलपालिकाःकुलश्रेष्ठसुवासिन्यःस्त्रियःरत्नसमूहविशि
ष्टैःसुवर्णभूषणैःअविकृतंविकारंनप्रापितंसहजसौंदर्यंयस्यास्तांकन्यकांद्रौपदींअमीषांपार्थानांसमीपेस्थापयामासुः॥ ९८॥ ॥७॥ २५

पद्यं॥कुशांकुरैः पूतपार्श्वभागे मणिकुट्टिमे रत्नैर्बद्धभूमौ तस्य धौम्यर्षेः प्रतिबिंबमिव अनलः अग्निः पुरस्तात् प्राज्वलत् ज्वलतिस्म अनयोत्प्रेक्षया धौम्य
स्य तेजस्वित्वं द्योत्यते ९८ हे वराः अनया कन्यया धर्मान् प्रजाः पुत्रांश्च संचिनुत संपादयत इति शाम्यतीनां ज्वलंतीनां समिधां चटचटाकृतिभिः चटचटेत्य-
कारैः कृत्वा ब्रुवाणः वदन् अग्निः ऋषिउन्नतं यत् शिखाग्रं तदेव करः तेन द्रुपदराज इव तां आत्मजां आत्मनः सकाशाज्जातां द्रुपदकृतयज्ञकुंडात् द्रौपदी-
धृष्टद्युम्नयोरुद्भवात् तेभ्यः पार्थेभ्यः प्रादादिव दत्तवानिवेत्युत्प्रेक्षा ९९ अथ जातु षाल यस्य लाक्षाधिकारकृतगृहस्य समर्पणात् भक्षणार्थं दानात् कृतं अ

प॰ पूतपार्श्वैकुशांकूरैः पुरस्तान्मणिकुट्टिमे प्राज्वलत्तस्य धौम्यस्य प्रतिबिंबमिवानलः ९८ धर्मान्प्रजाश्च बहुसंचिनुतानये
तिशाम्यत्समिच्चटच्चटाकृतिभिर्ब्रुवाणः तामात्मजां द्रुपदराज इवानलोपि प्रादाद्दिवोन्नतशिखाग्रकरेण तेभ्यः ९९ अथ जातु
षालय समर्पणात्कृतं पारिपोषमस्य वपुषोभिवीक्षितुं स्पृहयालवः किल पृथासुताः क्रमात्परिचक्रमुर्हुतवहं वधूसखाः १०० क
ठिनत्वसंपदवलेपभरात्कुचकुड्मलस्य कुरुवीर वधूः कृतनिर्जयेव पतिपाणिधृतं पदमश्मनः शिरसि सा निदधे १०१

षं अभितः वीक्षितुं स्पृहयालवः इच्छव इव पार्थाः वधूसखाः वधूसहायाः संतः हुतवहं अग्निं क्रमात् परिचक्रमुः परितो बभ्रमुः प्रदक्षिणं चक्रुः किलेत्युत्प्रेक्षायां स्य अग्नेः वपुषः परिपो
१०० कुरुवीराणां वधूः द्रौपदी विवाहविधिप्राप्तं अश्मनः पाषाणस्य शिरसि उपरि मस्तके च पति पाणिभिः धृतं पदं निदधे स्थापयामास वधूमुत्प्रेक्षते कुचः कुड्म
ल इव तस्य कठिनत्वसंपदः आधिक्यस्य अवलेपभरात् गर्वातिशयात् कृतः निर्जयः अश्मनो जयो यया सेव यथा अभिमानी राजा निर्जितस्य मस्तके पादं निक्षिपति
तद्वत् १०१

कन्यया अभ्युपहृता ः हुता ः विधिप्राप्ता ः लाजा ः कंदलयति परिज्वलति अनलार्चिषि अग्निज्वालायां पेतुः अपतन् शुभ्रत्ववर्तुलत्वधर्मयोगात् तासु त्वक्षते पंचपतिकराग्रैः संमर्दनात् बाहुरेव वंशः वेणुः तस्माद्गलिताः मुक्ता इव वेणूनां मुक्तोत्पत्तिस्थानत्वं अंतस्थितद्रव्यस्य विमर्दनबहिर्निःसरणं भवतीति च प्रसिद्धं १०२ विधिचोदनाक्रमविधिप्राप्तानुष्ठानप्रेरणाविषयेषु रत्नमयदीपयुक्तायष्टिकातस्यां स्फुरंती याइंदिराप्रतिकृतिः लक्ष्मीमूर्तिः लक्ष्मीवत् प्रतिच्छायावानस्याः सुभ्रुवः द्रौपद्याश्च अनयोरुभयोः विवेचनविधौ पार्थक्येन ज्ञानविधौ पुरोधसः धौम्यस्यस्खलनं बभूव मंत्रतंत्र

कन्यकाभ्युपहृताविधिलाजाः कंदलत्यनलरोचिषिपेतुः पंचवल्लभकराग्रविमर्दाद्बाहुवंशगलिताइवमुक्ताः ॥ २॥
विधिचोदनाक्रमणिदीपयष्टिकास्फुरदिंदिराप्रतिकृतेश्चसुभ्रुवः उभयोर्विवेचनविधौपुरोधसस्खलनंबभूवनतुमंत्रतं
त्रयोः ३ बाहुप्रतापइवसाक्षिणिहव्यवाहसामंतराजधरणेरिवयाज्ञसेन्याः कांक्षासमंक्रमशएवकरंगृहीत्वाहर्षेणवृद्धिमभजन्न
वनींद्रपुत्राः ४

योः [illegible]विवाहप्रयोगानुष्ठानयोस्तु स्खलनंनबभूव अनेन द्रौपद्याः लक्ष्मीसादृश्यं द्योत्यते १०३ अवनींद्रपुत्राः पांडुनंदनाः हव्यवाहे अग्नौ बाहूनां प्रतापइवसाक्षिणि सति याज्ञसेन्याः द्रौपद्याः सामंतराजानां मांडलिकभूभृतां धरणेरिव करं हस्तं करभागं च क्रमशः एव ज्येष्ठानुक्रमेणैव कालदेशाक्रमेण च कांक्षासमं पुत्रकन्येच्छानुरूपं च यथातथा गृहीत्वा हर्षेण वृद्धिं अभ्युदयं अभजन् स्वीचक्रुः अंगुष्ठमेव गृह्णीयाद्यदि कामयीत पुमांस एव मे पुत्रा जायेरन्नित्यंगुलीमेव स्त्रीकामो रोमांते हस्तं सांगुष्ठमुभयकाम इति गृह्यसूत्रं ॥१०४॥ ॥५॥ ॥६॥ ॥७॥

पूजकपूज्यत्वेपुष्यत्तमौ अतिशयेनवृद्धिंनयंतौ तौ द्रुपदयुधिष्ठिरौ स्वैः स्वकीयैः यौतकैः जामातृश्वशुराभ्यां परस्परदेयपदार्थैः आढ्यंभविष्णुत्वं धनसमृद्धत्वं अकिंचनत्वं दारिद्र्यं च व्यत्यस्य तामिव व्यत्यासमकुरुतामिवेत्युत्प्रेक्षा राज्ञाजामात्रे समृद्धत्वं दत्तंजामात्रा राज्ञे अकिंचनत्वं दत्तं किमिति लोकोमेने इत्यर्थः राज्ञाजामातृभ्यो यौतकमियद्दत्तं येनस्वयमकिंचनोजातइतिभावः ५॥ गद्यं॥ एवं अंतरिक्षेनिक्षिप्तं स्थापितं

पांचालराजश्श्वसपांडवश्श्वपुष्यत्तमौ पूजकपूज्यभावं आढ्यंभविष्णुत्वमकिंचनत्वंव्यत्यस्यतांताविवयौतकैः स्वैः ५.
गद्यं॥ एवमंतरिक्षनिक्षिप्तलक्ष्यवेधलक्षणेनशुल्कनिष्केणनिजकंठनिष्कायितकन्याभुजलतानेतान्पथिकौंतेयानवगंतारोदुरहंतारोपितनिवर्तनमतयोविकर्तनतनयोपायविधेयैः सहायैः सहसंमंत्र्यसमारब्धपूर्वस्ययुद्धपलायनाध्ययनस्याहुतीयावृत्तिविच्छित्तिंपरिजिहीर्षमाणाइवशकुनिभागिनेयाः सेनापुरःसरनिस्सार्णानिःसारितनिस्वानलालितैः क्ष्वेडितैः क्षालितगवाक्षमौनरोक्ष्यंद्रुपदनगरंपुनरपिनिर्वार्यनिरुच्छ्वासयांचक्रुः तत्क्षणमेवसत्वरंनिर्गत्वरेषुविविधैरायुधैरशून्येषुद्रुपदसैन्येषु॥ २९

यत्लक्ष्यंमत्स्यरूपंतस्यवेधलक्षणेन वेधरूपेण शुल्कनिष्केणकन्यार्थदेयमौल्य धनेननिजकंठेषुनिष्कायिताकंठभूषणीकृताकन्याबाहुलतायैस्तान् एतान् कौंतेयान् पार्थान् अवगंतारः पार्थाइमेइतिज्ञातारः पथिमार्गे दुरहंतया दुरहंकारेण आरोपिता उत्पादिता पार्थानांनिवर्तनेमतिर्येषांते शकुनेःभागिनेयाःगांधारीपुत्रादुर्योधनादयः विकर्तनतनयस्यसूर्यपुत्रस्यकर्णस्ययेउपायाः

पार्थानांनिवर्तनोपाया: तेषांविधेयै: वश्यै:सहायै: शकुन्यादिभि: सहसंमन्त्र्य सेनाया:पुर: सरो योनि:साणो दुंदुभि:तस्मान्नि:सारित:प्रक
टीकृत:योनि:स्वान: शब्द:तेनललितै:मनोहरै:क्ष्वेडितै:वीराणांसिंहनादै: क्षालितंदूरीकृतं गवाक्षाणांमौनस्यरौक्ष्यंदारिद्र्यंयस्मिन्तत्
भेरीक्ष्वेडितशब्दानां प्रतिध्वनयोगवाक्षेषुजाताइत्यर्थ: द्रुपदनगरं पुनरपि पूर्वमेकवारंद्रोणाज्ञया द्रुपदनगरंनिरुद्धमितिहेतो:पुनरपीत्यु-
क्तं निर्धार्य वेष्टयित्वानिरुद्धामयांचक्रु: अंत:स्थितप्राणिनांबहिर्निर्गमनादिप्रतिबंधंचक्रु: एतन्मंत्रकर्तृशकुनिभागिनेयानुत्प्रेक्षते समारब्ध
तिपूर्वसमारब्धंसमारब्धपूर्व तस्ययुद्धात्पलायनरूपस्याध्ययनस्यद्वितीयावृत्ते:धिच्छित्तिंविच्छेदंपरिहर्तुमिच्छव इव यथाकश्चित् कृतस्या

पद्यं॥ पृथासुतास्तेपिरथाधिरूढाद्विधाविचार्यैवपुरान्निरीयु: शरैर्विधातुंद्विषतोपिचूर्णांस्तत्सुभ्रुवामप्यलकानचूर्णान्

ध्ययनस्य विस्मरणंमाभूदिति द्वितीयावृत्तिंकरोतितद्वत् अनेकै:आयुधै: युक्तेषु द्रुपदसैन्येषुतत्क्षणमेव सत्वरं यथातथानिर्गलैरेषुपु
राद्बहिर्गमनंकुर्वत्सु सत्सु २० ॥ तेपृथासुता अपिरथाधिरूढा:संत:द्विधा विचारंकृत्वैव पुरान्निर्जग्मु: विचारद्वैविध्यमाह शरैरिति
शरै: बाणै:द्विषतोपि श[illegible]र्णान्खंडान् विधातुं कर्तुंतेषां शत्रूणांसुभ्रुवां वधूनां अलकानपिकेशानपि अचूर्णान् पतिजीवनेनसौ
भाग्यवत्वात् अखंडान्[illegible]रै:शत्रूणांप्राणहरणंकर्तव्यं अथवाजित्वा सप्राणामोक्तव्याइति विचारद्वैविध्यंफलति मानवतांयुद्धा
त्पलायमाने मरणममर[illegible]तिभाव: ॥६॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

स्वर्गवासिनां देवानां द्रष्टुं अतिशयेभे तेद्वयेपिउभयपक्षास्थिता अपिप्रवीराः शंखंदध्मुः वादयामासुः भेरीस्ताडयामासुः सिंहनादंचक्रुः चापगुणटणत्कारं चक्रुः प्रकटीचक्रुश्च ॥ ७ ॥ वनत्वं ताः सैन्ययोः संबंधिनां महारथानां एतत्संज्ञक महावीराणां अवलोकनायनभोजुषां नभसिप्राप्तानां सुरीणां अप्सरसां नगरसौधहर्म्याणां सुदृशां सुंदरस्त्रीणांच भेदकाभेदकर्त्री अप्सरोभिः हस्ते धृतानूतन पतिवरणविषये स्त्रक्पुष्पमालिकैव अभूत् वीराणां धर्मयुद्धे ससुखमरणे स्वर्गवासस्मरणात् अप्सरसांपतित्वेन तद्वरणं नगरस्त्रियोप्सरस्तुल्यादृतिभावः ॥ ८ ॥ ॥

शंखंदध्मुस्ताडयंतिस्मभेरीश्चक्रुक्ष्वेडांचापनादंविवव्रुः सिद्धादीनांद्योसदांलालनीये युद्धारंभेतेद्वयेपिप्र
वीराः ७ अनयोर्बलयोर्महारथानामवलोकायनभोजुषांसुरीणां सुदृशांचपुरस्यसौधभाजांवरणस्त्रग्विधृतेवभे
दिकाभूत् ८ आसीदताम्यत्सुधनुर्धराणांमासीदताम्यत्करकौशलानां क्षणंमिथोबाणगणंनिरुध्यव्रणंविनातत्ररणंम
हीयः ९ रथिकंरथिकोहिरदंद्विरदस्तुरगंतुरगःपदगंपदगः इतरेतरमेत्यरणंविदधौदिविनारदविस्मयनाकतरुः ॥ १० ॥

अताम्यत् विकसत् करकौशलं येषां तेषां आशु शीघ्रं आसीदतां परस्परं संघट्टमानानां धनुर्धराणां महीयः अतिशयेन महत् रणं युद्धं क्षणंमिथः बाणसमूहं निरुध्य खेटादिना रुध्वा बाणेन बाणं संछिद्य वा व्रणं विना आसीत् ॥ ९ ॥ चतुरंगसैन्यमध्ये रथिकादिकः स्वसमानं रथिकादिकं प्रति अन्योन्यं एत्य प्राप्य दिवि अंतरिक्षे नारदविस्मयस्य नाकतरुः कल्पवृक्षः नारदस्य बह्वाश्चर्यदायकमित्यर्थः रणं विदधौ चकार ॥ १० ॥ ॥५५॥ ॥

रजसा मंधकारेषु दृशः वीराणां नेत्राणि अंधानि कुर्वत्सु कौतुकसूत्राणि मांगलिकसूत्राणि चिन्हानि येषां तान् करान् हस्तान् स्वकीयकरैः
परामृशंतः स्वकीयः परकीयो वा इति ज्ञानार्थं परामृशंतः पांडुपुत्राः युधि परस्परं प्रतिप्रहारान् पर्यहरन् वर्जयामासुः सूत्रचिन्हैरयं ममा

॥ रजोंधकारेषु दृशोंधयत्सु करैः करान्कौतुकसूत्रचिन्हान् परामृशंतो युधि पांडुपुत्राः परस्परं पर्यहरन्प्र
हारान् ११ सोमकेष्वपसर्पत्सु सूर्यसूनोः शितैः शरैः कूजयामास कोदंडं कुलिशायुधनंदनः ॥ १२ ॥

तेति ज्ञात्वा प्रहारं न चक्रुरित्यर्थः ॥ ११ ॥ सूर्यसूनोः कर्णस्य शितैः तीक्ष्णैः शरैः सोमकेषु द्रुपदपक्षीयेषु अपसर्पत्सु पृथग्भागे गच्छत्सु स
त्सु अर्जुनः कोदंडधनुः कूजयामास सशब्दं चकार धनुषः प्रत्यंचा रणत्कारं चकारेत्यर्थः ॥ १२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

ऽजनने उत्पन्नाविव मथने युद्धेपि वृकोदरद्वितीयेन वृकोदरः द्वितीयः सहायो यस्य तेन अर्जुनेन करो दरे करमध्ये परिकर्मीकृतस्य धृतस्य कार्मुकस्य कवचभेदिभिः बाणतरंगैः निर्मितानि ईर्माणि व्रणान्येव मर्माणि प्राणघातकानि येषां तेः भयेन प्रसारिभिः क्षरद्भिः स्वेदोदकैः कलापदान्येव चरणानेव यानपदे पलायनाधिकारे अभिषिंचंतः सौबलेयाः गांधारीपुत्राः दुर्योधनादयः समरांगणे कंदलितं प्रसृतं यशः एव भाद्रपदस्तु कचतुर्थी चंद्रकलानस्याः अवलोकनं परिहर्तुमिव वंचयितुमिव तु स्वं निवर्त्य पश्चात्कृत्वा केवलैः बाहुभिः सहैव न तु कन्यायशआदिभिः सह कुरुराजधानीम

गच्छं ॥ तेनजनन इव प्रथनेपि वृकोदरद्वितीयेन करोदरपरिकर्मीकृतस्य कार्मुकस्य वर्मनिर्माथिभिः शरोर्मिभिर्निर्मितेर्मर्मणोः भयप्रसारिभिः स्वेदवारिभिः पदान्येव यानपदेऽभिषिंचंतः समराजिरकंदलितपार्थयशश्चतुर्थीचंद्रावलोकनं परिहर्तुमिव स्वं निवर्त्य सौबलेयाः केवलैरेव बाहुभिः कुरुपुटभेदनं प्रतिपलाय्य बभूवुः २०ए बीभत्सुचापविवृतेषु महत्सु कर्मस्वेकं दृष्ट्वा जगृहिरे युधि धार्तराष्ट्राः वीरस्य स्थितेषु विमतेषु विलोलजीवपृष्ठप्रकाश्यगमनं पृथुनाजवन ॥१२॥

तिपलायां बभूवुः पलायनं चक्रुः २०प० धार्तराष्ट्राः धृतराष्ट्रपुत्रकर्णशकुन्यादयः युधि युद्धे बीभत्सोः अर्जुनस्य चापेन विवृतेषु प्रकटितेषु महत्सु कर्मसु मध्ये एकं कर्म दृष्ट्वा यथातथा जगृहिरे स्वीचक्रुः किं कृत्वा विमतेषु शत्रुषु स्थितेषु सत्सु विलोला चंचला जीवा मौर्वी यस्मिन् तत्तु अन्यत्र विलोलाः बहिर्गमने चंचलाः जीवाः प्राणाः यस्मिन्तत् पृष्ठभागं प्रकाश्य शत्रून्प्रति दर्शयित्वा पृथुना जवनवेगेन गमनं रणांगणे भापणं अन्यवरणांगणात्

गमनं अपसरणं वीक्ष्य दृष्ट्वा यथा कश्चित् कस्यचित् अनेककर्मदर्शनेपि स्वबुद्धिसामर्थ्यानुसारेण यत्किंचित्कर्म इदं गृह्णातीति तद्वत् पार्थधनुषो नेककर्मणां मध्ये विलोलजीवं पृष्ठं प्रकाश्य पृथुनाजवेन गमनलक्षणमेककर्म इदं जगृहुरित्यर्थः १३ ऋजवः सरला अपि अरीणां भीषणाः प्र यदायकाः एतेषां पांडवानां गुणाः शौर्यौदार्यादयः विजयात्परं जयोत्तरं सद्यः तत्कालं समुन्नेमुः वृद्धिं जग्मुः धन्विनां गुणाः धनुर्गुणाः अवनेमुः अवनता बभूवुः एके उत्कर्षं प्राप्ताः अपरे अपकर्षं प्राप्ता इत्यर्थानुसंधानमापाततोत्र भवति १४ द्रुपदराजकृतया वस्त्रालंकारादिभिः पूजया भूषिताः

विजयात्परमेतेषामृजवोप्यरिभीषणाः । सद्योगुणाः समुन्नेमुरवनेमुस्तु धन्विनां ॥१४॥ तेनिवृत्य नगरं समावि
शन् भूषिता द्रुपदराजपूजया । अप्यशेषजनकेन शौरिणा जन्यभावमुपजग्मुषा समं ॥१५॥ पार्थ एव सहजे
ष्वखिलेषु प्रायशो युधि बलं श्रुतवत्याः । अन्वभूदधिकमीक्षणवृष्टेरार्जकोंशमिव राजसुतायाः ॥१६॥ ॥

ते पांडवाः रणांगणान्निवृत्य अशेषाणां जनकेनापि जन्यभावं पुत्रत्वमिति विरोधः मित्रत्वमिति परिहारः उपेयुषा प्राप्तवता शौरिणा कृष्णेन समं द्रुपदनगरं समाविशन् प्रविविशुः ॥१५॥ अखिलेषु सहजेषु बंधुषु मध्ये पार्थः अर्जुन एव युधि बलं शौर्यं अर्थात् अर्जुनस्य श्रुतवत्याः राजसुतायाः द्रौपद्याः अधिकमीक्षणवृष्टेः सरागापांगदर्शनवर्षणस्य अंशं प्रायशः अन्वभूत् कइव अर्जकएव आर्जकः धनादिसंपादकइव यथा कश्चित् विभागसमये धनभूम्यादिसंपादकः अधिकं अंशं प्राप्नोति तद्वत् इत्यर्थः ॥१६॥ ॥७॥ ॥७॥ ॥७॥

राजाचासौवृद्धश्वराजवृद्धः धृतराष्ट्रः लाक्षागृहान्मुक्तैः पांडवैः द्रुपदनगरे प्रकटीभूय स्वयंवरे द्रौपदीलब्ध्वा तस्मिन्समये प्रतिस्पर्धिनो राजानोजिताश्चेत्येवं वृत्तांतं श्रुत्वा क्षत्ताविदुरेणकृत्वा अनुजातैः कनिष्ठबंधुभिः सह स्वसमीपमानीय अर्धान्धर्मराजं कंसभिदः श्रीकृ-

वृत्तांतमेवमवकर्ण्यसराजवृद्धः क्षत्तासकाशमुपनीयसहानुजातैः धर्मात्मजाय धुरि कंसभिदोर्धभागाद्न्वर्थतामयथविभज्य ददौस्वनाम्नः ॥ १७ ॥ ॥ ॥

ष्णस्य धुरि अग्रभागे धर्मात्मजाय अर्धेराज्यार्धे भागात् विद्यमानत्वात् तस्य स्वत्वान्हेतोः स्वनाम्नः धृतराष्ट्र इति नाम्नः अन्वर्थतां राष्ट्रपालक त्वं विभज्य समविभागंकृत्वा ददौ अर्धराष्ट्रदानेनराष्ट्रपालकत्वंददावित्यर्थः ॥ १७ ॥ ॥ श्रीकृष्णायनमः ॥ ॥ ७ ॥ ॥ ७ ॥

पौराः पुरवासिनो जनाः आहृतानि प्रसिद्धानि लक्षणानि सामुद्रिकोक्त साम्राज्यादिचिन्हानि औदार्य दयालुत्वादयो गुणा वा यस्य तस्मिन्नर पतौ युधिष्ठिरे राज्ये राजकर्मणि अभिषिक्ते सति यत् यतः कारणात् स्वानि स्वकीयानि अक्षीणि शिशिरं आनंदजन्य शीतं अंबु दधुः कुंकु- मैः काश्मीरजन्मयुक्तचंदनैः लिप्तांगकेन चर्चितशरीरेण सति यतश्च रागं रक्तिमानं अनुरागं च भिशं बभूवुः दधुः बंदिभिः वर्णिते स्तुते सति- यतश्च निष्यंदत्वं स्तब्धत्वं अवहन् दधुः अतस्तं युधिष्ठिरं स्वदृष्टिरिति स्वनेत्रमिति स्फुटं विवव्रुः प्रकटीचक्रुः यत्राभिषेकस्तत्रांबु यत्र कुंकु-

तस्मिन्नाहितलक्षणे नरपतौ राज्याभिषिक्ते सति स्वान्यक्षीणि दधुर्यदंबु शिशिरं लिप्तांगके कुंकुमैः
रागं यद्भिशं बभूवुर्वहन्यद्वर्णिते बंदिभिर्निष्यंदत्वमतः स्वदृष्टिरिति तं पौरा विवव्रुः स्फुटं ॥ १८ ॥
दिगंतरलुठत्कीर्तिरनंतकविकुंजरः भोणस्तुल्यं सरस्वत्याः प्राणेशीश्चंपुभारतं ॥ १ ॥ ॥ ॥
इत्यनंतभट्टकविकृतौ चंपूभारते द्वितीयस्तवकः संपूर्णोभवत् ॥ २ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

मलेपस्तत्र रागः यस्य दर्शनं तस्य नेत्रे निष्यंदत्वं भवतीति कार्यकारणयोः सामानाधिकरण्यं लोके दृष्टमतो दृष्टित्वारोपो युक्त एवेति भावः ॥ १८ ॥ ॥ इति श्रीमदनंतभट्टकृतचंपूभारतटीकायां श्रीखंडोपाध्नारायणसूरिकृतायां द्वितीयस्तबकः समाप्तिमगमत् ॥ २ ॥ ॥

॥ श्रीकृष्णार्पणमस्तु ॥ ॥ श्रीगोपालकृष्णायनमः ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

अथचंपुभारतसटीकतृतीयस्तवक प्रारंभः

श्रीगणेशायनमः॥पितृव्येति अथपृथासुतः एषः धर्मराजः पितृव्यस्य धृतराष्ट्रस्यवाचा आज्ञया हरिं श्रीकृष्णं पुरोधाय अग्रतः कृत्वा बलौघैः सेनासमूहैः समं पथा नग
परस्परस्नेहं मातुं पंचकस्यान्योन्यं प्रीतिं मातुं परिमातुमिवेति फलोत्प्रेक्षा खांडवशब्दः पूर्वो यस्य तं प्रस्थं खांडवप्रस्थमित्यर्थः शब्दच्छलेन परिमाणविशेषं यथोज
गाम यथाकश्चित्कंचित्पदार्थं परिमातुं प्रस्थादिमानस्थले गच्छतितद्वत् १ ॥गणं॥ अत्रनंवनं अभवन् तस्मिन्नृपनीभवनिवनीपकजनमनीषितानांपावककनम
नोरथानांपूरकाः पूर्णकर्तारोयेपुरुकुलावनीपाः पौरवभूपालाः तेषां सुरसुरभिगोष्ठे कामधेनुसमूहस्य गोष्ठीने पूर्वभूतं गोष्ठीनं तस्मिन्देशे गोष्ठगोस्थानकं तनुगा

• पितृव्यवाचाथपृथातनूजोहरिंपुरोधायसमंबलौघैः परस्परस्नेहमिवेषगातुंप्रस्थंपयौखांडवशब्दपूर्वं १ गद्यं॥तत्रवनीपवनिवनीप
कजनमनीषितपूरकपुरुकुलावनीपसुरसुरभिगोष्ठीगोष्ठीनेदेशेप्रविश्यस्मरणमात्रनयनपात्रेणसकलशिल्पपारदृश्वकर्मणाविश्व
कर्मणानिर्मापितकामनीयकविलोकनसफलप्रविस्मयभारगुरुतरानमरान्वोढुमक्षमतयाक्षमातलमवलंबमानैर्विमानैरिवकुरुवि
दमणिमंदिरैरभ्रंलिहंजंभारिपुनिदेशानलंभितनत्नामोपपदहरिप्रस्थमधिष्ठिताययुधिष्ठिरायविनिवेद्यस्वपुरीपक्षपमामोदशीपरी
क्षितुमिवस्यंदनेनयदुनंदनेनप्रययेः १ ष्ठीनेभूतपूर्वकमित्यमरः प्रविश्यस्मरणमात्रेणनयनपात्रेणप्रत्यक्षादृश्येनसकलानांशिल्पानांकौशलानांपार
दृश्वानिपारंदृष्टवंतिकर्माणियस्यतेनविश्वकर्मणाप्रयोज्यकर्त्रानिर्मापितंउत्पादितंहरिप्रस्थंइंद्रप्रस्थं अधिष्ठिताययुधिष्ठिरायविनिवेद्यसमर्प्यस्वपुरेपिद्वारकाया
मपिईदृशींइंद्रप्रस्थतुल्यांसुषमांपरमशोभांपरीक्षितुंपरीक्षांकर्तुमिवेत्युत्प्रेक्षा द्वारकाहरिप्रस्थयोःविश्वकर्मकृतत्वादितिभावः यदुनंदनेनश्रीकृष्णेनस्यंदनेन- १

कृतापरथेप्रयाणंकृतं कीदृशं हरिमस्यं कामनीयकस्यरमणीयतायाः विलोकनेनसकलमानांविस्मयानां आश्चर्याणांभारेण गुरूतयन् अमरान् देवान् वोढुं च
हननंकर्तुं अक्षमतया असमर्थतया क्षमातलं भूतलं अवलंबमाने भूतलेतिष्ठद्भिरित्यर्थः विमानैरिवेत्युत्प्रेक्षा कुरुविंदमणीनां पद्मरागमणीनांमंदिरैः अभ्रं
लिहं गगनस्पृक् तथाजंभारिपुनिदेशेन इंद्रादेशपालंभितं यापितं तन्नामइंद्रद्रुतिनामउपपदंपूर्वपदंयस्यतत् १ अथइंद्रप्रस्थाधिष्ठानानंतरं माणायमानामा
णवदाचरंतीमहिलाद्रौपदीस्वीयेषांतान् इमान् पांडवान् अनुजिघृक्षुः अनुग्रहंकर्तुमिच्छुः अपारः अनंतः भूमामहत्त्वंयस्यसः एणाजिनेनमृगचर्मणाघटितं

माणायमानमहिलानयपांडुपुत्रान् क्षोणाविमाननुजिघृक्षुरपारभूमा एणाजिनेनघटितोद्गमनीयकृत्यो वीणानिनादरसि
कोमुनिराविरासीत् २ तपोनिधेरागमनेनसद्यः सभाविभोः स्तब्धजनारवापि वीणारवानुद्रुतभृंगमालाकोलाहलैर्घोषितदि
ङ्मुखाभूत् ३

कृतंउद्गमनीयकृत्यंधौतवस्त्रयुग्मकार्यंयेनसः तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगमित्यमरः यस्यधौतवस्त्रो
त्तरीयवस्त्रस्थाने एणाजिनमेववर्तत इत्यर्थः वीणायानिनादेशब्देरसिकः लुब्धः मुनिः नारदऋषिः क्षोणौ पृथिव्यां आविरासीत् प्रत्यक्षोबभूव २ तपो
निधेः नारदऋषेः आगमनेनसद्यः तत्कालेविभोः राज्ञः सभास्तब्धः जनारवोलोकशब्दोयस्यां तथाभूतापिवीणारवं अनुद्रुतावीणाशब्दमाधुर्यं अनु-
लक्ष्य आगतायाभृंगमालातस्याः कोलाहलैः कलकलैः घोषितानिशब्दयुक्तकृतानिदिङ्मुखानिदिक्प्रदेशायस्यास्तथाभूता अभूत् अनेनकल्प
वृक्षपुष्पमकरंदमपहाय भ्रमरागमनकथनेनवीणाशब्दमाधुर्यातिशयोद्योत्यते ३ ६७ ६७ ६७ ६७

विनीतःनम्रः अयंनृपः धर्मराजः देवमुनिंदृष्ट्वा मौलिस्रजामुकुटसंबंधिपुष्पमालानांधूलिमधूलीनां परागमकरंदानां वृंदैः तंनारदं अंघ्रियुग्मेसपंकंसकर्द
मंविधायकृत्वा आत्मानं विपंकं विगतकर्दमं व्यतानीत् अकरोत् इत्याश्चर्यं अंघ्रियुग्मेमस्तकस्थापन पूर्वकप्रणम्य आत्मानंविगतपापमकरोदितिना
श्चर्यमितिभावः ४ मेध्यांपवित्रांबृसींतृणमयासनं अधिगतस्यप्राप्तस्यतृणासनेउपविष्टस्येत्यर्थः विरिंचिसूनोः ब्रम्हपुत्रस्यनारदस्यसन्निधिं आस्था
य आसाद्य उदारामहतीमुत्हर्षंयेषांतेषां कुरूणांपांडवानांचित्तानितस्यनारदस्य अद्भुतागमने योहेतुः कारणंतस्यपरिच्छिदायांइयत्तयानिय

दृष्ट्वानृपोदेवमुनिंविनीतोमौलिस्रजांधूलिमधूलिवृंदैः सपंकमाधायतमंघ्रियुग्मेविपंकमात्मानमयंव्यतानीत् ४ मेध्यां
बृसीमधिगतस्यविरिंचिसूनोरास्थायसन्निधिमुदारमुदांकुरूणां तस्याद्भुतागमनहेतुपरिच्छिदायांचित्तानिदूरप
थवर्तनतामवापुः ५ निकुंचितेतेनधृतानिजांकेविपंचिकामौनमवाप्यतस्मिन् पांचालिकावंदनवादशैलीमाधुर्यमा
कर्ण्यविलज्जितेव ६

मने दूरपथेवर्ततेतानि दूरपथवर्तननितेषांभावस्तत्तातां अवापुः एतदर्थमयमागतइ
तिनसिनिश्चयोनाभूदितिभावः ५ तेननारदेननिकुंचितेसंकुचितेनिजांकेस्वोत्संगे [illegible]विपंचिकावीणायामौनंअवाप्यशब्दंविसृज्येत्यर्थः त
स्यांतांनिःशब्दवीणामुपेक्षते पांचालिकायाः द्रौपद्याःवंदनवादशैल्या अभिवंदनसंब[illegible]प्रीतेःमाधुर्यंआकर्ण्य द्रौपदीकंठमाधुर्यंश्रुत्वेत्य
र्थः विलज्जितेवलज्जांप्राप्तेव पांडवान्प्रतिकिंचिद्वक्तव्यमस्तीतिवीणावादनेनत्यक्तमिति [illegible]ः ६ ॥ ॥ ॥

अमुना राज्ञा धर्मराजेनसमुचितेषु योग्येषुसभाजनेषुपाणिविधृतैः करधृतैः पात्रैः गंधपुष्पादिपूजापदार्थभाजनैः चपलैः वेत्रैश्चक्रमेणनिर्वर्तितेषु पूजयासुखितेषु रभसेनवेगेन निवर्तितेषु अपसारितेषु च सत्सु धातृसूनुः नारदः स्मित्वाईषद्धास्यंकृत्वामिथोरहसिगिरं अभाषत द्वाभ्यांचकाराभ्यांयोग्येष्वपिपात्रवेत्रजन्यसंतोषापसारणसाहित्यंद्योत्यते ७ हेपांडवाः युष्माभिः लाक्षागृहात् अच्चाविगृहदाहात्पूर्वंनिर्गतंइतियत् साक्षात्रतिरिवप्रियाव्यवाहिव्यूढा इतियत् ननुइयंसतांमुदेहिहर्षायैव अनेन असतांदुर्योधनादीनांदुःखायजातमितिध्वन्यते ८ स्वतःपरोपदेशादिकारणंविनास्वात्मनैवभातास्फुरद्रूपाम

राज्ञामुनासमुचितेषुसभाजनेषुपात्रैश्चपाणिविधृतैश्चपलैश्चवेत्रैः निर्वर्तितेषु रभसेननिवर्तितेषुस्मित्वामिथोगिरमभाषतधातृसूनुः ७ लाक्षागृहाद्यदच्चाविसाक्षादिवरतिःप्रिया पर्यवाहिचयुष्माभिस्तदयंहिसतांमुदे ८ स्वतोभातमतीनांवःकुतोवान्यानुशासनं मौनंतुसुहृदास्थेयेदूनंवक्तारमावहेत् ९ अष्टमीकिलशिखावधूरियंभातियाजमखवेदिबर्हिषः यूयमग्मसारिताहृतान्वयाःपावनःखलुभवत्समागमः १०

तिर्यषांतेषांवः युष्माकंअन्यानुशासनंअन्यशिक्षाकुतःकुतोपिनेत्यर्थः तर्हिकेनापिशिक्षावचनंमात्तव्यमितिचेदत्राह मौनमिति सुहृदेमित्रायसुहृदामित्रेणवावक्तव्येर्थेमौनंतुवक्तारंदूनंदुःखसंतप्तंआवहेत् कुर्यात् अतोमित्रेणस्वतोभातमतीनांस्वसंतापपरिहारायवक्तव्यमित्यर्थः ९ इयंवधूःजायाद्रौपदीयाजस्ययाजर्षेःमखवेदेःयज्ञकुंडसंबंधिनःबर्हिषःअग्नेः बर्हिःशुष्माकृष्णवर्त्मेत्यमरः अष्टमीशिखाकिलज्वालेवभाति सप्तार्चिरग्निरस्तिइयंतदुत्पत्तिमत्त्वापावनत्वादिधर्मेणतस्याष्टमी अर्चिःकिमित्यत्रेसा यूयंभवंतः अग्मसारिताभागीरथ्याहृतःस्वीकृतःअन्वयोवंशोयेषांतथाभूताःभवंतः

 भागीरथ्याः पौरववंशजशंतनुभार्यत्वात् स्मृतान्वपइत्युक्तं अतः नयाराकं भवतांसमागमः पावनः खलु पवित्रएव अग्निभागीरथ्योः पावनत्वात् तत्संबंधतया
 युष्माकं समागमः पवित्रएवेतिभावः १० जायया एकभार्यया पतिभिः बहुपतिभिश्च दंपतिशब्दः जायाचपतयश्चेतिविग्रहेण एकजायाबहुपतिवाचकदंप
तिशब्दः कदाचित् नहिजायतस्मनैवजातः तदर्थस्यलोके अभावात् नोत्पद्यतेस्म अद्भुतस्यलोकविलक्षणत्वादाश्चर्यकारकस्यतस्य जायाचपतयश्चेति
विग्रहविशिष्टस्यदंपतिशब्दस्य अर्थतां अभिधेयतां जगत्यांलोके भवंत अनुभवंति ११ एकजायायाः अनेकपतित्वमनर्थमूलमित्याह एकस्मैइति सुधियां
विचारवतामपि एकस्मैइष्टायप्रियपदार्थायस्पृहयालूनांस्पृहांकुर्वतांप्राणिनांनिधनावधिमरणांतंकलहंकरस्थंहस्ते विद्यमानंसुलभमित्यर्थः ब्रुवंते

जाययाचपतिभिश्चकदाचिज्जायतेस्मनहिदंपतिशब्दः अद्भुतस्यखलुतस्यजगत्यामर्थतामनुभवंतिभवंतः ११ एकस्मैस्पृह
यालूनामिष्टायसुधियामपि करस्थमेवब्रुवतेकलहंनिधनावधि १२ सुंदोपसुंदौसहजावभीकौसुरेषिवकापिसुरांगना
यां अन्योन्यमाहत्यपुरायमस्यमनोभवेषोरिवलक्ष्यमास्तां १३ तत्सोप्यत्रशरव्यस्यद्वैधीकरणकेलये भवतांमारचापेषु
भवतांमावधूकृते १४ वदंति १२ एतद्विषये इतिहासमाह सुंदोपसुंदाविति पुरासहजौसोदर्यबंधूसुंदोपसुंदौ एतन्नामकावसुरौसुरेषिवकापि
कदाचित्सुरांगनायांतिलोत्तमानाम्न्यांदेवांगनायां अभीकौनिर्भयौकामुकौचतौसंतौ कम्रःकामयिताभीकइत्यमरः अन्योन्यं आहत्यगदाभ्यांताडयित्वाम
नोभवेषोरिव मदनबाणस्येवयमस्यलक्ष्यंवेध्यं आस्तांमृतावित्यर्थः १३ तत्तस्मात्बंधूकृतएकस्त्रीविषयार्थमारस्यमदनस्यचापेषुधनुर्बाणेषु भवतांयुष्माकं

शोभनभ्रातृणांभावः सौभ्रात्रंसुबंधुत्वंतदेवशरव्यंलक्ष्यं तस्यद्वैधीकरणंभेदनंतदेवकेलिः क्रीडातस्यै केलिंकर्तुमित्यर्थः माभवतांनभवेतां एकस्त्रीहे
तःयुष्माकंपरस्परप्रीतिभंगोमाभूदितिभावः १४ गद्यं इतिरहस्यंरहसिभवंतपस्विनोनारदस्यनिदेशंआज्ञांशुभः उदर्कः भाविफलंयस्यतथाविधंतर्क
यंतः बुध्याविचारयंतः तेकौंतेयाः तस्यैवनारदस्यैवसमक्षंतीक्ष्णत्वेन असिधारयासगंधांसमानांइमांवक्ष्यमाणांसंधांप्रतिज्ञां आबबंधुःचक्रुः २ गद्यं एते
वयंचातकपक्षिणइवजीवनमयंजीविकारूपं एकैकंवर्षसंवत्सरं अवलंब्यस्वीकृत्य पक्षिपक्षेजीवनमयं उदकमयंवर्षवृष्टिं अवलंब्य अनयाप्रियया-

गद्यं॥ इतिरहस्यंतपस्विनिदेशंशुभोदर्कंतर्कयंतस्तेकौंतेयास्तस्यैवसमक्षमसिधारासगंधांसंधामिमामाबबंधुः २ एते
वयंचातकाइवजीवनमयंवर्षमेकैकमवलंब्यप्रिययासममनया स्फुरवेनवृत्स्यामस्तथाभूतेष्वस्मासुयोमिथुनकृतापवेशो
देशोदशापिप्रविशेत्सोयंवृजिनंविहातुमजिनंपरिधायस्फूर्जत्तसार्थसमर्थापकतीर्थपरिपुष्टास्वष्टास्फटिदक्षुतत्स्त्रिगुणसंख्या
कान्पक्षान्प्रक्षिपेदिति ३

समंस्फुरत्वेनवत्स्यामः अस्मासुतथाभूतेषुतेननियमेनवर्तमानेषुसत्सुपंचानांमध्येयः मिथुनेनस्त्रीपुंसाभ्यां-
कृतउपवेशःस्थितिर्यस्मिन्तस्मिन्देशेदशापिप्रविशेत् चक्षुषापिपईक्षेतसोयंवृजिनंनियमोल्लंघनपापंविहातुंक्षालयितुंअजिनंकृष्णाजिनंपरि
धायस्फूर्जत्सार्थस्यपुण्यसमूहस्यसमर्थापकानिसंपादकानियानितीर्थानितैःपरिपुष्टाःसुयुक्ताःस्फुअष्टस्फदिक्षुतासांदिशांत्रिगुणासंख्यायेषांतान्च
तुर्विंशतिसंख्याकान्पक्षान्एकवर्षमित्यर्थः प्रक्षिपेत् तत्पक्षयार्थ एकवर्षंतीर्थाटनंकुर्यादित्यर्थः भारतीयादिपर्वणिद्वादशवर्षाणिप्रक्षिपेदितिनिय
मोस्तिएकवर्षमितिकुतउक्तमिदंचिंतनीयं ३

च॰ भा॰ पद्यं॥ राजानिदेशकृत् आज्ञानुवर्ती अभूदितिहेतोः धातृसूनोः अंतःमनसि निरवधेः निर्मर्यादायाः मुदः हर्षस्य इदं उत्तरार्धोक्तं किंचिन्हं ज्ञापकं आस अभूत् आसे टीका॰

४ तिमोघादिकस्यलिटिरूपं नरू नारदस्य पाणिः वीणायाः गुणे तंतौ अंगुलीनां मृद्धाः कंठगीतेः विवशाविसंवादिरिंगणं वादनार्थं इतस्ततोगमनं अकरोत् इ २

तियतः हर्षातिशयेन गीतिवादनयोरनुसंधानाभावादितिभावः १५ तस्मिन्मुनींद्रेनारदेनभःसरणिं आकाशमार्गं उत्पतिते उड्डीयगते सति सा मृगाक्षी द्रौपदी पं

चसुतेषु पांडुपुत्रेषु समं यथातथा ववृते समवर्तत इतिदृष्टांतद्वयमाह सांक्रंदनेष्विति संक्रंदनस्य इंद्रस्य इमे सांक्रंदनाः तेषु विटपिषु पंचसु कल्पवृक्षेषु दानलक्ष्मी

पद्यं॥ राजानिदेशकृदभूदिति धातृसूनोरंतर्मुदो निरवधेरिदमास चिन्हं यत्तस्य पाणिरकरोन्मृदु कंठगीतेर्वीणागुणे विवशरिंखण

मंगुलीनां १५ तस्मिन्नभःसरणिमुत्पतिते मुनींद्रे सा तेषु पंचसु समं ववृते मृगाक्षी सांक्रंदनेषु विटपिष्विव दानलक्ष्मीर्मानोभवेषु

जयसिद्धिरिवाशुगेषु १६ विप्रः कश्चन तत्र जात्वयमुजावुत्थ्तृत्य चौरैर्हृता गावो मे निखिला हतोऽस्मि विधिना वत्सापिनो शिष्यते राज

न्राज्यमिदं विमुंच वसुधां शास्मीति सर्वानिमान्किं वा ह्रासयसीति रोषकटुवाग्प्रहारं ययौ भूपतेः १७ रिव मनोभवस्य इमे मानोभवाः तेषु आ-

शुगेषु पंचसु बाणेषु जयसिद्धिरिव १६ नारदस्य पुरतः कृतप्रतिज्ञायाः पालनप्रकारं निरूपयति विप्रइति तत्र इंद्रप्रस्थे जातु कदाचित् कश्चन विप्रः भुजो उत्थ्

त्य मे निखिलाः गावः चौरैः हृताः नीताः विधिना दुर्दैवेन हतोऽस्मि मारितोऽस्मि यतः वत्सोऽपि नो शिष्यते नो अवशिष्टो भवति हे राजन् इदं राज्यं विमुंच त्यज अहं वसु ४

धां शास्मि दुष्टनिग्रहादिना पालयामि इति उक्त्वा सर्वान् नृपान् किं वा ह्रासयसि राज्यत्यागेन स्वल्पसंपत्तीन् करोषि तव प्रजापालने सामर्थ्याभावात् व्यर्थं परराज्या

पहारं करोषीति भावः इति रोषेण कटुः परुषा वाक् यस्य तथाभूतः सन् भूपतेः द्वारं ययौ जगाम १७

अथविप्राक्रोशानंतरंमधुरंसुंदरंस्मितंईषद्धास्यंयस्यसःविजयःअर्जुनःआसनादुत्थितिउत्थानंकृत्वाअंघ्रौनत्वाहेब्रम्हन्इहस्थलेमांभृत्यंदासंसमवेक्ष्यम
यिदासभावंमत्वेत्यर्थःक्षणंसहस्वअधुनातेगावःस्वयंआव्रजेयुःआगमिष्यंतीत्यर्थःइतिवचनेन आश्वास्यपुरःआदौदस्यून्प्रतिमनसाप्राविक्षत्प्रवेशंकृत
वान् ततोनंतरंशस्त्रायशस्त्रमानेतुंनृपतेःधर्मराजस्यगेहंप्राविक्षत्१८तत्रगृहेतरस्विनावेगवताअनेनगंतव्यस्थलविचारशून्यतान्द्योत्यते तेन अर्जुनेन चक्षुषा
करणेनअंगनायाःसखाकृष्णद्रौपदीसहितइत्यर्थःजगृहेगृहीतःदृष्टइत्यर्थःचेत्यपरं पाणिनासशरंशरासनंधनुःजगृहे उभयत्रहेतुमाह पूर्तयइति सपदि

दृष्ट्वातंमधुरस्मितोथविजयःकृत्वासनादुत्थितिंनत्वांघ्रौसमवेक्ष्यभृत्यमिहमांब्रह्मन्सहस्वक्षणं गावस्तेस्वयमाव्रजेयुरधुनेत्या
श्वास्यदस्यून्पुरःप्राविक्षन्मनसाततस्तुनृपतेःशस्त्रायगेहंस्वयं १८ तत्रतेनजगृहेतरस्विनाचक्षुषान्नृपांतिरंगनासखः पाणि
नाचसशरंशरासनंपूर्तयेसपदिविप्रवासयोः१९विनिर्गतोसौविशिखानिचस्वकान्विमुक्तजीवान्विरचय्यतस्करान् नितांतवेगाभि
वगोपरंपरांनिवर्तयामासशुचंद्विजन्मनः२०

एकसमयावच्छेदेनविप्रवासयोःविप्रवासस्यप्रागनज्ञाततीर्थयात्रार्थदेशांतरप्रवास
स्यपूर्तयेपूर्त्यर्थंगोभिःविप्रवासस्यविप्रगृहस्यपूर्त्यर्थंच १९ तद्गृहात्विनिर्गतःअसौ अर्जुनःस्वकान् स्वकीयान् विशिखान् बाणानिचतस्करान् विमु-
क्ताजीवाप्राणायैस्तान् अथचगतप्राणान् विरचय्यकृत्वानितांतःवेगोयस्याःतांद्विजन्मनःविप्रस्यगोपरंपरांगोसमूहमिवनितांतवेगां शुचं शोकं
निवर्तयामास क्रमेणअपनीतवान् अपहृतवांश्चेत्यर्थः २० ॥ ॥ ॥ ॥

नदनुनदनं ... जानिनेरं वियोगभीरोः वियोगोयोगाभावस्तत्रभीरुर्भयशीलः तस्यनरेंद्रस्यनराणांइंद्रःमनुष्यश्रेष्ठःतस्यधर्मराजस्यपवित्रैःपूतैःबाष्पैःनेत्रोदकैःपार्थ स्यपृथायाअयंपार्थःअर्जुनःतस्येदमित्यण् तीर्थोपगमात् तीर्थेषुउपगमःतस्मात्गंगादिषूपगमात्प्रागेवपूर्वमेवप्रयाणनम्रःप्रयाणायनम्रःतस्मिन्स्वमौ लौस्वस्यमौलिःतस्मिन्स्वकीयमूर्धनिनियमाभिषेकःनित्यनियमायस्नानंजज्ञे २१ गद्यं॥ धीरधीःसार्जुनःअत्युच्छ्रितेनमहताकृच्छ्रेणमात्मगृहीताअभ्य नुज्ञाआज्ञायेनतथाभूतःसन् कल्कस्यएकांतेद्रौपद्यासहासीनधर्मराजदर्शनजन्यपापस्यलंघनायदूरीकरणाय घनंनिबिडंवल्कलंवृक्षत्वचंपरिधाय

प्रयाणनम्रेतदनुस्वमौलौपार्थस्यजज्ञेनियमाभिषेकः प्रागेवतीर्थोपगमात्पवित्रैर्बाष्पैर्नरेंद्रस्यवियोगभीरोः २१ गद्यं॥
सधीरधीरत्युच्छ्रितेनकृच्छ्रेणराज्ञोगृहीताभ्यनुज्ञोवल्कलंघनंकल्कलंघनायपरिधायमलयानिलइवमनुष्यधर्मणाराज
न्वतींकाष्ठांप्रतिष्ठमानस्तपःप्रसादितस्यभगवतोभवानीवल्लभस्यसाक्षात्कृपामिवभगीरथरथानुसारिणींतरंगिणीमुपगम्य
तत्रपवित्रासुवीचिषुसायंतननियमायऋचोघमर्षणीजपन्मज्जनमकार्षीत् ४ मलयानिलइवदाक्षिणात्यवायुरिवमनुष्यधर्मणाकुवेरेण-
राजन्वतींसुराजपरिपालितांकाष्ठांदिशंउत्तरदिशामित्यर्थःप्रतिष्ठमानःप्रस्थानंकुर्वन्तपसाप्रसादितस्यभगवतोभवानीवल्लभस्यशिवस्यसाक्षात्प्रत्य
क्षांमूर्तिमतींकृपामिवभगीरथस्यराज्ञःरथानुसारिणींरथमनुलक्ष्यगमनकर्त्रींतरंगिणींनदींभागीरथीमित्यर्थःउपगम्यतत्रतत्स्थलेपवित्रासुभागी ५
रथ्याःवीचिषुसायंतननियमायसायंकालीननियमंकर्तुंअघमर्षणीःऋचःजपन्मज्जनंनिमज्जनंअकार्षीत् ४ ॥ ॥ ॥

पद्यं॥ तत्र नागीरथ्यां काचित् भुजगसुता उलूपीनाम्नी नागकन्या तं अर्जुनं दृष्ट्वा संतुष्टा अतएव मिथः एकांते रिरंसुः रंतुमिच्छुः सती हृदयमिव मन इव गेहं आनयत् आ
नीतवती यथा दोमनस्यानीतवती तथा गृहेप्यानयदित्यर्थः भुजगसुतामुत्प्रेक्षते सायंकाले नालीकात् कमलात् सकाशात् कुवलये चंद्रविकासिकमले यः संक्रमः
उड्डीय गमनं तस्मिन्कर्मणि स्खलित्वा अधः पयसि मग्ना निमग्ना रमेव लक्ष्मीरिव एतेन तस्याः लोकविलक्षणं सौंदर्यं द्योत्यते २२ तत्र स्वगृहे एषा भुजगसुता हृ-
दि मनसि प्रहृष्य महानंदं प्राप्य मदनसदृशं मनुष्यं अर्जुनं फणिनां रतैः मदनोत्सवैः संतर्पयितुं संतुष्टं कर्तुं उत्सेहे उत्कंठिता बभूव २३ तस्याः भुजगेंद्रपुत्र्याः स्वमा

नालीकात्कुवलयसंक्रमे रस्खलित्वा मग्ना धः पयसि रमेव तत्र काचित् तं दृष्ट्वा भुजगसुता मिथो रिरंसुः संतुष्टा हृदयमिवानयत्स्वगेहं
२२ प्रहृष्य हृदि तत्रैषा मनुष्यं फणिनां रतैः संतर्पयितुमुत्सेहे कंदर्पसममर्जुनं २३ भोगाय तस्या भुजगेंद्रपुत्र्याः फूत्कार एव स्फुट
सीत्क्रियासीत् ॥ कस्तूरिकाकोंजनकंठकांतिः फणामणिः पल्लवशेखरोभूत् २४ पाण्योर्ज्यामर्शकाठिण्यं तस्य तत्कुच
मर्दने तस्याश्च तन्मुखास्वादे फलायाभूद्द्विजिह्वता २५

वसिद्धफूत्कार एव भोगाय अर्जुनस्य सुखं दातुं स्फुटा भात् क्रियासीत्कारः आसीत् तया
कंठसंबंधि कृष्णकांतिः कस्तूरिकांकः कस्तूरीलेपः अंजनिजातः फणासंबंधिशोणमणिः पल्लवशेखरः पल्लवावतंसः अभूत् तस्याः शरीरे स्वतः सिद्धवस्तुवृंद
मस्य सुखाय जातमिति भावः २४ तस्य अर्जुनस्य हस्तयोः ज्यामर्शेन बाणप्रक्षेपसमये मौर्वीस्पर्शेन यत्काठिण्यं तत्तस्याः कुचयोः मर्दनकर्मणि फलाय उ
पयोगाय अभूत् तथा तस्याः नागकन्यायाः द्विजिह्वता तस्य मुखास्वादे तद्ग्रहणकर्मणि फलाय अभूत् २५ ॥ ॥ ॥ ॥

चक्षुःश्रवस्तन्व्याः नागकन्यायाः स्मरेते स्मरवान् हेतोः दृशोः नेत्रयोः मीलनं कृतं ततः तस्य अर्जुनभणितिवैदग्धीं रतिकूजितचातुर्यं काननकौमुदीं अरण्यसंबंधि
चंद्रज्योत्स्नां चक्रे तस्याश्चक्षुःश्रवस्त्वात् नेत्रमीलने भणितश्रवणप्रतिबंधात् अरण्यचंद्रिकेव निष्फला जातेत्यर्थः अत्र चक्षुःश्रवस्तन्व्या इति साभिप्रायविशे
ष्यसत्वात् परिकरांकुरालंकारः २६ तया नागकन्यया इरावान् एतन्नामकः पुत्रः सुषुवे प्रसूतः तं मुखप्रेक्षणे प्रियस्य अर्जुनस्य रतेः श्लाघया कंपायस्य तस्मा
न्नृशिरसः सकाशात् अंतःपथात् शरीरांतर्वर्तिमार्गात् अधःच्युतः भ्रष्टः मणिरिव फणारत्नमिव २७ सः अर्जुनः तत्र नागकन्यागृहे इति उक्तवृत्तांतेन ए कि

सुरत्नाच्चक्षुःश्रवस्तन्व्याः स्मरे तमीलनं दृशोः चक्रे भणितवैदग्धीं तस्य काननकौमुदीं २६ श्लाघाकंपात्प्रियरतेः शिरसोंतःपथादधः च्युतो
मणिरिवेरावान् सुषुवे तनयस्तया २७ इत्येकिकां स रजनीमपनीय तत्र श्वासैः समं स्वकुलसंभवपृष्ठमित्रैः मुक्तस्तया तटगतोनुचरान्द्वि
जातीनंतर्वनोद्भुतरसैरतनोत्स्ववृत्त्या २८ उलूपिकायाः निदर्शनैस्तैरुन्मत्तकं मोहमिवापनेतुं उदग्रवीर्यौषधिजन्मभूमिमुमागुरुं शैलमयं
मपेदे २९ कां एकां रजनीं अपनीय यापयित्वा तया स्वकुले संभवः उत्पत्तिर्येषां तेषां नागानां पृष्ठस्य पृष्ठभागस्य मित्रैः तत्सादृशैः दीर्घैरित्यर्थः दर्वीकरो दी
र्घपृष्ठ इत्यमरः श्वासैः विरहदुःखजन्यदीर्घश्वासैः समं मुक्तः ततः तटगतः सन् स्ववृत्त्या एकरात्रोदकवासरूप स्वचरित्रेण ये अद्भुतरसाः तैः अनुचरान् द्विजातीन्
ब्राह्मणान् अंतर्वनः सगर्भान् अतनोत् चकार अद्भुतरसविशिष्टान् चकारेत्यर्थः २८ अयं अर्जुनः उलूपिकायाः एतन्नामकनागकन्यायाः तैः प्रसिद्धैः रत्नादर्शनैः
दंतक्षतैः उन्मत्तकं उदयप्राप्तं मोहं मूर्छामपनेतुमिवेति फलोत्प्रेक्षा उदग्रं महत् वीर्यं सामर्थ्यं यासु तासां ओषधीनां जन्मभूमिं उत्पत्तिस्थानं उमायाः गुरुं पितरं हिमवंतं
शैलं प्रपेदे २९

तस्मिन्हिमाचले सोर्जुनः सिद्धानांदेवविशेषाणांमिथुनानिस्त्रीपुरुषद्वंद्वानि पत्यपशुपतेः शिवस्य भालाद्यवयवकर्तृकस्य अपदानस्य पूर्ववृत्तकर्मणः पद्यंप्रबंधंगा यंतिनतत् अशृणोत् अपदानंकर्मवृत्तमित्यमरः कस्यावयवस्य कस्मिन्नपदानकर्मेतदाह फालस्येत्यादिना फालस्यललाटस्य पंचविशिखेमदने ललाटस्था ग्न्यात्मकतृतीयनेत्रेणमदनोदग्धः तथापदयाः कृतांतेयमधर्मस्वभक्तमार्कंडेयजीवात्मानं नेतुमागतस्य शिवेन पादप्रहारः कृतः तथाहासस्य दानवानांपु रेषुत्रिपुरेषु पृथिव्यात्मकरथादियुद्धीयमहासामग्रींकृत्वागतेनशिवेनत्रिपुरात्मकं रिपुंतुच्छंदृष्ट्वा अट्टहासः कृतः तेनैवतद्दाहसिद्धेर्यादिनाशोजातः

फालस्यपंचविशिखेपदयोःकृतांतेहासस्यदानवपुरेप्ववलोकनस्य शंबायुधेपशुपतेरपदानपद्यंगायंतिनिरीक्ष्यमिथुनान्यशृ णोत्सतस्मिन् ३० तत्रतत्रसतस्यहिमाचलस्यखुरपुटविनिमर्यावन्यासचंद्रांकितेरवतारपथैरपारोमंथफेनशकलतारकितेः प्रतीरनमेरुतलोपवेशैरप्यनुमेयहरवृषभस्वैरविहारास्फटकसरसीषुवृजिनानिविशोध्यवनमदावलकलभविदलितंतरल सरलद्रुमप्रवालपरिमलसुरभिलैनोपत्यकावर्त्मनादिधिभुधिमरणकुशलाभ्यांमहेंद्राभ्यांपरिगृहीतांहरितमवजगाहे ५

तथा अवलोकस्यदर्शनस्य शंबायुधेवज्रायुधेइंद्रे कदाचित् शिवदर्शनार्थं इंद्रः कैलासंगतः तत्रद्वारि रूपांतरेणस्थितं शिवमवमत्यांतर्गच्छन्नंदिहस्तेन नि षिद्धः ततस्तं हंतुंवज्रमुद्यतवान् ततः शिवेनावलोकनेनैव सर्वावयवेषुस्तब्धः कृतः ३० गद्यं॥ सः अर्जुनः हिमाचलस्यतत्रतत्रतासुतास्फटकसरसीषु नितंबसरोवरेषुवृजिनानिपापानिविशोध्यक्षालयित्वा वनमदावलकलभैः वनगजशिशुभिः विदलिताः भग्नाः तरलानांचंचलानांसरलद्रुमाणांयेप्रवाला

पल्लवाः तेषांपरिमलैः सुगंधैः सुरभिलेनसुगंधिना उपत्यकावर्त्मना अद्रिसमीपभूमिमार्गेण महेंद्राभ्यां मघवन्महेंद्रावल्लभाभ्यांपरिगृहीतांस्वीकृतांह
रितं दिशं प्राचीदिशमित्यर्थः अवजगाहे प्रविवेश कथंभूतास्तु कटकसरसीषु खुरपुटयनां विनिमयेन ये विन्यासाः एकं पादमग्रेस्थापयित्वा पूर्वस्थापिताग्र
पादमुत्थाल्य तदग्रेस्थापनं तद्रूपाःतैः चंद्रकितैः संजातमयूरबर्हचंद्रकसदृशाचिन्हैः संजातचंद्रसदृशाचिन्हैर्वा अवतारपथैः अभ्यंतरगमनमार्गैरपि
तयोरोमंथफेनशकलैः चर्वितचर्वणसंबंधिफेनखंडैः कृत्वातारकितैः संजाततारकैः प्रतीरनमेरूणां तटसंबंधिनमेरुवृक्षाणांतलेषु उपवेशैरपि अनुमे-

पंफुल्यमाननवकेतकपांसुगर्भैः पर्यंतनिर्झरजलैः कलिताभिषेकः पार्थःसतत्रजनकाभिधयेवहृष्टः पादेचिरंपरिचचारगिरिं
महेंद्रं ३१

याः हरदृषभस्यस्वैरविहाराः स्वच्छंदक्रीडाः यास्तु कथंभूताभ्यांमहेंद्राभ्यांदिविस्वर्गेभुविचभरणयोः क्रमेणपालनधारणयोः कुशलाभ्यां ३०पद्यं॥ तत्रतस्यांदि-
शिसःपार्थः जनकस्य पितुरिंद्रस्य अभिधयानाम्नाहृष्टःसन्निवमहेंद्रंगिरिंपादेचरणेप्रत्यंतपर्वतेचिरंपरिचचार पूजयामासपरितोबभ्रामवेत्यर्थः पार्थः ७
पंफुल्यमानानिभृशंविकसंति यानिनवानिकेतकानिकेतकीपुष्पाणितेषांपांसवःपरागाःगर्भेयेषांतैः पर्यंतप्रांतभागेनिर्झरजलैः कलिताभिषेकः कृतस्नानः ३१

अयंअर्जुनः रतिपतेःमदनस्यरथेमलयानिलंकरोतितथाभूतेनअद्रिणामलयाचलेनेत्यर्थः लांछितायांयुक्तायांदिशिदक्षिणस्यांदिशीत्यर्थःदत्तचक्षुः तांदिशमवलोकयन् सन्नित्यर्थःजलधितटपदव्यांसमुद्रतीरमार्गेणप्रतस्थेमलयमरुदायोधनरथइतिसौंदर्यलहर्यांश्रीमदाचार्योक्तेःमलयानिलस्य मदनरथत्वंतदुत्पत्तिस्थानत्वान्मलयाद्रेर्मदनरथकारकत्वंकथंभूतायांदिशि विविधा अनेकप्रकारास्तटिन्योनद्योयस्यांतस्यां किंकुर्वन् झर्झरीरिति चीरशब्दानुकरणंचीरशब्दैःवल्कलशब्दैःराजतालीवनानांमहातालवृक्षवनानांरवंशब्दंअनुकुर्वन्सन् ३२इंद्रसूनुःअर्जुनःतस्यतापसस्यतप-

जलधितटपदव्याझर्झरैश्चीरशब्दैर्रवमपमनुकुर्वन्राजतालीवनानां रतिपतिरथकारेणाद्रिणालांछितायांदिशिविविधतटि-
न्यांदत्तचक्षुःप्रतस्थे ३२ शैलोगर्भेशिशुरिवभुवःशासनाद्यस्यशेतेवातापिंयोनठरदहनेवर्तयामासहव्यं क्षोणीनग्नंकरणमहि
माकोपलेशोयदीयस्तस्यावासंदिशमभिययौतापसस्येंद्रसूनुः ३३

स्विनःऋषेःआवासंवासस्थानंदिशंअभिययौजगाम ॥

तस्यकस्ययस्यतापसस्यशासनात् आज्ञाहेतोः शैलःविंध्यपर्वतःभुवःगर्भेशिशुरिवशेतेनिश्चेष्टस्तिष्ठति यथास्त्रीगर्भेशिशुस्तद्वद्यंभूगर्भेतिष्ठतीत्यर्थः न याधःजठराग्नौवातापिंदानवंहव्यंवर्तयामासचकार वातापिदानवंभक्षयित्वाजीर्णंचकारेत्यर्थःयदीयःयत्संबंधीकोपलेशःनग्नंवस्त्ररहितंकरोत्यनेननग्नं करणःक्षोण्याःपृथिव्याःनग्नंकरणःमहिमायस्यसःपृथिव्याःसागरांबरत्वात् दुष्टासुररक्षकसमुद्रपानेन पृथिवीवस्त्ररहिताजाता एवंबहिरिहराद्यकार्य कर्मकारिणोगस्त्यऋषेरावासस्थानत्वेनदक्षिणदिशःपूज्यत्वंगम्यते ३३ ॥ ॥ ॥ ॥ ॥

अयं अर्जुनः कवेरजायाः कावेर्याः सलिलानिफलेषुनारिकेलेषु धृत्वा अभ्रंसरितः स्वर्गगायाः गुणौघैः माधुर्यादिगुणसमूहैः साम्यं परीक्षितुमिव अभ्रंलिहैः अत्यु
च्चत्वादाकाशस्पृग्भिः कावेरीतटसंबंधिनारिकेलवृक्षैः निर्बिडितांव्याप्तांचोलवसुधां चोलदेशसंबंधिभूमिं आलोक्य अभ्यनंदत अतुष्यत् यथाकश्चित्स्व
वस्तुपरीक्षितुं उत्तमवस्तुसमीपंगच्छतितद्वन्नारिकेलवृक्षाः कावेरीजलंगृहीत्वास्वर्गगाजलसमीपंगच्छंतिकिमित्युत्प्रेक्षा अनेननारिकेलानामत्युच्चत्वंद्योत्यते
२४ अथपार्थः पांडुदेशानांराजापांड्यः तेनगुप्तांनगरींविवेश नगरीमुत्प्रेक्षते वारांजलानांराशिः समुद्रः तस्मिन्वासेनजडंक्लिन्नं आत्मनःवपुः विशोषेणशोषंशुष्क

धृत्वाफलेषुसलिलानिकवेरजायाः साम्यंपरीक्षितुमिवाभ्रसरिद्गुणौघैः अभ्रंलिहैर्निर्बिडितांतटनारिकेलैरालोक्यचोलवसुधा-
मयमभ्यनंदत् २४ वाराशिवासजडमात्मवपुर्विशोषयमानतुमातपभरात्तटमुत्तरेण लंकामिवागतवतींनिजपौरवर्जंपार्थोविवेश
नगरीमथपांड्यगुप्तां २५ तत्रचित्रांगदातेनव्यूढाराजकुमारिका दर्शनदोहदार्ताचद्वयोरासीदनंगदा २६

तां आनेतुं आतपभरात्द्योतातिशयात्
तटमुत्तरेणसमुद्रस्योत्तरतटेउत्तरेणेतिएनबंतंनिजैः स्वकीयैः पौरैः पुरवासिभिः राक्षसैः वर्जंरहितं यथातथा आगतवतीं लंकामिव अनयोत्प्रेक्षयानगर्याः
सकलवस्तुसमृद्धत्वंदुष्टजनरहितत्वंचद्योत्यते २५ तत्रनगर्यां तेन अर्जुनेन चित्रांगदानाम्नीराज्ञः पांड्यस्य कुमारिकाव्यूढापरिणीता सादर्शनेदोहृदा
र्तौ गर्भपीडायांचद्वयोः कर्मणोः अनंगदा आसीत् तत्रदर्शनेमदनदादोहृदार्तौ अंगदभूषणरहिता किंचचित्रांगदापि अन्वर्थकनाम्न्यपि द्वयोः कर्म-
णोरनंगदासीदितिचित्रांगदात्वपिकर्मद्वये अंगदात्रीन भवतीति चाकूतं २६ ॥ श्रीकृष्ण ॥ ॥ राम ॥ ॥

सः पार्थः तया चित्रांगदया सह उद्यानभूमिं उपगम्य गत्वा सुखयन् सुखं प्राप्नुवन् पितुः पदं इंद्रपदं बल्वजेभ्यः तृणविशेषेभ्यः अमन्यत पुंसि भूम्नि तु बल्व
जा इत्यमरः इंद्रपदं तृणतुल्यं तृणतुच्छं मन्यते इत्यर्थः कीदृशीमुद्यानभूमिं एलालवंगवृक्षयोः पिप्पलिकाचंदनवृक्षयोः तांबूलिकापूगवृक्षयोश्च दंप
तिभावेन जायापतित्वेन रम्यां मनोहरां अन्योपि अन्येषां दांपत्यसुखं दृष्ट्वा अहमपि तथास्मीति स्वनिष्ठसुखमनुभवति २७ अथ अ निर्मतीगर्भधी-

एलालवंगतरुपिप्पलिकापटीरतांबूलिकाक्रमुकदंपतिभावरम्यां उद्यानभूमिमुपगम्य तया स पार्थः सुखयन्पितुः पदममन्य
त बल्वजेभ्यः २७ अद्दिवसे शुभंयुगुणकोरकितेद्धपितं हृद्दिस्थितमिवार्तिमती अवतार्य सा भुवि कुमारमभाद्यबभ्रुवाहन इति प्रथितं २८

डावती सा चित्रांगदा शुभंयवः शुभान्विताः ये गुणाः शुभतिथिवारनक्षत्रादयः तैः कोरकिते युक्ते इत्यर्थः दिवसे हृद्दिस्थितं दयितं अर्जुनमिव इत्युत्प्रेक्षा
बभ्रुवाहन इति प्रथितं प्रसिद्धं कुमारं भुवि अवतार्य अभात् अशोभत अन्योपि हृदयस्थं कुमारं भुवि अवतार्य सुखोत्पन्न शोभते २८ ॥ ॥

गद्यं॥ इत्यनेनप्रकारेणतत्रनगरे कतिचिद्दिनानिउषित्वावसतिं कृत्वा अहंप्रयामिप्रयाणंकरोमीतिभाषितस्यपक्ष्मसु अवलंबितं बाष्पमेवभाविविरह
जन्यदुःखाश्रु एव उत्तरयंतींउत्तरंकुर्वतीं उत्तरमदत्वा दुःखाद्रुदतीमित्यर्थः प्रेयसींचित्रांगदांरहसिदृढालिंगनेनतरंगितंसंजातवलिकंयत् वल्कलरूपमु
त्तरीयंतस्ययोमर्मरःशब्दःतस्यसहाध्यायीसीत्कारोयस्मिन्कर्मणियथाभवतितथा यथासह्य व्याचिनोसहैवगच्छतःतद्वन्मर्मरसीत्कारो पुलकैःझर्झरेन

गद्यं॥ इतितत्रदिनानिकानिचिदुषित्वाप्रयामीतिभाषितस्यपक्ष्मावलंबिबाष्पमेवोत्तरयंतींप्रेयसींरहसिदृढालिंगनतरंगितव
ल्कलोत्तरीयमर्मरसहाध्यायिसीत्कारंपुलकझर्झरकपोलेपरिचुंब्यतस्याःकथंचिदुदंचितानुमतिर्निर्गत्यरक्षोयोधिभिरिक्ष्वा
कुपतिसेनाध्यक्षैरुत्पाटितानांमलयदर्दुरमहेंद्रपादानांमूलशिलातलपरिदृश्यमानकठिनतरतलकरांगुलिनरैरव्याव्यावर्तित
कुलिशभयोच्चालितशैलसंस्थानबुद्धिभिःसन्निवेशावटैःस्थपुटितामटवींविलंघ्यपुत्रीन्यक्कारुषापुलस्त्यान्वयस्यपुरीमुन्मूल
यितुंप्रसारितनभुवोभुजेनवसेतुनाकृतसीमंतमुदन्वंतमभजत ६. तोन्नतेकपोलेगल्लदेशेपरिचुंब्यतस्याःकथंचित् अतिसंकटेनउदंचिता

उत्पन्ना अनुमतिःप्रयाणानुमोदनंयस्यतथाभूतःसन् निर्गत्य अटवींअरण्यंविलंघ्यसेतुनाकृतःसीमंतःविभागोयस्यतंउदन्वंतंदक्षिणसमुद्रंअभजत्
९ असेवत प्राप्तइत्यर्थः कथंभूतामटवीं रक्षोयोधिभिःराक्षसैःसहयुद्धकर्तृभिःइक्ष्वाकुपतेःश्रीरामचंद्रस्यसेनाध्यक्षैःसेनापतिभिः हनुमन्नलनीलादि
प्लवंगैःसेत्वर्थंउत्पाटितानांमलयदुर्दरमहेंद्रशैलानांयेपादाःप्रत्यंतपर्वताःतेषांमूलशिलातलेषुपरिदृश्यमानाभिःकठिणतराःयेतेषांप्लवंगानां

करांगुलिनखाः तेषांरेखाभिः व्यावर्तितानि वर्तिता कुलिशाङ्कयेनउच्चालितानांद्रावितानांशैलानांसंस्थानंवसतिस्थानमिति बुद्धिः दृष्टबुद्धिर्येषुतेः
सन्निवेशावटैः स्थितिगर्तैः स्यपुटितांनतोन्नतां कीदृशेनसेतुना पुत्र्याः सीताकन्यायाः न्यक्कारेणरावणकृत तिरस्कारेण यारूढक्रोधः तेनपुलस्त्या-
न्वयस्य रावणस्यपुरीं लंकांउन्मूलयितुंउत्पाट्य नाशयितुं भुवापृथिव्या प्रसारितेन भुजेनेवेत्युत्प्रेक्षा ६प०सः धनंजयः अर्जुनः रघुवीरेणरामचंद्रेण-
निर्मितंसेतुंचित्रेआश्चर्ये आलेख्येचविषयेभित्तीकृतार्थाः बुद्धिः येननथाभूतः सन् चित्रशब्दस्यार्थांतरमवलंब्यसति कुड्येचित्रमितिन्यायाद्भित्तिस्थानेधीः

पद्यं॥ममौक्ष्यसेतुंरघुवीरनिर्मितंसचित्रभित्तीकृतधीर्धनंजयः दिनेशवंशस्यतपोविचारणेचिरावकाशंचितनारचेतसे ३९अब्धौ
वानरपातिनाचलशिलाभंगाभिघातैश्चिरादक्ष्णांधैःकुणिभिःकरणचपदारखंजैःपयोमानुषैःधीवीर्यादृषुकीर्त्यमानमनघंकृत्तंर
घूणांप्रभोःश्लाघ्यंश्लाघमसौतटेनहरितंप्राचेतसीमभ्यगात् ४०गोकर्णमत्यसकुलाद्रिसतांप्रियस्यपुष्पाणिमूर्ध्निनिदधेपुरुहूतसू
नुः आगामिनांनिजशरासनताडनानामत्रावकाशइतिसूचयनेवदोष्णा। ४१ कृता तेनबुद्धौमहदाश्चर्यंबभूवेतिद्योत्यते दिनेशवंशस्यसूर्यवंश
स्यतपसः विचारणेविषयेचेतसे चिरावकाशंबहुकालावधिंवितनारददौ सूर्यवंशीयपुरुषैःकीदृशंकियत् पुण्यंकृतंयेनतत्संभवेनरामचंद्रेणाद्भुतातिमहांतिसेतु
बंधनादिकर्माणिकृतानीतिबहुकालविचारंकृतवानित्यर्थः ३९असौअर्जुनः अब्धौवानरैःपातिताः त्यक्ताः येसेतुरचनार्थंअचलाः पर्वताः तेषांशिलाभंगाद्धेतोः ये
अभिघाताः शिलाखंडानांप्रहाराः तैःकृत्वा चिरात् बहुकालं अक्ष्णा अंधैः करणकुणिभिः अग्रहस्तरहितैः कुकरेकुणिरित्यमरः पदाचरणेन खंजैः खलक्र

तिकेश्चपयोमानुषेःजलमनुष्येःवीच्यः तरंगाएववेदयःपरिष्कृतभूमयःतास्रुकीर्त्यमानं अनघंनिर्दोषंरघूणांप्रभोःश्रीरामचंद्रस्यवृत्तंसेतुबंधनप्रव
ण हव नादिकंचरितंश्लाघंश्लाघंश्लाघित्वाश्लाघित्वा नेटनसमुद्रतीरणाप्राचेतसींवारुणींदिशंप्रतीचीमित्यर्थःअभ्यगात्जगाम ४०सःपुरुहूतस्य
इंद्रस्यसूनुःअर्जुनःगोकर्णक्षेत्रंएत्यदोष्णास्वभुजेनकुलाद्रिसुतायाःपार्वत्याःप्रियस्यशिवस्यमूर्ध्निमस्तकेपुष्पाणिनिदधे कथंभूतेनदोष्णा आगामि-
नांइंद्रकीलपर्वतेतपःसमये युद्धप्रसंगेभाविनांनिजशरासनस्य स्वधनुषःताडनानां अत्र अस्मिन्मस्तकस्थाने अवकाशइतिसूचयतेवेत्युत्प्रेक्षा ४१ अत्र
स्योगोपृष्ठेतिश्लोकः श्लोकद्वयानंतरं वर्तते अर्जुनस्यसेतोःअवलोकनेनप्रागेवपापापनोदे पापनाशे फलितेसिद्धेसतिपश्चात्प्रभासतीर्थेनियमावगाहः

पापापनोदे फलितेर्जुनस्यप्रागेवसेतोरवलोकनेन प्रभासतीर्थेनियमावगाहःपश्चात्सुभद्रागमहेतुरासीत् ४२ पापापनुत्यैपरिकल्पि
तोयःप्रभासतीर्थेप्रथितेभिषेकः सेतुंदृशास्पृष्टवतोस्यसोसौसाध्यंविनाजागरितावभूव ४२

नियमपूर्वकस्नानंसुभद्रागमस्यक
ल्याणमातेःसुभद्रायाःकृष्णभगिन्याःप्राप्तेश्चहेतुःकारणं आसीत् सेतोरवलोकनेनसर्वपापेगते प्रभासतीर्थेस्नानेनपुण्यप्राप्तिरभूदितियुक्तमेव४२
युक्तार्थमेवभंग्यंतरेणाह पापेति पापापनुत्यै पापनाशार्थंपरिकल्पितःयःप्रथितेप्रसिद्धेप्रभासतीर्थे अभिषेकःस्नानंसोसौअभिषेकःदृशासेतुंदृष्ट
वतःअस्य अर्जुनस्यसाध्यंविनाजागरिताजागरणंबभूव यदर्थंजागरंकृतंतत्साध्यंनजातंयथातथासेतुदर्शनेन पापेगते प्रभासतीर्थेस्नानंव्यर्थमभू
दित्यर्थःअत्रसदृशयोःवाक्यार्थयोःयत्तच्छब्दाभ्यामैक्यारोपात् निदर्शनालंकारःतदुक्तंवाक्यार्थयोःसदृशयोरैक्यारोपोनिदर्शनेति ४३ ॥ ॥

गोपृष्ठे वृषभपृष्ठे लग्नंस्थितंकुलशैलकन्यायाः पार्वत्याःसहायंशिवं अंतःकरणेसततंदधानःकुरुराजसूनुःअर्जुनःतमेवदेवंशिवंगोःवृषभस्यकर्णे-
वासोयस्यतयाभूतं ऐक्षिष्टदृष्टवान् इदमाश्चर्यं गोकर्णक्षेत्रेवासो यस्येत्याश्चर्यपरिहारः ५४ ततःतत्रप्रभासतीर्थे यदुकन्यकायाःसुभद्रायाःशोभायाः
सौंदर्यस्य यशाएवशुभ्रत्वात् मरालःहंसःघनाविर्भवनात् प्रावृट्कालप्रादुर्भावात् भियाभयेनेव कर्णेंद्रियस्याकाशात्वात् कर्णांतरमेवकर्णबिलमध्या
वकाशएवक्रौंचपथ आकाशमार्गःतेनअमलंस्वच्छं अस्यअर्जुनस्यमानसंमनःसरोवरविशेषंचभेजे प्रावृट्कालेहंसाःपृथिव्यांनतिष्ठंतीतिप्रसिद्धिः

गोपृष्ठलग्नंकुलशैलकन्यासहायमंतःसततंदधानः आश्चर्यमैक्षिष्टतमेवदेवंगोकर्णवासंकुरुराजसूनुः ५४ ततो
घनाविर्भवनाद्भियेवतत्रामलंमानसमस्यभेजे कर्णांतरक्रौंचपथेनशोभायशोमरालोयदुकन्यकायाः ५५ स्मृति
पथस्थितयापिसुभद्रयाजनसमक्षमिवासितुमात्तभीः द्विजकुलानिसतत्रसमत्यजत्सहचराणिरतीशवशंवदः ५६

५६रतीशस्यकामस्यवशंवदःअधीनःसःअर्जुनःसहचराणिद्विजकुलानि ब्राम्हणसंघान् तत्रप्रभासेसमत्यजत् किंभूतःसःस्मृतिपथेस्थितयापिस्म
रणविषयतांप्राप्तयापिसुभद्रयासहजनसमक्षं आसितुंवस्तुं आत्तभीःगृहीतलोकापवादभयइवेत्युत्प्रेक्षा यथालोकापवादभयात्जनसमक्षंसाक्षा
दृष्ट्वानहनावसत् तथांतःकरणस्थितयापितयासहवस्तुंलज्जमानइवस्वसहचरब्राम्हणानत्यक्तवान् ५६ ॥६७ ॥६२

पाकशासनिः इंद्रपुत्रोर्जुनः द्विजविसर्जनं कृत्वा प्रभासक्षेत्रात् रैवतकपर्वतं प्रतिगमनसमये पथिमार्गे पयसा उदकेन परिपूरितो घटो परि पश्यन् सन् क-
मलाक्षस्य श्रीकृष्णस्य कनीयस्याः कनिष्ठभगिन्याः सुभद्रायाः कुचौ करस्थितौ इव कलयामास। निश्चितवान् शुभशकुनेनावश्यं सुभद्राप्राप्तिर्भवि-
ष्यतीति निश्चितवानिति भावः ५७ तदानीं वर्षर्तुप्रारंभे खल्विति वाक्यालंकारे कतिपयैः दिनैः प्रादुर्बभूव प्रादुर्भूतं कथंभूतैः दिनैः चक्रांगीनां चक्र-
वाकीनां मदस्य गर्वस्य पश्यतो हराः पश्यतः सतः हरणकर्तारश्चौरविशेषाः येषु एवंभूतानि चलंतीनां शंपानां विद्युतां समुन्मेषणानि आविर्भवनानि येषु

पयसापरिपूरितो घटोपरि पश्यन्पथि पाकशासनिः कमलाक्षकनीयसीकुचौ कलयामास करस्थिताविव ५७ तदानीं ख-
लु॥ चक्रांगीमदपश्यतोहरचलच्छंपासमुन्मेषणैः पुष्पत्केतकगंधसिंधुविलुठत्पुष्पंधयांधीकृतैः मंदस्वीकृतके-
किनीकलरवैर्मेघंकराशामुखैः पांथानामपमृत्युभिः कतिपयैः प्रादुर्बभूवे दिनैः ५८

तैः तथा पुष्पतां विकसतां केतकानां केतकीपुष्पाणां गंधसिंधौ सुगंधसमुद्रे विलुठद्भिः पुष्पंधयैः भ्रमरैः अंधीकृतैः सर्वतो विचरतां भ्रमराणां कृष्ण-
त्वात् तद्योगेन दिनानामंधत्वं यथा च स्फूर्हीनाम् मलिनाः दृश्यंते तद्वद्दिनानीति भावः यद्वा दिनांधत्वेन दिनगतप्राणिनामंधत्वं लक्ष्यते तथा मेदोभिः मां-
सैः स्वीकृताः पुष्टा इत्यर्थः केकिनीनां मयूरीणां कलरवाः अव्यक्तमधुरशब्दाः येषु तैः तथा मेघंकराणि मेघोत्पादकानि आशामुखानि दिगग्रा- ११
रंभाः येषु तैः पांथानां स्त्रीविधुराध्वगानां अपमृत्युभिः मारकैः ५८ ६ ६ ६ ६ ६

घनकालःप्रावृट्कालएवयोधःक्षणदीप्तिःविद्युदेववर्तिःआग्नेयमुखवर्तिःतथासंधुक्षिताद्दीपितात्कालांबुदालिःकृष्णमेघश्रेणिरेवनलिकः महाराष्ट्रभाष
याबंदुकसंज्ञकः तस्मात्सपदिसंधुक्षणसमयेसध्वनिसशब्दंयथातथानिःसरद्भिःबहिर्गच्छद्भिःकठोरैःवर्षाश्मानःकरकाएवसीसगुलिकानांनिकराःस
मूहास्तैःघर्माभियातिं ग्रीष्मर्तुशत्रुं ऊष्माणंशत्रुंवाअवधीत् अन्योपियोद्धानलिकात्मकाग्नियंत्रेणशत्रुंहंति ४९ कांतारसीम्नि दुर्गममार्गप्रांतभागेमाध्वीलि
हाभ्रमरेणमलिनीकृतंस्वस्थित्याकृष्णीकृतंअग्रंयस्याःसा नवानांकेतकबर्ह्यणांकेतकपत्राणांलेखापंक्तिःविरुरुचेविशेषेणशुशुभे नामुत्प्रेक्षते दयिता
जनेनस्मरभियाकिंचित् अंचलेअग्रेदग्ध्वापथिकभर्तृषुसंप्रेषितापत्रिकेव दयिताजनेन पतीन्प्रतिस्मरपीडानिवेदनार्थंपूर्वंलिखितातत्तःस्मराग्निरास्यतीतिन

कालांबुदालिर्नलिकात्क्षणदीप्तिवर्त्यासंधुक्षितात्सपदिसध्वनिनिःसरद्भिः वर्षाश्मसीसगुलिकानिकरैःकठोरैर्घर्माभियातिमवधीद्घनका
लयोधः ४९ माध्वीलिहाविरुरुचेमलिनीकृताग्राकांतारसीम्निनवकेतकबर्हलेखा दग्ध्वांचलेस्मरभियादयिताजनेनसंप्रेषितापथिकभर्तृषु
पत्रिकेव ५० अर्जुनेषुसकलेषुविकासिष्वद्रिसीम्निधृततादृशशब्दः एकएवविशुशोषविशेषादंबुभृद्दहनेहसिचित्रं ५१ इयाकिंचिदंचलेदग्ध्वा

दहनसमये पतीन्प्रत्यस्मत्पीडाज्ञानंनस्यादितिबुध्याग्निशांतिंकृत्वाप्रेषितादग्धाग्रापत्रिकेव अनयोत्प्रेक्षयादग्धपत्रनिरीक्षणवत् तादृशकेतकपत्रनिरीक्षणेननष्ट
तृणांविरहतापातिशयोद्योत्यते ५० अंबुभृद्दहनेहसिप्रावृट्कालेअद्रेःवनकपर्वतस्यसीम्निसीमायांसकलेषु अर्जुनेषुविकासिषुविकसनशीलेषुसत्सुधृतःतादृश
शब्दः अर्जुनइतिनामयेनसएकएवविशेषात्विशुशोष शुष्कोभूत् एतच्चित्रंआश्चर्यं पर्जन्यकालेर्जुनवृक्षविकासिनोःभवत् पार्थोर्जुनःसुभद्राविरहेणशुष्कोभूदित्या
श्चर्यपरिहारः ५१

धनंजयः अर्जुनः वियति आकाशे अशेषासु सकलासु विदिक्षु आग्नेय्यादिषु दिक्षु प्राच्यादिषु च वियोगः सुभद्राविरह एव शिल्पींद्रः चित्रकारः तेन विनिर्मितायाः
[?]दितायाः तस्याः मृगाक्ष्याः सुभद्रायाः तडितां विद्युतां तते श्च भेदं न संविविदे न ज्ञानवान् गौरवर्णेन कांतिमत्वेन क्षणिकत्वेन च साम्यात्तड्डेदाग्रहणं अनेन वि[र]
हातिशयो द्योत्यते ५२ अथ वासवसूनुः मानसे मनः कल्पिते यदुपुत्र्यायाः सुभद्रायाः परिणये विवाहे मन्मथे मदनाग्नौ ज्वलति सति लाजवापं वरहस्तेलाजहविः
प्रक्षेपं कर्तुमिव तस्याः सगार्भ्यं बंधुं उपेंद्रं कृष्णं चित्तं अनैषीत् आनीतवान् सुभद्राप्राप्तिः कृष्णसाहाय्यं विना न भविष्यतीति तत्स्मरणं कृतवानित्यर्थः ५३ स्मृतमा

वियत्यशेषासु विदिक्षु दिक्षु वियोगशिल्पींद्रविनिर्मितायाः तस्या मृगाक्ष्याश्च तडित्ततेश्च धनंजयः संविविदे न भेदं ५२ मन्मथे ज्वलति वा
सवसूनुर्मानसे परिणये यदुपुत्र्याः लाजवापमिव कर्तुमुपेंद्रं तत्सगार्भ्यमथ चित्तमनैषीत् ५३ अणुमात्रमिदं सहेत वोढुं न हि विश्वंभरमद्य मा
मितीव मनसोप्यवरुह्य तस्य दृष्टेः पुरतः प्रादुरभूत्पुमान्पुराणः ५४ स्वस्वचेष्टाकथानद्याह्लितीयर्तु गुणज्ञया न बभूवे तयोस्तत्र नयनानंदिनोर्मिथः ५५

त्र श्रीकृष्णः प्रादुरभूदित्यत्र हेतुं परिकल्पयति अणुमात्रमिति पुराणः पुमान् अनादिः श्रीकृष्णः अणुमात्रं परमाणुप्रमाणं इदं मनः अद्य विश्वंभरं विश्व-
धारकं मां वोढुं मत्कर्मकवहनं कर्तुं न हि सहेत न समर्थं भवेत् इतीव हेतोः तस्य मनसोपि अवरुह्य अवतीर्य दृष्टेः पुरतः प्रादुरभूत् प्रकटोभूत् ५४ तत्र मिथः
परस्परं नयनानंदिनोः नयनसुखदायिनोः तयोः कृष्णार्जुनयोः स्वस्वचेष्टानां स्वस्वचरित्राणां कथैव नदी तया ह्लिनीयर्तोः ग्रीष्मर्तोः गुणस्य जलशोषकर १२
णरूपगुणस्य ज्ञया ज्ञात्या न बभूवे न जातं कथानदी शुष्का न जाता परस्परस्वस्वचरित्रकथनं न समाप्तमिति यावत् अनेन स्नेहातिशयो द्योत्यते ५५ ६

मधुरस्मितस्य अर्जुनकृतसुंदरस्मितस्यभावं अभिप्रायं विदुषः ज्ञातुः तस्य कृष्णस्यमतेन भिक्षोः सन्यासिनः वेषइव वेषोयस्यसः विजयः अर्जुनः कुसुमास्त्रस्य मदनस्य भयादिव रैवतकस्य कुहरे गुहायां अतिगूढः अतिगुप्तः सन् तिष्ठतिस्म तस्थौ ५६ उन्मत्तोपि महानपि कविः सुभद्राकमनीयतायाः सुभद्रासौंदर्यस्यनुत्यै स्तवनं कर्तुं कथंकल्पेत समर्थोभवेत् अपितुनैवभवेत् येनकारणेन चतुर्थं आश्रमं सन्यासाश्रममपि आश्रमोस्त्रीत्यमरः अस्य अर्जु-

विजयोमधुरस्मितस्यभावंविदुषस्तस्यमतेनभिक्षुवेषः कुसुमास्त्रभयादिवातिगूढः कुहरे रैवतकस्यतिष्ठतिस्म ५६
कथंसुभद्राकमनीयतायाः कल्पेतनुत्यै कविरुन्मत्तोपिचतुर्थमप्याश्रममस्ययेन तांसाधनीभूयदिदृक्षतेस्म ५७ तदात्व
एवाद्रितटात्पतिः श्रियःपरिप्लुवंतंप्रकृतेश्शुभागमे यदाशयेतेशयएवतद्भवेदिति ब्रुवन्द्वारवतींपुनर्ययौ ५८

नस्य साधनीभूयसहायीभूयतांद्रष्टुमिच्छतिस्म अतिनिःस्पृहं तत्रापिनपुंसकमपितांद्रष्टुमिच्छतिस्म किंपुनर्नरोयुवाविषयीतिभावः ५७ तदात्वेए
व तदानीमेव श्रियःपतिः श्रीकृष्णः प्रकृतेवर्तमानेसुभद्राप्राप्तिरूपेश्शुभागमे परिप्लुवं चंचलं संदिग्धं इतियावत् तं अर्जुनं ते आशये मनसि यत् वर्तते
तत् शये हस्ते एव करगतमेव भवेत् इति ब्रुवन् सन् पुनः अद्रितटात् द्वारवतीं ययौ जगाम ५८ ५ ५ ५ ५ ५

गद्यं॥ तदनंतरं रैवतकगुहावासानंतरं अहस्कर मदस्य सूर्यगर्वस्य तस्करं अपहारकं महः तेजो यस्य सः महान् मस्करी संन्यासी रैवतकगिरेः उपस्कुरुते रैवतकगिरिं अलंकुरुते तस्य संन्यासिनः नमस्करणं अस्माकं श्रेयस्करणं श्रेयः साधनं इति पुरोधोजनबोधनात् उपाध्यायजनवचनात् हेतोः कुतूहलिना कौतुकवता हलिना बलरामेण नगरं द्वारकानगरीं उपनीयमानं भावनाभिक्षुं कपटसंन्यासिनं अर्जुनं यदुवृंदेषु यादवसमुदायेषु संभ्रम

गद्यं॥ तदनंतरमहस्करमदतस्करमहामहान्मस्करी रैवतकगिरेरुपस्कुरुते तस्य नमस्करणमस्माकं श्रेयस्करणमिति पुरोधोजनबोधनात्कुतूहलिना हलिना नगरमानीयमानं बहिरपि ज्वलता विरहानलज्वालेनेव काषायवाससावगुंठितवपुषं सव्यसाचिशब्दमत्सरेण स्मरवीरेण प्रवासरंध्रमन्विष्य पन्नगपांड्य यदुकुमारिकाणां कृते पृथक्पृथग्गीरितां शरकांडीमिव त्रिदंडीं बिभ्राणं निजपल्लवकोमलिम्नि निजयशोकादिव सुष्केण पटीरतरुणा पादुकीभूय परिस्वर्यमाणपादयुगं तं भावनाभिक्षुं संभ्रमेण वंदमानेषु यदुवृंदेषु मुकुंदोपि सविनयमुपागतश्चेतःपूरणावशेषैः स्वसोदरीप्रेमरसैरिव तीर्थजलैः पिचंडिलं कमंडलुं तदीयपाणेरादाय भगवन्निन इत इति राजभवनमुपनीय कन्यांतःपुरे निवेशयामास ७

णा वंदमानेषु सत्सु मुकुंदोपि कृष्णोपि सविनयं यथा तथा उपागतः सन् चेतःपूरणात् अवशेषैः स्वचित्तपरिपूरणे जाते सति अवशिष्टैः स्वसोदर्याः स्वभगिन्याः प्रेमरसैरिवेत्युत्प्रेक्षा तीर्थजलैः पिचंडिलं पूर्णमित्यर्थः कमंडलुं तदीयपाणेः भिक्षुकरात् आदाय स्वहस्ते गृहीत्वा हे भगवन् इत इत इति अ ११२

अस्मिन् अस्मिन्देशे आगंतव्यमिति उक्त्वा राजभवनं राजगृहं उपनीय कन्यांतःपुरे कन्यावासगृहे निवेशयामास कीदृशं भिक्षुं अंतरिव अंतःकरणे इव बहि-रपि ज्वलता सुभद्रायाः विरहानलस्य ज्वालेनेव काषायवाससा रक्तद्रव्यविशेषरंजितवस्त्रेण अवगुंठितवपुषं वेष्टितदेहं तथा स्मरवीरेण कर्त्रा सव्यसा-चिशब्देन स्वस्य सव्यसाचिनामतदैवेन तस्य भिक्षोरपितेन भिक्षौ मत्सरः तदुत्कर्षासहनं तेन करणेन प्रवासएव रंध्रं शत्रोरपकर्षसमयं अन्विष्य मृगित्वा प-न्नगपांड्ययदूनांयाः कुमारिकाः उलूपी चित्रांगदा सुभद्राः तासां कृते पृथक्पृथक् ईरितामुक्तां त्रयाणां शरकांडानां बाणदंडानां समाहारः त्रिशरकांडी-तामिव कन्यात्रयार्थं मुक्तं बाणत्रितयमिवेत्यर्थः त्रिदंडीं बिभ्राणं धारयंतं तथा निजपल्लवस्य कोमलिम्नः मृदुलस्य निर्जयेन शोकादिव शुष्केण पटीरत

॥ पद्यं॥ मार्गेशरत्रयममुष्य कृते विमुच्य शेषं द्वयं पुनरिवोज्झितुमात्तलोभः शुश्रूषितुं तदनुसोदर
चोदितायास्तन्व्याः स्मरो नयनमेवशरं व्यतानीत् ५९

रुणा चंदनवृक्षेण पादुकीभूय परिचर्यमाणं सेव्य-
मानं पादयुगलं यस्य तं ७ पद्यं॥ तदनु कन्यांतःपुरवासानंतरं स्मरः शुश्रूषितुं भिक्षोः सेवां कर्तुं सोदराभ्यां रामकृष्णाभ्यां चोदितायाः प्रेरितायाः तन्व्याः सुभद्रायाः नयनमेव शरं व्यतानीत् मुक्तवान् कथंभूतः स्मरः अमुष्य भिक्षोः कृते मार्गे शरत्रयं विमुच्य पंचसु बाणेषु मध्ये शेषं द्वयं शर-द्वयं पुनः उज्झितुं मोक्तुं आत्तलोभ इव संजातलोभ इवेत्युत्प्रेक्षा अन्योपि धानुष्कः स्वबाणैर्लक्ष्यवेधने जये माप्ते लोभात्पुनरपि बाणं मुंच-ति ५९॥ श्रीकृष्ण॥ श्रीरामकृष्ण॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

चित्तभुवामदनेन कर्त्रा स्कंभद्रायाः मधुरेणसुंदरेण वपुषा स्कंभ्रुवास्कंभ्रूरूपेण धनुषा च करणेन तर्जितः भर्त्सितः सः मस्करीसंन्यासीतपसेवत-
पोहेतुनेव दिने दिने ततोः तनिमानंकृशत्वंजगृहेस्वीचकार : कृशत्वे मदनपीडाहेतुः न तपोहेतुरित्यहेतोर्हेतुत्वकल्पनात्हेतूत्प्रेक्षा ६० अयंपा
र्थः मदनपीडयादीर्घनिःश्वसितंनिःश्वसितमितिप्रतिनिःश्वसितंतस्मिन्सति वीप्सायामव्ययीभावः तृतीयासप्तम्योर्बहुलमितिविकल्पात्साप्त-
म्या अमभावः पाणिनानासिकांस्पृशन्सन्प्राणायामसमापनंभावयामास ज्ञापयामास अत्रस्वमर्म गुप्त येक्रियया परवंचनात् युक्त्यलंकारः त

वपुषामधुरेणस्कंभ्रुवाधनुषाचित्तभुवाचतर्जितः तपसेवदिनेदिनेतनोस्तनिमानंजगृहसमस्करी ६० प्रतिनि श्वसितेदीर्घे
पाणिनानासिकांस्पृशन् भावयामास पार्थोयंप्राणायामसमापनं ६१ प्रणवोच्चरणे पुरःप्रसर्पत्प्रबभासे पतिनस्तदाधरोष्ठं॥
मुहुरग्रगतावनींद्रपुत्रीमुखमास्वादयितुंकिलोज्जिहानं ६२॥

दुक्तंयुक्तिःपरातिसंधानंक्रियया मर्मगुप्तयेइति ६१ तदाकन्याशुश्रूषासमयेप्रणवस्य ओंकारस्यउच्चारणेपु
रःप्रसर्पत् प्रणवावयववर्णयोः ओंकारमकारयोः ओष्ठ्यत्वात् अग्रेगच्छत् यतिनः अधरोष्ठंप्रबभासे अत्यंतंशुशुभे अत्रोष्ठशब्दस्यनपुंसकत्वंकोशांतरादवगंत
व्यं कीदृशं अधरोष्ठं अग्रगतायाः अवनींद्रपुत्र्याः स्कंभद्रायाः मुखं आस्वादयितुं चुंबनक्रियया आस्वादंग्रहीतुं मुहुः पुनःपुनः उज्जिहानं उद्योगंकुर्व
दिवेत्युत्प्रेक्षा ६२॥ ॥श्रीकृष्ण॥ ॥श्रीरामकृष्ण॥ ॥७॥ ॥७॥ ॥७॥ १४

यतिः कन्याकरे स्कंभद्राहस्ते पादपद्मं मृद्नतिपादमर्दनं कुर्वति सतिगात्रेशरीरे पुष्यंति पुलकांकुराणि हरेहरे माधव माधवेति हरिनामोच्चारणं कृत्वा हरिस्मृतेः ह-
रिस्मृतिहेतु दर्शनात् अन्ययर्यांचकार हेत्वंतर जनितानिचकार इमानिपुलकांकुराणि न शृंगार सात्विकभावजन्यानि अपितु शांतरससात्विकभावजन्या
नीति हेत्वंतरं प्रदर्शयामासेत्यर्थः ६३ ॥ गद्यं ॥ एकदा प्रत्यवसानकृत्यं भोजनकृत्यं निर्वर्त्य कृत्वा प्रतिक्षणं इक्षुचापस्य मदनस्य स्फारप्रेरितनीक्ष्णैर्वितस्तिप्रमा
णैश्च बाणविशेषैः संधुक्षणेन तक्षणेन समंतात्पतितैः सत्वगुणस्य शकलैरिव स्वेदबिंदुभिर्व्याकीर्णां चामूरवीं च मूरुसंज्ञकमृगविशेषसंबंधिनीं त्वचं अ-

कन्याकरे मृद्नति पादपद्मं पुष्यंति गात्रे पुलकांकुराणि हरेहरे माधव माधवेति हरिस्मृतेरन्ययर्यांचकार ६३ गद्यं ॥ एकदा निर्वर्त्य प्र
त्यवसानकृत्यं प्रतिक्षणमिक्षुचापस्फारप्रसंधुक्षणेन समंतात्पतितैः सत्वगुणशकलैरिव स्वेदबिंदुभिर्व्याकीर्णां चामूरवीं त्वचम
ध्यास्य विश्राम्यंतं तं धवित्रेण वीजयंती सा स्कंभद्रा तेन स्नौरगिनैस्तस्य यतित्वं संशय्य तत्वजिज्ञासया सविनयमनुरहसि व्यजिज्ञपत् ८
पद्यं ॥ तपस्विन्नद्य मे प्रीतिस्तवाभ्यागमसंभवा कन्यां मोनावकीर्णित्वकल्पशाखाशिखायते ६४ ध्यास्य अधिष्ठाय विश्राम्यंतं तं यतिं धवित्रेण मृग
चर्मरचितव्यजनेन वीजयंती सा स्कंभद्रा तैस्तैः दीर्घनिःश्वासादिभिः इंगितैः चेष्टाभिः यतित्वे संशय्य तस्य यतित्वस्य तत्वजिज्ञासया याथार्थ्यज्ञानेच्छया अनुपश्चात् रह
सि सविनयं व्यजिज्ञपत् विज्ञापयामास ८ पद्यं ॥ हे तपस्विन् अद्य नव अभ्यागमात् संभवः उत्पत्तिर्यस्याः सा मे प्रीतिः कन्यायाः मोनरूपपरपुरुषेण सह भाषणवर्जन
रूपमौनव्रतस्य अवकीर्णित्वे क्षतव्रतत्वे मौनव्रतभंगविषये इति यावत् अवकीर्णी क्षतव्रत इत्यमरः कल्पशाखा शिखा यतेकल्पवृक्षाग्रमंजरीवदाचरति

यथाकल्पवृक्षाग्रमंजरीकांक्षितपदार्थबाहुल्यंकरोतितथाप्रीतिःमौनव्रतभ्रंशबाहुल्यंकरोति प्रीतिर्मांवादयतीत्यर्थः ६४ हेपतिनांइंद्रश्रेष्ठइदानीं अभीय
त्वः यादृशाःपुण्यराशयःसंतिखलुयेः यदुभिः तवअंघ्रिसंगमेशिरसा अन्यत्रजः धूलिःअवाप्यतेमनसाअन्यत्रजःरजोगुणःपरिवर्ज्यतेचशिरसा
नमनेन येषांमनसाविक्षेपकारिरजोगुणस्त्यज्यतेइतिभावः ६५ हेभगवन् त्वंअखिलंविबुध्यसेजानासि अतः भाविभविष्यत्मेशुभंपरमार्थसत्यंव
दब्रूहि परमःअर्थोयस्मिन्निति शुभविशेषणंवायतः भवद्विधाः त्वत्प्रकाराःप्रयताःपूताःयोगिनोवायतयःप्रणिधानेनसमाधिनादिव्यचक्षुषःअ

यद्वःखलुपुण्यराशयोयतिनामिंद्रतवांघ्रिसंगमे शिरसान्यदवाप्यतेरजोमनसान्यत्परिवर्ज्यतेचयैः ६५
भगवन्निखिलंविबुध्यसेपरमार्थवदभाविमेशुभं प्रयतायतयोभवद्विधाःप्रणिधानेनहिदिव्यचक्षुषः ६६
अथकर्ण्यतदेषमीलितःक्षणमक्ष्णोःप्रतिवाचमाददे बहुनाकिमयिस्वकैर्गुणैर्विजयंप्राप्स्यसियोषितांकुले ६७

लौकिक त्रैकालिकज्ञानवंतःसंति ६६ एषः कपटयतिः तत्सुभद्रावचनं आकर्ण्यक्षणं अक्ष्णोःमीलितःसन्कृताक्षिमीलनःसन्नित्यर्थःप्रतिवा
चं तदुत्तरं आददे स्वीचकार उवाचेत्यर्थः अयिकन्ये बहुना भाषणेनकिं किंप्रयोजनमस्ति त्वंयोषितांस्त्रीणांकुलेसमूहमध्येस्वकैःगुणैःसौंदर्या १५
दिभिःविजयंसर्वोत्कर्षप्राप्स्यसि विजयं अर्जुनं प्राप्स्यसीतिगूढाभिप्रायः ६७॥ ॥७॥ ॥७॥ ॥

यः नतिसमयेस्वस्यपादांगुष्ठनखंतेभालेविशेषकंतिलकंकुर्यात् सनरोपिमनुष्योपिस्मरेण आर्तःसन् सघःदृशोःआमिषंभोग्यंवस्तुस्यात् दृग्विषयोभवे-
दित्यर्थः आमिषंत्वस्त्रियांमांसेतथास्यादङ्गोग्यवस्तुनीतिकेशवः अन्यत्रतुपूर्वंधर्मपुत्रोविष्णवंशभूतोजितेंद्रियोनरनारायणोगंधमादनेतपस्यमानोदृष्ट्वात
द्भार्यमिंद्रप्रेषितकामरंभाद्यप्सरोगर्वनाशार्थंनरेणैवस्वोरूयप्सरांनिर्माय तद्दर्वोहृतइतिदेवीभागवतेउक्तत्वात्समुख्योनरः सोपिकामार्तस्त्वदृग्गोचरो
भवत् तत्रैवाप्सरोवरदानेनविषयभोगार्थमेवगृहीतावतारस्यममनरशब्दवाच्यस्यार्जुनस्यकाकथेति गूढोभिप्रायोपिनाद्योतितः ६८ गद्यं॥ सारूभद्राइति

पादांगुष्ठनखंयस्तेभालेकुर्याद्विशेषकं सनरोपिस्मरेणार्तःसद्यस्स्यादामिषंदृशोः ६८ गद्यं॥ इतिसातस्यवक्रिमस्पृशावच
साश्रवसाचनिपीतपूर्वेस्तैस्तैर्लक्षणेश्श्वसोयंपतिःसंक्रंदननंदनइतिनिश्चयमणिंहृदयपेटकपुटे निधायभगवन्भ
वदभिहितयोर्विजयनरशब्दयोःक्रमेणधर्मिपरताविशेषनामताचतवद्रूपयाभावितेतिनिलसॊवीडतरलनयनंवदनमवनमयंतीतस्थे॥

उक्तप्रकारेणवक्रिमाणं अर्थांतरक्रोडीकाररूपवक्रतांस्पृशतितथाभूतेनवचसाश्रवसाश्रवणेंद्रियेणनिपीतपूर्वैःसादरंश्रुतैःतैस्तैःप्रसिद्धैःलक्षणैःसव्यद-
क्षिणप्रकोष्ठज्याघातकिणादिचिन्हैःश्वसोयंसंक्रंदननंदनः इंद्रपुत्रोर्जुनइतिनिश्चएवमणिःतंहृदयपटकपुटेहृन्मंजूषायांनिधायमहार्हमणिमंजूषायामिवंनि
श्चयंहृदयेस्थापयित्वेत्यर्थः हेभगवन्भवता अभिहितयोःउक्तयोःविजयनरशब्दयोःक्रमेणविजयशब्दस्यधर्मिपरताधर्मिवाचकत्वंनरशब्दस्यविशेषनामताम
नुष्यविशेषनरसंज्ञकताचतवद्रूपयाभाविताभविष्यतिइतिउक्त्वाव्रीडेनतरलंचंचलंनयनंयस्मिन्तद्वदनं अवनमयंतीसतीतस्मैकपटयतयेतस्थे तस्मैस्वा

शयंप्रकाशयामासेत्यर्थः प्रकाशनस्थेयाख्ययोश्चेतितिष्ठतेरात्मनेपदं तस्मैइतिश्लाघ ह्नुङ् स्थाशपांज्ञीप्स्यमानइतिसंप्रदानत्वं ६९पद्यं। यंउद्दिश्यएवंउ [illegible]रातवउक्तिभंगीसः एषः अहं अनुकंपनीयः कृपाविषयः दासः अस्मि इतिउक्त्वाक्षणं अर्जुनत्वंप्रकाश्यप्रकटीकृत्य चोरयतिः कपटयतिः तांस भद्रांकपोलेचुचुंब ६९ पुष्पास्त्रः मदनएवकर्षकवरः कृषीवलश्रेष्ठः स्वस्यकिंशुकशिलीमुखएवपलाशपुष्पबाणएवसीरः लांगलंतेनकृष्टेस्वेदांबुपूरेणभरितव्याप्तेतस्याः सुदृशः सुभद्रायाः क्षेत्रेदहेकेदारेचपुलकानांछलेनकपटेननिबिडान्शृंगाररसस्यबीजानांनिकरान्अवाप्सीत्-

यमेवमुद्दिश्यतवोक्तिभंगीसएषदासोस्म्यनुकंपनीयः इतिप्रकाश्यक्षणमर्जुनत्वंचुचुंबतांचोरयतिः कपोले६९स्वेदांबु पूरभरितसुदृशस्तस्याःक्षेत्रेस्वःकिंशुकशिलीमुखसीरकृष्टे पुष्पास्त्रकर्षकवरः पुलकच्छलनशृंगारबीजनिकरान्निबिडानवाप्सीत्७० तस्यामेववधूमिमांसरजनोसद्यानुकूलांरहःपाणीकृत्यविलोकितोत्सवभरोद्वाभ्यांहरिभ्यामपि पौरेषूभययाजनेष्वबलनांप्राप्तेषु पार्थस्तयाजाग्रत्सारथिविद्ययासहरथारूढः पुरान्निर्ययौ७१

अन्योपिकर्षकः लांगलकृष्टेजलपूर्णेक्षेत्रेसस्यबीजानांवापंकरोति७०सःपार्थः यस्यांअ र्जुनत्वप्रकटनंतस्यामेवसजनोअनुकूलांइमांवधूंसुभद्रांरहः एकांतेसद्यः पाणीकृत्यविवाह्यजाग्रतीस्फुरद्रूपासारथिविद्यासारथ्यंयस्याः तयासुभद्रयासह रथारूढःसन्पुरात्निर्ययौनिर्जगामकथंभूतः पार्थः द्वाभ्यांहरिभ्यांकृष्णमहेंद्राभ्यामपिविलोकितः विवाहस्यउत्सवभरोयस्यसः कृष्णेनस्वभक्तस्यइंद्रे णस्वसुतस्यविवाहोत्सवोहर्षात्दृष्टइत्यर्थः केषुसत्सुपौरेषुजनेषुउभययाउभयप्रकारेणअबलानांबलरामरहितानां अर्जुनजयेसामर्थ्यरहितानांचभावः अबलनातांप्राप्तेषुसत्सु७१

इदं आकर्ण्य पार्थोद्देशान् पार्थमुद्दिश्येत्यर्थः जृंभितानां प्रवृद्धोद्योगवतां यदूनां क्रोधनानां कोपिनां भावः क्रोधनत्वं तस्य जातेः सामान्यस्य क्रोधस्येत्यर्थः जाति
लतायाश्च म्लानिं दातुं माधवः श्रीकृष्णः माधवः लक्ष्मीपतिः समर्थ इति यावत् वसंतश्च अभूत् वसंते हि जातिलता म्लाना भवंति वर्षासु प्रफुल्ला भवंती-
ति प्रसिद्धं यत्र श्रीकृष्णो साकौरवी कुरुवंशोत्पन्नपांडवीयासमृद्धिः आयत्ता अधीना यत्र वसंते च कुरबाणां कुरबकवृक्षाणां इयं बवयोरभेदात् कौरवा
ग्रासमृद्धिः पुष्पादिबाहुल्यं अधीना यादवाः कृष्णवचनप्रोत्थाशांता अभूवन्निति भावः ७२ रणोत्साहे शांते सति यदूनां जडिम्नः बुद्धिमांद्यस्य कीर्तेर्ध्वजल-

आकर्ण्येदं जृंभितानां यदूनां पार्थोद्देशात् क्रोधनत्वस्य जातेः म्लानिं दातुं माधवो माधवो भूद्यत्रायत्ता कौरवी सा समृद्धिः ७२
रणोत्साहे शांते यदुजडिमकीर्तिध्वजलतां मुहुः स्मारं स्मारं कपटयतितां वल्गितकुचं हसंत्याः प्रेयस्या दशनरुचिमिश्रीकृतयशाः
शतांगेनाविक्षत्सुरपतितनूजो निजपुरीं ७३ ततो मुहूर्ते सकलाभिनंद्ये कुरूद्वहानां कुशलोदयाय सुतं सुभद्रा सुषुवे भिमन्युं प्रवी
सूस्तातमिव प्रवीरं ७४

तां ध्वजवत् सर्वेषां सूचिकां कपटयतितां मुहुः पुनः पुनः स्मारं स्मारं स्मृत्वा वल्गितौ चंचलौ कुचौ यस्मिन् कर्मणि यथा भवति
तथा हसंत्याः प्रेयस्याः सुभद्रायाः दशनानां रुचेः कांतेः निर्मलतया शुभ्रतया च मिश्रीकृतं यशो येन सः सुरपतितनूजः अर्जुनः शतांगेन रथेन पुरीं इंद्रप्रस्थन
गरीं अविक्षत् प्रविष्टवान् ७३ ततः सुभद्रा सकलानां अभिनंद्ये अभिनंदनीये मुहूर्ते शुभसमये कुरूद्वहानां कुरुवंशश्रेष्ठानां धर्मादीनां कुशलोदयाय कल्या
णोदयार्थं अभिमन्युसंज्ञं सुतं सुषुवे काकमिव प्रवीरसूः महाशूरप्रसूः कुंती प्रवीरं महावीरं तातं जनकं अर्जुनमिव ७४ ॥ ७५॥ ॥ ७५॥

पतिव्रतानांमध्येप्रधानभावेप्राधान्येमुख्यत्वेकृतःपट्टबंधोयस्याःसाअधिकारार्थमभिषेकेहिपट्टबंधःक्रियतेऋष्यादिभिःपतिव्रतासुमुख्योक्तेतिभावः
पांचालपुत्रीद्रौपदीच चकारःसुभद्रासमुच्चयार्थःपंचापिस्वान्पतीन्पितॄणांअनृणान्पितृऋणरहितान् अकार्षीत् पत्न्यांपुत्रोत्पादनेनपितृऋणान्मुक्तो
भवतीतिश्रुतिस्मृतिपुराणादौप्रसिद्धिः७५गद्यं॥अथतेषांपांडवानांनाद्यांअत्युत्कृष्टतयाअनिर्वाच्यंपुत्रोत्सवंआकर्ण्यसामंतःऋतुमंडलस्यमांड-
लिकोराजावसंतःऋतुःराजसंबंधितया अहंऋतूनांराजाधर्मराजस्तुसार्वभौमःएवंचराजसंबंधेनहर्षादिवसमाजगामतदानीं वसंतागमनसमयेभ

पांचालपुत्रीचपतिव्रतानांप्रधानभावेकृतपट्टबंधा पंचापिसद्यःप्रतिभूरिवस्वान्पतीन्पितॄणामनृणानकार्षीत्७५गद्यं॥अथतेषां
तादृशंपुत्रोत्सवमाकर्ण्यऋतुर्वसंतसामंतोराजन्यसंबंधितयाहर्षादिवसमाजगाम तदानींभगवान्पवमानस्तुभीमस्यसुतोत्पत्तिनि
मित्ताशौचवत्तयालोकस्पर्शायसंकुचन्निवकांतिवनदिनानिमलयंविहायपदमेकमपिनचचाल१०पद्यं॥एतेनखल्वकरुणेनतपागमेन
जीवातुरद्यममदेशातएवदूरात् उत्सारितोमधुरितीवरुषावनांतेनत्वागतंपरभृतोनसमाचचार७६ गवान्पवमानःवायुस्तुभीमस्यस्वपुत्रस्यसुतो
त्पत्तिनिमित्तायाआशौचवत्ताजननाशौचवत्तानपालोकानांस्पर्शायसंकुचन्निवलोकानांमत्स्पर्शोमाभूदितिमनसिसंकुचन्निवकांतिवनदिनानिमलयपर्वतंविहायएक
मपिपदंनचचालसदामलयसंबंधेनावर्ततेत्यर्थः१०पद्यं॥अकरुणेननिष्कृपेणकरुणवृक्षपुष्परहितेनकरुणस्तुरसेवृक्षेकृपायांकरुणामतेतिविश्वःतपागमेनग्री
ष्मागमेन अद्यममजीवातुःजीवनदातामधुःवसंतःदेशातःदूरादेवउत्सारितःनिष्कासितइतिमनस्यानीयरुषेवक्रोधेनेववनांतेवनमध्येतस्यग्रीष्मस्यस्वा १७

गतंवाचासत्कारंपरभृतः कोकिलः नसमाचचार ग्रीष्मे कोकिलः शब्दंनकरोतीति प्रसिद्धिः नन्ररुषेतिहेतूत्प्रेक्षा ७६ तदानींग्रीष्मर्तौशिरीषपंक्तेः शिरीष
कुसुमपंक्तेः कुरुकामिनीनांसुभद्राद्रौपद्यादीनांशरीर वल्यासहमार्दवेनउपमासादृश्यंउपस्थिताउदिता अभूत् इतः प्राक्नासीत् इदानींमिलितेतिभावः
तदेवतपस्थितशब्देनार्थांतरक्रोडीकारादर्थांतरन्यासेनद्रढयति हियतःतपस्थितानांग्रीष्मेस्थितानांतपस्विनांचसर्वंसुलभं ७७ कुरूणांकेलिवनेषुउद्याने
षुमल्लिकाकुसुमेषुभ्रमरावलीबभौशुशुभे तामुत्प्रेक्षते ऋत्विति ऋतुनाप्रकृतत्वाद्ग्रीष्मेणमधुगंधयोः मकरंदसुगंधयोः गुप्तयेरक्षणायअग्रेकुसुमाग्रेजतु

शिरीषपंक्तेः कुरुकामिनीनांशरीरवल्यांसहमार्दवेन उपस्थितामूदुपमानदानींतपस्थितानांफलमंहिसर्वं ७७ कुरुके
लिवनेषुमल्लिकाकुसुमेषुभ्रमरावलीबभौ ऋतुनामधुगंधगुप्त्यैजतुनाग्रेनिहितेवमुद्रणा ७८ शुभसौरभसंभृ
तानिभूमौशुचिभूतान्यपियानिपाटलानि कलयेयुरतीवचित्रभावंक्षणपीतानिदृशाकथंनतानि ७९

नालाक्षयाकृत्वानिहितास्थापितामुद्रणेवभाषायांलाखोलेतिप्रसिद्धवाच्यमिव यथाकोशगृहद्वारशृंखलोपरिलाक्षालेपरूपमुद्रणाक्रियते तथाकुसुमो
परिकृताकिमित्यर्थः ७८ भूमौशुभसौरभेणउत्तमसुगंधेनसंभृतानिशुचिभूतानिशुभ्राण्यपि यानिश्वेतरक्तवर्णानीतिविरोधः शुचौआषाढे भूतानि
जातानिपाटलानिपाटलावृक्षपुष्पाणीतिविरोधपरिहारः दृशानेत्रेणक्षणंपीतानिसादरमवलोकितानितानिचित्रभावंआश्चर्यंकथंनकलयेयुःदद्युः
अपितुआश्चर्यंदद्युरेव किंचयानिशुभ्राणिपाटलानिशीतानितानिचित्रभावंकर्बुरत्वंकथंनकलयेयुःधारयेयुःअपितुकर्बुरत्वंधारयेयुरेव ७९

सुदृशांसुंदरीणां कैश्यंकेशसमूहः अयंघनः मेघइतिकैः नजज्ञेनज्ञातं अपितुसर्वैर्ज्ञातं यत् यस्मात्कारणात् तस्यकैश्यस्य अधः अधोभागेनिटिलेललाटेएवसाचासौ तादृशीचतत्तादृशी अतिमहतीत्यर्थः सलिलानांशीकरकणाः यस्मिन्तस्यदुर्दिनस्यमेघछन्नाकाशदिनस्यश्रीःशोभासततंनिरंतरं आसीत् कीदृशंकैश्यं सीमंतएवविधुत् यस्मिन्तत् तथाअवतंसशिरीषाणि अवतंसीकृतशिरीषकुसुमान्येवचापंयस्मिन्तत् ८० उष्णरुचेःसूर्यस्यउग्रैःकरैःकिरणैः समंतात् ऊष्मायमाणानि ऊष्माणं उद्वमंति अखिलदिङ्मुखानि यस्मिन्तस्य अन्हःदिवसस्यसमीपंभागंस्वकालेअन्हस्त्रिंशद्दंडका

सीमंतविद्युदवतंसशिरीषचापंकैश्यंघनोयमितिकैःसुदृशांनजज्ञे तस्याधएवनिटिलेसततंयदासीत्तत्तादृशीसलिलशीकरदुर्दिनश्रीः ८१ उग्रैःकरैरुष्णरुचेःसमंतादूष्मायमाणाखिलदिङ्मुखस्य आगंतुमन्हःसविधेस्वकालेह्यनीश्वरेयापससर्पराविः ८१ वर्षास्वियंत्वरितमस्मदुपांतभूमेरुन्मूलनंकलयतीतिरुषावलीढैः तीरद्रुमैःस्वनिकटादपसारितेवमध्यंजगामसरितां सलिलस्यवेणी ८२

वसानरूपस्वसमये आगंतुं अनीश्वरे वअसमर्थेव रात्रिः अपससर्प किंचित् किंचित् स्वपश्वाद्भागेजगाम ग्रीष्मेहिरात्रिर्लघुभवति तत्कारणमुत्प्रेक्षितं ८१
सरितांनदीनांसलिलस्यवेणीप्रवाहःमध्यंपात्रमध्यभागंजगाम कीदृशीसलिलस्यवेणी इयंवेणीवर्षासुप्रावृट्कालेअस्माकंउपांतभूमेःसमीपभूमेःउन्मूलनंत्वरितं १८
कलयतिकरोतिइतिहेतोःरुषाक्रोधेनअवलीढैःयुक्तैःतीरद्रुमैःतीरस्थवृक्षैःअपसारितेवस्वसकाशात्परितःक्षिप्तेवेत्युत्प्रेक्षा ८२ ॥८२ ८२

देशोदेशोजडिमकुरंगाः शैत्यमृगाः दिनकरएवभिल्लः किरातः तस्मिन् तेजोभल्लैः उष्णकिरणबाणैः धावंधावंधावित्वाधावित्वाप्रहरतिसतिराज्ञांधारागेहजलमंदि रंशरणंअवापुः अन्येपिदुर्जनेनपीड्यमानाराजगृहंप्रतिगच्छंति ८३ भुवनपश्चयुवानश्चयुवानः पुमान्स्त्रियेत्येकशेषः तरुणस्त्रीपुरुषाः तपर्तौग्रीष्मर्तौअंगा नांस्वांगानांअंगैःपरांगैः संगस्य असहनेसति अभिमुखाः अन्योन्यस्यसन्मुखाः शांताएवकेचित्युवानःवाचापि अन्योन्यंदृढंपथानयाआलिलिंगुः केचित्दृढ शादर्शनेनापि आलिलिंगुः केचित्मनसापिमनःकल्पनयापिआलिलिंगुः ८४ गद्यं॥ एवंरीत्यापचेलिमांपक्वांपूर्णामित्यर्थः हेलिमयूखानांसूर्यकिरणानां

देशेदेशेजडिमकुरंगास्तेजोभल्लैर्दिनकरभिल्लः धावंधावंप्रहरतिराज्ञांधारागेहंशरणमवापुः ८३ अंगांगसंगासहनेतपर्तावन्योन्य मेवाभिमुखायुवानः वाचापिकेचिन्मनसापिकेचिद्दृशापिकेचिद्दृढमालिलिंगुः ८४ गद्यं॥ एवंपचेलिमांहेलिमयूखकठोरकेलि नस्यननयायेनिवेदितुकामाभिरिवराभाभिर्निरंतरोपान्तोद्गतध्वनिचमंतोवसंतरतिकांताभिविजयंतजनकानंतरजकौंतेयोपरि पाटलहंसपाददुरवगाहवनजानसनाथपाथसिरोधसिर्चाविहाररत्नधाविन्ताभाभोपायिकमातिथ्यमापादयितुंभगवतींतामेवसरितमापतत् ॥११

कठारकेलिपरुषक्रीडांतस्यरवेजननयायेयमुनायैनिवेदयितुकामाभिरिवरामाभिः सुंदरीभिः निरंतरोपांतोनिबिडितसमंताङ्गगोद्गगध्वनिवसंतोद्गगोचरैवसंतो वसंतमदनाविवेत्युत्प्रेक्षा अयंतजनकस्यइंद्रस्य अनंतरजः कनिष्ठबंधुः उपेंद्रः कृष्णः कौंतेयः अर्जुनश्चतौपरिपाटलाः समंतात् श्वेतरक्तवर्णाः येहंस पादाः हंसचरणाः सूर्यकिरणाश्चतैः दुरवगाह्यानिदुष्प्रवेशानिवनेषुउदकेषुजातानिउत्पन्नानि अंभोजानितैः सनाथेयुक्तेपाथसियमुनाजलेअन्यत्रवनजा तानिवनस

मूहाःतैःसनाथैराधसियमुनानीरेचविहारैःजलक्रीडाचवनक्रीडाभिःतेषांग्रीष्मीयानांदिनानांऔर्षधिकंयुक्तंआतिथ्यंआपादयितुंकर्तुंभगवर्तीनामिवस
रितयमुनांआपततांअगच्छतांतस्मिन्‌कृतौकृष्णार्जुनौस्त्रीभिःसहजलक्रीडांवनक्रीडांचकर्तुंयमुनांगताविल्यर्थः११पद्यं॥कालिंदपुत्र्यायमुनयाक
ल्लोलवेगस्यमहाल्लहरीवेगस्यकपटेनछलेनपरमस्यपुंसःश्रीकृष्णपादंप्रतिप्रससृपगतंकथंभूतयाइहपादेपुनःत्रिजगत्पवित्राःमेसरव्यःभागीरथी
तुल्याःकतितिष्ठंतीतिमनस्यानीयताःसंद्रष्टुंकामोयस्याःतयैवत्युत्प्रेक्षाएतत्‌पादान्ममसरवीएकानिर्गतातत्तुल्याअन्यास्तत्रकतिसंतिताःद्रष्टव्याद्

पद्यं॥कल्लोलवेगकपटेनकलिंदपुत्र्यापादंप्रतिप्रससृपेपरमस्यपुंसःतिष्ठंतिमेपुनरिहत्रिजगत्पवित्राःसरव्यःकतीतिसमवे
क्षितुकामयेव८५तस्याजलेषुतरुणांबुदजातिवैरिष्वावर्तजालमनयारुभयोरतानीत्‌वीचीकराग्रविनिवर्तितरामसीरव्यावल्गनो
पजनितव्रणगर्तशंका८६मुरारिनारीमुखपद्मपंक्तिर्जवेनयोद्धुंजलदुर्गपद्मैःतीरेवतस्थौतिलकापदेशात्कृत्वापुरःखटकमंडलानि८७

तीप्छुंयैवयमुनयापादंप्रतिप्रसस्पेइत्यर्थः८५तरुणांबुदानांसजलमेघानांजातस्यसमूहस्यवैरिषुप्रतिभटेषुश्यामतयातत्तुल्येषुतस्याःयमुनायाःजलेषुआवर्ता
नांअंभोभ्रमाणांजालंसमूहःउभयोःअनयोःकृष्णार्जुनयोःवीच्यएवकराःतेषांअग्रैःविनिवारितानियानिरामसीरस्यबलरामस्यव्यावल्गनानिस्वविदार
णार्थंचापल्यकर्माणितैःउपजनिताःयेव्रणगर्ताःतेषांशंकाअतानीत्‌ददौबलरामेणगोपीभिःसहपर्वतेक्रीडताजलक्रीडार्थंआहूतायमुनायदानागता
तदासासीरेणाकृष्टेतिश्रीमद्भागवतेकथानकं८६मुरारेःनारीमुखपद्मानांपंक्तिःजलदुर्गवर्तमानैःपद्मैःसहजवेनयोद्धुंतीरेअवतस्थेकिंकृत्वातिलकापदेशा

नृभालस्थतिलककपटात्खेटानांमंडलानिसमूहान्पुरःकृत्वा अग्रतःकृत्वा नेमेतिलकाःअपितुस्वत्राणार्थंमुखपद्मेःखेटकान्यग्रतःकृतानीत्यर्थोऽत्रैकेनद्या
पन्हुत्यलंकारः८७ तत्रयमुनायांतासांकृष्णपत्नीनांविलासगमनंसमवेक्ष्यलज्जितचेतनायाःलज्जितमनसःमराल्याःहंस्याःलाल्यत्वस्यलालनीयतायाःहेतु
रपिकारणमपिगतःगमनस्यमंदिम्नःमंदतायाःश्रीःशोभावेगात्तिरोभवनस्यवेगेनगत्वानिलीयस्थितेःविघ्नतयाप्रतिबंधकतयागर्ह्यानदानींनिद्याबभू
व अस्माकंगतिमंदिमानस्यान्वेत्तर्हिद्रुतंगत्वानिलयनंभवेत् अतोनिलयनेगतिमंदिमाप्रतिबंधकतयानिंदार्होजातइतिभावः८८गद्यं॥तासुकृष्णस्त्रीषु

तासांविलासगमनंसमवेक्ष्यतत्रलाल्यत्वहेतुरपिगर्हितचेतनायाः वेगात्तिरोभवनविघ्नतयामराल्यागर्ह्योबभूवनितरांगतिमंदि
मश्रीः८८गद्यं॥शनैस्तासुसरितमवगाहमानासुकासांचिदोर्ष्यपर्वानतंबबिंबानिजावकाशदानावलंबितोन्नतिभिरंबुभिः
पुलिनानिनिचोलयांचक्रुः१२ अपरासामसूययेवनाभिकुहराणिजलचूषणादावर्तकुलजवावलेपमवलुंपन् इतरासांकुच
चकुचयुगलानिक्षोभणात्कोकनदकोशान्विदलयामासुः१३ शनैःशनैःसरितमवगाहमानासुसर्नीपुकासांचित् नितंबबिंबाःई
र्ष्ययेवविशालतयापुलिनेनसहस्वसाम्येर्ष्ययेवनिजस्यस्वस्य अवकाशदानेन अवलंबिता धृताउन्नतिः उच्चतायैःतैःअंबुभिःपुलिनानिनिचोलयां
चक्रुःआच्छादयामासुः१२ अपरासांस्त्रीणांनाभिकुहराणिनाभिबिलानि असूययेव स्वसादृश्येर्ष्ययेवजलचूषणात्जलपानात् आवर्तकुलजवस्य-
आवर्तसमूहवेगस्यअवलेपंगर्वं अलुंपन् चिच्छिदुः इतरासांकुचयुगलानिक्रुधेवस्वसाम्यधारणहेतुकक्रोधेनवक्षोभणात्क्षोभजन्यताडनात्कोकनदानांरक्तो
त्पलानांकोशान्विदलयामासुः१३

पद्यं॥ ग्रहराजस्यसूर्यस्यपुत्रीयमुनावनिताजनानांवक्षोजकुंभनिवह्नात् कुचकुंभसमूह्नात् सकाशात् ग्रीष्मर्तुनाविनिहितंपितुः जनकस्यरवेः
तापरूपंस्वंधनंतरलोर्मयएवहस्ताःतैःअहरत्अग्राह् ह्रियतः अपत्यभाजां पुत्रदुहितृमतांविभूतिःसंपत्तिःअन्यंस्वसंतते रपरंजनंनयाति पुत्रा
दिःपितुःस्वंअन्येनगृहीतंचेत्तस्माद्बलेनगृण्हाति किंपुनःराजपुत्रीतिभावः ८९ रूढ्दशःसंदर्पःमुखैःस्मरनायकानुजस्य उपेंद्रस्यकृष्णस्यमनसः
वशीकृतौस्वाधीनीकरणविषयेनिपुणतांपटुतांयथाययुःप्रापुःतथानलिनीलताःसरसीरुहैःकमलैःनिपुणतांनययुःयत् यस्मात्कारणात् अमू

वक्षोजकुंभनिवहाद्वनिताजनानांग्रीष्मर्तुनाविनिहितंग्रहराजपुत्री तापंपितुःस्वमहरत्तरलोर्मिहस्तैरन्यंनयातिहिविभू
तिरपत्यभाजां ९० स्मरनायकानुजमनोवशीकृतोरूढ्दृशोमुखैर्वनिपुणतांयथाययुः सरसीरुहैर्ननलिनीलतास्तथाराव
चान्यमूनिविकचानितानियत् ९१यमस्वसुःसन्निधिमेत्यरात्रौस्वकांतिचोरंसुदृशामुराजः नालाग्रशूलेनलिनंनिवेश्यववल्गहर्षादिववारि
मध्ये ९२
नि मुखानिसकचानिसकेशानितानिकमलानिविकचानिकेशरहितानिप्रपुल्लानिचवर्तंतेमुखकमलयोःसादृश्येपिसकेशानांयथाशोभातथाविके
शानांनास्तीत्युक्तिभंगिः ९० रूढ्दशांउरोजःस्तनःयमस्वसुःयमुनायाःसन्निधिंसामीप्यंएत्यप्राप्यमुकुलीभावात्रात्रौस्वकांतेःस्वशोभायाःचोरंनलिनं २०
कमलंवारिमध्येनालाग्रमेवशूलंतस्मिन्निवेश्यआरोप्यहर्षादिववल्गाननर्त अन्योपिकस्यचिदाश्रयंकृत्वाचौर्यकर्मरतस्यस्वबलेनशासनंकृत्वाहर्षान्नृत्य
ति ९२

कंसहंतुःकृष्णास्यकरोपिव्यात्युक्षिकायांपरस्परांगेषुजलप्रक्षेपक्रीडायांविपुलेक्षणासुसुंदरीपुनस्वानांद्योतेनकांत्यावलक्षंशुभ्रं अंभः वर्षन्सन्तुपुनः व
स्याःसरितःयमुनायाःउदरांमहतींसखींभागीरथीं असावीदिवप्रासृत्किंपुरापादःप्रासूत इदानींतत्करोपिप्रासृतकिमित्यपिशब्दार्थः १३उल्लासभाजांआ
नंदभाजाहरिणाकृष्णेनप्रियायाःकवर्यांकेशवेशेकल्हाराणांसुगंधिकमलविशेषाणामाल्येमालायांकलितेस्थापितेसतिसपत्न्याःवल्के असैः दुःखाश्रु
भिःअसूययाईर्ष्ययाहसितेनेश्ववउत्तंसितंअवतंसयुक्तंअभूत् इदंचित्रं यस्याःकवर्यांमालाप्रक्षेपःतद्वक्रेणोत्तासितेन भाव्यं अत्रतु अन्यस्याःमुखमुत्तं

व्यात्युक्षिकायांविपुलेक्षणासुवर्षन्नखद्योतवलक्षमंभः सखीमुदारांसरितस्ततरयाःकरोप्यसावीदिवकंसहंतुः १३उल्ला
समाजाहरिणाप्रियायाःकल्हारमाल्येकलितेकवर्यां असैरसूयाहसितेश्ववचित्रमुत्तंसितंवक्त्रमभूत्सपत्न्याः १४ ग्लहंनि
मग्नग्रहणेषुकल्पयन्स्वयंग्रहाश्लेषमखंयदूद्वहः सवर्णवर्ष्मासलिलेतडित्तनूःसुखादगृण्हात्सुदृशस्ततानतं १५

सितमितिचित्रं उत्तंसितंयुक्तमित्यर्थेनतत्परिहारः १४ सवर्णंयमुनाजलेनसमानवर्णंवर्ष्मशरीरंयस्यसःयदूद्वहःकृष्णःनिमग्नानांग्रहणेषुस्वयंग्रहेणआ
त्मनाग्रहणेनयत्आश्लेषसुखंतद्रूपंग्लहंपणंकल्पयन्सन्सलिलेकृष्णाजलेतडिदिवगौरीननुर्यासांताःसुखान्अनायासेनअगृण्हात्ताःसुदृशस्ततंकृ
ष्णंनागृह्णन्सलिलकृष्णशरीरयोः एकवर्णत्वेनभेदनाज्ञानान्नग्रहणमितिभावः १५ ॥७॥ ॥७॥ ॥७॥

अंबुधुनिमग्नः हीरः क्वचिद्देशे फूत्कृतैः स्वस्य अधःस्थितैः चिन्हं ज्ञापकं बुद्बुदं उदस्य जलोपरि गतं कृत्वा वधूं प्रतिवंचयन् क्वचिदन्यदेशे वरांग्याः सुंदर्याः उरस्तं
अंचुचुंब ९६ तटिन्याः यमुनायाः तटयोः तीरयोः प्रांते अप्सु उदकेषु मंडलीभूय क्रीडतोः कृष्णयोः कृष्णार्जुनयोः यौवते युवतीनां वृंदे ताटंके इव यमुनायाः क-
र्णभूषणे इव रेजतुः ९७ गद्यं ॥ इति अनेन प्रकारेण चिरं विहृत्य क्रीडित्वा प्रतीरं उत्तीर्णाभिः गताभिः सह नटाटवीं पर्यटतोः तयोः कृष्णार्जुनयोः अग्रे दिशि दिशि शिञ्जितः

फूत्कृतैः क्वचिदधःस्थचिन्हं बुद्बुदं हीरः उदस्य निमग्नः वंचयन्प्रति वधूं क्वचिदुरस्तं भमं बुधुचुचुंब वरांग्याः ९६ क्रीडती
मंडलीभूय कृष्णयोरप्सु यौवत नटिन्यास्तटयोः प्रांतेताटंके इव रेजतुः ९७ गद्यं ॥ इति चिरं विहृत्य प्रतीरमुत्तीर्णाभिर्ज
लमेकन व्रीडादिव संकुचितात्मभिः कुचैरानमिताभिस्तदंगसंगमशर्माणि मर्मरगिरा संस्तुत्य पवनचंचलैरंचलैः श्लाघमा
नानीव वसनानि वसितवतीभिः कायकांति कनकलताकोरकाणि व कनकाभरणानि कामनीयकपुनरुक्तिमात्रस्यपात्रय
तीभिर्वधूटीभिः सह नटाटवीं पर्यटतोस्तयोरग्रे दिशि दिशि शिञ्जितशिशिरेतराभीशुप्रकाशो जनदृशां कोशीकरणदेशि
कः कोपि महसां राशिराविरासीत् १४ शितः कृशीकृतः शिशिरेतरः उष्णः अभीषुप्रकाशः किरणप्रकाशो येन सः जनदृशां कोशीकरण-
स्य कुड्मलीकरणस्य देशिकः गुरुः शिक्षकः कोपि अनिर्णीतः महसां तेजसां राशिः आविरासीत् प्रादुर्बभूव कथंभूताभिः वधूटीभिः जलस्य डलयोरभे
दात् जडस्य मूर्खस्य च मेलनेन संगमेन व्रीडादिव संकुचितः आत्मा स्वरूपं येषां तैः कुचैः आनमिताभिः नम्रीकृताभिः तथा तासां अंगसंगमस्य शर्माणि

सुखानिमर्मरगिरास्वशब्दरूपवाण्यासंस्तुत्यपवनेनचंचलैः अंचलैः प्रांतभागैः श्लाघमानानीववसनानिवस्त्राणिवसिनवतीभिः अन्यापिप्रियपदार्थसं स्तुत्यशिरश्चालनेनश्लाघते तथाकायकांतिः स्वशरीरकांतिरेव लतातस्याः कोरकाणीव कुड्मलानीवकनकाभरणानिकामनीयकस्य स्वलावण्य- स्ययत्पुनरुक्तिमात्रंतस्यपात्रपंतीभिः पात्रंकुर्वतीभिः अधिकार्थस्याप्रतिपादनात्पुनरुक्तिर्यथाव्यर्था तथास्वलावण्यशोभाधिकशोभाया अकरणात् भूषणानिव्यर्थानिकुर्वतीभिरितिभावः १४ पद्यं॥ अथयत्नात् उन्मिष्योन्मिष्यनेत्रे उन्मील्योन्मील्यपरिचलितायया पूर्वं शक्तिर्यस्याः तयादृष्ट्यातन्मध्ये

पद्यं॥ उन्मिष्योन्मिष्ययत्नात्परिचलितयया पूर्वशक्त्यायदृष्ट्यातन्मध्येवीक्ष्यकंचित्पुरुषमनुदितच्छायहस्तातपत्रं
अक्ष्णाज्ञातेयमोतोर्विदधतमनयोः प्रश्रयाश्चर्यदत्तद्वैराज्यादाकुलाभूद्यदुकुरुवरयोस्तत्क्षणंचित्तसीमा १८

तेजोराशिमध्येकंचित् पुरुषंवीक्ष्य अनयोः यदुकुरुवरयोः यदुकुलकुरुकुलश्रेष्ठयोः कृष्णार्जुनयोः चित्तसीमाद्वयोः राज्ञोः पालनशासनादिकर्मद्वैराज्यंप्र- श्रयः विनयः आश्चर्यंचताभ्यांसंप्रदानाभ्यांदत्तयत् द्वैराज्यंतस्माद्धेतोः तत्क्षणंआकुलाव्यग्राअभूत् यस्मिन्ग्रामेराजद्वयाधिकारः तत्स्थानांएककालाव च्छेदेनोभयाज्ञापालने आकुलताभवति कथंभूतंपुरुषंतउदितानात्पन्नाच्छायायस्यतथाभूतंहस्तआतपत्रंछत्रंयस्यतं आतपत्रस्याधः पुरुषतेजसाउपरि सूर्यतेजसाछायाभावः तथाअक्ष्णानेत्रेण ओतोः मार्जारस्यज्ञातेयंएककुलतांमार्जारत्वंविदधतं धारयंतं अग्निनेत्राणांमार्जारनेत्रसादृश्यादयमुक्तिः १८

मुकुंदवध्वः वयसावार्धक्येनकृतैः द्विजातिवृद्धस्यमुखेतिरोवेपथुभिःनिर्यत्कंपैः कृतासूचनायासांताइव अस्यवृद्धस्यपथः मार्गात् पार्श्वयोः सहसातत्क्षणं
द्विधा अपसस्रुः अपसर्पणेहेतुगर्भंविशेषणं यतोभीरवः भयशीलाः ९९ ततः ताभ्यांकृष्णार्जुनाभ्यां आत्मानं अपंकंविधातुंकर्तुंतस्य वृद्धविप्रस्यपदोः
चरणयोःपुरस्तात् अग्रभागेउदंचति आविर्भवंति घनानिनिबिडानि घर्मतोयानियेषुतैः अष्टाभिः अंगैः करचरणहृदयादिभिः अवन्याः भूमेः रजांसिस्पृष्टानि
अहोआश्चर्यं घर्मजलरजोमेलनेनपंकोत्पत्तिर्भवति अपरपंककरणीकारणपूर्वकं कल्पप्रक्षालनं आश्चर्यकारकं अत्रापिविचित्रालंकारः तदुक्तं विचित्रंतत्प्रयत्न-

मुखेतिरोवेपथुभिर्वयःकृतैर्मुकुंदवध्वःकृतसूचनाइव । द्विजातिवृद्धस्यपथोस्यपार्श्वयोर्द्विधापसस्रुःसहसातिभी
रवः ९९ ताभ्यांततस्तस्यपदोःपुरस्तादपंकमात्मानमहोविधातुं स्पृष्टान्युदंचद्घनघर्मतोयैरष्टाभिरंगैरवनेरजांसि १००
परस्परासंगफलप्रदित्सयास्वजन्मतारेंदुवासराविव उपस्थितौतावुपसृज्यसंभ्रमात्तदाशिषोनंतरमेवमब्रवीत् १०१

ष्वेविद्वपरीतफलेच्छयेति अपंकं अपापंइत्यर्थादाश्चर्यपरिहारः विप्रायसाष्टांगनमनंचक्रुरितिभावः १०० परस्परयोः आसंगः संगतिः तस्याःफलं अन्नं
तस्यप्रदित्सादातुमिच्छातयाउपस्थितौप्राप्तौस्वजन्मतारेंदुवासरौस्वजन्मनक्षत्रेंदुवासराविवेत्युत्प्रेक्षा तौकृष्णार्जुनौ संभ्रमात् अतित्वरयाउपसृ
त्यसमीपंगत्वावृद्धब्राम्हणःतदाआशिषःआशीर्वादस्यअनंतरं पश्चात् एवंवक्ष्यमाणं अब्रवीत् अध्यात्मवर्जितभयसन्मानवस्त्रसौगंध्यदुःखानिम
लिनानिभेरविवासराद्याविनिमुहूर्तचिंतामणौजन्मनक्षत्रवारसंगतिफलानि १०१ ॥ ॥९७॥ ॥९७॥ ॥९७॥ २२

अथिवीरो अनेनयाचितदानसामर्थ्यंद्योत्यते पुत्राभ्यांसकाशाद्भगिनेवभीतेवक्षुत्कुक्षिं मदुदरं एत्य मांप्रपीडयति तत् तस्मात् बहु अशनं भक्ष्यंभोक्तुं याच्यते यस्ययेन अशनेन एषः मद्रूपः अतिथिः पुरानृप्यति तृप्तिंयास्यति यावत्पुरानिपातयोर्लडितिभविष्यतिलट् यस्येतिशेषषष्ठी १०२ स्वस्यदक्षिणकरं पुरतः प्रसार्य इत्थंउक्तप्रकारेण अर्दतः याचमानस्य तस्यवृद्धब्राम्हणस्यवचनपार्ष्णेःवचन पृष्ठभागस्य अनुधावी पश्चाद्गमनकर्ता वेगोयस्याःसात

क्षुत्प्रपीडयतिमामथिवीरोकुक्षिमेत्यचकितेवपुत्राभ्याम् याच्यतेनेनदशनंबहुभोक्तुंयस्यतृप्यतिपुरातिथि
रेषः १०२ ॥ इत्थं स्वदक्षिणकरं पुरतःप्रसार्यतस्यार्दतोवचनपार्ष्ण्यनुधाविवेगा ताभ्यांतथेतिफणि-
तिस्तुसमालल्बेसत्स्वर्थनाफलमदोहृदमेवसूते १०२॥

थेति तथाभवेदिति फणितिःउक्तिः ताभ्यांकृष्णार्जुनाभ्यां समालल्बे स्वीकृता कोयंकिंयाचते इत्यादिविचारमकृत्वा याचनानंतरमेवतथेत्युक्तमिति भावः इममर्थमर्थांतरन्यासेनद्रढयति सत्स्विति सत्सु उत्तमजनेषु अर्थना याञ्चा अदोहृदमेवदोहृदरहितमेवफलंसूतेददातीत्यर्थः उत्तमजनेषु प्रार्थनाफलदानेपूर्वस्नेहदानादिनापेक्षतेइतिभावः १०२॥ ॥७॥ ॥७॥ ॥७॥

वं·भा· गद्यं॥ अथदानप्रतिज्ञानंतरं मुदाहर्षेण कथितः आत्मनः यथातथाभावः अहमग्निर्गिरिनियाथातथ्यंयेनसः भगवान्बृहद्भानुः अग्निः दंतपटी ओष्ठः सए- टी·स्त·
२२ वजवनिकातिरस्कारिणीतस्याः अंतः अभ्यंतरे नटीभवत्स्मितंययोः यथाजवनिकांतः नटः तथा ओष्ठांतर्हास्यंवर्ततेइत्यर्थः देवकीपृथासुतयोःधुरि ३
अग्रभागेगिरेः दरीषुगुहासुवसंतौ धुरीणाःनिपुणाःयेविभावरीचराः राक्षसाः सरीसृपाः सर्पाःदिविषदरीशाः दैत्येंद्राश्चतैः मेदुरीकृतं बहुलीकृतंदुरी
हितंताडवंदुश्चेष्टितंनाट्यंयस्मिन्तस्यखांडवस्यएतत्संज्ञकवनस्यजगतः कंठेगडुलं महागुल्मिकारूपरोगविशेषत्वंसरोगः गलग्रहेणयथानाशकरःत

॥गद्यं॥ अथमुदाकथितात्मयथातथाभावोभगवान्बृहद्भानुर्दंतपटीजवनिकांतर्नटीभवत्स्मितयोर्देवकीपृथासुतयोर्धुरिगि
रिदरीवसतिधुरीणविभावरीचरसरीसृपदिविषदरीशमेदुरीकृतदुरीहितताडवस्यखांडवस्यजगत्कंठेगडुलंचतत्परिरक्षणदं
क्षस्यक्रमुष्णस्तक्षकेपक्षपातंचनिवेद्ययुवयोःकटाक्षबलेनक्षणाद्दिधक्षामीतिस्वयमपेक्ष्यविशेषमाचचक्षे १५० भ्रूसंज्ञयायदु
पतेःपुरुहूतसूनुःसंतुष्यताथजगृहेसतनूनपातः तूणौचगा इवसखेवोतुरगांश्चशुभ्राकांतंरथंचनटताकपिकेतनेन १०२ यदंखांडवंजगन्नाशक

मित्यर्थः तस्यखांडवस्यरक्षणेदक्षस्यचतुरस्यक्रमुष्णः इंद्रस्यतक्षकेतन्नाम्नानागेपक्षपातंचनिवेद्ययुवयोःकटाक्षबलेनकृपावलोकनबलेनक्षणाद्दिधक्षामिदग्धु
मिच्छामिइतिस्वयंअपेक्ष्यविशेषंयाचितमस्यविशेषंआचचक्षेकथितवान् १५ पद्यं॥ अथसःपुरुहूतसूनुः अर्जुनः यदुपतेः कृष्णस्यभ्रूसंज्ञयाभ्रुवाकृतयासंज्ञया २२
संतुष्यतःसतनूनपातः अग्नेःसकाशात्गांडिवसखेवोगांडिवधनुःसहितोतूणौअक्षयशरौइषुधीशुभ्रान्तुरगांश्चनटतानृत्यताकपिकेतनेनकपियुक्तध्वजेनउपल
क्षितंरथंचजगृहे १०२

राः फाल्गुनः उत्तरफल्गुन्यांजातः अर्जुनः मरुन्मनोमार्गणवेनतेयानांवेगविषयेपृथक् जयेन ऐकैकस्यपृथक्जयेन आप्तः प्राप्तः कीर्तिः याभिः अर्पकौरव-
शुभ्रैरित्यर्थः चतुर्भिः अश्वैः समुपास्यमानं युक्तं तंरथं आरुरोह १०४ पुरादशामुखनगरेलंकायां अनुभूतं दहनस्य अग्नेः हठात्करणं बलात्कारं पुनः दि
दृक्षुः खांडवंद्रष्टुमिच्छुः अतः उपागतः प्राप्तः साक्षात् मारुतिरिव हनूमानिव अस्य अर्जुनस्यरथाग्रकेतनांकः ध्वजचिन्हं उद्लसन् उल्लसन् अंकेमारु
तेरुत्प्रेक्षा ध्वजाग्रेकृत्रिमकपिर्विश्वकर्मणा कृतः तत्रैवकार्यवशेनमारुतेरावेशः इतिभारततात्पर्यं १०५ तदागमनसमये तूणोइषुधीनस्य अर्जुनस्य मु

मरुन्मनोमार्गणवेनतेयपृथक्जयाप्तोरिवकीर्तिशुभ्रैः चतुर्भिरश्वैः समुपास्यमानं सफाल्गुनस्तंरथमारुरोह १०४ दशा
मुखनगरे पुरानुभूतं दहनंहठात्करणं पुनर्दिदृक्षुः उपगतइवमारुतिःससाक्षादुद्लसदस्यरथाग्रकेतनांकः १०५ तद्भु
जावनुधावत्यासंग्रामपुत्रयश्रियः जंघाद्वयधियंतूणोजनयामासतुस्तदा १०६ पवनसखदृशोर्मुदंवितन्वन्पटुतरटं
कृतिकंपिताटवीकः कुटिलमतनुतासकृत्कराभ्यां गुणमपिदंडमिवास्यगांडिवस्य १०७

जौ अनुधावत्याः तद्भुजयोः पश्चाद्धावंत्याइत्यर्थः संग्रामेषुजयश्रियः जंघाद्वयस्यधियं बुद्धिंजनयामासतुः १०६ पटुतरामहत्तराटंकृतिः धनुषोज्याशब्दः
तयाकंपिता अटवी अरण्यंयेनसः एषः अर्जुनः पवनसखस्य अग्नेः दृशोः नेत्रयोः मुदं हर्षं वितन्वन्कुर्वन्सन् गांडिवस्य धनुषः दंडमिवगुणमपिमौर्वीम
पिकराभ्यां असकृत् पुनः पुनः कुटिलंवक्रंयथातथा अतनुत चकार दंडस्यसज्जीकरणं गुणस्याकर्षणेन कुटिलत्वं १०७ ॥ ॥६५ ५

अथस:अग्निःगरुडःवर्लामुखःवानरश्चैतोध्वजयोर्ययोस्ताभ्यांकृष्णार्जुनाभ्यांसकाशात् अनुमतिं अनुमोदनं एत्यप्राप्यहर्षान्वनं अशितुं भक्षितुंस
न्ननाहसन्नद्धोबभूव कीदृशंवनं बलरिपुमणिवत् इंद्रनीलमणिवत् श्यामंतथा उत्पवालं उद्गतपल्लवं कइव वडवायाः आस्यंमुखंभवतिसवडवास्यभूः अ
ग्निरिव वडवाग्निरिव सयथाइंद्रनीलमणिवन्नीलं उत्पवालं उद्गतविद्रुमं वनं जलं अशितुंसन्नद्धोभवति तद्वदित्यर्थः १०८ अग्निःबाणपुरस्यबा
णासुरनगरस्य आवृत्तेर्वेष्टनस्य वासनयैव संस्कारजन्यस्वभावेनैव अतिमहत्याशोणारक्तारुक्कांतिर्यस्याः तयाशिखयाज्वालयाचंडतरस्यअ

अथगरुडवर्लामुखध्वजाभ्यामनुमतिमेत्यससन्ननाहहर्षात् बलरिपुमणिनीलमुत्पवालंवनमशितुंवडवास्य
भूरिवाग्निः १०८ शोणरुचाशिखयातिमहत्याबाणपुरावृतिवासनयैव चंडतरस्यवनस्यसमंतात्कुंडलनंकल
यन्ववृधेग्निः १०९ प्रथमंपावकपिङ्गपरिरभ्यगृहीतपल्लवोष्ठपुटे उपकंठवनराजेरुदगादाकुलकपोतनादततिः ११०

तिरोद्धरस्य वनस्यसमंतात्कुंडलं वेष्टनं कलयन्सन् ववृधे अन्योपि अभ्यासजन्यस्वभावानुसारेणकर्मकरोति १०९
पावकएवषिङ्गःविटःतस्मिन्प्रथमंपरिरभ्यसंवेष्ट्य आलिंग्यचगृहीतःपल्लवएवआरक्तत्वात् ओष्ठपुटोयेनतस्मिन्सति वनराजेःवनपंक्तेःउपकंठे
समीपभागेकंठसमीपेच आकुलानांसंभ्रमवतां कपोतानांपारावतानां नादततिःशब्दसमूहःउदगात् आविर्बभूव विटनाप्रियायाःआलिंगनेन २४
ओष्ठपुटग्रहणेचकृतेसतिरमावेशेन कंठात्कपोतशब्दसदृशाशब्दआविर्भवति ११०॥ ॥२॥ ॥२॥ ॥५॥

गद्यं॥ क्रमेणप्रबलीभवतः भगवतःपवमानसरवस्य अग्नेःतमालादिषु केषुचित्द्रुमेषुपत्रोच्चयायमानेः श्यामत्वेन पत्रराशिवदाचरद्भिःधूमैःकिंशुकादिषुपला-
शादिषु केषुचित्वृक्षेषुस्तबकायमानेःआरक्तत्वेन पुष्पगुच्छवदाचरद्भिःज्वालकंदलैःज्वालासमूहेः तिलकादिषुकेषुचित्द्रुमेषुपक्विमबीजायमानेःपीतलघु
गुलिकासदृशात्पक्वफलबीजवदाचरद्भिःस्फुलिंगैःहरिचंदनादिषुकेषुचिद्द्रुमेषु पीतत्वेनसर्वतोवेष्टनेनचकल्कलवदाचरद्भिःआलोकेःप्रकाशैःनीडव
ल्कपस्थावासस्थानवल्ककेषुचिद्द्रुमेषुपरस्परं पक्षिपक्षताडनानारटनायमानेःशब्दवदाचरद्भिःप्रोघद्भिःआविर्भवद्भिःचटच्चटात्कारैश्चवकृत्वासर्वतःपरीत

गद्यं॥ क्रमेणप्रबलीभवतोभगवतःपवमानसखस्यतमालादिषुकेषुचिद्द्रुमेषुपत्रोच्चयायमानेधूमैःकिंशुकादिषुकेषुचि
त्स्तबकायमानेज्वालाकंदलैस्तिलकादिषुकेषुचित्पक्विमफलबीजायमानैःस्फुलिंगैर्हरिचंदनादिषुकेषुचिद्वल्कलाय
मानैरालोकैः नीडवल्ककेषुचित्परस्परपक्षिपक्षताडनरटनायमानैःप्रोद्यच्चटच्चटात्कारैश्चसर्वतःपरीतमपितद्वनंयथापुर
मवतस्थे १७ पद्यं॥ हुताशनपरित्रासादुच्चलंत्यावनश्रियः कबरीवश्लथावेगात्कापिधूम्यास्वमानशे॥ १११ वलयंधूमरेखाया
वर्त्मनिद्युसदांबभौ भाविनःशरकूटस्यपरिणामानसूत्रवत् ११२

मपि अग्निनाव्याप्तमपि तद्वनं यथापुरं यथापूर्वं अवतस्थे वर्ततेस्म १७ पद्यं॥ हुताशनपरि
त्रासात् अग्निभयात् वेगात् उच्चलंत्याः ऊर्ध्वंगच्छंत्याः वनश्रियः वनलक्ष्म्याः श्लथाशिथिला कबरी धकेशसन्निवेश इव कापि धूम्या धूमसमूहः खंआकाशं आनशे व्याप्नो
तिस्म १११ धूमरेखायाः वलयंमंडलंद्युसदांदेवानांवर्त्मनि आकाशेबभौ किमिव परितःआसमंतात् भाविनः इंद्रेणसहसमरे भविष्यतः शरकूटस्य बाणसमूहस्यमान

नं·भा· सूप्रवत्परिमाणसूत्रमिव यथाकश्चित्परिमाणार्थंमांदोसूत्रन्यासंकरोतितद्वत् ११२सः अग्निः हेजन त्वं भुवि मरुतां देवानां मध्ये मल्लं श्रेष्ठं इंद्रमपितृणाय धस्त·
१२५ मन्यमानं तृणमिवतुच्छं मन्वानं अस्यगांडीव भृतः अर्जुनस्यैव बाहोर्बलं पठपठ इतिवदन्निव झटिति शीघ्रं स्फोटारवं वेणवादेर्विदारणशब्दंस्फुटयांबभू २
व प्रकटीचकार पठपठ इतिविदारणशब्दे इयमुत्प्रेक्षा ११२ स्वपार्श्वयोर्युग्मेज्वलंतः अग्निकंदलाः अग्निसमूहाः येषांते वनांतभाजः वनमध्यवर्तिनः म
हत्तराः अजगराः निशातंतीक्ष्णंयत् वज्रं तस्यक्षतिभ्यो महाव्रणेभ्यः निःसृतं बहिर्निर्गतं असृक् येषांते महीभृतानां पर्वतानां दशां अवस्थां अपलात्

अस्यैवगांडिवभृतोभुविहेजनत्वंमल्लंतृणायमरुतामपिमन्यमानं बाहोर्बलंपठ पठेतिवदन्निवाग्निः स्फोटारवंसझ्झ
टितिस्फुटयांबभूव ११२ स्वपार्श्वयुग्मज्वलदग्निकंदलावनांतभाजोऽजगरामहत्तराः निशातवज्रक्षतिनिःसृतासृ
जांदशामपलाज्जगृहुर्महीभृतां ११४ गद्यं ॥ तत्रनिकुरंबाणिस्तंबेरमाणामामूलमनलार्चिरवलंबितदंतमुसलानिप्रे
मपरवशतयावशास्फाविनारितुंस्वसृक्कभागविन्यस्तजग्धार्धसल्लकीपल्लवकवलानीवक्षणमलक्ष्यंत १८ पलांवनाजगृहुःस्वीचक्रुः

११४गद्यं ॥ तत्रवने आमूलंमूलपर्यंतं अनलार्चिभिः अग्निज्वालाभिः अवलंबितानि धृतानि दंतमुसलानि येषांतानि स्तंबेरमाणां गजानांनिकुरंबाणिवृंदानि प्रेम
परवशतयास्नेहाधीनतयावशास्करिणीषु वितरितुं दातुंस्वेषांसृक्कभागेषुविन्यस्ताः स्थापिताः अर्धजग्धाः भक्षिताः जग्धार्धाः राजदंतादित्वात्परनिपातः सल्ल- २५
कीपल्लवानांकवलाः ग्रासाः येषांतानीवक्षणंक्षणमात्रं अलक्ष्यंत अदृश्यंत जनैरितिशेषः सल्लकीपल्लवानामतिरक्तत्वात्पल्लवानांसृक्कभागस्थापनस्यकार्यस्वभावा-
त्चेयमुत्प्रेक्षा १८

सविधे समीपभागे ज्वलनस्य अग्नेः ऊष्मणां वीचिभिः सपदि तत्काले म्लानानां कपित्थशाखिनां परितः पाकेन पचनेन सिताः शुभ्राः फलानां व्रजाः समू-
हाः स्फोटकबुद्बुदा इव जलबुद्बुदाकारस्फोटका इव प्रबभुः कपित्थवृक्षाणां फलानि अग्निसंपर्कजतद्वृक्षस्फोटका इव बभूवुरित्यर्थः ११५ निशि तमसि के
वलं दीप्रा दीप्तियुक्ता तनुर्यस्यास्तां निजजातिं स्वज्ञातिं निखिलं सकलं ओषधितरुं विजेतुमिव इतरे तेभ्योऽन्ये ते तमालपलाशादयः तरवः दिवसेपि अतीव
तरां जज्वलुः दीप्ततनवो बभूवुः यथा कश्चित् रात्रौ तमसि दीपिकया गच्छंतं स्वज्ञातिं जेतुं अहोरात्रं दीपिकया गच्छति तद्वत् ११६ तत्र वने गांडिवभृता

पद्यं ॥ सविधज्वलनोष्मवीचिभिः सपदि म्लानकपित्थशाखिनां परिपाकसिताः फलव्रजाः प्रबभुः स्फोटकबुद्बुदा इ
व ११५ निशि केवलं तमसि दीप्रतनुं निजजातिमोषधितरुं निखिलं इतरे विजेतुमिव ते तरवो दिवसेपि जज्वलुरतीवतरां ११६
दृप्तदानवनिशाचरवर्गस्तत्र गांडिवभृता निहतोपि तन्निषंगयुगबाणगणानां संख्यया प्रतिभटत्वमकार्षीत् ११७

अर्जुनेन निहतोपि मारितोपि दृप्तानां दानवनिशाचराणां वर्गः समूहः तस्य अर्जुनस्य निषंगयोः तूणीरयोः युगस्य बाणगणानां संख्यया प्रतिभटत्वं प्रति-
स्पर्धिभटत्वं अकार्षीत् कृतवान् यथा मल्लानां प्रतिमल्लाः बलेन प्रयांति तथैव मृतदैत्यराक्षसाः अर्जुनबाणगणानां संख्यया प्रतिभटत्वं चक्रुः प्रभुबलेन अ
संख्यबाणैरसंख्या हताः इत्यसंख्यत्वेन कोटिबाणैः कोटिर्हता इति संख्यया प्रतिभटत्वं स्वीकृतमित्यर्थः ११७ ॥ ॥८॥ ॥८७॥

कृशानुः अग्निः अतिहृष्टः सन् ज्वालतापभरेण ज्वालोष्मातिशयेन कुंडलितानि अंगानि यासां ताः क्ष्वेडसार एव घृतं तस्य सेचनेन मृद्धीः सर्पपुंगवानां सर्पश्रेष्ठानां ततीः पंक्तीः शाष्कुलीरिव भाषायां कोडबळी इति जिलेबी इति च प्रसिद्धपदार्थानिव चचर्व भक्षयामास ११८ यावदग्निः वनदाहप्रवृत्तः तावत् शक्रः इंद्रः त क्षकस्य नागस्य रक्षणाय सहसा अकस्मात् द्विपं ऐरावतं अधिरुह्य तदीये ऐरावतीये मूर्ध्नि पर्जन्यस्य मरुतां देवानां वाहिनीं सेनां सन्नाहयन् सन्नद्धां कुर्व

ज्वालतापभरकुंडलितांगीः क्ष्वेडसारघृतसेचनमृद्धीः सर्पपुंगवततीरतिहृष्टः शाष्कुलीरिव चचर्व कृशानुः १८ तावत्तक्षकरक्षणा यसहसा शक्रोधिरुह्य द्विपं पर्जन्यस्य तदीयमूर्ध्नि मरुतां सन्नाहयन् वाहिनीं ब्रम्हांडप्रतिरोधनेन विमुखैर्धूमैरिवारण्यजैरातस्तार न भस्तलं जलधरैरावद्धघोराखैः ११९ गद्यं ॥ ततस्तैरनेकैर्नाकौकसामनीकैर्मत्सरेण तदुपरि निपात्यमानदिग्भित्तिशिखराणामिव वे गादापततां वारिधौ वाडवहव्यवाडपि कवलितोयमस्माभिरितीव विद्युतः प्रकाश्य गर्जितेन तर्जयतामिव पर्जन्यानामासारसर्वा भिसारेण निर्वापितवने मनाक् श्यामायमाने सति शोणायमानलोचनेन कपिकेतनेन तन्प्रतिचिकीर्षया शरकदंबैरंबरे निरव लंबमाकलितां शरशालां छत्रीकृत्य पुनरपि समुन्नीयमाननिजकेतुरुषर्बुधो भगवानुद्दिदीपे १९ न् जलधरैः मेघैः नभस्तलं आतस्तार आच्छादयामास कथंभूतैः जलधरैः आबद्धः आरब्धः घोरारवो यैस्तैः तथा ब्रम्हांडप्रतिरोधेन ब्रम्हांडोर्ध्वकटाहप्रतिबंधेन विमुखैः पश्चान्निवृत्य आगतैः अरण्यजैः धू मैरिवेत्युत्प्रेक्षा ११९ गद्यं ॥ ततः तैः अनेकैः बहुभिः नाकौकसां देवानां अनीकैः सैन्यैः मत्सरेण तदुपरि अर्जुनोपरि निपात्यमानानां दिश एव भित्तयः तासां शिखरा-

णामिववेगात् आपततां अधःआगच्छतां वारिधौसमुद्रेजलग्रहणसमये अपंवाडवहव्यवाडपिवडवाग्निरपिअस्माभिःकवलितःधृतःइतरेषांकाकथाइतिसूचयि
तुमिवविद्युतःप्रकाशयदर्शयित्वागर्जितेनतर्जयतांधिक्कुर्वतामिव पर्जन्यानांमेघानां आसाराणां धारासंपातानांसर्वाभिसारेणसहैवसर्वागमनेननिर्वापितेव नेमना
कु ईषत् श्यामायमाने कृष्णीभवतिसति शोणायमाने शोणीभवंतीलोचनेयस्यतेनकपिकेतनेन अर्जुनेन तत्परिचिकीर्षया तस्यप्रतिक्रियाकरणेच्छया शर
कदंबैः बाणसमूहैःकृत्वा अंबरे आकाशेनिरवलंबं यथातथा आकलितां कृतां शरशालांबाणगृहं छत्रीकृत्य पुनरपिसमुन्नीयमानःसमुच्छ्रीयमाणःनिज
केतुःधूमोयेनसःभगवान् उषर्बुधः अग्निःउद्दिदीपे प्रजज्वाल १९ तत्रांतरे पुनरुद्दीपनसमयेश्वेतवाहनःअर्जुनःप्रोषितःदेशांतरं प्रतिगतःवल्लभःपतिःतस्य

गद्यं ॥तत्रांतरेप्रोषितवल्लभतयाप्रेम्णाकुमारमश्वसेनंनिगीर्यदहनार्चिरुष्णासहिष्णुतयापुनरपिनिवर्त्यदिवंप्रयातीभिर्घनधारा
भिरिवपन्नगकन्यकाभिःसहवनादुत्पतंतीतक्षककुटुंबिनीमविलंबितमेवश्वेतवाहनःशातमुखनरसनायामिवग्रीवायामपिद्विधावि
दलितांचक्रे २०

कोपस्याःतस्याःप्रावस्तत्तातयाप्रेम्णाकुमारं अश्वसेनंनिगीर्य मुखमध्येकृत्वा पन्नगकन्याभिःसहवनादुत्पतंतीं तक्षककुटुंबिनींभा
र्यां अवलंबितमेवशीघ्रमेवशातमुखतीक्ष्णाग्रेणशिलीमुखेन बाणेनरसनायामिवजिह्वायामिव ग्रीवायामपिद्विधाविदलिताभिन्नांचक्रे यथासर्पजातीय त
या ब्रह्मणाजिह्वाद्विधाविदलिता तथापार्थेनग्रीवापिद्विधाविदलितेत्यर्थःसापार्थेनहतेतिभावःकथंभूताभिःपन्नगकन्याभिःदहनस्य अग्नेःअर्चिषांज्वा-
लानां उष्णास्य असहिष्णुतया पुनरपिनिवृत्त्यदिवं आकाशंप्रयांतीभिःघनानांधाराभिरिवेत्युत्प्रेक्षा २०॥ . ॥९७॥ ॥. ॥५॥

पद्यं॥ नभसिशरकूटे बाणसमूहात्मके मंडपे कृतेसति तस्मिन् खांडव वन्हौ आसुगेन वायुना विनुन्नं प्रेरितं अंबुमुचां मेघानां कबंधं उदकं नपपात परंकेव- टी.का.
खं.भा. पद्यं॥ नभसिशरकूटे बाणसमूहात्मके मंडपे कृतेसति तस्मिन् खांडव वन्हौ आसुगेन ... ल आसुगविनुन्नं बाणाच्छिन्नं तक्षकपत्न्याः कबंधं मस्तकरहितं शरीरं पपात १२० गद्यं॥ अथसः कौशिकोपि इंद्रोपि नकुलोपिच चकितादपि चकितं अति २

२७ लं आसुगविनुन्नं बाणाच्छिन्नं तक्षकपत्न्याः कबंधं मस्तकरहितं शरीरं पपात ...

भीतमित्यर्थः वियति आकाशे विहितंकृतं उपसरणं आगमनं येनतं नवेन जननीशोकेन दयनीयं दयापात्रं हतबालं छिन्नपुच्छं तं अहिबालं सर्पार्भकं परि-
गृह्यलालनया परितोषं अनेषीत् नीतवान् इंद्रोपि अहिबालं शत्रुपुत्राकार पुत्रसंतोषं अनेषीदित्यप्यर्थं द्योतयितुमपिशब्दः सर्पहत्राखरे प्याहिरिति यादवः कौ

पद्यं॥ नभसिकृतेशरकूटेनपपाताशुगविनुन्नमंबुमुचां तस्मिन्खांडववन्हौ तक्षकपत्न्याः कबंधमेवपरं १२० गद्य॥ अथसकु
पितःस्वयंकौशिकोपिचकितचकितोवियतिविहितोपसरणंनवजननीशोकदयनीयंहतबालंतमहिबालंपरिगृह्यलालनयाप
गितोषमनेषीत् २१ पद्य॥ कृतंतमभ्येत्यसुरैरशेषैः क्रुध्यन्नयायुध्यतघोरमिंद्रः चक्रेसदावस्यचतक्षकस्ययदग्निमत्तांयदन
ग्निमत्तां १२१

शिको नकुले व्यालग्राहे गुग्गुलशक्रयोरितिविश्वः २० ॥पद्यं॥ अथइंद्रः क्रुध्यन्सन् अशेषैः सुरैः सहतं सुतंपुत्रं अर्जुनं अभ्येत्यघोरं यथातथा अयुध्य
त पुत्रेणसहयुद्धेकारणमाह चक्रेइति यत् यस्मात्कारणात् सः अर्जुनः दावस्य वनस्य अग्निमत्तां अग्नियुक्ततांचक्रे यद्यतश्च तक्षकस्य अनग्निमत्तां- २७
भार्याहननात् गृहाग्निराहित्यंचक्रे १२१॥ ॥ श्रीकृष्णायनमः॥ ॥८२॥ ॥८७॥ ॥८३॥ ॥८१॥

तदा युद्धसमये तस्य वनस्य उपरि ऊर्ध्वभागे केवलं सहस्रनेत्रस्य इंद्रस्य सव्यसाचिनः अर्जुनस्य च निषंगा एव नीडानि आवासस्थानानि तेभ्यः उत्पतितानि ब
हिर्गतानि पत्रिणां बाणानां पक्षिणां च कुलानि वृंदानि कोलाहलकेलिं कलकलशब्दक्रीडां आदधुः चक्रुः ननु वृक्षनीडोत्पतितपत्रिणां कुलानि तेषां नाशादिति
भावः १२२ विपाठानपि स्थूलानपि अध्ययनरहितानपि च शरान् आशु शीघ्रं श्रुतेः कर्णस्य वेदस्य च पारदृश्वनः पारं दृष्टवतः विधाय कृत्वा ततस्ततः तस्मिन् त
तस्मिन्देशे विमुंचतः कुरूद्वहात् अर्जुनात् सकाशात् साध्वसं भयमेव रोगः तद्वतः हरेः इंद्रस्य दूरतरं यत् अपसर्पणं पलायनमेव भिषक् वैद्यः रोगहर्तृ अभवत्

वनस्य तस्योपरि केवलं तदा सहस्रनेत्रस्य च सव्यसाचिनः निषंगनीडोत्पतितानि पत्रिणां कुलानि कोलाहलकेलिमादधुः १२२
शरान्विपाठानपि पारदृश्वनः श्रुतेर्विधायाशु विमुंचतस्ततः कुरूद्वहात्साध्वसरोगिणो हरेरभूद्भिषग्दूरतरापसर्पणं १२३ जयंत
मेकं युधि सोढुमक्षमं जयंतमन्यं स्रुतमीक्षितुं गते पुरीं बलद्वेषिणि घोषकैतवाज्जहास शंखद्वितयं च कृष्णयोः १२४ ततः कृशानोर्वि
परीतवर्णस्वनामवाच्यादिव भीतभीतं मयं वने दैत्यमयं ररक्ष स चक्रपाणेरवशाक्रसूनुः १२५ इंद्रोर्जुनभयेन पलायनं चक्रे इत्यर्थः १२३ युधि
जयंतं पराभवंतं एकं स्रुतं अर्जुनं सोढुं अक्षमे असमर्थे बलद्वेषिणि इंद्रे अन्यं जयंतं एतन्नामकं सुतं ईक्षितुं पुरीं अमरावतीं गते सति कृष्णयोः कृष्णार्जुनयोः शंखद्वि
तयं पांचजन्यदेवदत्तनामकं शंखद्वयं घोषकैतवात् शब्दकपटात् महासहास्यं चकार युद्धादिंद्रेण पलायने कृते सति जयलाभात् हर्षेण कृष्णार्जुनौ शंखौ प्रदध्मतु
रिति भावः १२४ ततः सोयं शक्रसूनुः अर्जुनः वने विपरीतो वर्णो अक्षरे यस्य तच्च सत्त्वनाम मय इति नाम तद्विपरीनाक्षरं कृतं चेत् यम इति भवति तस्य वाच्यात्-

अभिधेयान् साक्षात्कृतानांतादिव कृशानोः अग्नेः सकाशात् भीतादपिभीतं अतिभीतंमयंदैत्यंररक्ष रक्षितवान् कस्मादिव चक्रपाणेरिव यथाहंतुमुद्यता न्मयोरक्षितः तथाग्नेरपिरक्षितइतिभावः १२५ कुरुपूर्वं कुरुशब्दपूर्वं क्षेत्रं अधिपतिमपि कुरुक्षेत्रं कुर्वधिपतिं कुरूणामधिपतिं अर्जुनंचसपदिदैवबलेन संश्रितो आश्रितो तक्षको तक्षकसंज्ञकनागः दैत्यानांतक्षकः तक्षामयासुरश्चतो सकलखांडवचर्वितुः भक्षयितुः अग्नेः विघसत्वंभोजनशेषत्वंअभज तांस्वीचक्रतुः खांडववनदाहाद्दतो द्वावेवावशिष्टावितिभावः १२६ अथविजयित्रो विजयशीलो कृष्णो कृष्णार्जुनोस्मित्वा ईषद्धास्यंकृत्वातुंदं उ

क्षेत्रमप्यधिपतिंकुरुपूर्वसंश्रितोसपदिदैवबलेन चर्वितुःसकलखांडवमग्नेस्तक्षकावभजतांविघसत्वं १२६ अथस्मि
त्वातुंदंपरिमृशतिमंदायितगतोसमापृच्छ्यप्रीत्यात्रिदिवमुपयातेहुतवहे रथाभ्यांमौनिभ्यांघनसलिलसेकेनमहताविजे
त्रोतोकृष्णोविविशतुरुपांतंनरपतेः १२७॥ ॥इत्यनंतभट्टकृतेश्रीमतिचंपूभारतेतृतीयःस्तवकःसंपूर्णोभवत्॥ ७॥ ॥

दरं परिमृशति अतिपूर्णत्वात् हस्तेनपरितः स्पृशति तथातिभक्षणेन शरीरजाड्यात् मंदायितागतिर्यस्यतस्मिन् हुतवहे अग्नौ प्रीत्या समापृच्छ्य युष्मत् कृप याकार्यं जातंस्वस्थानं गच्छामीतिपृष्ट्वा त्रिदिवंस्वर्गंउपयातेगतेसति महताघनः निबिडः घनानांमेघानांवायः सलिलसेकः तेनकृत्वामौनिभ्यांगंतव्यभूत लस्यसपंकत्वात् निःशब्दाभ्यांरथाभ्यांनरपतेःधर्मराजस्यउपांतं समीपदेशंविविशतुः जग्मतुः १२७॥ ॥ इतिश्रीकविधुरीणानंतभट्टकृतश्रीम- चंपूभारतटीकायांश्रीखंडोपाद्ध्वबाजीरायात्मजनारायणकृतायांतृतीयःस्तवकःसमाप्तिमगमत्॥ ७॥ ॥७॥ ॥७॥ ॥

अथभारतचंपौचतुर्थस्तबकप्रारंभः ॥

श्रीगणेशायनमः॥ ॥पद्यं॥ यदुवंशकेतौ श्रीकृष्णे निजपुरींद्वारकांयातेसति ततः मयोदैत्यः राज्ञोयुधिष्ठिरराजार्थं मणिसभांरत्नमयींसभां रचयांबभूव निर्ममे यस्याःसभायाःरुचंशोभांकांतिंवासमवलोक्य स्कधर्मादिवसभाशुचाशोकेन अधुनापिगतागतेगमनागमने जुषते से वतेसोगतागतजुट्तंजीवं प्राणं बृहस्पतिंचवहते अन्यस्या अपिपरोत्कर्षासहनजन्यशोकेनप्राणानां गमनागमनंभवति॥ १॥ विपंच्याः

॥पद्यं॥ यातेततोनिजपुरींयदुवंशकेतौराज्ञेमयोमणिसभांरचयांबभूव यस्यारुचंसमवलोक्यशुचाधुनापि जीवंगतागतजुषंवहतेस्कधर्मा १ तामधिष्ठास्नुमागत्यतंमखंकर्तुमन्वशात् विपंचीरवसारज्ञोनृपंचीरवसांवरः २

वीणायाःरवस्य शब्दस्य सारंजनातिसः चीराणि वल्कलानिवसते परिदधते तेचीरवसः मुनयः तेषांमध्येवरः श्रेष्ठः नारदः तां सभां अधिष्ठास्नुं अ धिष्ठातारंतंनृपं धर्मराजं आगत्य मखं राजसूययज्ञं कर्तुं अन्वशात् आज्ञापयामास॥ २॥ ॥श्रीकृष्णायनमः॥ ॥९७॥ ॥ १

॥गद्यं॥ ततः नारदानुशासनानंतरं धर्मराजेन दूतैः कृत्वा आहूतः पुरुहूतानुजः श्रीकृष्णः निरंतरायमेव नि र्विघ्नमेव महांतं सप्ततंतुं राजसूययज्ञं आहर्तुं कर्तुं मनो यस्य तस्य कौंतेयस्य धर्मराजस्य उपांते समीपे रहसि मुहूर्तं संमंत्र्य उत्साहप्रभवाभ्यां उत्साहशक्ति प्रभुशक्तिभ्यां मूर्तो मूर्तिमा न् मंत्र इव मंत्रशक्तिरिव तेन युधिष्ठिरेण महिताभ्यां प्रेरिताभ्यां गंधवहस्कंधाधोधिपाभ्यां वाय्विंद्रयोः नंदनाभ्यां भीमार्जुनाभ्यां अनुसंधीयमानं पश्चात्क्रमनेनानुलक्ष्यमाणं गमनं यस्य तथाभूतः सन् मगधान् देशान् अवगाह्य प्रविश्य द्वयोः बृहद्रथपत्न्योः द्विमात्रोः अपत्यं पुमान् द्वैमातुरः तंपु

॥गद्यं॥ ततो दूताहूतः पुरुहूतानुजो निरंतरायमेव महांतं सप्ततंतुमाहर्तुमनसः कौंतेयस्योपांते रहसि मुहूर्तं संमंत्र्योत्साह प्रभवाभ्यां मूर्तो मंत्र इव तन्महिताभ्यां गंधवहस्कंधाधोधिपनंदनाभ्यामनुसंधीयमानगमनो नदीतटाकैर्द्विमातृकतया स्वपालयितारमनुकुर्वतोपि विविधान्यदुर्लभवसुधान्यसमेधितवसुधान्मागधानवगाह्य विशृंखलहर्षितगिरिव्रजम विशृंखलाखेदितमहीभृत्कुलं जराघटितदेहमपि देदीप्यमानबलसंपदमाशाजेतारमपि परार्थोपहारजागरितारं माग धमपि विगीतव्यापारं द्वैमातुरं महारथं पृथ्वीनाथमेत्य प्रधनं ननाथ॥१॥ अमदं ऋषिदत्तं फलं राज्ञा द्विधाकृत्वा द्वयोः पत्न्योः दत्तं तेन ताभ्यां द्वे शकले जाते ते अचेतनत्वात् बहिः क्षिप्ते जराराक्षस्या संधिते इति भागवतीयेतिहासः महारथं महावीरं पृथिवीनाथं राजानं जरासंधं एत्य प्रध नं युद्धं ननाथ ययाचे कथंभूतान् मागधान् नद्यश्च तटाकाः सरांसि च तैः स्वपयोभिः पोषितत्वात् या द्विमातृकता यद्वा तैरेव नदीमातृकाः वृष्ट्या देवमा

नृकाश्चतेनद्दिमानृकतांतयास्वपालयितारं राजानंजरासंधं अनुकुर्वतइव तयाविविधानि अन्येषांदुर्लभानि यानिवसुधान्यानिद्रव्यधान्या नितैः समेधितासम्यक् वृद्धिंप्रापितावसुधायेषांतान् कथंभूत पृथिवीनाथंविशृंखलः शृंखलारहितः अतएवहर्षितः गिरिव्रजः गिरिसमुदायोयेन तमपि शृंखलाभिः खेदितंमहीभृत्कुलंपर्वतसमूहोयेनतमितिविरोधः विशृंखलंनिष्प्रतिबंधं यथातथाहर्षितंगिरिव्रजनगरं येनतंशृंखला- खेदितराजसमूहमितिपरिहारः तथाजरयावार्धक्येनघटितायुक्तात्तनुर्यस्यतमपिदेदीप्यमानादेह बलसंपत्यस्यतमितिविरोधः जरानाम्न्या

॥ग॰तत्क्षणमतितिक्ष्णतयात्वमष्टादशकृत्वोदृष्टापजयोस्यपंपुनरितरः किशोरइतिकृष्णावुभावप्यवधीर्यहिडिंबकु टुंबशोकोद्यादारभ्यप्रवीरजनकर्णिकामौक्तिकायमानभुजकीर्तेरात्मनः संमुखीनं दृढतरपरिकर बंधंजरासंधंसमी रकुमारः पंचदशदिनानिनियुध्येषांतृतीयभागसंख्यानपदाभिधेयेनसह घटयांबभूव ॥२॥ राक्षस्याघटितात्कृतसंधानात्तनु

र्यस्येतिपरिहारः तथाआशायाःजेतारमपिपरार्थापहारेपरद्रव्यापहारेजागरितारं सावधानमितिविरोधः आशाजेतारंदिग्जेतारमितिपरिहारः न थामागधमपिविगीतः गीतेनरहितःव्यापारोयस्यतमितिविरोधः मागधंमगधदेशानांराजानंविगीतः निंद्यः परोपद्रवबहुलःव्यापारोयस्यत मितिपरिहारः॥१॥ तत्क्षणंयुद्ध्वाश्वासमयएव अतितिक्ष्णतयारूपांतरेणयुद्ध्वात्वा सहनेनत्वं अष्टादशकृत्वः अष्टादशवारान्दृष्टःअप 2
जयोयस्यतथाभूतोसि अयमितरः पुनः अयमन्यस्तुकिशोरः अल्पवयाबालोस्ति इतिस्वसाम्याभावप्रदर्शकवचनेनउभावपिकृष्णौकृष्णार्जुनौ

अवधीर्य तिरस्कृत्य हिडिंबकुटुंबस्य शोकोदयादारभ्य हिडिंबराक्षसहननात् आरभ्य प्रवीरजनानां कर्णिकामौक्तिकाय मानाकर्ण भूषणमौक्तिकवदाचरंती भुजकीर्तिर्यस्य तस्य आत्मनः स्वस्य संमुखीनं अभिमुखीभूय तिष्ठंतं दृढतरः परिकरबंधः वस्त्रेण कटिबंधादिर्यस्य तं जरासंधं समीरकुमारः भीमः पंचदशादिनानि नियुध्य बाहुयुद्धं कृत्वा एषां पंचदशादिनानां यः तृतीयभागः पंच तेषां संख्यानपदं पंचत्वं संख्येये ह्यादशात्रिषित्यमरान् पंचशब्दस्य संख्येयवाचकत्वं पंचत्वस्य संख्यावाचकत्वं तस्य अभिधेयेन अर्थेन मरणेन सह घटयांबभूव युयोज जघानेत्यर्थः॥ २॥ पद्यं॥ तस्मिन्जरासंधे-

पद्यं॥ हतेतस्मिंस्त्रयोदीप्ताहरिप्रस्थमुपाययुः आगामिनिमखे हव्यमादित्सवइवाग्नयः ३ कृष्णेगतेयदुपुरींक्षितिपानुजानांजित्वादिशःप्रतिनिवृत्तवतांचतुर्णां कोशेममुःपरमसिप्रवरागृहीतादोष्णोर्बलेनमहतानतुहेमपुंजाः ४

हतेसति दीप्ताः दीप्तिमंतः त्रयः कृष्णार्जुनभीमाः आगामिनि भविष्यति मखे राजसूये हव्यं होमद्रव्यं आदित्सवः अग्नयः आहवनीयदक्षिणाग्नि गार्हपत्यनामानो वन्हय इव हरिप्रस्थं इंद्रप्रस्थं उपाययुः आजग्मुः अग्नयोपिदीप्ताः त्रयश्च॥ ३॥ कृष्णइति कृष्णे यदुपुरीं द्वारकां प्रतिनिगते सति दिशः चतुर्दिशः जित्वा प्रतिनिवृत्तवतां प्रतिनिवृत्य आगतानां चतुर्णां क्षितिपस्य धर्मराजस्य अनुजानां भीमादीनां कनिष्ठबंधूनां महता दोष्णोः बाह्वोर्बलेन गृहीताः असिवराः खड्गश्रेष्ठाः परं केवलं कोशे खड्गपिधाने भांडारगृहे च ममुः हेमपुंजास्तु न ममुः हेमपुंजा अपि बाहुबलेन गृहीताः॥ ४॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

उपायनत्वेनेति सर्वैः भूपैः अखिलेषु वित्तेषु नृपाय धर्मराजाय उपायनत्वेन दत्तेषु सत्सु पार्थस्य धर्मराजस्य पुर्याः इंद्रप्रस्थनगर्याः क्षितिरेव वसुंधरा वाचकस्य वसुंधरा शब्दस्य वाच्यभावं वसुधारणरूपाभिधेयत्वं भेजे दध्रे यावत्पृथिव्यां स्थद्रव्यं उपायनत्वेनेंद्रप्रस्थे आगतमित्यर्थः ५ नरदेवमिति आनकदुंदुभेः वसुदेवस्य कुमारः पुत्रः श्रीकृष्णः प्रतीच्याः दिशः जयेन कुलेन विस्मृतानीव वसूनि द्रव्याणि दधत् आनकानां पटहानां दुंदुभीनां च-निःस्वनैः द्यां दलयन् भिंदन् सन् नरदेवं धर्मराजं अगात् अगमत् ६ ततः हविः साक्षात् प्रत्यक्षं आदातुमिव आगतेन हरिणा कृष्णेन कृताभ्यनुज्ञायज्ञः क्रियतामिति आज्ञा यस्य सः धर्मराजः अथ क्रमविद्भिः यज्ञसंबंधिकर्मक्रमज्ञातृभिः ऋत्विजां समाजैः समूहैः सह क्रतुं राजसूययज्ञं आहर्तुं कर्तुं उपक्रमं प्रारंभं यज्ञपूर्वांगं प्रचक्रे कृतवान् ७ प्राग्वंशमिति दीक्षितः संजातयज्ञदीक्षः सः कुरुवीरः धर्मराजः कुशीरं यज्ञीयं मांगलिकवस्तु शिरसि यस्याः तया पत्न्या द्रौपद्या सह उत्तरे प्राग्वंशे प्राचीनवंशे कुलेतिष्ठन्नपि पुनः प्राग्वंशं आविशत् इति विरोधः प्राग्वंशं यज्ञीयहविर्गेहात् प्राग्गृहमिति परिहारः ॥ ८ ॥

उपायनत्वेन नृपाय सर्वैर्दत्तेषु वित्तेष्वखिलेषु भूपैः पार्थस्य पुर्याः क्षितिरेव भेजे वसुंधरावाचकवाच्यभावं ५ नरदेवमगात्प्रतीच्या जयेन कुलेन वसूनि विस्मृतानि दधदानकदुंदुभिस्वनैर्द्यां दलयन्नानकदुंदुभेः कुमारः ६ हरिणा सततः कृताभ्यनुज्ञो हविरादातुमिवागतेन साक्षात् क्रमविद्भिरथर्त्विजां समाजैः क्रतुमाहर्तुमुपक्रमं प्रचक्रे ७ प्राग्वंशे प्युत्तमे तिष्ठन् प्राग्वंशं पुनराविशत् कुशीरशिरसा पत्न्या कुरुवीरः सदीक्षितः ८

॥ ७ ॥

अनलः अग्निः अत्र यज्ञे रुच्यं माधुर्यादिगुणविशिष्टं हविः आघ्रातुं भक्षितुं इच्छुः सन् आनीलयन् धूमकुलं धूमसमूहः तस्य निर्गमनं तस्माद्बहिर्गमनं तस्य अपदेशात् कपटात् पुरा जग्धान् भक्षितान् गुरून् महतः गुरुत्वगुणविशिष्टांश्च अतः अजीर्णान् कुक्षौ स्थितान् जतुनिकेतनस्य लाक्षागृहस्य भित्तिखंडानिव ववाम वमति स्म नायं धूमसमूहः किंतु अजीर्णलाक्षागृहभित्तिखंडाः किमित्यपन्हुतिगर्भोत्प्रेक्षा अन्येनापि भक्षितं गुर्वन्नमजीर्णं भवति ९ तत्र यज्ञे प्रवर्ग्येण यज्ञीयकर्मविशेषेण जनितं धूमचक्रं धूममंडलं दिवि आकाशे आलक्ष्यते स्म लोकैर्दृश्यते स्म कथंभूतं धूम

आघ्रातुमिच्छुरनलो हविरत्र रुच्यमानीलधूमकुलनिर्गलनापदेशात् । जग्धान्पुरा जतुनिकेतनभित्तिखंडान्कुक्षिस्थितानि
ववाम गुरूनजीर्णान् ९ तत्र प्रवर्ग्यजनितं दिवि धूमचक्रमालक्ष्यते स्म विबुधान्प्रति पावकेन । आनाकदुर्वहहविर्द्रविणे
न वेगादाह्वानपत्रवलयं किल नीयमानं १० मेदस्विनो विपुलखांडवभक्षणेन देहं निजं चलयितुं शिखिनाऽक्षमस्य । उद्गम्य
संज्वलितुमुत्तरवेदिकायामालंबनाय किल यूपवरोंऽतिकेऽभूत् ११

चक्रं आनाकं स्वर्गपर्यंतं दुर्वहं वोढुमशक्यं हविर्द्रविणं यस्य तेन पावकेन अग्निना विबुधान् देवान् प्रति वेगात् नीयमानं आह्वानपत्राणां वलयं किल कोशाः इत्युत्प्रेक्षा अन्योपि बहूनि पत्राणि वस्त्रकोशे संबध्य नयति १० विपुलस्य खांडवस्य भक्षणेन मेदस्विनं मांसलं पुष्टमित्यर्थः निजं देहं चलयितुं अक्षमस्य असमर्थस्य शिखिनः अग्नेः उद्गम्य उत्थाय संज्वलयितुं आलंबनार्थं किल आलंबनार्थमिव उत्तरवेदिकायां अंतिके समीपे यूपवरः यज्ञीयपशुबंधनार्थं निखातकाष्ठदंडश्रेष्ठः अन्योपि मांसलः उत्थातुं असमर्थो दंडमालंबते ॥ ११ ॥ ॥

तदानीं अशेषाः देवाः अत्यद्भुतानां हविषां अत्यद्भुतैः हविर्भिः होमद्रव्यैः घृतादिभिस्तथैवतेनप्रकारेणैव ततृपुः तृप्ताः बभूवुः कलानांनाथःचंद्रः बिसपुष्पबंधोः कमलबंधोः सूर्यस्यबिंबेन मंडलेनसंगं यथायेनप्रकारेण नविदध्यात् अयंभावः देवाः अमृतमयस्य चंद्रस्य कृष्णपक्षेनित्यमेकैकांकलांभक्षयंतिततः सर्वकलाक्षये अमावास्यांचंद्रस्य सूर्यस्यबिंबेनसंगोभवति पुनश्चतुष्टादेवाः शुक्लपक्षेकलावृद्धिंकुर्वंतीतिपौराणिकाः तथाचराजसूययज्ञसंबंधिरुच्यंहविर्भक्षणेनातितृप्तैःदेवैः क्रूदमावात् कलानामभक्षितत्वेनसंपूर्णचंद्रस्यसत्वात्पूर्णिमायाःसंभवेन

बिंबेनसंगंबिसपुष्पबंधोर्नाथःकलानांनयथाविदध्यात् तथैवदेवास्ततृपुस्तदानीमत्यद्भुतानांहविषामशेषाः॥ १२॥ सर्वेषुवर्णेष्वपिदातुरस्मात्संप्राप्तवत्स्वर्थमजातशत्रोः नवर्णएकस्तकदापिलेभेनार्थक्रतूनामिहसार्वभौमे॥ १३॥ ॥ ॥ ॥

अमावास्याकालिकसूर्यबिंबसंगश्चंद्रस्यनबभूवेति १२ इहअस्मिन्क्रतूनांसार्वभौमेश्रेष्ठेराजसूये अस्माद्दातुःअजातशत्रोःधर्मराजात्सर्वेष्वपिवर्णेषुब्राम्हणादिषु अक्षरेषुच अर्थंद्रव्यंअभिधेयंचसंप्राप्तवत्सुसत्सुएकःनवर्णस्तकदापिअर्थंनभेजेनप्राप इदमद्भुतमित्यर्थः अयंभावः येनयेन यद्यन्नृयाचितंनृपेणतस्यतस्यतत्तद्दत्तंकस्यापिकदापिनास्तीतिनोक्तमतोनिषेधार्थकाव्ययनवर्णस्यार्थोनमिलितइति॥ १३॥ ॥ ५॥ ॥ ४

॥ग०॥ तत्र यज्ञोत्सवे नानाजनपदानां ये मेदिनीवल्लभमल्लाः भूपालश्रेष्ठाः तेषां मुकुटमणिकिरणैः पल्लविते संजातपल्लव इत्यर्थः यज्ञवाटे यज्ञमंडपे त्रिपथापृथातनूजाभ्यां भीष्मधर्मराजाभ्यां नियुक्तः आज्ञप्तः सहदेवः विरत्नं पुमांसं पुराणपुरुषं श्रीकृष्णं समासाद्य समीपमागत्य प्रथमं अर्घ्येण अर्घ्यविशिष्टविधिना परिपूजयांचक्रे कथंभूतः सहदेवः वैमात्रेयैः एकस्मिन्नृपितरि सति भिन्नमातृजैः भ्रातृभिः भीमार्जुनधर्मराजैः जतुभवनवनसवनेषु लाक्षागृहखांडवयज्ञेषु पृथक्पृथक् आराधिततया स्वेनापि आतिथ्याय आतिथ्यं कर्तुं निमंत्र्यमाणेन वीतिहोत्रेणेव वह्निनेव ज्वलता देदीप्यमानेन

॥गद्यं॥ तत्र नानाजनपदमेदिनीवल्लभमल्लमुकुटमणिकिरणपल्लविते यज्ञवाटे त्रिपथापृथातनूजाभ्यां नियुक्तो वैमात्रेयैर्भ्रातृभिर्जतुभवनवनसवनेषु पृथक्पृथगाराधिततया स्वेनाप्यातिथ्याय निमंत्र्यमाणेन वीतिहोत्रेणेवेज्वलता हेमपात्रेण परिष्क्रियमाणपाणितलः सहदेवो निखिलभक्तजनकृत्यनिर्वाहभारेण निभृतावयवं सभ्यलोकलोचनपक्ष्मयुग्मपंक्तिपरस्परवैमुख्यवदान्यरूपकोमलिमानं महर्षिजनवलयमध्यमहेंद्रनीलरत्नं विरलं पुमांसं समासाद्य प्रथममर्घ्येण परिपूजयांचक्रे॥ २॥

हेमपात्रेण सुवर्णमयपूजासाहित्यभाजनेन परिष्क्रियमाणं भूष्यमाणं पाणितलं यस्य सः कथंभूतं विरलं पुमांसं निखिलानां भक्तजनानां कृत्यस्य योगक्षेमस्य निर्वाहभारेण संपादनभारेणैव निभृतावयवं नम्रावयवं अन्योपि भारेण नम्रावयवो भवति तथा सभ्यलोकलोचनानां पक्ष्मयुग्मपंक्तयः परस्परवैमुख्यस्य अन्योन्यस्मादपसरणस्य वदान्यः दानशौंडः रूपकोमलिमा आकारसौंदर्यं यस्य तं सभ्याः निर्निमेषविकसितनयनाः संतो यं पश्यंतीत्यर्थः त-

चं·भा यामहर्षिजनानां वलयस्य मंडलस्य कटकस्यच मध्यं मध्यभागस्थं महेंद्रनीलरत्नं इंद्रनीलमणिं ॥ २ ॥ पद्यं ॥ यावत्कृष्णपूजां करोति तावत् तत्र सभा टी·स्त

५ मंडपे वन्हिः वेदीभुवं विहाय त्यक्त्वा मकोपाद्धेतोः तरलः चंचलः अधरो यस्य तस्य प्रतिक्षितीशानानां शत्रुराजानां भयानकस्य भयंकरस्य चेदीशितुः चै ४

द्यस्य चित्तं मनि आविवेशेव चित्ते कोपाग्निः प्रादुरभूदित्यर्थः ॥ १४ ॥ सन् अच्युतः कृष्णः सदसि सभायां शत्रोः चैद्यस्य परुषाक्षराणां मंडलेन समूहे

न यत् यस्मात् विकृतः कोपादिविकारवान् नाभूत् तत् तस्मात् बहुतराणि यानि कुंडलसंबंधिनीलरत्नानि तत्कालस्यात् व्याजात् श्रवोभ्यां कर्णाभ्यां

प॰ तावत्सकोपात्तरलाधरस्य प्रतिक्षितीशान भयानकस्य वेदीभुवं तत्र विहाय वन्हिश्चेदीशितुश्चित्तमिवाविवेश १४ सदसि सन

विकृतो यदच्युतो भूत्स तु परुषाक्षरमंडलेन शत्रोः बहिः प्रसद्गतेत्यनश्रवोभ्यां बहुतर कुंडलनीलरत्नलक्ष्यात् १५ अश्लीलवागि

हसमा भवती न वेति संद्रष्टुकाममिव दानववैरिचक्रं कल्पांततिग्मकरकल्पमनल्पवेगं कंठं बिभेद रणसीमनि दामघोषिं ॥ १६ ॥

बहिः उपेत्य आगत्य अवसत् अंतःस्थितश्चेत् कर्णविलेनांतः प्रविष्टपरुषाक्षरैः विकृतो भवेदेव यतो न विकृतो अतो कुंडलनीलरत्नकपटात् बहिरेव अ

वसदित्यनुमितमित्यर्थः ॥ १५ ॥ रणसीमनि दानववैरिणः कृष्णस्य चक्रं इह कंठे अश्लीलवाक् ग्राम्यवाणी समा भवती वर्तते न वा समा भाष्ट्रे इति संद्रष्टुं

काममिव दामघोषिं दमघोषपुत्रं शिशुपालं कंठं बिभेद द्विधा चकार कथंभूतं चक्रं इत्यपूनः कल्पांततिग्मकरः कल्पांततिग्मकर कल्पं प्रलयकालि ५

कसूर्यसदृशं तथा अनल्पवेगं अतिजव अंतर्नाविशेषणेन यावदस्त्रं गृण्हाति तावत्कंठं बिभेदेति व्यज्यते ॥ १६ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ गद्यं ॥ इति अनेनप्रकारेण दुर्मतेः तस्यशिशुपालस्य आयुषा सह सवनकर्मणि यज्ञकर्मणि समापिते सति निर्मितं कृतं अवभृथाप्लवनं यज्ञान्तस्नानं येन तं पौरवं धर्मराजं अनुज्ञाप्य स्वस्मै गमने आज्ञां दापयित्वा चैद्यस्य निधनोत्सवेन सकृद्दर्शनस्यैव स्वस्य पौरजनानां द्वारकावासिजनानां लोचनस्यापि आत्मभिप्रायेणैकवचनं नवाम्रकणिकाभिः नवरक्तलवैः नवाश्रुलवैश्च आर्द्रतां अनुभावयितुं आर्द्रतायाः अनुभवं ग्राहयितुं मनो यस्य तथाभूत इव स

॥ गद्यं ॥ इति तस्य दुर्मतेरायुषा सह समापिते सवनकर्मणि निर्मितावभृथाप्लवनमुपदात्वेन दत्तपूर्वाणि वित्तान्युत्तमर्णानिव पुनर्द्विगुणमेव ग्राहितान्सर्वानुर्वीपतीन् प्रस्थापितवन्तं पौरवंतमनुज्ञाप्य चैद्यनिधनोत्सवेन सकृद्दर्शनस्यैव स्वपौरलोचनस्यापि नवाम्रकणिकार्द्रतामनुभावयितुमना इव सनातनः पुमान्सुरीं पुरानुभूतकुशस्थलीनाम्नीं प्रतस्थे ॥ ५ ॥ पद्यं ॥ अंधभूपतनयोपि बलौघैर्हास्तिनं पुरमवाप्य विलक्षः सौबलिं गिरमसौ बलवंतं दुर्विचाररचनासकृचचक्षे ॥ १७ ॥ ॥ ॥ ॥ नातनः पुमान् श्रीकृष्णः पुरा अनुभूतं कुशस्थलीतिनामयस्यास्तां पुरीं द्वारकामित्यर्थः प्रतस्थे कथंभूतं पौरवं उपदात्वेन उपायनत्वेन दत्तपूर्वाणि पूर्वदत्तानि वित्तानि वस्त्राश्वकुंजरभूषणादीनि उत्तमर्णानिवृद्ध्यर्थं धनप्रयोक्तॄनिव पुनर्द्विगुणमेव ग्राहितान्सर्वान् उर्वीपतीन् नृपान् प्रस्थापितवंतं ॥ ५ ॥ प० असौ अंधभूपतनयोपि दुर्योधनोपि विलक्षः उद्विग्नः सन् बलौघैः सेनासमूहैः सह हास्तिनं पुरं अवाप्य दुर्विचाररचनासकृपलवंतं बुद्धिबलवंतं सौबलिं सुबलापुत्रं शकुनिं गिरं चचक्षे उवाच ॥ १७ ॥ ॥

टी॰ स॰ ४

न्व॰ भा॰ ६१

गांडवसंपत्तिं दर्शने मम सविस्मितापोजातइत्याह अग्नेरिति हेमातुल शकुने हेमसुवर्णं अग्नेः अपत्यं इतियत् आहुः एतत् मिथ्या न मयाविरोधिमखे
मखे अनुभूतं श्रुतिरपि अग्नेरपत्यं प्रथमंसुवर्णमिति अनुभवं प्रकटयति तदिति यतः अखिलक्षितिपैः उपनीतं आनीतं तत् हेमस्मर्यमाणंसत्
मनुकृतयज्ञे अनुभूतं श्रुतिरपि अग्नेरपत्यं प्रथमंसुवर्णमिति अनुभवं प्रकटयति तदिति यतः अखिलक्षितिपैः उपनीतं आनीतं तत् हेमस्मर्यमाणंसत्
तद्‌द्रव्यं चित्तं नक्तंदिवं अहर्निशंदहति यतः चित्ते आनीतंसच्चित्तं दहति कारणगुणाः कार्ये उपसंक्रामंतीतिन्यायाद्दाहशक्तिम्वापत्ये आगतातस्त
दपत्यत्वं सुवर्णस्ययुक्तमितिभावः ॥१८॥ द्रौपदीसभावलोके सभाचमत्कार दर्शने मणिभुवि रत्नमयभूमौ स्खलितं जलेस्थलभ्रांत्यापतितं मांउच्चैः

अग्नेरपत्यमितिहेमयदाहुरेतन्मिथ्यानमातुलविरोधिमखेनुभूतं तत्स्मर्यमाणमखिलक्षितिपोपनीतंनक्तं
दिवंदहतिचित्तमिदंयतोमे ॥१८॥ वल्गत्कुचंपरिजहाससभावलोके मांद्रौपदीमणिभुविस्खलितंयदुच्चैः ॥
तत्साधुजातमितिवक्तुमिवस्नुषांस्वांमत्प्राणवायुरयमुत्क्रमणेच्छुरास्ते ॥ १९ ततः ॥ अधुनायुधिसेनाभिर्विधूनानो
रसातलं निधायनिधनंतेषुनिगृण्हीयामिमांशुचं ॥ २० ॥

वल्गत् कुचं चलत्कुचंयथातथापरिजहासइतियत् तत् सा
धुजातमिति स्वां स्नुषां स्वपुत्रभीमभार्यां द्रौपदीं प्रतिवक्तुमिव अयंमत्प्राणवायुः उत्क्रमणेच्छुः ऊर्ध्वमार्गेणबहिर्गंतुमिच्छुः आस्ते द्रौपदीपरिहास ६
स्मरणेनमत्प्राणाः व्याकुलीभवंतीतिभावः ॥१९॥ इदानींस्वमतेनकर्तव्यमाह अधुनेति अधुनासेनाभिः धरातलं विधूनानः कंपयिता अहं युधिषु
द्वेषु पांडवेषुनिधनंमरणंनिधायस्थापयित्वा इमांनद्यासपरिहासस्मरणकृतांशुचंनिगृह्णीयांनाशयेयं ॥ २० ॥ ॥७॥ ॥७॥

॥गद्यं॥ अभग्नः अपराजितः कैतवबंधः कपटस्वीकारो यस्य सः गांधारपतिः इतिनिगद्य उक्त्वा ग्रीडाव्ययानद्योः संगमेनिमग्नं एनं दुर्योधनं उत्तारयितुं बहिर्निष्कासयितुं एवं वक्ष्यमाणं उत्तरं प्रतिवचनं आदत्त उवाच इत्यर्थः ॥ ५॥ पद्यं॥ हे वत्स बाल अर्जुन ते जय्यतां जेतुं शक्यतां कः समुपैति प्राप्नोति यद्य स्मात् युधि खांडववनदाहकालिकयुद्धे भयात् पलायिताः हरिमुखाः इंद्रादयः सुराः केवलं नामतः मरुतः नाभवन् अपितु वेगतोपि मरुतः अभवन्

॥गद्यं॥ इतिनिगद्यव्रीडाव्ययानद्योः संगमेनिमग्नमेनमभग्नकैतवबंधोगांधारपतिरुत्तारयितुमेवमुत्तरमादत्त ॥ ५ ॥ पद्यं॥ जय्यतांकःसमुपैतितेर्जुनोवत्सयद्युधिभयात्पलायिताः केवलंहरिमुखाननामतोवेगतोपिमरुतो ऽभवन्सुराः॥ २१ ॥ अपिच ॥ तंवीक्षितुंजगतिशङ्कुयुरत्रकेवाभीमंभकोपधृतभीमगदांकबाहुं एकैकमुष्टिहतयेस्मभवंतिनालंयस्याहवेबकबृहद्रथभूहिडिबाः॥ २२ ॥

मरुतोपवनामराधित्यमरः वायुतुल्यवेगेन पलायिताइत्यर्थः देवानामियमवस्था तत्रमनुष्याणां काकथेतिभावः॥ २१ ॥ भकोपेन धृताभीमा भयंकरागदा अंकः चिन्हं यस्य तथाभूतः बाहुर्यस्य तं भीमं वीक्षितुं अत्र अस्मिन् जगति के वा पुरुषाः शङ्कुयुः शक्ताबभूवुः यस्य भीमस्य एकैकमुष्टेः हतये प्रहाराय बकः बकासुरः बृहद्रथभूर्जरासंधश्च हिडिबश्च एते अलपर्याप्ताः नभवंतिस्मनबभूवुः॥ २२॥ ॥ ७॥ ॥ ७॥ ॥ ५॥

ताभ्यां भीमार्जुनाभ्यां उपास्यमानस्य सेव्यमानस्यतपस्यातनुजन्मनः धर्मराजस्यव्यापादप्रोद्दचिंतनेपिमादृशांमत्सदृशानां काप्रसक्तिः कः प्र
संसरणेतुविशेषात् काप्रसक्तिः नास्त्येवेत्यर्थः ॥ २६ ॥ गद्यं ॥ तथापितज्जयेममाशक्ततायामपि अहंतु तवतेषां पांडवानांच परस्परस्यविभ
वे कोशाश्वतुरगादिसंपत्तौपरिणयनस्यममजयेत्वयात्वत्कोशोमह्यंदातव्यः तवजयेमयामत्कोशस्तुभ्यंदातव्य इत्यादिरूपस्यकलहस्यपंथानं
अधिरोहति आगच्छति यस्तथाभूतेसनिजगतिसामान्यतांसाधारणतां अक्षममाणेनजगतिसर्वाधिकेनेत्यर्थः अक्षसंप्रदायेन अक्षक्रीडारीत्या

नाभ्यामुपास्यमानस्यतपस्यातनुजन्मनः व्यापादेपिप्रसक्तिःकाविशेषान्मादृशांरणे २३ गद्यं ॥ तथाप्यहंतुतवचतेषांप
रस्परस्यविभवेपरिणयनपथाधिरोहिणिक्षणादक्षममाणेनजगत्सामान्यतामक्षसंप्रदायेनतंपराजयघंटापथेसंचार
यिष्यामि ॥ ६ ॥ पद्यं ॥ वित्तेहृतेदरिद्रास्तेविसृष्टाबंधुभिःस्वयं विनाशं वाशुचायायुर्विदेशंवायलज्जया ॥ २४ ॥ ॥

तं धर्मराजं क्षणात्पराजयस्य घंटापथेविस्तीर्णवर्त्मनि संचारयिष्यामि अक्षक्रीडया धर्मं क्षणात्पराजयिष्य इतिभावः ॥ ६ ॥ पद्यं ॥ अनयारी
त्या तेषांवित्तेहृते अस्माभिः अपहृतेसतितेपांडवाः दरिद्राः अतः बंधुभिः स्वजनैःविसृष्टाःत्यक्ताःसंतःस्वयमेवशुचाचित्तादिशोकेनवाविनाशं
मरणंयायुःगच्छेयुः अथवालज्जयाविदेशंस्वजनरहितदेशंयायुः ॥ २४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

ततः त्वं तु आत्मना संयुते सोदरैः बंधुभिः सदृशीसंख्या यासां ताः समाः वर्षाणि शतसंवत्सरानित्यर्थः नीरराशयः समुद्रा एव हरिनीलाः इंद्रनीलमणयः तद्रूपा मेखलाकांचिर्यस्यास्तां मेदिनीं भुवं निःसपत्नं यथा तथा सुखं अनु भुंक्ष्व उपभुंक्ष्व ॥ २५ ॥ ग० इत्थंकारं अनेन प्रकारेण रहसि कल्पिते कैतवं दुरध्वे असत्क्रीडयां पणात् दुर्मार्गे तावुभावपि शकुनि दुर्योधनावपि अनुधावितुं पश्चाद्गमनं कर्तुं दिव्यचक्षुषा वस्तुतः-

तं तत्र स्त्वं सुखमात्मसंयुतैः सोदरैः सदृशासंख्यकाः समाः नीरराशिहरिनीलमेखलां निःसपत्नमनुभुंक्ष्व मेदिनीं ॥ २५ ॥ गद्यं ॥ इत्थंकारं रहसि कल्पितकैतवदुरध्वे तावुभावप्यनुधावितुं दिव्यचक्षुषा तेनांधेन वसुंधराधिपतिना नवमणिमंडपिकाप्रवेशोत्सवव्याजादाहूतः सानुजो धर्मात्मजः कुरुपत्तनमुपेत्य बंधुतया प्रत्युद्गम्यमानो दुस्तरं भाविवनवासवर्षमेकैकमेकैकेन प्रणिपातपुण्येन सुप्रतरं करिष्यन्निव पितृव्यं द्वादशकृत्वः पदयोः प्राणंसीत् ॥ ७ ॥

अंधेन तेन धरापतिना धृतराष्ट्रेण नवमंडपिकायां प्रवेशोत्सवस्य व्याजात् आहूतः सानुजः भीमादिबंधुभिः सहितः धर्मात्मजः कुरुपत्तनं हास्तिनपुरं उपेत्य बंधुतया दुर्योधनादिबंधुसमूहैः प्रत्युद्गम्यमानः संमुखं गम्यमानः सन् पितृव्यं धृतराष्ट्रं पदयोः द्वादशकृत्वः द्वादशवारं प्राणंसीत् नमनं अकार्षीत् किं कुर्वन्निव दुस्तरं भावि एकैकं वनवासवर्षं एकैकप्रणिपातस्य एकैकनमस्कारस्य पुण्येन सुप्रतरं सुखेन तरितुं शक्यं करिष्यन्निव ॥ ७ ॥ ॥

प॰ अयमद्रुपदकन्यापि स्वस्य कबरीं वेणीकृतकेशसमूहं स्कबलजाया: गांधार्या: पद्यो: समनीनमत् ननामयचीकरत् कथंभूतां कबरीं नूतनै: अ वभृथस्य यज्ञांतस्नानस्य अंबुकणै: उदकबिंदुभिरिव जालकस्य पामरजनानपरपेयुरिति राजपत्न्या: आच्छादकजालस्य मौक्तिकै: अधिगतां प्राप्तां युक्तामित्यर्थ:॥ २६॥ धृतं आकारस्य कोपमत्सरादिजन्य देहविकारस्य निगूहनं गोपनं येन स: महीप: धृतराष्ट्र: विनीतं नम्रं तं धर्मराजं अ नामयानुयुक्ते: आरोग्यप्रश्नस्य अनुजाभि: कनिष्ठभगिनीभि: अनामयप्रश्नानंतरं कृताभिरित्यर्थ: कतुलाभस्य राजसूयलाभस्य लालनाभि: स्तु

प॰ अवभृथांबुकणैरिव नूतनैरधिगतामयमौक्तिकजालकै: स्वकबरीं द्रुपदस्य कन्यापि सा स्कबलजापदयो: समनीनमत्

२६ अनुजाभिरनामयानुयुक्तेरभिनंद्य कतुलाभलालनाभि: सदनाय ससर्ज तं विनीतं स धृताकारनिगूहनो महीप: २७

तावन्मरीचिपतनुभेदि भटांतहेतुर्वैरं मिथ: प्रभवितां कुरुभूभुजां श्व: इत्यंतराहितशुचेव दिशि प्रतीच्यां मंदायमानमहसा रवि

णा निपेते॥ २८॥ निभि: कृत्वा अभिनंद्य आनंदयित्वा सदनाय सदनं प्रति गंतुं ससर्ज मुमोच आज्ञापयामासेत्यर्थ:॥ २७॥-

यावत् सदनाय विसृष्ट: तावत् तस्मिन्समये मम सूर्यस्य पंमदीपायां तनु: तस्या: भेदिनां भटानां योधानां अंतहेतु: कारणं वैरं कुरुभूभुजां कौरव-

पांडवानां मिथ: परस्परं श्व: प्रभवितां प्रभविष्यति इति अंत: मनसि आहितया स्थापितया शुचेव शोकेनेव स्तुलेक्षा मंदायमानं मह: तेजो यस्य तेन रविणा प्रतीच्यां दिशि निपेते निपतितं अन्योपि शरीरनाशचिंतया हीनकांति: सन् भूमौ निपतति॥ २८॥ ॥ ५॥ ॥ ५॥ ८

दिशापदिशान्तरे दिग्विदिशां अंगणे सान्द्रे संतमसे सर्वतो विद्यमानतमोभिः दिग्धे लिप्ते सति तदा सर्वाः प्रजा दृशा नेत्रेण राज्ञः तुलां साम्यं समारुक्षन् प्रापुः राजवत् प्रजा अंधा बभूवुरित्यर्थः ॥ २९ ॥ तं क्षणमेव तस्मिन् क्षणे एव प्रथमशैलस्य उदयाचलस्य रोहिता तेन या भूता अमृतांशोः चंद्रस्य भानवः किरणाः पुनः मनुजावलीनयनवर्त्मने मनुष्यनेत्राणां मार्गं कर्तुं मघवादिदेवानां मम प्रभावगोचराः ममत्वविषयाः ककुभः पूर्वादिदिशः विभेजुः ॥ ३०

दिग्धे संतमसे सान्द्रे दिशापदिशान्तरे सर्वाः प्रजास्तदा राज्ञः समारुक्षन् दृशा तुलां ॥ २९ ॥ मनुजावलीनयनवर्त्मने पुनर्मघवादिदेवममप्रभावगोचराः ककुभो विभेजुरमृतांशुभानवः क्षणमेव तं प्रथमशैलरोहिणः ॥ ३० ॥ अथोपकार्यामधितिष्ठतोऽस्य संदर्शनायानिशमापतद्भिः अशेषपौरैरतिबालमित्रैः शेषि किंचिन्नतया रजन्या ॥ ३१ ॥ धर्मजन्मा ततः कर्म निर्माय अहर्मुखोचितं सभां सभास्फुरां पौरैर्भूयः प्रापाक्षवेदिभिः ॥ ३२ ॥

उपकार्यां राजगृहमधितिष्ठतः प्राप्तवतोऽस्य राज्ञः पृथक्त्वेन दर्शनाय अनिशं निरंतरं आपतद्भिः इतस्ततः आगच्छद्भिः अतिबालमित्रैः अशेषपौरैः समस्तपुरवासिभिः तया रजन्या किंचित्नाशेषि नावशिष्टं भावे लुङ् रात्रौ पौरसन्मानपरेण राज्ञा निद्रावकाशो न लब्ध इति भावः ३१ ततः प्रातःकाले सः धर्मजन्मा अहर्मुखे प्रातः प्रातःकाले उचितकर्म स्नानसंध्यावंदनादि निर्माय कृत्वा अक्षवेदिभिः द्यूतकोविदैः पौरैः प्रासुरां शोभमानां सभां भूयः पुनः प्राप ॥ ३२ ॥

वें.भा. ग॰ तत्रसभायांचित्रीयमाणेषु आश्चर्यंकुर्वत्सु अनल्पानाचारिम्णाचारुत्वानांजल्पाकेषुवाचालेषुबहुसौंदर्यंदर्शयत्सु इतियावत् सभायाःशिल्पेषु स टी.स्व.
१ भानिर्माणकर्तृशिल्पिजनकौशल्येषुदृशंपरिकल्पयतःददतःप्रज्ञादृशः धृतराष्ट्रस्यनिकषासमीपेमूर्तेतृतीयगुणेइवतमोगुणेइवदिविषदृषभनी ४
लदृषदासनेइंद्रनीलग्लासनेनिषीदतःआसीनस्य अमुष्यकुरुकुलप्रदीपस्यधर्मराजस्यप्रतीपंयथातथानिविशमानःआसीनःशकुनिःप्रासंगि
केनप्रस्तुतकर्तव्यपर्यवसितोक्तिकौशलेनपथादुरोदरविहारेद्यूतक्रीडायांअवतारंकर्तव्यतामित्यर्थः अचिरात् शीघ्रंअभिरोचयामासरुचिमुत्पादया

ग॰ तत्रचित्रीयमाणेष्वनल्पचारिमजल्पाकेषुसभाशिल्पेषुदृशंपरिकल्पयतःप्रज्ञादृशःनिकषामूर्तेतृतीयगुणइवदिविषदृ
षभनीलदृषदासनेनिषीदतोमुष्यकुरुकुलप्रदीपस्यप्रतीपंनिविशमानःशकुनिःस्थानात्भ्रंशयितुंसाक्षात्कृतसन्निधिर
मध्यमवर्णयातदीयाभिख्ययावाच्यइवग्रहविशेषःप्रासंगिकेनपथादुरोदरविहारेवतारमचिरादभिरोचयामास ८ प॰ अथ
सदसिमहत्याबाज्ञयासौनियत्याःस्वमतिमपिविमुह्यद्यूतमार्गप्रवृत्तं बहुषुजनपदेषुप्राप्तवत्सुग्लहत्वंसपदिसुबलसूनुर्धर्मसूनुं
विजिग्ये २२ मास कथंभूतःशकुनिःस्थानात्सार्वभौमपदात् भ्रंशयितुंसाक्षात्प्रत्यक्षंकृतसन्निधिःसमीपमागतःनविद्यतेमध्यमवर्णोयस्यांतया
तदीयाख्ययाशकुनिनाम्नावाच्यःग्रहविशेषइवशनिरिवेत्यर्थःशकुनिरितिनाम्निमध्यमकुवर्णत्यागे शनिरित्यवशिष्यते पदात्भ्रंशयितुंसाक्षात्शनिः १
प्रातिकूल्येनस्थितःकिमित्युत्प्रेक्षा ८ प॰ अथमहत्यांसदसिसभायांअसौसुबलसूनुःशकुनिःस्वमतिमपिनियत्याःदैवस्यआज्ञयाकृत्वाविमुह्यमोहंप्राप्य

द्यूतमार्गे प्रवृत्तं धर्मसूनुं बहुषु जनपदेषु देशेषु ग्लहत्वं पणत्वं प्राप्तुवत्सु सत्सु सपदि ग्लहत्वकाले एव विजिग्ये जयति स्मेत्यर्थः ग्लहगतपदार्थदेशादी-
न् धर्मराजात् जग्राहेति भावः॥ ३३॥ सुबलभूः शकुनिः एकेन अक्षेण पाशकेन इंद्रियेण च नृपतेः सर्वविषयान् देशान् शब्दस्पर्शादींश्च युगपत् एक
कालावच्छेदेन गृहीतुं अशक्नोत् शक्तो बभूवेति यावत् अस्मात् एकेनाक्षेण सर्वविषयग्रहणात् परं अन्यत् जगति परमं अद्भुत वाचकाय लोकविल
क्षणसंज्ञायै वाच्यतया अर्थनया अभ्युपेत्य स्वीकृत्य तिष्ठेत किंनु नैव तिष्ठेतेत्यर्थः एकेनाक्षेण इंद्रियेण श्रोत्रादिना एकस्य विषयस्य शब्दादेर्ग्र

एकेन यत्सुबलभूर्युगपत् गृहीतुमक्षेण सर्वविषयान्नृपतेरशक्नोत् अस्मात्परं जगति वाच्यतयाभ्युपेत्य
तिष्ठेत किंनु परमाद्भुतवाचकाय ३४ प्रतिदेवनमेवमेव भूषाः प्रचुरान् रत्नमयांश्च हेमकोशान् सहजान्
सहजायया स्य जित्वा स तु गांधारपतिर्जगर्ज हर्षात् ३५ ॥ ॥ ॥ ॥

हणं लोके विद्यते अत्र तु एकेनाक्षेण सर्वविषयाणां यौगपद्येन ग्रहणं दृष्टमिति श्लेषेणाद्भुतत्वं परिकल्प्य अस्मादन्या लोकेऽद्भुता संज्ञा तदर्थश्च
अस्ति किमिति प्रश्नव्याजेन नास्तीत्यर्थ वैचित्र्यं प्रतिपाद्यते॥ ३४॥ प्रतिदेवनं प्रतिक्रीडायामेव एकया क्रीडया सर्वदेशवदेव अस्य धर्मराजस्य-
भूषाः कटककुंडलादिभूषणानि प्रचुरान् बहून् रत्नमयान्हेमकोशांश्च जायया द्रौपद्या सह सहजान् भीमादिबंधूंश्च जित्वा सः गांधारपतिः श
कुनिस्तु हर्षात् जगर्ज जितं जितमिति उच्चैः शब्दं चकार॥ ३५॥ ॥ ६७॥ ॥ ६७॥ ॥ ६७॥ ॥ ६७॥

तत्रांतरे तस्मिन्समये बहूनां पतीनां वधूटी युवतिः जायेत्यर्थः द्रुपदजानः अस्माकं घटीचेटीघ टेन जलानयनकर्त्री दासी अभूत् वराकीं दीनां तां द्रौपदीं अत्र अस्यां परिषदि सभायां आनय इति अग्रजस्य ज्येष्ठबंधोः दुर्योधनस्य गिरं आज्ञावचनं हरन् गृण्हन् स्फबलतनयासूनुभुजां[?] धरीषु न पुंहेलीयीकः द्वितीयः दुःशासनः जवात् समुत्तस्थौ उदतिष्ठत् कइव धरणिं पृथिवीं अवतीर्णः आगतः साक्षात् यम इवेत्युत्प्रेक्षा ॥ ३६ ॥ बलादाकृष्यनयनार्थमागतं दुःशासनं दृष्ट्वा भियाभीत्या सदसि सभायां धावनं पलायनं आचरंत्याः कुर्वत्या आनतांग्याः कुचादिभारेण नताव

तत्रांतरे ॥ घटीचेटीनो भूद्बहुपतिवधूटी द्रुपदजा वराकीं तामत्रानय परिषदीत्यग्रजगिरं हरन्द्वैतेयीकः स्फबलतनयासूनुभुजयालं समुत्तस्थौ साक्षाद्धरणिमवतीर्णो यम इव ॥ ३६ ॥ दृष्ट्वा भिया सदसि धावनमाचरंत्याः केशपेचकार सकरांगुलिमानतांग्याः वक्षोरुहेषु च महीपपुरंध्रिवर्गो नासाग्रसीम्नि सुधियश्च नदीसुताद्याः ॥ ३७ ॥

यवायाः द्रौपद्याः केशपेकेशसमूहे दुःशासनः करांगुलिं हस्तांगुलिं चकार करांगुलिभिः केशपाशो जग्राहेत्यर्थः तथा महीपानां राज्ञां पुरंध्रिवर्गः वधूसमूहः वक्षोरुहेषु कुचेषु करांगुलिं चक्रुः दुःखादंगुलिभिः हृदयताडनं चक्रुः तथा नदीसुताद्याः भीष्माद्याः सुधियः ज्ञातारः नासाग्रसीम्नि नासाग्रे अंगुलिं चक्रुः मर्मोचीनं न जातं क्रोयं दैवयोग इति चिंतया नासाग्रे करांगुलिं चक्रुः ॥ ३७ ॥ ॥ ५ ॥ ॥ ५ ॥

ननसभायां दुर्मेधाः दुर्बुद्धिः दुःशासनः तस्याः द्रौपद्याः पानिग्रत्यलक्ष्म्याः निवासस्यस्थितिस्यलस्यस्फटिकनाकारमिव दुकूलमपिसूक्ष्मश्वेतपरिधा
नवस्त्रमपि अपहर्तुमावर्त्तत कथंभूतायाः तस्याः बलवतः आकर्षणात्‌यनूभयंतस्मात्‌ उद्भिदुराणि बाहिर्निर्गच्छंति स्वेदपृषंतीव घर्मबिंदवद्‌वेत्यु
लेक्षा भूषामुक्ताफलानि धारयंत्याः तथाचिकुरभारात्‌केशसमूहात्‌सकाशात्‌करतलनिष्पीडनेननिर्गलिता अधःक्षारितां कालिम्नः श्यामतायाः धा
रामिव निर्भरंनिबिडंयत्कुवलयगर्भकमात्यंनीलोत्पलानांकेशमध्यस्थमालातस्याः रसमञ्जरीं अश्रुभिः नेत्रोदकैः सहवर्षंत्याः ९ प॰ तादृक्षेनादृशे आन

ग॰ तत्रसदुर्मेधाः बलवदाकर्षणभयाद्भिदुराणिस्वेदपृषंतीवभूषामुक्ताफलानिधारयंत्याश्चिकुरभारात्‌करतलनिष्पीडननिर्गलि
तांकालिमधारामिवनिर्भरकुवलयगर्भकमात्यरसमञ्जरीमश्रुभिः सहवर्षंत्यास्तस्याः पानिग्रत्यलक्ष्मीनिवासस्फटिकमाकारमिवदु
कूलमप्यपहर्तुमावर्तत ०॰ प॰ तादृक्षेसमुपस्थितेपरिगतवसत्स्वपुवात्वंयमेष्वाध्यायत्सु विधेर्बलंस्वदर्पितेष्वन्येष्वशक्तेष्वपि निश्चित्या
निमतांगतिं यदुपतिंनिर्व्याकरोकुर्वतीमाचक्रंदतमुच्चैः यदुपनत्रायस्वद्रामामिति २८
वांच्येपरिभवेसमुपस्थितेसतिसत्स्वपुभीष्मद्रोणा
दिषुवात्वंयमेषुमौनिषुसत्सुस्वदर्पितेषुभीमादिषुविधेः दैवस्यबलं आध्यायत्सुचिंतयत्सु सत्सु अन्येषुउक्तव्यतिरिक्तेषुजनेषु अशक्तेषुतस्याः आप-
निवारणेअसमर्थेषुसत्स्वपि सा द्रौपदीनिर्व्याकरोधानयस्त्वेकंरोकुर्वतीस्थापयंती सती यदुपतिं श्रीकृष्णं आर्तिमतांपीडितानांगतिंपीडानिवारकंनिश्चित्यहे
कृष्ण मां यदुपते मां त्रायस्व रक्षेतिउच्चैः उच्चस्वरेणाचक्रंद आर्तशब्दंचकार एतत्समयेएतदापन्निवारकः श्रीकृष्णात्किन्योन्यास्तीतिनिश्चित्य कृष्णस्मरणार्थे

[illegible]के:आजुहावेत्यर्थः॥ ३८॥ सभायांतस्याः तन्व्याः कृशांग्याः द्रौपद्याः ह्रियमाणवस्त्रात् नितंबात् कटिपश्चाद्भागात् दुकूलपंक्तिः सूक्ष्मशुभ्र
वस्त्रसमूहः सहसा अकस्मात् आविरासीत् प्रादुर्बभूव शुभ्रतयानंततयाच वस्त्रपंक्तिमुत्प्रेक्षते कंसारेः श्रीकृष्णास्यपयः कारुण्यपयःपयोधिः दु
ग्धक्षीरसमुद्रः तस्यकल्लोलमालेवमहालहरीपरंपरे व ॥ ३९॥ वरांग्याः सुंदर्याः वाससिवस्त्रे हृतेसति हृद्यरूपंमनोहरं वासोंतरं अन्यत् वासः
वस्त्रंवृद्धिंप्रापेतियत् तेनैव वासोंतर वर्धनेनैव तत्रसभायांकस्यनरस्यचित्तस्यनव्यः नूतनः चित्रकूटः आश्चर्यराशिः तन्नामापर्वतश्चन अजनि

तस्याःसभायांह्रियमाणवस्त्रातन्व्यानितंबात्सहसाविरासीत् कंसारिकारुण्यपयःपयोधेःकल्लोलमालेवदुकूलपंक्तिः
॥ ३९॥ हृतेहृतेवाससिहृद्यरूपंवासोंतरंपद्वृधेवरांग्याः नरस्यतेनैवनकस्यनव्यश्चित्तस्यनव्योजनिचित्रकूटः ४० अदृ
श्यस्यापहारेपिवर्धितानेकवाससः अंबरप्रायतातस्यामध्यस्योभययाप्यभूत ॥ ४१॥ ॥ ॥

नजातः अपितुसर्वस्य जातः प्राचीन एकश्चित्रकूटोवर्तते अयमपरोजात इत्यर्थांतरंश्लेषेण ४० अदृश्यस्य अतिसूक्ष्मस्य अपहारेपिवस्त्राणामप
हारेसत्यपिवर्धितानिवृद्धिंप्रापितानि अनेकवासांसियेनतस्यतस्याः द्रौपद्याःमध्यमस्यमध्यभागस्यउभयथापिउभयप्रकारेणापि अंबरप्रायताप्राये-
णबाहुल्येन अंबरे अंबरप्रायः तत्ता बहुवस्त्रोत्पत्तेः वस्त्ररूपता सूक्ष्मत्वादाकाशरूपताच अभूदित्यर्थः॥ ४१॥ ॥ ६७॥ ॥ ६७॥ ११

अंधसूनुः दुःशासनस्तु तस्याः द्रौपद्याः चैलानि वस्त्राणि कर्षन् अपहरन् सन् अनग्ना नग्ना वस्त्ररहिता क्रियते अनेन सः नग्नंकरणः आढ्यसु-
भगस्थूल पलित नग्नांधेतिकरणे ख्युन्प्रत्ययः नग्नीकरणोत्पादनं नाभूत् श्रीकृष्णकृपया वस्त्रप्रादुर्भावेन द्रौपद्याः नग्नीकरणाभावाद्वस्त्रा-
पहारश्रमेणास्खलनं प्राप्य भूमौ पतन् दुःशासनः जनान् हासयामास हासाद्दंतवाससोरोष्ठयोर्विवृतत्वेन दंतावलेर्नग्नीकरणसमर्थोभूदित्यर्थः
॥४२॥ प० अथ तथाभूतः तेन प्रकारेण जातः पुरुषः कठिनः यो रोषाभिषंगः भार्यापराभवः तस्मात् यो रोषः तेन कलुषः आविलः तेन पृषदश्वज

चैलानि कर्षंश्चिरमंधसूनुस्तस्यास्तु नग्नंकरणः स नाभूत् श्रमात्स्खलित्वा धरणौ पतन्सन्दंतावलेरेव जनन्नजानां
॥४२॥ग० अथ तथाभूतपरुषरोषाभिषंगरोषकलुषेण पृषदश्वजनुषा परिषदि भीषणमेवं बभाषे १० प० उरसि स्खलदूष्मलं
मृगाक्ष्याः समितावस्रमिदं यथाहमक्ष्णा द्विषतः कचकर्षिणोप्यमुष्या रसनेनानुभवेयमेवमेव ॥४३॥ ॥ ॥

नुषा वायुपुत्रेण भीमेन परिषदि सभायां एवं वक्ष्यमाणं वचनं बभाषे उक्तं ॥१०॥ प० अहं समितौ सभायां उरसि स्खलन् पतन् ऊष्मलं दुःखजत्वादुष्णं
मृगाक्ष्याः द्रौपद्याः अस्रं नेत्राश्रु अक्ष्णा नेत्रेण अनुभवामि पश्यामि एवमेव अमुष्याः कचकर्षिणः केशाकर्षणकर्तुः द्विषतः शत्रोः दुःशासनस्यापि उ-
रसि स्खलत् बहिः पतत् ऊष्मलं अस्रं रक्तं समितौ युद्धे रसनेन रसनेंद्रियेण अनुभवेयं आस्वादयेयं ॥४३॥ ॥७॥ ॥७॥

ग॰ किंच हेमंतइव अहंसरसीवसरोवरे इषविलसद्भिः कबंधैः जलैः मस्तकरहितदेहैश्च बंधुरे व्याप्ते समराजिरे रणांगणे तामरसस्य कमलस्य छदानीव पत्राणीव शतमपि एतान्विमतान् शत्रून्दुर्योधनादीन् धार्तराष्ट्राणांहंसानां धृतराष्ट्रपुत्राणांच शब्दः वाचकः नामेति यावत् शेषोयस्याः सकाशात्तां महाग दस्यमहार्घ्यगस्य महागदायाश्च आपत्तिंतत्कृतविपत्तिंगमयिष्यामि रणांगणेदुःशासनस्यहृदयंभित्वारक्तंपास्यामिदुर्योधनादिशतबंधून्हनिष्यामिचे तिभीमःप्रतिज्ञांचक्रेइतिभावः तत्रसूत्रात्मनः इंद्रस्यपुत्रोप्येवंवक्ष्यमाणंप्रतिजज्ञेर्मतिज्ञांचक्रे॥१॥प॰ असौराधासूनुःकर्णःसदासउत्सेकान् गर्वात्प्रलपन्ग्राम्यं

॥द्यं॥ किंचसरसीवविचलत्कबंधबंधुरसमराजिरेतामरसच्छदानीवशतमपिविमतानेतान्हेमंतइवाहंधार्तराष्ट्रशब्दशेषांमहागदाप त्तिंगमयिष्यामीतितत्रसूत्रात्मनःपुत्रोप्येवंप्रतिजज्ञे ११ प॰ उत्सेकात्कृतहस्ततालममुनागांधारपुत्रांभुवाराधासूनुरसौजहाससदसिग्राम्यं ब्रुवन्प्रलपन्‌ः यस्यांजात्वपिदेहिनोभ्युदिततानैवाभिनिर्मुक्ततास्यात्तांहि अपिगांडिवीममतुनांनिद्राममुंनेष्यति ५५ अश्लीलंभाषणंब्रु वन् अमुनागांधारपुत्रात्सुवादुर्योधनेनसहकृतःहस्ततालोहस्ततांडनंयस्मिन्कर्मणियथातथाजहासममगांडीवस्त्वअमुंकर्णंयस्यांनिद्रायांजात्व पि कदाचिदपि अभ्युदितता अभिनिर्मुक्तताचहि अपिएतद्दोषद्वयमपिनस्यात्तांतांनिद्रांदीर्घनिद्रांमरणमितियावत् नेष्यति अमुमपराधकारि णंकर्णंरणांगणेहनिष्यामीतिप्रतिज्ञांचक्रेइतिभावः यायोःकृतयोःसूर्योस्तमेति उदेतिचतौक्रमात् अभिनिर्मुक्ततादोषवान् अभ्युदिततादोष वांश्च भवतःसुप्तेयस्मिन्नस्तमेतिसुप्तेयस्मिन्नुदेतिच अंशुमानभिनिर्मुक्ताभ्युदितौचयथाक्रममित्यमरः॥५५॥ ॥९२॥ ॥६७॥ १२

॥ग०॥ इतितयोर्भीमार्जुनयोरादेशेन वीर वादेन युष्मदासने इह शक इति वादेन स्फारं यथा तथा इह आस्व निषीद इति उक्त्वा करास्फालेन हस्तताडने
न दर्शिते सक्थिनि ऊरौ एवम् अनयमृत्युः स्यादिति स्फयोधनं प्रतियाज्ञसेन्याः द्रौपद्याः शापेन च यद्वयतेन आत्तगांधाभ्यां पराभूताभ्यां अंधदंपतिभ्यां गांधारी
धृतराष्ट्राभ्यां यथापुरं यथापूर्वं राज्यं प्रसर्प्य हरिप्रस्थं प्रति प्रस्थापितो युधिष्ठिरः पुनरपि कृतमंत्रैः अमित्रैः शकुनिकर्णदुर्योधनादिभिः शत्रुभिः आ
हूतमात्रः अयं युधिष्ठिरः अर्धपथात् अर्धमार्गात् विधिना दुर्दैवेन गलहस्तिकया अर्धचंद्राकाराग्रहस्तगलप्रहारेण निवर्तित इवेत्युत्प्रेक्षा तामेव सभां

ग० इतितयोस्तादृशेनवीर वादेनस्फारमिहास्वेति करास्फालितदर्शिनि निजसक्थिन्येव तव मृत्युः स्यादिति स्फयोधनं प्रतियाज्ञ
सेन्याः शापेन भयात्तगांधाभ्यामंधदंपतिभ्यां यथा पुरं राज्यं प्रत्यर्प्य हरिप्रस्थं प्रतिस्थापितो युधिष्ठिरः पुनरपि कृतमंत्रैरमित्रैरा
हूतमात्रोयमर्धपथाद्विधिना गलहस्तिकया निवर्तित इव तामेव सभां प्रत्यावर्तत ॥१२॥ पद्यं ॥ भूताभिविष्ट इव बोधवतां वरो
पि भूयोपि धर्मतनयः सह सौबलेन आधत्त दवनविहारमनार्यजुष्टमाद्यक्षरं विजहद्देवपणोपि सोभूत् ॥ ४५ ॥ ॥

प्रत्यावर्तत पुनरागच्छत् १२॥ पद्यं ॥ बोधवतां ज्ञानिनां मध्ये वरोपि धर्मतनयः भूताभिविष्ट इव पिशाचप्रविष्ट इव सन् सौबलेन शकुनिना सह भूयोपि
अनार्यैः नीचैः जुष्टं सेवितं देवनविहारं पाशकक्रीडां आदत्त जग्राह सः देवनविहारः आद्यक्षरं प्रथमाक्षरं विजहत् त्यजत् सन् पणोपि अभूत् अस्यां क्री
डायां यस्य पराजयः तेन द्वादशवर्षाणि वनवासः कर्तव्य इति पणो भूदित्यर्थः ॥ ४५ ॥ ॥ ७ ॥ ॥ ६ ॥ ॥ ८ ॥

कितवेद्यूतकृतिशकुनौस्वेनकरेणवशं वदान् अनुकूलान्पाशकान्किरतिक्षिपतिसतिविजयेनसदापुरस्कृतोपि अग्रतःकृतोपिसःधर्मराजःतेनवि
जयेनपृष्ठतःकृतःअभवत् इदमद्भुतं विजयेन अर्जुनेन पुरस्कृतोपिविजयेनपृष्ठतःकृतःपराजितोभूदित्यर्थः॥४६॥अथपराजयानंतरं सत्यसंधःसत्यप्र
तिज्ञःक्षितींद्रःधर्मराजःप्रत्यर्थिभिःस्वीकृतायां अस्यां धरणौ क्षणमपिस्थातुं नयुक्तमितिमनस्यानीय उत्थाय अंतःअंतःकरणे अतितरांउत्तप्यमानां
दुःखेनतप्तांप्रसूवंमातरं कुंतीं देवुःदेवरस्यविदुरस्यपाणौ हस्तेविधायतत्समीपेस्थापयित्वेत्यर्थःसजानिःजायया द्रौपद्यासहितःसन्सहजैःबंधुभिःस

कितवेशकुनौवशंवदान्किरतिस्वेनकरेणपाशकान् विजयेनसदापुरस्कृतोप्यभवत्तेनसपृष्ठतःकृतः ५६ उत्थायाथ
क्षितींद्रःक्षणमपिधरणौस्थातुमस्यांनयुक्तंप्रत्यर्थिस्वीकृतायामितिसहसहजैःसत्यसंधःसजानिः पाणौदेवुर्निधाय
प्रसूवमतितरामंतरुत्तप्यमानांपद्भ्यांप्रापद्वनानिव्यथितहृदमुचत्पौरलोकस्तदृग्भ्यां ॥ ५७ ॥ ॥ ॥

हपद्भ्यांवनानि अरण्यानिप्रापत् व्यथितहृत् दुःखमनाःपौरलोकस्तदृग्भ्यां वनानिजलानि अमुचद् त्यजत् यद्यपिप्रसूवमित्यत्र ओःसुपीतियणा
भाव्यं तथापिप्रकृष्टं सूतेसौप्रसूरितिसूतेसौसूःप्रकृष्टासूःप्रसूरितिचविग्रहेप्रशब्दस्यकर्षतेरन्वयेनसूतिंप्रत्यन्वयाभावात्गतित्वाभावेनगतिकारकेतर
पूर्वपदस्ययण्नेष्यतइतिभाष्यकारेष्ठायणाभावःयत्क्रियायुक्ताःप्रादयस्तंप्रत्येवगत्युपसर्गसंज्ञाइतिनियमात् ॥ ५७ ॥ ॥७॥ ॥७॥

कातार वर्त्मनि अरण्यदुर्गममार्गे धनुर्विशिष्टस्यापितूणीरविशिष्टस्यापिशांताकृतेःतस्य धर्मराजस्य पुरतःनिषण्णाः आसीनाः मृगाः उत्थाय पटुमर्म-
रैः मनोहर वस्त्रशब्दैः चारुचीरं वल्कलंरोमंथेचर्वितस्यतृणादेः आकृष्यपुनश्चर्वणे लोलंचंचलं चुबुकं अधोभागोयस्यतेन मुखेनजघ्नुः आघ्राणंचक्रुः
शांताकृतिं दृष्ट्वानिःशंकांतःकरणतया मृगाः विश्वासेनवल्कलमाजघ्नुरित्यर्थः॥४८॥ परागैः धूलिभिःपूर्णेपथिमनोज्ञाःमनोहराःतस्य धर्मराजस्य
पादरेखात्मकघटस्यप्रतिमाःघटाकाररेखासुद्राःवनदेवताभिःभक्त्याउपनीताःपाद्यार्थंपादप्रक्षालनार्थंउदकुंभाइवउदकपूर्णघटाइवजाग्रतिस्मति

कांतारसीमनिमृगाः पुरतोनिषण्णाः शांताकृतेःसधनुषोपिनिषंगिणोपि उत्थायतस्यपटुमर्मरचारुचीररोमंथलोलचिबु
केनमुखेनजघ्नुः॥४८॥ परागपूर्णेपथितस्यपादरेखाघटस्यप्रतिमामनोज्ञाः भक्त्योपनीतावनदेवताभिःपाद्योदकुंभा
इवजाग्रतिस्म ५९ ग० क्रमेणतेविलंघ्यविविधानिविपिनानिजन्हुमुनिकर्णशष्कुलीपथवशेनशिक्षितैर्गतिविशेषैरिवगंभी
रैरावर्तैरुपासकजनादाहृतानिसंसारचक्राणीवदर्शयंतींकोकनदवदनोदितैरिवकोककुटुंबिनीकूजितैःकुमारस्यदेवव्रतस्य
कुशलमिवपृच्छंतींभागीरथींपुरस्कृत्यतांनिशीथिनींपश्चाच्चक्रुः १४ षुंतिस्म स्वस्थानवनमागतस्यमहासाधोर्धर्मराजस्यपादप्रक्षाल
नार्थमानीताउदकुंभाइवेत्युत्प्रेक्षा॥४९॥ ग० तेपांडवाःविविधानिविपिनानिक्रमेणउल्लंघ्यभागीरथींपुरस्कृत्यअग्रतःकृत्वातत्रतत्तीरेतांनिशीथिनीं-
रात्रिंपश्चाच्चक्रुःयापयामासुःकथंभूतांभागीरथींजन्हुमुनेःजन्हुसंज्ञकराजर्षेःकर्णशष्कुलीपथवशेनकर्णबिलमार्गेणबहिर्निर्गमनवशात्तयाशिक्षि

नैः अभ्यस्तैः गतिविशेषैः इव गभीरैः आवर्तैः अंभोभ्रमैः कृत्वा उपासकजनात् आहूतानि आनीतानि संसारचक्राणीव दर्शयंती तथा कोकनदानि रक्तोत्पलान्येव वदनानि तैः उदितैः उक्तैः इव कोककुटुंबिनीनां कूजितैः कुमारस्य पुत्रस्य देवव्रतस्य भीष्मस्य कुशलं पृच्छंतीमिव अत्र भगीरथरथानुगमनमाचरंत्याः मार्गे जन्हुयाजप्रवृत्त यज्ञवेदीं प्लावयंत्याः तपोबलेन पीतायाः मार्गरथ्याः भगीरथयाच्ञाप्रसन्नेन तेन कर्णबिलमार्गेण मोचनं कृतमिति कथानुसंधेया ॥१४॥ अपरेद्युः द्वितीयदिवसे अतिमात्रं बुभुक्षितानां अनुयात्रिकाणां अनुयायिनां सत्रिजनानां यज्ञसंबंधिऋत्विगादि

॥ गद्यं ॥ अपरेद्युरतिमात्रबुभुक्षितानुयात्रिकसत्रिजनपरित्राणाय पवित्रैः स्तोत्रैः प्रसेदुषा चित्रभानुना दत्तमक्षय्यमन्नपात्रमादाय कलत्रे निदधुः ॥ १५ ॥ पद्यं ॥ वनं ततः काम्यकमेत्य तेषु वसत्सु भीमस्तु नियोद्धुकामं किर्मीरमुग्रं कुणपाशनेंद्रं क्षिप्रं तदाहारदशामनैषीत् ॥ ५० ॥ ॥ ॥ ॥ ॥

जनानां परित्राणाय रक्षणाय पवित्रैः स्तोत्रैः स्तुतिभिः प्रसेदुषा प्रसन्नेन चित्रभानुना सूर्येण दत्तं अक्षय्यं भक्ष्यपदार्थप्रसवितृ अन्नपात्रं आदाय कलत्रे भार्यायां द्रौपद्यां निदधुः स्थापयामासुः ॥ १५ ॥ पद्यं ततः तेषु पांडवेषु काम्यकं वनं एत्य वसत्सु सत्सु भीमस्तु नियोद्धुकामं बाहुयुद्धकरणेच्छावंतं उग्रं किर्मीरनामानं कुणपाशनानां शवभक्षकाणां राक्षसानां इंद्रं नायकं क्षिप्रं शीघ्रं तस्य राक्षसस्य आहारदशां भक्ष्यदशां शवावस्थामित्यर्थः अनैषीत् नीतवान् तं जघानेति भावः ॥ ५० ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

ततः कदध्वनि दुर्मार्गे अलसतां श्रमजन्यालस्यं अबुध्वा अज्ञात्वा वध्वा द्रौपद्या सार्द्धं द्वैतवने चरन् गच्छन् सः भूपः धर्मराजः मुनींद्रसंघात् सर्वस्य शुभस्य पुण्यस्य मूलानि कारणानि मूलानि वृक्षाणां वल्लीनां च मस्य मूलानि जग्राह अतिथित्वेन माभायदत्तानि मूलानि जग्राहेति भावः ॥५१॥ अथ तत्र द्वैतवने ते पांडवाः सत्यवर्तीसुतस्य व्यासस्य पादारविंदात् प्रविसृत्वरीभिः प्रसरणशीलाभिः नरवप्रभाभिः कृत्वा जटालतानां नवां नूतनां पुष्पपंक्तिं जनयांब

तनश्चरन्द्वैतवने ससार्द्धं वध्वा कदध्वालसमामबुध्वा मूलानि सर्वस्य शुभस्य भूपो मूलानि जग्राह मुनींद्रसंघात्
॥ ५१ ॥ तत्राथ ते सत्यवतीसुतस्य पादारविंदात्प्रविसृत्वरीभिः नरवप्रभाभिर्नवपुष्पपंक्तिं जटालतानां जनयां
बभूवुः ॥ ५२ ॥ तस्मिन्कवौ तापसयूथनाथे स्वातीमिवाजग्मुषि वासभूमिं तेषामतिक्षामतया सुतानां शुचा
क्षिदेशेष्वतिवृष्टिरासीत् ॥ ५३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भूवुः उत्पादयामासुः नमने व्यासचरणयोर्मस्तकं स्थापयामासुरिति भावः ॥५२॥ तापसयूथनाथे तस्मिन्कवौ पुराणादिकर्तरि व्यासे शुक्रे च स्वातीं स्वातीनक्षत्रमिव वासभूमिं निवासस्थानं आजग्मुषि आगतवति सति अतिक्षामतया अतिकार्श्येन दुर्भिक्षेण च पुतानां तेषां पांडवानां शुचा शोकेन अक्षिदेशेषु अतिवृष्टिः आसीत् आपन्निवारकं आप्तजनं दृष्ट्वा शोकेन रुरुदुरित्यर्थः शुक्रे स्वातीनक्षत्रमागतवति अतिवृष्टिर्भवतीति ज्योतिर्ग्रंथे प्रसिद्धं ॥ ५३ ॥ ॥

तदानींदीर्घदर्शी भवि ष्यज्ज्ञः व्यासः प्रसृमरया प्रसरणशीलया तनुभासा श्यामया शृंगारकांत्या दिशि दिशि प्रावृषेण्यान् प्रावृट्कालिकान् सजलानि स्थ
र्थःमेघान् विदधानः कुर्वाणः सः व्यासः कुरुराजवाचक कुरवृक्षवाचककुरव इति महान्तं शब्दं संज्ञां आविभ्रतोपि तान् पांडवान् स्ववचनानां निपुणि-
म्नाकौशलेन अशोकान् शोकरहितान् अशोकवृक्षांश्च अकार्षीत् वृक्षपक्षे आश्चर्यं॥ ५४॥ पार्थः अर्जुनः अस्मात् व्यासात् प्रतिश्रुतिरिति एतत्संज्ञां वि
द्यां विधानसहितमंत्रं प्रतिपद्य प्राप्य धर्मतनयेन आलिंग्य विसृज्यमानः आज्ञप्तः सन्नित्यर्थः कृपाजलधेः शंभोः चरणयोः अर्चनाभिः पूजाद्युपासना

प्रसृमरतनुभासा प्रावृषेण्यान्स मेघान्दिशिदिशि विदधानो दीर्घदर्शी तदानीं कुरव इति महान्तं शब्दमाविभ्रतोपि स्व
वचनैर्निपुणिम्ना तानशोकानकार्षीत्॥ ५४॥ अस्मात्प्रतिश्रुतिरिति प्रतिपद्य विद्यामालिंग्य धर्मतनयेन विसृज्यमानः॥
पार्थो हिमाचलमगात्परमास्त्रमाप्तुं शंभोः कृपाजलनिधेश्चरणार्चनाभिः॥ ५५॥ यस्मिन्हिमानीभृति यक्षवृंदमंगेषु स
र्वेष्वपि मंजुलेषु नरवंपचोष्णं नलिनेक्षणानामुरोजमेवातितरामुपास्ते॥ ५६॥ ॥ ॥ ॥

भिः परमास्त्रं पाशुपतास्त्रं आप्तुं प्राप्तुं हिमाचलं अगात् अगमत्॥ ५५॥ हिमानीभृति हिमसंहतिधारके यस्मिन्हिमाचले यक्षाणां वृंदं नलिनेक्षणा
नां सुंदरस्त्रीणां सर्वेष्वपि अंगेषु अवयवेषु मंजुलेषु सुंदरेषु सत्सु नरवं पचं नरवपाचकं उष्णं यस्मिन्नं उरोजमेव स्तनमेव अतितरां उपास्ते सेवते पर्व १५
ते शैत्यबाहुल्यात् स्वभावतः स्त्रीणां कुचाधारहृदयेषु उष्णातासत्वात्तान्येव प्रेजुरितिभावः॥ ५६॥ ॥ ७॥ ॥ ७॥

यः हिमालयः वसुंधरायाः पृथिव्याः वत्सतां एत्य प्राप्य निपीतान् रत्नावलीनां कांतिपूरान् तृष्णा अतितृष्णया मनःशिलायाः वप्रस्य तटस्य झरीमिषेण-
निर्झरमिषेण दरीमुखैः गुहामुखैः उद्गिरतीव वमतीव अन्योपि पयसादिपदार्थातिभक्षणेन वमति पृथुराजेन यदा गोरूपा पृथिवी दुग्धा तदा पर्वतैः
हिमालयं वत्सं कृत्वा रत्नानि दुग्धानीति पुराणेतिहासोनुसंधेयः॥ ५७॥ समीरकिशोरकः मंदवायुः तं हिमालयं तरसा वेगेन आरोहतः ऊर्ध्वं गच्छतः त-
स्य अर्जुनस्य स्वेदजलानां अणुराजिं कणिकासमूहं निपीय प्राश्य आननपद्मस्य मुखकमलस्य माध्व्याः मकरंदस्य द्विरेफभावं भृंगत्वं प्रकटीचकार स-

योवत्सतामेत्य वसुंधराया निपीतरत्नावलिकांतिपूरान् मनःशिलावप्रझरीमिषेण दरीमुखैरुद्गिरतीव तृष्णा॥ ५७॥ आ
रोहतस्तं तरसा समीरकिशोरकः स्वेदजलाणुराजिं निपीय तस्याननपद्ममाध्वीद्विरेफभावं प्रकटीचकार॥ ५८॥ शिवाख्य
योरेकतनुत्वकारणं त्रिलोकपित्रोर्महसोस्तपोवनं मिथोर्च्यमानं मिथुनैस्तपस्विनां तयेच्छुभिस्तत्र ननाम पांडवः॥ ५९

मीरभृंगः मुखकमलस्य स्वेदमकरंदपपावित्यर्थः मंदवायुः स्वेदमपजहारेति भावः यथा भ्रमरपदे द्विरेफत्वं तथा समीरकिशोरपदेप्यस्तीति द्विरेफत्वं-
मंदवायोरिति कवेरभिप्रायः॥ ५८॥ पांडवः अर्जुनः तत्र हिमालये तपोवनं ननाम कीदृशं तपोवनं शिवश्च शिवा च शिवौ आख्ये नाम्नी ययोस्तयोः त्रिलो
कस्य पित्रोः मातापित्रोः महसोः उमामहेश्वरयोरित्यर्थः एकतनुत्वस्य कारणं तथा मिथः स्त्रीपुरुषयोर्मध्ये परस्परं तयेच्छुभिः उमामहेश्वरवत् एक
तनुत्वमिच्छद्भिः तपस्विनां मिथुनैः स्त्रीपुरुषैः अर्च्यमानं सेव्यमानं विशेषणाभ्यां वनस्य महासिद्धिस्थानत्वमुच्यते॥ ५९॥ ॥ ६०॥ ॥ ६१

तत्रवनेसन्निधास्यन् सन्निधिंप्राप्स्यन् यःऋषभःहरवृषभःतदर्थंउपदामिवउपायनमिव दर्भदलमुष्टिंआहरन् गृण्हन् अर्जुनःचित्तंईशस्य प
दयोःसमादधन् सन् दुश्चरंतपःतप्तुंकर्तुमित्यर्थःआरभत ॥ ६० ॥ तपस्वितेःविशेषविधौविशेषाचरणे चतुरःकुशलःसःअर्जुनःशत्रुजिते भुवः
तले अखिलेन सर्वांशेननिजंचरणंविधातुंस्थापयितुंजुगुप्समानइवतद्विषयकंतिरस्कारंकुर्वन्निव प्रपदेन पादाग्रेणातिष्ठतिस्मभूतले पा

तत्रदर्भदलमुष्टिमाहरन्सन्निधास्यद्वृषभोपदामिव *चित्तमीशपदयोःसमादधत्तपमारभतदुश्चरंतपः ६०
चतुरस्तपस्वितिविशेषविधौचरणंविधातुमखिलेननिजं सजुगुप्समानइवशत्रुजितेप्रपदेनतिष्ठतिभुवस्स
तले ॥ ६१ ॥ भानोर्ललाटंतपभानुजालेप्रविष्टदृष्टिंपरितस्तमग्निः भूयोपिभोक्तुंविपिनंदिशेतिप्रेम्णो
परुंधन्निवदृश्यतेस्म ॥ ६२ ॥ . ॥ ॥ ॥ ॥ ॥ ॥

दाग्रेणतिष्ठन् तपश्चकारेतिभावः ॥ ६१ ॥ ललाटंतपं ललाटतापकं भानुजालंकिरणसमूहोयस्य तस्मिन् भानौ सूर्येप्रविष्टदृष्टिंस्थापितचक्षु
षं तं अर्जुनंपरितः तस्यासमंतात् भागे अग्निः भूयोपिपुनरपिविपिनंखांडववनं भोक्तुंदिशदेहिइतिवदन् प्रेम्णास्नेहेन उपरुंधन् गतिरोधपू
र्वकाग्रहंकुर्वन्निवदृश्यतेस्मदृष्टोलोकैरितिशेषः अनयोत्प्रेक्षयापंचाग्नितपश्चर्यांचकारेतिद्योत्यते ॥ ६२ ॥ ॥ ६७ ॥ ॥ ६७ ॥ १६

फलपत्रजलानिलानां अशनानि देहनिर्वाहार्थं भक्षणानि क्रमशः प्रविहाय उत्तरोत्तर भक्ष्यस्वीकार पूर्वकपूर्वत्यागं कृत्वा तपस्यतः [illegible]
जपस्य अर्जुनस्य अक्षगणः इंद्रियवर्गः रुद्राक्षसमूहश्च विषयेषु शब्दस्पर्शादिषु लोलतां सतृष्णतां न प्रपेदे न प्राप अपितु कराग्र एव लोलतां चंचलतां प्र
पेदे विषयेषु निरिच्छः सन् अक्षमालया मंत्रजपं चकारेति भावः ॥ ६२ ॥ सः वासविः अर्जुनः तदा तपोविधौ पंचाग्नितपोविधाने पावकेन अग्निना धनंजय
त्वेन यद्बांधवं बंधुत्वं स्वजनत्वमिति यावत् तस्मात् वेष्टितः बभूवेति गम्योत्प्रेक्षा बभूव किमित्यर्थः अंगहेमो भवान् वैरिणं मच्छत्रुं तं अंगराजं कर्णं अजीज

फलपत्रजलानिलाशनानि प्रविहाय क्रमशस्तपस्यतोस्य विषयेषु न लोलतां प्रपेदे विजयस्याक्षगणः कराग्र एव ६२ तपोविधौ
स पावकेन सर्वदिक्षु वासविस्तदा बभूव वेष्टितो धनंजयत्वबांधवात् अजीजनत्त्वमंगराजमंग वैरिणं भवानिती वरोषितो दिनेश एव
वक्षः रक्षिपत् ६४ पाराशरि प्रापितमंत्रभोगैराधयन् शंकरमंतरंगे सप्तापि च र्षीस्तपसा विजेतुं सप्तत्वमापत्स्वयमेक एव ॥ ६५

नत् उत्पादितवान् इति हेतोः रिवरोषितः रोषं प्राप्तः सन् दिनेश एव सूर्य एव वक्षः अक्षिपत् अन्योपि शात्रुपितरं सरोषं पश्यातेत ॥ ६४ ॥ पाराशरिणा व्यासे
न प्रापितैः उपदिष्टैः मंत्रभोगैः अंतरंगे अंतःकरणे शंकरं आराधयन् सः अर्जुनः स्वयं एक एव सन् तपसा सप्तापि ऋषीन् वसिष्ठादीन् विजेतुं सप्तत्वं सप्त
संख्यावैशिष्ट्यं आपेत्याश्चर्यं सप्ताभिः जटाभिः सहितः सप्तः तत्त्वमिति तत्परिहारः सप्ताः सप्ताश्च तनुत्थारुणकिरणानिभाः पातु विभ्रच्छिनेत्र इत्यत्र
त्तापदस्य जटावाचकत्वं दृश्यते ॥ ६५ ॥ ॥ ६७ ॥ ॥ ६७ ॥ ॥ ६७ ॥ ॥ ६७ ॥ ॥ ६५

मघोनः इंद्रस्यतनयः सुत्रः अर्जुनः तत्तादृशेन अतिदुष्करेणेत्यर्थः तपसातरुणेंदुमौलिं शिवं कृपापरवशं कृपाधीनं तन्वन् कुर्वन् सन् फलानिउपरि
नन फलानिलिप्सुरिव ग्रहीतुमिच्छुरिव उपरि ऊर्ध्वदेशे बाहुंउद्यम्य धरणौपादाग्रमेवप्रविधाय कृत्वा तस्थौ अन्योपिउच्चदेशस्थ फलानिग्रहीतुं
पादाग्रेणतिष्ठन् बाहुमुत्क्षिपति॥ ६६॥ वायुंप्राणवायुंनिरुध्यनिभृतंअत्यंततपस्यतः अस्यअर्जुनस्यशिरसः सकाशात् समुत्थितादशादिक्षुवि

तत्तादृशेनतपसातरुणेंदुमौलिं कुर्वन्कृपापरवशंतनयोमघोनः पादाग्रमेवधरणौप्रविधायतस्थावुद्यम्यबाहुमुप
रीवफलानिलिप्सुः॥ ६६॥ निरुध्यवायुंनिभृतंतपस्यतःशिरःसमुत्थादशादिविसृत्वरी नटत्स्फुलिंगानवधूमसंततिः
स्फुटीचकारास्यधनंजयाभिधां॥ ६७॥ तस्याथनारदमुखात्तपसःप्रभावंश्रुत्वाहरस्त्रिजगतामधिपोदयालुः देव्या
दृशासदसिसूचिततद्दिदृक्षोदित्सन्नभीष्टमपिलुब्धकतामयासीत्॥ ६८॥ ॥ ॥ ॥

सृत्वरीप्रसरणशीला नटंतः इतस्ततोगच्छंतः स्फुलिंगाः यस्यांसानवाधूमसंततिः धूमपरंपरा धनंजयइति अभिधां नाम स्फुटीचकार अन्वर्थांच-
कार॥ ६७॥ अथसदसिसभायांनारदमुखात् तस्यअर्जुनस्यतपसः प्रभावसामर्थ्यं श्रुत्वादयालुः देव्यापार्वत्या दृशानेत्रव्यापारेणसूचिता तस्यअर्जुन १७
स्यदिदृक्षादर्शनेच्छायस्यसः हरः अभीष्टंतन्मनोगतं फलंदित्सन्नपिदातुमिच्छन्नपिलुब्धकतांलोभवत्तांकिरातत्वंच अयासीत्प्रापत्॥ ६८॥ ॥

किराततेष धारणंस्वनिकटस्थपदार्थैः फलभंजातमित्याह हेरंबेति हेरंबस्यगजाननस्य गंडयोर्मदपंकः तस्यविशेषकः तिलकः अंकः चिन्हं य-
योस्तौस्कंदस्य औपवाह्यशिखीवाहनमयूरः तस्यपिंछैः बर्हैः विलासचूडे लीलाकिरीटौ ययोस्तौ भूषानद्याः शिरोभूषणनद्याः भागीरथ्याः त
टरुहाणां तीरस्थवृक्षाणांछदैः पत्रैः क्लृप्तानिकृतानिवस्त्राणियाभ्यांतौकोदंडिनौ धनुर्धरौ कुहनाकिरातौ किरातीचकिरातश्चकिरातौ कुहनया
मायया किरातौ व्यरुचतां अशोभेतां॥ ६९॥ शाबरत्वंजुषतेभजतेसौ शाबरत्वजुट् तस्यवरस्यश्रेष्ठस्य पुंसः शिवस्य शशिखंडात् पदात् शाकारसं

हेरंबगंडमदपंकविशेषकांकौस्कंदौपवाह्यशिखिपिञ्छविलासचूडौ भूषानदीतटतरुच्छदक्लृप्तवस्त्रौकोदंडि
नौव्यरुचतांकुहनाकिरातौ॥ ६९॥ शाबरत्वजुषोवरस्यपुंसः शशिखंडान्नुशकारसंविधानं भजतिस्मतदाशि
खंडभावंभगवन्मस्तकभूषणंयदेषः॥ ७०॥

विधानंनुशकारयोगः किमु कुतएतदितिचेत् तदाशाबरत्वधारणसमये भगवतः शिवस्यमस्तकभूषणंएषः शशिखंडः शिखंडभावं अवशिष्ट
शिखंडत्वंभजते धारयति अयंभावः सदाशिवस्यवरपुरुषस्वरूपं आसीत् तदामस्तके शशिखंड आसीत् यदाशबरः तदामस्तकेशिखंडोमयू
रपिञ्छमासीत् तस्मात् बवयोरभेदात् वरपुरुषेणभगवतायदाशाबरत्वंस्वीकृतंतदामस्तकभूषणशशिखंडात् वरपदस्य शाकारयोगेनश
बरइतिसंज्ञाजातामस्तकभूषणस्य अवशिष्टशिखंडइतिसंज्ञाजातेति॥ ७०॥ ॥ ७॥ ॥ ७॥ ॥ ७॥ ॥

॥गद्यं॥ तदानीमेव किरातरूपधारणसमये एव रजतगिरिशिखरात् कैलासशिखरात् निर्गच्छंतौ किमेतदिति सांशयिकैरपि किरातरूपमवलो
क्य किमर्थमेतत्कृतं इमौ अस्मत्प्रभू वा नवेत्यादि संशयाविष्टैरपि तयोः अनुसरणे सेवार्थं पश्चाद्गमनविषये उचितवेषविरचनायां आकुलैः व्यग्रैः

॥गद्यं॥ तदानीमेव रजतगिरिशिखरान्निर्गच्छंतौ किमेतदिति सांशयिकैरपि तदनुसरणोचितवेषविरचनाकुलैः प्रमथ
कुलैः परिवार्यमाणौ समुच्चलितलांगूलमितस्ततो धावद्भिर्दूरचारश्रमविदारितवदनलंबायमानरसनाग्रपातिनीभिः सृ
णिकाकणिकाभिर्वनपद्धतिं शुद्धतरीकुर्वद्भिर्द्रुततरश्वसितकंपमानावयवैस्तेषु तेषु वनगुल्मेषु श्वापदानन्विष्यान्विष्य
हुंकारमात्रदद्भिर्विश्वनिगमविश्वकद्रुभिरविमुच्यमानपार्श्वभागौ दीपकमृगायमाणनिजहरिणशावकानुधाव्यमानपार्श्व
भागौ प्रशमिततुहिनगिरिजडिमोद्वेगेन भाविनि पदे पदे वनदेवताभिरर्घ्यमाणस्फुरत्तरुप्रसूनास्तरणेनार्हिमवतः कटकप
थेन सविलासं संचरमाणौ कावेतावदृष्टपूर्वौ वनमस्मदीयमाक्रमत इति रोषकषायिततया निवारयितुकामैरपि तेजोविशेष
प्रतिहतोत्साहैरारण्यैरन्यैः शबरयुवभिः केवलमालोक्यमानौ जटावल्लरीमूलमुकुलीभवदंजलिभिस्तपस्विपुंजैर्नभसि वि
मानवेगं निरुध्य हर्षाश्रुभिः सममभिवृष्यमाणजयशब्दौ तौ जगदादिमौ दंपती सविनयमुपासीनस्य शुनासीरसुतस्य तपो १८
वनसीमानं शनैः शनैरासीदतां॥ १८॥ प्रमथकुलैः प्रमथगणसमूहैः परिवार्यमाणौ तौ जगतः आदिमौ कारणभूतौ दंपती उमामहेश्वरौ सवि

नयं उपासीनस्य उपासनां कुर्वतः शुनासीरस्कृतस्य अर्जुनस्य तपोवनसीमानं शनैः शनैः आसीदत्तां प्रापतुः कथंभूतौ दंपती समुच्चलितानि लांगूला
निपुच्छानि यस्मिन्कर्मणि यथा तथा इतस्ततो धावद्भिः दूरचारेण दूरगमनेन नयः श्रमः तेन विदारितेषु प्रसारितेषु वदनेषु लंबमाना रसनाः जिह्वाः
तासां अग्रेभ्यः पतंति तन्वछीलाभिः सृणिकानां लालानां कणिकाभिः बिंदुभिः वनपद्धतिं वनमार्गं सुरुतरीं कुर्वद्भिः द्रुततरेण श्वसितेन कंपमानाः
अवयवाः येषां तैः तेषु तेषु वनगुल्मिषु वनगुल्मविशिष्टस्थलेषु श्वापदान् शशमृगादीन् अन्विष्यान्विष्य मृगित्वा मृगित्वा हुंकारं आचरद्भिः कुर्व-
द्भिः विश्वनिगमाः समस्तवेदा एव विश्वकद्रुवः मृगयाकुशलश्वानः तैः अविमुच्यमानाः युक्ताः पार्श्वभागाः ययोस्तौ तथा दीपकमृगः दीपकं वदने
गृहीत्वा गमनकर्ता लघुपशुस्तं हृदा चरन् यः निजहरिणशावकः तेन अनुधाव्यमानः पार्श्वभागः ययोस्तौ तथा भराभितः तुंहिनगिरेः हिमाचल
स्य जडिम्नः शैत्यात् उद्वेगो भयं येन तेन वेगेन अर्थात् वनदेवतासंबंधिनेति ज्ञेयं भाविनि पदे पदे पदनिक्षेपस्य स्थले स्थले वनदेवताभिः अर्घ्य
माणं विरच्यमानं सुरतरुप्रसूनानां कल्पवृक्षपुष्पाणां आस्तरं यस्मिन् तेन हिमवनः कटकपथेन सविलासं यथा तथा संचरमाणौ तथा कौ एतौ पूर्वं दृ
ष्टौ दृष्टपूर्वौ तथा न भवतः अदृष्टपूर्वौ अस्मदीयं वनं आक्रमतः इति मनस्यानीयरोषकषायितनतपाकोपकलुषिततया निवारयितुकामैरपि तेजोवि-
शेषेण प्रतिहत उत्साहः निवारणोद्योगो येषां तैः अन्यैः शबरयुवभिः तरुणशबरैः केवलं आलोक्यमानौ तथा जटावल्लर्याः जटालतायाः मूले
मुकुलीभवंतः कुड्मलीभवंतः अंजलयो येषां तैः तपस्विनां वपसां स्वर्गप्राप्तानां सिद्धानां पुंजैः समूहैः नभसि विमानवेगं निरुध्य हर्षाश्रुभिः संभ्र
मितं दृश्यमाणाः विकीर्यमाणाः जयइतिशब्दाः ययोस्तौ ॥१६॥ ॥१७॥ ॥१८॥ ॥१९॥ ॥२०॥

तत्रखलु ॥ प॰ आपादंपादपर्यंतं लंबंते आपादलंबिन्यः जटाः यस्य तं आतपमात्रं सूर्यकिरणमात्रं भक्षयति तथाभूतं सूर्ये दृष्टिं निधाय सोष्णसहमित्यर्थः ऊर्ध्वीभवन् भुजो यस्य तं उदारेण महता तपसा कृशांगं कुरुषु वीरं मुनींद्रं राजर्षिश्रेष्ठं एनं अर्जुनं दृष्ट्वा कृपादृष्ट्या अनुगृह्य अनुग्रहं कृत्वा कृपापात्रं कृत्वेत्यर्थः भवान्याः कृतवत्सलता त्रेधा त्रिविधा बभूव पूर्वं हेरंबकार्तिकेययोः कृतयोर्भवान्याः वत्सलता द्वेधा आसीत् इदानीमेतादृशमर्जुनं दृष्ट्वा कृतवदस्मिन्वत्सलता जातेति त्रेधा बभूवेत्यर्थः ॥ ७१ ॥ खुरपातैः पादाग्रताडनैः महीं क्षोदयन् चूर्णीकुर्वन् कोपेन कुटिलः रौद्रः कोपि वनकोलः वनवरा

तत्रखलु ॥ प॰ आपादलंबिजटमातपमात्रभक्ष्यमूर्ध्वीभवद्भुजमुदारतपःकृशांगं दृष्ट्वानुगृह्य कुरुवीरमुनींद्रमेनं त्रेधा बभूव सुतवत्सलता भवान्याः ७१ क्षोदयन्नपि महीं खुरपातैः कोपि कोपकुटिलो वनकोलः घोरघूत्करणघोणमुपागात्कुक्षिमाश्रमभुवः कुरुसूनोः ॥ ७२ ॥ तं वीक्ष्य रौद्रवपुषं मृगशावकेषु त्रासाद्विशत्सु कटिलंबितवल्कभागान् पर्याकुले कलकलैरपि पक्षिजाले पार्थो निवृत्य नियमाज्जगृहे शरासं ॥ ७३ ॥

होपि शबरसमुच्चयार्थमपि शब्दः कुरुसूनोः अर्जुनस्य आश्रमभुवः कुक्षिं अभ्यंतरभागं घोरं घूत्करणं यस्याः सा घोणा नासिका यस्मिन्कर्मणि यथा तथा उपागात् उपागमत् ॥ ७२ ॥ रौद्रं भयकरं वपुः शरीरं यस्य तं वनवराहं वीक्ष्य मृगाणां शावकेषु कटेः सकाशात् लंबितान् वल्कभागान् वल्कलभागान् प्रति विशत्सु प्रविशत्सु सत्सु पक्षिजाले पक्षिसमूहेपि कलकलैः शब्दैः पर्याकुले संभ्रमाद्व्यग्रे सति पार्थः नियमात् निवृत्य समाधेर्व्युत्थाय शरासं धनुः जगृहे स्वीकृतवान् ॥ ७३ ॥ ॥ ७४ ॥ ॥ ७५

मुखरासशब्दाज्यालतायस्यसः एषः मुनिः अर्जुनः जिघांसुः हंतुमिच्छुः सन् जवात् वराहं यदा अभ्ययात् अभिमुखमगच्छत् तदा धनुः आकृष्य अनुयायिवर्गैः सेवकसमूहैः सह अभिधावन् वराहाभिमुखं धावन् शबरः ददृशे दृष्टः लोकैरितिशेषः ॥७४॥ सः अर्जुनः मया अनुद्रुते अनुधाविते अस्मिन्वराहे बाणंमामुंच हेजाल्म अविचारिन् मूर्ख अपेहि निवर्तस्व इतिकिराननेतुः शबरनायकस्यमनसः लक्ष्यंनकुर्वन् सन् वराहं अस्त्रस्य बाणस्य लक्ष्यंचकार तद्वचस्यनादरं कृत्वा वराहेबाणं मुमोचेत्यर्थः ॥७५॥ तदा युगपत् समुज्झिताभ्यां मुक्ताभ्यां शिवसव्यसाचिनोः

मुनिरेषयदाभ्ययाद्वराहंमुखरज्यालतिकोजवाज्जिघांसुः शबरोददृशेतदाभिधावन्धनुराकृष्यसहानुयायिवर्गैः ॥७४॥ मामुंचबाणंमदनुद्रुतस्मिन्नपेहिजाल्मेतिकिराननेतुः वचःसलक्ष्यंमनसोनकुर्वन्वराहमस्त्रस्यचकारलक्ष्यं ॥७५॥ शिलीमुखाभ्यांशिवसव्यसाचिनोःसमुज्झिताभ्यांयुगपत्किटेस्तदा समंविभज्यायुरभुज्यतक्षणंसहोदराभ्यामिवपैतृकंधनं ॥७६॥ गद्यं॥ ततःकुपितोपिकुरुप्रवीरस्तपःशांततयानातिपरुषमुवाच॥१७॥ ॥

शिवार्जुनयोः शिलीमुखाभ्यां बाणाभ्यां क्षणात् किटेः वराहस्य आयुः समंविभज्य अभुज्यत भक्षितं अपहृतमित्यर्थः काभ्यांकिमिव सोदराभ्यां सोदर्यबंधुभ्यां पैतृकंपितृसंपादितंधनमिव यथासोदराभ्यांपैतृकंधनंसमंविभज्यभुज्यतेन तद्वत् उभयोर्बाणप्रहाराभ्यांवराहोमृतइतिभावः ॥७६॥ गद्यं॥ तदाप्रकुपितोपिकुरुवीरः अर्जुनः तपःशांततया तपसावलंबितशांत्या अतिपरुषं अतिकठोरंनोवाच॥१७॥ ॥७॥ ७

॥ पद्यं ॥ हे शबर मम आवसथं स्थानं आपतिते आयाते मया प्राक् पूर्वं लक्षीकृते अस्मिन् वराहे यत् यस्मात् त्वया प्रहृतं त्वया बाणप्रहारः कृत इत्यर्थः तत्तस्मात्त्वं शापस्य अथवा धनुषः वशो अधीनतायां असि मम शापेन बाणप्रहारेण वा नाशार्होऽसीत्यर्थः तथापि अद्य मम तपसा भुजोष्मणा भुजप्रतापेन च सोढं शान्त्या तपसा असाम्यात् भुजोष्मणा च सोढमिति ज्ञेयं ॥ ७७ ॥ इति तस्य मुनेः अंतर्दर्पवसस्य अभ्यंतरीयगर्वरसस्य परीवाहानां स्रो-

अस्मिन्ममावसथमापतिते मया प्राग्लक्षीकृते शबर यत्प्रहृतं त्वयानन शापस्य वाथ धनुषोऽसि वशे तथापि सोढं मया

घ तपसा च भुजोष्मणा च ॥ ७७ ॥ गद्यं ॥ इति तस्य मुनेरंतर्दर्परसपरीवाहवेणीमिव वाणीमाकर्ण्य क्षोणीधरध

न्वापि सस्मितं प्रत्यभाणीत् ॥ १८ ॥ पद्यं ॥ मृदुबुद्धिरंग वचसैव लक्ष्यसे मृगहिंसनं विपिनसीमनीदृशं शतशः

स्वधर्म इति पठ्यते बुधैः शबरस्य वाथ दनपोधनस्य वा ॥ ७८ ॥ ॥ ॥ ॥

तसां वेणीमिव सर्वस्रोतसां मेलनेन महाप्रवाहमिव वाणीं आकर्ण्य क्षोणीधरः मेरुर्हिमालयो वा त्रिपुरदाहे धनुर्यस्य सः शंकरोऽपि सस्मितं प्रत्य-

भाणीत् प्रत्युत्तरमवोचत् ॥ १८ ॥ पद्यं ॥ अंग हे मुने वचसैव त्वदुक्तवचनेनैव त्वं मृदुबुद्धिः मंदबुद्धिः लक्ष्यसे ज्ञायसे कुत एतदिति चेत् वनसी- २०

मनि ईदृशं मृगहिंसनं मृगयया वनपशुहिंसा स्वधर्म इति बुधैः शतशः शतवारं पठ्यते स स्वधर्मः शबरस्य अथवा तपोधनस्य मुने वद ब्रूहि ॥ ७८ ॥

तत्तस्मात् स्वकुलाचारात् अप्रमाद्यतेसावधानतयाप्रशंसनप्राप्नुवते मह्यं अयुक्तकारिणापित्वयातपस्विबाहाव्यपि आहोपुरुषिकाशापेन बाहुबलेनयात्वन्मा-
शंकुर्यामितिगर्वेण आत्मनिसंभावनाकियदूरं अतिबहुप्रकाश्यतेप्रकटीक्रियते स्वाचारभ्रष्टेन बलहीनेन त्वयामदपकारःकिंचिदपिकर्तुंनशक्यइतिभा-
वः ७९ कुतएतदितिचेत्तपसोऽशुद्धत्वाद्बाहुबलस्याल्पत्वाच्चेत्याह संदृश्यतइति एनन्तवतपःअशुद्धंसंदृश्यते अवलोक्यते खलु यत् तपः जंतूनांप्राणिनां हिं
सनविधौहिंसाकरणेदृढबद्धःकच्छोयेनतत् सन्नद्धमित्यर्थः इयंपरिहासोक्तिः हिंसापरत्वादशुद्धमित्यर्थः इदं अकिंचित्करं भुजबलंच आस्तां पन

ग० तत्स्वकुलाचारादप्रमाद्यतेमह्यमयुक्तकारिणापिकियद्दूरंप्रकाश्यतेतपस्विबाहाव्याहोपुरुषिका ७९ प० संदृश्यतेखलुतपस्तवशु
द्धमेतद्यज्जंतुहिंसनविधौदृढबद्धकच्छं आस्तामिदंभुजबलंचमृगान्ययस्मिन्साहायकंयदुपजीवतिमेशरस्य ७९ ईदृशींवचनरीति
पपास्यमेहिसांत्वयकियानमिमेत्वं अक्ष्णिकिंचिदरुणिम्निजगत्यामंतकोपिमदतीवबिभीयात् ॥ ८० ग० इतिशंकरस्यन्यक्कारवा
देनसातंकःकुरुशशांकःपुनरपिगिरंकामप्येवमंकुरयामास २० अस्मिन्मृगान्ययवराहवधममशबरस्यसाहायकंसहायत्वंउपजीवतिअवलंबते ७९
ईदृशीं अस्मिन्ममावसयमापतितेति पद्योक्तप्रकारांवचनरीतिं अपास्यनूत्यजन् सन् एहि आगच्छ सांत्वय ममापराधंक्षमस्वेत्यादिवचनेन मत्सांत्वनंकुरु त्वंमे
कियानसिमत्पुरतोल्पत्वोसीत्यर्थः अक्ष्णिममनेत्रेकिंचिदरुणिम्निसतिकोपेनरक्ततायांसत्यांजगत्यांजगति अंतकोपिमत्तूमत्तः अतीवबिभीयात् भयंप्राप्नुया
त् अन्यस्यकावार्तेत्यर्थः ८० इतिशंकरस्यन्यक्कारवादेनधिक्कारवचनेन सातंकःसंतमःकुरुशशांकःकुरुश्रेष्ठःपुनरपिएवंवक्ष्यमाणप्रकारांकामपिगिरंअंकुर

यामास भकरीचकार २० हेवनेचरकुलाधम यस्मात् हप्तः गर्विन: त्वं स्वजनस्यमन:पुलकयन् सन् एवं वदसि तस्मात् उपांतजुषः समीपवर्तिन्याः किरात्याः
स्वस्त्रियाः कपोलस्य गल्लस्य मित्रं शोभाकरमित्यर्थः ताटंकमेव कर्णभूषणमेव असंशयं निःसंशयं नसहसे किरात्याः सौभाग्यं न सहसे इत्यर्थः अनेन भाषणे
न त्वं मम वध्योसीति भावः ॥ ८१ ॥ सर्वेगणाः प्रमथादयः तादृक् उक्तप्रकारं श्रवणदाहि कर्णयोस्तापकरं मुनेः वचः निशम्य श्रुत्वा हृदि मनसि रुषा रोषेण निजि
घांसवोपि निहंतुमिच्छव: संतोपि स्मितंगर्भे अंतर्भागे ययोस्तौ गंडौ यस्य तत् देव्याः पार्वत्याः वदनं विलोक्य तूणात् इषुधेः अर्धं यथा तथा कृष्टः आकृष्टः

प॰ यस्माद्वनेचरकुलाधम जल्पसि त्वमेवं मनः पुलकयन्स्वजनस्य हृप्तः तस्मादसंशयमुपांतजुषः किरात्यास्ताटंकमेव सहसे न कपोलमित्रं ८१
तादृग्वचः श्रवणदाहि मुनेर्निशम्य सर्वे गणा हृदि रुषा निजिघांसवोपि देव्या विलोक्य वदनं स्मितगर्भगंडं तूणार्धकृष्टविशिखेन करेण तस्थुः
८२ अथ भिल्लमल्लकुरुवल्लभावुभौ परिफुल्लमल्लकुलशल्यपल्लवैः स्थगितावलोकसरणिं दिवौकसां समरं भयंकरमवीवितेनतुः ८३

विशिखः बाणो येन तेन करेण तस्थुः तिष्ठंतिस्म देव्या वदनांतर्गतहास्येन रोषाभावं ज्ञात्वा यं वध्यो वा न वेति संदेहात् आज्ञां प्रतीक्षमाणा अर्धकृष्टविशि
खेन करेण तस्थुरिति भावः ॥ ८२ ॥ अथ भिल्लमल्लः शबरश्रेष्ठः कुरुवल्लभः कुरुश्रेष्ठश्च उभौ भयंकरः जयो यस्य तं समरं संग्रामं वितेनतुः चक्रतुः कथं
भूतं समरं परिफुल्लैः विकसितैः मल्लकुलानां स्थूलबाणसमूहानां शल्यपल्लवैः कृत्वा दिवौकसां देवानां स्थगिता आच्छादिता अवलोकसरणिः दर्शन
मार्गो यस्मिन् तं अत्र दिवौकसामिति पदार्थस्य समासैकदेशावलोकपदार्थेन संबंधेपि नित्यसापेक्षत्वान् समासः ॥ ८३ ॥ ॥ ७ ॥ ॥ ७ ॥ २१

सएषः अर्जुनः श्रवणात् कर्णात् आलंबते ननु श्रवणालंबि यत् जपाक्षसूत्रं जपसाधनरुद्राक्षमाला तस्य घर्षात् घर्षणात् श्लथाः शिथिलाः संधयो ये
षां तथाभूताः गरुतः पत्राणि येषां तैः बाणैः प्रमथे शंशिवं अवाकिरत् आच्छादयत् कैः किमिव यथा दिव्यं अलौकिकं प्रतिमालिंगं तस्य प्रतिमारू
पं लिंगं प्रसूनपुंजैः अवकिरंति तद्वत् ॥ ८४ ॥ हरे सहासरुषीव सक्रोधे इव बाणप्रहारगर्वोक्तिजन्यरोषाभावात् इवेत्युक्तिः विकृष्टं आकृष्टं चा
पं येन तस्मिन् सति देवी गौरी शैलसुतापि जाताशंका प्रहारसंशयो यस्यास्तथाभूता सती मघवत्सुतस्य अर्जुनस्य मंगलाय कल्याणाय मनसा न

श्लथसंधिगरुद्भिरपवाणैः श्रवणालंबिजपाक्षसूत्रघर्षात् प्रमथेशमवाकिरत्स दिव्यं प्रतिमालिंगमिव प्रसूनपुंजैः ८४ सरु
षीव हरे विकृष्टचापे सहसा शैलसुतापि जातशंका मघवत्सुतमंगलाय देवी मनसा यात इषुः श्रुतिं जजाप ॥ ८५ ॥ ससं
भ्रमाकृष्टधनुर्गुणोपि शंभुः कृपांभोनिधिरिंद्रसूनोः संबद्धमात्रान्कति चिच्च देहे चक्रे पराच्यान्कति चिच्च बाणान् ॥ ८६ ॥

तु प्रकटं यात इषुः श्रुतिं यात इषुः शिवतमेति याजुष रुद्रसूक्तऋचं जजाप तस्या अयमर्थः हे रुद्र ते इषुः धनुश्च सुखकारकं भवतां लक्ष्याणि सुखी
नि भवंतु तैरस्मान्सुखयेति देव्यापि जातशंका भूत् किमन्ये वक्तव्या इत्यपि शब्दार्थः यद्वा शैलमघवता शत्रुत्वेन शत्रुसुतापि तत्सुतकल्याणार्थं श्रु
तिं जजाप किं पुनरन्य वक्तव्या इत्यर्थमपि शब्दः सर्वेषां मंगलाशंसने सौजन्यं कारणं ॥ ८५ ॥ कृपांभोनिधिः शंभुः ससंभ्रमं सत्वरं यथा तथा आकृष्टः ध
नुर्गुणो येन तादृशः सन्नपि इंद्रसूनोः देहे कति चित् बाणान् संबद्धमात्रान् स्पृष्टमात्रान् चक्रे कति चित् बाणान् अपराच्यान् लक्ष्यात् च्युतांश्च चक्रे ८६ ॥ ॥

विजयस्य अर्जुनस्यबाणाः शंभुंविगाह्यप्रविश्यपुनः दृष्ट्योर्नेत्रयोःपदंविषयत्वंनपुपुषुः दृग्गोचरानबभूवुरित्यर्थः शंभौलीनाबभूवुरितिभावः एत-
देवम्लेषोत्थापितार्थांतरन्यासेनसमर्थयति नरादिति मार्गणाःबाणाःयाचकाश्चउदारात्महतःदातुश्चनरात् अर्जुनात् मनुष्याच्च उदारतरंविद्याप्र
त्यर्थः लुब्धं लुब्धकं शबरं लोभिनंच अधिगम्यप्रकाशंप्रकटतांप्रसिद्धिंनयांतिनप्राप्नुवंति॥ ८७॥ पूर्वंकुपितःनिषंगयोःतूणीरयोःयुगलेनिःस्वबा

विगाह्यशंभुंविजयस्यबाणाःपुनःपदत्वंपुपुषुर्नदृष्ट्योः नरादुदारादभिगम्यलुब्धंनमार्गणायांतिपुनःप्रकाशं
८७निःस्वेनिषंगयुगलेनितराममर्षीचापेनमूर्ध्निगिरिशंपुरएवदेव्याः पार्ष्णिप्रमुक्तधरणिःप्रजहारवेगात्कुर्वं
न्व्रणंसकुपितःशशिखंडमित्रं॥ ८८॥ धनुषाभिहतात्समुत्थितेधरकन्यारमणस्यमस्तकात् विपुलैरिव
रक्तशीकरैर्विनिपेतेमणिभिःफणाभृतां॥ ८९॥ ॥ ॥ ॥ ॥ ॥

णोःरिक्तेसति नितरांअमर्षीक्रोधनःपार्ष्णिभ्यांपादपश्चाद्भा
गाभ्यांप्रमुक्ताधरणिर्येनसः अर्जुनःदेव्याःपुरःअग्रभागेएवगिरिशंमूर्ध्निचापेनवेगात्प्रजहार प्रहृतवान् किंकुर्वन् शशिखंडस्यमित्रंसहचरंव्र
णंकुर्वन्सन् शिवःतंव्रणं शशिखंडवत् भूषणत्वेननित्यंदधारेत्यर्थः॥८८॥ धनुषाअभिहतात् ताडितात् धरकन्यारमणस्यशिवस्यमस्तकात्स २२
मुत्थितेःउत्पतद्भिःविपुलैःरक्तशीकरैरिवरक्तबिंदुभिरिवफणाभृतांभूषानागानांमणिभिःफणासंबंधिलोहितरत्नैःनिपेतेपतितं॥ ८९॥ ॥

जगतांजनकस्यतस्यदेवस्यशिवस्यचित्तेपार्थप्रहारान्‌जनुः उत्पत्तिर्यस्यतस्यप्रमदांबुराशेः हर्षसमुद्रस्यभूषाधुनीशिरोभूषणभूताभागीरथीत
स्याःतटभुविद्विपवक्त्रस्यगजाननस्यबाल्येवप्रक्रियाभिःतिर्यक्कृदंतप्रहारैःउदितंउत्पन्नःप्रमदःहर्षःकणःबिंदुःअभूत्‌ शिवेनपार्थप्रहारजन्यह
र्षसमुद्रस्यपुरतःस्वपुत्रगजाननबालक्रीडासंबंधिप्रहारजन्यहर्षःबिंदुवदत्यल्पोमानीत्यर्थः१०॥ग०तत्रसःगांडीवदंडोपिरखांडवेतक्षकवध्वाःवध
स्यसाधनतयाकारणतयाचिरंबहुकालंअयंगांडीवदंडःअस्मत्कुलस्यविरोधीवैरीइतिमनस्यानीयक्रोधनेःक्रोधविशिष्टैःतस्यशिवस्यजटावनकु

देवस्यतस्यजगतांजनकस्यचित्तेपार्थप्रहारजनुषःप्रमदांबुराशेः भूषाधुनीतटभुविद्विपवक्त्रबाल्यप्रक्रियाभिरुदितःप्रमदःक
णोभूत्‌ १०ग०तत्रसगां डीवदंडोपिरखांडवतक्षकवधूवधसाधनतयाचिरमयमस्मत्कुलविरोधीतिक्रोधनैस्तस्यजटावनकुटुंबि
भिःकुंडलभिर्भक्षितइवतत्क्षणंनालक्ष्यत २०ततोपिदैवविपर्ययःकिममुष्यमायाकिमितिचिंतापरतंत्रेणापिधैर्यदत्तहस्तो
त्साहेननिष्ठुजडात्मन्नर्जुनमेवंनिर्जित्ययशोर्जितुमिच्छसीतिकृततर्जनेनस्मितवाहनेनवृषभवाहनंप्रतिनियोद्धुमारेभे॥२१॥

टुंबिभिःजटावनवासिभिःकुंडलिभिःनागैःभक्षितइवतत्क्षणंतस्मिन्समयेनालक्ष्यतनादृश्यत गांडीवोपिशिवमस्तकेलीनोभूदितिभावः॥२०॥ततः
शबरशरीरे शस्त्रलयानंतरं अयंशबरदेहेशस्त्रलयःममदैवस्यविपर्ययःप्रतिकूलताकिं अथवा अमुष्य शबरस्यमायाकिंइत्याकारिकायाःचिंतायाः
परतंत्रेणापिइतिचिंताक्रांतेनापीत्यर्थःधैर्येणदत्तःहस्तावलंबोयस्यतथाभूतःउत्साहःयुद्धोत्साहोयस्यतेन हेजडात्मन्‌ मंदबुद्धे शबर निष्ठएवंभाय

या अर्ज्जुनं विनिर्जित्य यशः अर्जितुं संपादयितुं इच्छसि इति वा कु· इति वचनेन कृतां तर्जनां भर्त्सनां येन तेन सितवाहनेन अर्ज्जुनेन वृषभवाहनं प्रतिशि
वं प्रतिनियोद्धुं बाहुयुद्धं कर्तुं आरेभे आरब्धं ॥ २१ ॥ पद्यं ॥ परूषकठिने मुनिमुष्टेः ताडने लुब्धकस्य शबरस्य वाम वक्षसि वक्षसः वामभागे इत्यर्थः
पतिते सति किरातिकायाः तत्पत्न्याः शबर्याः सितानां शुभ्राणां गुंजामणीनां हारयष्टयः शिथिलाः सत्यः जगलुः गलंतिस्म शिववामांगस्य पार्वतीत्वात्
इति भावः ॥ ९१ ॥ हरोपि भृशं उपवासैः कृशो मुनेः उरसि स्वीकृतं मुष्टिमार्दवं येन तथाभूतः सन् प्रजहार प्रहृतवान् मुष्टिमार्दवस्वीकारफलमुत्प्रेक्षते पी

॥ पद्यं ॥ परुषे मुनिमुष्टिताडने पतिते लुब्धकवामवक्षसि शिथिलाजगलुः किरातिकायाः सितगुंजामणिहारय
ष्टयः ॥ ९१ ॥ उपवासकृशो भृशं मुनेरुरसि स्वीकृतमुष्टिमार्दवः प्रजहार हरोपि पीडनात् परिहर्तुं स्वमिवास्य हृद्गतं
॥ ९२ ॥ ग ॥ इति परस्परमुष्टिप्रहारवृष्टिपरिमृष्टवनकुंकुमपरागभस्मांगरागौ सरभसमेकेन बाहुना जटासु गृहीत्वा
परेण वलयितकंठनालौ तौ शबरतपोधनौ यदा महत्यामधित्यकायामापततां ॥ २२ ॥ डनादिति अस्य मुनेः हृदि गतं विद्यमानं

स्वं आत्मानं पीडनात् पीडायाः परिहर्तुमिव रक्षितुमिव ध्यानेन हृदि निरुद्धस्यात्मनः पीडा मा भूदिति मृदुमुष्टिना प्रहृतवान्किमिति भावः ॥ ९२ ॥ म० इ
ति परस्परस्य मुष्टिप्रहारवृष्ट्या परिमृष्टौ वनकुंकुमपरागभस्मांगरागौ ययोस्तौ सरभसं सवेगं एकेन बाहुना जटासु गृहीत्वा परेण अन्येन बाहुना वलयितः २२
वेष्टितः कंठनालो याभ्यां तौ शबरतपोधनौ महत्यां अधित्यकायां हिमाचलोर्ध्वभूम्यां यदा आपततां ॥ २२ ॥ ॥ ६२ ॥ ॥ ६२ ॥ ॥ ६२ ॥

तदापतनसमये झटिति शीघ्रं घटितानि पिहितानि द्वाराणि यासां तासां दरीणां गुहानां गर्भे अंतर्भागे निरुद्धैः सिद्धमुनिमिथुनैः निबद्धः आरब्धः हाहाकारो यस्मिन्सः तीरवनं दूरं उत्सर्पिणीनां वीचीनां वेगो येन पूर्वं उत्पाटितं पश्चात् आकृष्टं मुनिजनानां पर्णशालासहस्रं येन तथाभूतः सुरस्रवंत्याः भागीरथ्याः पूरो यस्मिन्सः दर्वीकरविभोः शेषस्य कंधरायाः खर्वीकरणे नीचीकरणे पटुतरः समर्थतरः भारो यस्य सः उर्वीधरपतिः हिमालयः आसीत् २३
प० शंभुना अवाङ्मुखत्वेन अधोमुखत्वेन निपात्य पातयित्वा समुज्झितः त्यक्तः अतएव विमोहितः विशेषेण मूर्छितः अयं अर्जुनः तवजामातारं शिवे अ

ग० तदा झटिति घटितद्वारदरीगर्भनिरुद्धसिद्धमुनिमिथुननिबद्धहाहाकारः तीरवनदूरोत्सर्पिवीचीवेगोत्पाटिताकृष्टमुनिजनपर्णशालासहस्रसुरस्रवंतीपूरः दर्वीकरविभुकंधराखर्वीकरणपटुतरभारो यमुर्वीधरपतिरासीत् २४ प० अवाङ्मुखत्वेन निपात्य शंभुना समुज्झितायं ददृशे विमोहितः तवाद्य जामातरमिदं शममिमां निवेदयन्त्यद्रिमिव ब्रुवन् रहः १२ पार्थस्य तस्य भुजयोः परमेश्वरोसौ वीर्यं विलोक्य युधि विस्मयमानचेताः चापव्रणस्फुरनदीकणसेकशंकामप्युत्सृजन्मुहुरकंपयदुत्तमांगं १४ घमेइमां दशां प्राणावसानावस्थां

निवेदय इति अद्रिं हिमालयं रहः एवं तेब्रुवन्निव ददृशे दृष्टः पर्वते अवाङ्मुखत्वेन स्थिताविय मुत्प्रेक्षा १२ असौ परमेश्वरः युधि तस्य पार्थस्य भुजयोः वीर्यसामर्थ्यं विलोक्य विस्मयमानचेताः सन् चापव्रणे चापप्रहारजातमस्तकक्षते सुरनद्याः कणानां बिंदूनां सेकस्य शंकां क्षते शीतजलसेचनेनाधिकाव्यथा भविष्यतीति शंकामप्युत्सृजन् प्रमेदातिशयान्मनसि नानयन् सन् मुहुः उत्तमांगं मूर्धानं अकंपयत् शिरश्चालनेन पार्थस्य वीर्यधैर्यं च श्लाघयामास इत्यर्थः
१४

॥गद्यं॥ तथाविध एवासौ चिरदाचरितचेतनास्वागताचारः शनैः शनैरुत्थाय पुरतो घंटाभरणघणघणात्कारसहचरेण कंठगर्जि
तेन कर्णयोः परिफल्पितसुधासमोक्षमहोक्षेनिषदिवासं भुजमूलप्रसारितगिरिजापाणियुगनखरेखांकुरधोरणीद्विगुणीकृत
हारमणीरमणीयवक्षसं पार्षदगणांजलिकमलवनमध्यराजहंसायमानं मार्दवभारितशार्दूलचर्मनिर्मितपल्ययनमंकोप
रिभागातिर्यगर्पितैकचरणपल्लवसंवाहनपरेण शिलादकुमारेण दर्पदुर्ललननिवारणाय मुखबंधकशृंखलेन निरुध्य मुहुर्मुहुः क
रपुटास्फालितककुदशृंगेण शृंगिरिटिना चलक्ष्यमाणोभयपक्षभागं गांडीवताडनपीडितचूडाशशिनमाश्वासयितुमवतरद्भि
रुडुनिकरैरिव कुसुमवर्षैरवकीर्यमाणं जटाभसितकुसुमचीरधारिभिरत्तैरेव चतुर्भिराम्नायपुरुषैः परिपठ्यमानशतरुद्रीयवि
रुदप्रबंधमंबरे सविधमविलंबमानैस्तुंबुरुप्रभृतिभिः सूत्र वैणिकैरुपवीण्यमानभक्तजनरक्षणापदानप्रकरणकर्णपूरीकृतत
मालमंजरीमधुझरीमिषेण कटाक्षात्साक्षात्कृपामिव वर्षंतं प्रज्वलद्भिः परिष्कारपन्नगफणारत्नैर्नूत्नैः शरव्रणमिवानुबध्यमानाव
यवमासन्नावतंसशशिशकलागलितकिरणधारापातसीतासहिष्णुतयेव दंतपटगर्भवर्तिना स्मितेन सूचितहृदयप्रसादं भगव
तं महादेवमुदीक्ष्य पक्ष्मतटरुद्धनिमेषविटपिसमुत्पाटनपटुभिः प्रमोदाश्रुपूरैर्नंदी मातृकायमाणपुलकप्ररोहः सविनयमुपा- ॥ २४
सृत्य पादारविंदयोः सहस्रकृत्वः प्राणसीत्॥ २४॥ ॥ ॥ ॥ ॥ ॥
श्रीसदाशिवायनमः॥ ॥ ॥ श्रीपार्वतीपतयेनमः॥ ॥ ॥ ॥

॥ गु० ॥ तथाविधपंच अवाङ्मुखस्थित एव असौ अर्जुनः चिरात् बहुकालेन आचरितः कृतः चेतनायाः संज्ञायाः स्वागताचारः आगमनसत्कारो येन सः मूर्छो-
पगमेन प्राप्तसंज्ञः सन्नित्यर्थः पुरतः भगवंतं महादेवं उद्वीक्ष्य पक्ष्मतटेषु रोहंति उद्भवंतिते पक्ष्मतटरुहाः तेषां निमेषविटपिनां निमेषवृक्षाणां समु-
त्पाटने पटुभिः प्रमोदाश्रूणां हर्षाश्रूणां पूरैः नदीमातृकायमाणः नदीमातृकदेशवदाचरन् पुलकप्ररोहः रोमांचोद्गमो यस्य सः निर्निमेषः आनंदाश्रुपू-
र्णः सरोमांचः सन्नित्यर्थः सविनयं उपसृत्य शिवसमीपं गत्वा पादारविंदयोः सहस्रकृत्वः सहस्रवारं मार्णमीन् साष्टांगं प्रणनाम कथंभूतं महादेवं घं-
टाभरणानां घणघणत्कारस्य सहचरेण सहायेन घंटाशब्दयुक्तेनेत्यर्थः कंठगर्जितेन कर्णयोः परिकल्पितः संपादितः सुधारसपोषो येन तस्मिन् महोक्षे
महावृषभे निषद्वांसं आरूढं पुनः कथंभूतं महादेवं भुजमूलयोः प्रसारितस्य गिरिजायाः पाणियुगस्य नखरेखांकुराणां धोरणी वक्षसो धोभागादूर्ध्वं
क्रमेणावस्थिता निश्रेणीनया ह्यगुणीकृताभिः हारमणीभिः अरुणरत्नैः रमणीयं वक्षो यस्य तं पुनः० पारिषद्गणानां अंजलय एव कमलवनं तस्य म-
ध्ये शुभ्रत्वात् राजहंसायमानं ॥ पुनः० मार्दवेन भरितं युक्तं पत् शार्दूलस्य व्याघ्रस्य चर्म तेन निर्मितं पल्ययनं वृषभपृष्ठास्तरणं येन तं ॥ पुनः० अंक-
स्य उत्संगस्य उपरिभागे तिर्यगर्पितस्य तिर्यक् स्थापितस्य एकचरणपल्लवस्य संवाहनपरेण मर्दनपरेण शिलादकुमारेण नंदिकेश्वरेण दर्पेण यत्
दुर्ललनं दुश्चेष्टितं तस्य निवारणाय मुखबंधने कनकशृंखले निरुध्य वेगानिरोधं कृत्वा मुहुर्मुहुः करपुटेन आस्फालितं मृदु ताडितं ककुदस्य शृंग-
अग्रं येन तं तन भृंगिरिटिना लक्ष्यमाणो धियमाणो उभयपक्षभागो उभयपार्श्वभागो यस्य तं ॥ पुनः० गांडीवदंडताडनेन परिपीडितं व्यथितं चूडाशशि-
नं आश्वासयितुं अवतरद्भिः भूतलमागच्छद्भिः उडुभिः नक्षत्रसमूहैरिव अरुणकुंकुमपाणिपादरूपदर्शनमाणा वर्षैः रश्मिभिः अवकीर्यमाणं

आच्छाद्यमानं॥पुनः०जटाभस्मकुशवल्कलधारिभिः तैः प्रसिद्धैरेव चतुर्भिः आम्नायपुरुषैः वेदपुरुषैः परिपठ्यमानः शतरुद्रीयसंज्ञकः प्रबंधः यजुर्वे
दस्थमहत्वप्रतिपादकग्रंथो यस्यतं॥पुनः० अंबरे आकाशे सविधं समीपं यथातथा अवलंबमानैः अवस्थितैः तुंबुरुनामागंधर्वः सः प्रभृतिः आदिर्येषांतैः
सुर वैणिकैः देवगायकैः उपवीण्यमानानि वीणावादनेन सह गीयमाननिजभक्तजनरक्षणसंबंधीनि अपदानप्रकरणानि वृत्तकर्मप्रकरणबंधाः य
स्यतं॥पुनः० कर्णपूरीकृताकर्णावतंसीकृतायातमालमंजरीतस्याः मधुझरीमिषेणमकरंदप्रवाहमिषेण कटाक्षात् साक्षात् मूर्तिमतीकृपामिव वर्ष
तं॥पुनः० प्रज्वलद्भिः देदीप्यमानैः परिष्कारपन्नगानां भूषानागानांफणारत्नैः फणासंबंधिमाणिक्यैः नूत्नैः नूतनैः शरत्रणैरिव अनुबध्यमानाः रव

प॰ स्वामिन्मयाजडधियात्वयिदेवदेवेवाचाशरेणधनुषादृढमुष्टिनाच यत्तेचतुर्विधमकारिरणेतदागः क्षंतव्यमद्यभवताकरुणार्णवेन ९५

चिताः अवयवाः यस्यतं॥पुनः० आसन्नायाः समीपवर्तिन्याः अवतंस शशिकलायाः सकाशात् गलितायाकिरणधारातस्यापातेन स्वस्मिन्पतनेन-
यत् शीतंतस्य असहिष्णुतयेव असहनेनेव दंतपटयोः दंतवाससोः ओष्ठयोः गर्भे अंतर्भागेवर्तिनास्मितेन सूचितः हृदयप्रसादोयस्यतं॥ २४॥ पद्यं॥
प्रणामानंतरं आदौस्वापराधानांक्षमांप्रार्थयते स्वामिन्निति हेस्वामिन् प्रभोजडधियामंदबुद्धिनामयादेवानांब्रह्मादीनामपिदेवपूज्येप्रथमंवाचादुर्भाषणेनत
तः शरेणबाणप्रहारेणततः धनुषामस्तके धनुर्दंडताडनेन ततः दृढमुष्टिना वक्षसिदृढमुष्टिप्रहारेणचइति चतुर्विधंतेतवयत् आगः अपराधः रणे
संग्रामे अकारितत् आगः अद्यकरुणार्णवेनभवताक्षंतव्यं॥ ९५॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

॥गद्यं॥ इतिविज्ञापयंतं पारिजातस्यकल्पवृक्षस्य यःपल्लवतल्लजः प्रशस्तपल्लवः तस्यप्रतिमल्लस्य प्रतिभटस्य पाणिपल्लवस्य परामर्शनेन स्पर्श
नेन प्रमुषिता अपहृतारणवेदनायस्यतस्यतादृशं अंगंयस्यतं एनंप्लवंगकेतनं वानरध्वजं अर्जुनं अनंगशासनोपिएवंवक्ष्यमाणं अवादीत् अ
वोचत् ॥ २५॥ पद्यं ॥ हेप्रवीर युधिउक्तापराधेषुतृतीयेन धनुर्दंडताडनेन तवअपराधेन हृष्टः संतुष्टः यथाभवामि तथा भक्त्या तरुप्रसूनैः अ

॥गद्यं॥ इतिविज्ञापयंतमेनंपारिजातपल्लवतल्लजप्रतिमल्लस्यपाणिपल्लवस्यपरामर्शनेनप्रमुषितरणवेद
नांगंप्लवंगकेतनमनंगशासनोप्येवमवादीत् ॥ २५॥ यथातृतीयेनयुधिप्रवीरतवापराधेनभवामिहृष्टः तथा
नभक्त्यातपसांविभूत्यातरुप्रसूनार्चनयापिबल्क्या ॥२६॥ ॥ ॥ ॥ ॥

र्चनया पूजया कृत्वा बल्क्यामहत्यातपसांविभूत्यासमृध्यापि हृष्टःनभवामि त्वयावीरेणशस्त्राभावेपिधैर्येणकृत्वाममस्तकेप्रहारःकृत:
तज्जन्यसंतोषेणसर्वेपराधाःक्षांताइतिभावः॥२६॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥५॥ ॥५॥ ॥५॥

॥गद्यं॥ इतिसुधामाधुर्याः धुरीणं भारवाहकं अमृततुल्यमित्यर्थः वचनमभिधाय उक्त्वा ॥ २७॥ पद्यं ॥विभुःसदाशिवः तत्क्षणात्पूर्वं गुप्तीकृतान् तान् तान् धनुः इषूनपिसन्निधाप्यसन्निधिंगमयित्वा पांडवाय अर्जुनाय स्वं स्वकीयं अस्त्रं पाशुपतास्त्रमपिधनुषा आहृतेः ता डनस्यरीतेः पारितोषिकमिवसंतोषेणदीयमानं वेतनातिरिक्त दानमिवप्रदिदेशदत्तवान् ॥ ९७॥ अथ आश्चर्या आश्चर्यकारिणीवृत्तिःरू

॥गद्यं॥इतिसुधामाधुरीधुरीणंवचनमभिधाय॥ २७॥पद्यं॥तत्क्षणाद्धनुरिषूनपितांस्तान्सन्निधाप्यविभुर स्त्रमपिस्वं पाडवायधनुराहृतिरीतेःपारितोषिकमिवप्रदिदेश॥ ९७॥ तस्यायपाशुपतलाभदुरापदीप्तेर क्ष्णःसमक्षमपरिप्लुवपक्ष्मपंक्तेः आश्चर्यवृत्तिरखिलैरनुगामिभिःस्वैरंतर्दधेसभगवानमृतांशुमौलिः॥९८॥ ॥ इतिश्री अनंतभट्टकृतेश्रीमतिचंपुभारतेचतुर्थस्तबकःसमाप्तः॥ ४ ॥ श्रीकृष्णार्पणमस्तु॥ ॥छ॥ ॥

पांतरेणागम नादिव्यापारोयस्यसः भगवान् अमृतांशुमौलिः शिवः पाशुपतस्य अस्त्रस्य लाभेन दुरापाद्दूनरेषांदुर्लभादीप्तिर्यस्य अपरिप्लुवानि मेषाभावात् अचंचलापक्ष्मपंक्तिर्यस्यतस्य अर्जुनस्य अक्ष्णः समक्षं अखिलैः अनुगामिभिः सेवकगणैः सह अंतर्दधे गुप्तोबभूवेतिशिवं॥ ९८ इतिश्रीमदनंतभट्टकृतचंपूभारतटीकायांश्रीखंडोपाह्वनारायणसूरिविरचितायांचतुर्थस्तबकःसमाप्तिमगमत्॥ ४॥ ॥छ॥ ॥छ॥

॥ अथभारतचंपौपंचमस्तबकः प्रारभ्यते ॥ श्रीकृष्ण ॥

श्रीगणेशायनमः॥ ॥ अथशिवप्रसादानंतरं सविधतपोधनैः समीपस्थमुनिभिः कृताशीः दत्ताशीर्वादः अमरपतेः धृतंस्वीकृतं शासनं आज्ञा
नाज्ञायेनसः पार्थः अर्जुनः मातलिना इंद्रसारथिनासहितःसन् रवेण वेगेनजितःपवनोयेन तंरथं अधिरुह्य मुदादिवं स्वर्गं प्रतस्थे ॥१॥ नाकंस्वर्गं
एत्य फाल्गुनइतिस्वनाम ब्रुवतानंदनेनपुत्रेण अर्जुनेन अतिहृष्टः दिविषदांदेवानांनायकः इंद्रः धनुषा अंकितेनविशिष्टेन दोष्णाभुजेनहस्तेन
त्यर्थः पदयुग्मेजगृहे गृहीतः पदयुग्मं हस्तेनगृहीत्वा ननामेत्यर्थः ॥२॥ इंद्रः अमुं अर्जुनं पाणिनापरिमृशन् परिस्पृशन् सन् नाकिगणानां देवस

अथसविधतपोधनैःकृताशीरमरपतेर्धृतशासनःसपार्थः रयजितपवनंसमातलिःसनूरथमधिरुह्यमुदादिवंप्रतस्थे १
नाकमेत्यधनुरंकितदोष्णानायकोदिविषदामतिहृष्टः नामफाल्गुनइतिब्रुवतास्वंनंदनेनजगृहेपदयुग्मे २ पाणिना
परिमृशन्नमुमिंद्रःपक्ष्मलीकृतजयंतमहेर्ष्यः आदरेणधुरिनाकिगणानामासनार्धमधिरोपयतिस्म ॥ ३॥ ॥

मूहानां धुरिपु आदरेण आसनार्धं स्वसिंहासनार्धभागं अधिरोपयतिस्म आसनार्धेस्थापयामासेत्यर्थः कथंभूतःइंद्रः पक्ष्मलीकृतास्वा
सनार्धस्थापनेन बहुलीकृताजयंतस्य तन्नाम्नःस्वपुत्रस्य ईर्ष्यायेनसःस्वपत्न्यांजातंमां आसनेकदापिनागृण्हात् इमंपारस्त्रेणंयंगृण्हाती
तीर्ष्याबहुत्वेकारणं॥ ३॥ ॥श्रीकृष्णायनमः॥ ॥श्रीगोपालकृष्णायनमः॥ ॥छ॥ ॥छ॥ ॥छ॥

कपटशबरस्यशिवस्यबाणैः कल्पिताः कृताः आर्द्रव्रणाः आर्द्रक्षतानि यस्य तस्मिन्नपि कुरूणां कुरुवंशोत्पन्नानां राज्ञां मध्ये सार्वभौमे श्रेष्ठे तस्मिन्न र्जुने सदसि सभायां विशति सति निशितकुलिशकल्पाः तीक्ष्णवज्रतुल्याः समेताः संघीभूताः निखिलसुरवधूनां नेत्रसंघाः कटाक्षसमूहाः निर्दयं यथा तथा सन्निपेतुः अर्जुनस्य सौंदर्याधिक्येन तरुणीजनमनोहरत्वात् तस्मिन्न प्सरसां कटाक्षानिपेतुरित्यर्थः ॥४॥ आस्थानसीमनि सभादेशे गिरिशेन सह युद्धं तनयात् पुत्रात् अर्जुनात् आकर्ण्य हर्षेण विकसन्मनसः —— मघोनः इंद्रस्य अखिले अंगे शरीरे प्रसरतां पुलकांकुराणां अ

सदसि वसति तस्मिन्सार्वभौमे कुरूणां कपटशबरबाणैः कल्पितार्द्रव्रणेऽपि निखिलसुरवधूनां नेत्रसंघाः समे तानिशितकुलिशकल्पा निर्दयं संनिपेतुः ॥४॥ आस्थानसीम्नि तनयाद्गिरिशेन युद्धमाकर्ण्य हर्षविकसन्मन सो मघोनः अंगेऽखिले प्रसरतां पुलकांकुराणामक्ष्णां सहस्रतयमेव बभूव विघ्नः ॥५॥ आज्ञया पितुरमर्त्यसमाजा दग्रतः स्वनितमंगलवाद्यं वारणेंद्रमधिरोप्य जयंतो वैजयंतमनयद्द्विजयं तं ॥६॥ ॥ ॥

क्ष्णां नेत्राणां सहस्रतयमेव सहस्रनयनान्येव विघ्नः बभूव अक्षिषु लोम्नामभावात्तत्र पुलकांकुरप्रसरणाभाव इति भावः ॥५॥ जयंतः इंद्रपुत्रः पितुः इंद्रस्य आज्ञया अग्रतः पुरतः स्वनितानि वादितानि मंगलवाद्यानि मृदंगतूर्यादीनि यस्य तं विजयं अर्जुनं वारणेंद्रं ऐरावतं अधिरोप्य वैज-यंतं एतन्नामकप्रासादं अनयत् नीतवान् ॥६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अथ इंद्रपुरंध्री इंद्राणी पद्योः आननस्य जिष्णोः अर्जुनस्य फालसीमनि ललाटदेशे आशिषः आशीर्वादस्य अनुपदं पश्चात्पारिजातकुसुमस्य पूतन्नामक कल्पवृक्षपुष्पस्य परागैः रेणुभिः ललाम दृष्टिदोषनिवारणार्थं तिलकं चकार रूपपराक्रमादिगुणशालिनः पुत्रस्य दृष्टिदोषबाधा माभूदिति परागतिलकं कृतवती अयं स्त्रीजातिस्वभावः ॥७॥ तत्र स्वर्गलोके स्वकांत्या पुनःपुनः जयंत शंकां ददतः नरस्य अर्जुनस्य दोष्णोः

आननस्य पद्योरथ जिष्णोराशिषोनुपदमिंद्रपुरंध्री पारिजातकुसुमस्य परागैः फालसीमनि ललाम चकार ॥७॥ पुनः
पुनस्तत्र पुलोमपुत्र्या जयंतशंकां ददतः स्वकांत्या नरस्य मौर्वीकिण एव दोष्णोर्नामग्रहेषु सवलनं न्यरौत्सीत् ॥८॥

र्भुजयोः मौर्वीकिण एव मौर्वीनाडनजन्यक्षतस्य किण एव पुलोमपुत्र्याः इंद्राण्याः नामग्रहेषु आव्हानार्थं नामोच्चारणेषु स्खलनं व्यत्ययं न्यरौत्सीत् निवारितवान् अर्जुनजयंतयोः रूपतेजसोः साम्येन अर्जुनं प्रति जयंतनाम्नाव्हान समये हस्तयोर्ज्याघातचिन्हं दृष्ट्वा जयंतनामग्रहणमुन्मुच्य अर्जुननामग्रहणं चकार विशाखः नरस्य तत्वेनार्जुनस्य मानुषत्वेपि स्वकांत्या देवत्वाजेजसशरीर विशिष्टजयंतस्य शंकोत्पादनेनातिशयोक्तिः अलंकारः निफत्वं व्यज्यते ॥ ८ ॥ २

मः अर्जुनः पितुः इंद्रात्सकाशात् अस्त्रकलामिव दिविगायकात् चित्रसेनगंधर्वात् सकाशात् गीतकलामपि गानविद्यामपि परिशिशील अभ्यस्तवान् कथं
भूतः सः पिककुलैः कोकिलसमूहैः आदृतः कंठरवो यस्य सः तथा परिहृतं त्यक्तं अमृतं यैस्तैः दिव्यजनैः देवैः आदृतः गायनश्रवणार्थं वेष्टितः अनेना
मृतापेक्षया गीतौ माधुर्याधिक्यं द्योत्यते ॥ ९॥ तत्र स्वर्गलोके कदाचित् उर्वशी देवांगना स्वयं तं अर्जुनं एत्य रहः कर्मणि स्मरतकर्मणि भग्नकामा भ
ग्नमनोरथा सती कोपात् अये पृथापत्य हे पृथापुत्र तव अभिधेव पृथापत्येति नामेव यथा पृथापत्येति शब्दः नपुंसकं न यातद्वाच्यस्त्वं क्लीबत्वं नपुंस

पितुर्यथास्त्रकलां दिविगायकात्पिककुलादृतकंठरवो दयः परिहृतामृतदिव्यजनाद्दृतः परिशिशील सगीतकलामपि ॥ ९॥
तमुर्वशी तत्र कदाचिदेत्य स्वयं रहः कर्मणि भग्नकामा अये पृथापत्य तवाभिधेव क्लीबत्वमेहीति शशाप कोपात् ॥ १०॥
तद्बुध्वा हरिरूचे तं शापायं वत्स तमुदे चित्रसेनोक्तविद्यायाः सहकृत्वाभवेदिति ॥ ११ ॥

कत्वं एहि प्राप्नुहीति शशाप शापं दत्तवती ॥ १० ॥ हरिः इंद्रः तच्छापवचनं श्रुत्वा तं अर्जुनं इति वक्ष्यमाणं ऊचे उक्तवान् इति किं हे वत्स अयं शापः
चित्रसेनोक्तविद्यायाः गाननर्तनविद्यायाः सहकृत्वा सहायः तत्र उपयुक्तः सन्नित्यर्थः ते मुदे हर्षाय भवत् पुरुषस्य गाननृत्य कर्मश्लाघ्यमिति
भावः ॥ ११ ॥ ॥ श्रीगोपालकृष्णायनमः ॥ ॥ ६८ ॥ ॥ ६८ ॥ ॥ ६८ ॥ ॥ ६८ ॥ ॥ ६८ ॥

भा. ॥गद्यं॥ कदाचित् अस्त्रशिक्षापरिसमाप्तौ सुराणां देवानां समक्षं गुरुदक्षिणात्वेन विपक्षकुलस्य निवातकवचादेः शत्रुकुलस्य क्षपणं वधं टी.

२ भिक्षमाणेन याचमानेन सहस्राक्षेण स्वमस्तकात् आक्षिप्य अपनीय शिरसि निक्षिप्तः स्थापितः किरीटो यस्य सोयं वलक्षाश्वः श्वेताश्वोर्जु ५

नः मातलिना परिकल्पिताः योजिताः रथ्याः अश्वाः यस्य तेन नंदनवनसंबंधिना मंदपवनेन संदीयमानं क्रियमाणमित्यर्थः केतनस्पंदनं

॥गद्यं॥ कदाचिदस्त्रविद्याशिक्षापरिसमाप्तौ सुरसमक्षं गुरुदक्षिणात्वेन विपक्षकुलक्षपणं भिक्षमाणेन सहस्रा
क्षेण स्वमस्तकादाक्षिप्य शिरसि निक्षिप्तकिरीटो वलक्षाश्वोयं मातलिपरिकल्पितरथ्येन नंदनवनमंदपवनसंदी
यमानकेतनस्पंदनेन स्यंदनेन निर्गत्य विलंघितदूरवियत्पथः पाथोनिधौ गंभीरनीरपूररक्षितरक्षःकुलकोला-
हलनीचीकृतवीचिरवरसातलकुहरमुखं निरुध्य रणप्रस्तावं वितस्तरे॥ १॥ ॥ ॥ ॥

ध्वजकंपनं यस्य तेन स्यंदनेन कृत्वा निर्गत्य विलंघितः दूरः वियत्पथः आकाशमार्गो येन तथाभूतः सन् पाथोनिधौ समुद्रे गंभीरेण नीरपूरेण
रक्षितस्य रक्षःकुलस्य कोलाहलैः कलकलरवैः नीचीकृतः अल्पीकृतः वीचीनां रवो यस्मिन् तत् रसानलकुहरस्य अधोलोकगमनबिल ३
स्य मुखं निरुध्य रणप्रस्तावं युद्धप्रसंगं वितस्तार प्रकटीचकार॥ १॥ ॥७॥ ॥८॥ ॥९॥ ॥६॥

यावत् रणप्रस्तावं चकारतावत् पूर्वं आकर्णित: आकर्णितपूर्व: नयानभवति योगांडीवस्यविस्फार: ज्याटणत्कार: तस्यश्रवणात् अहंपूर्विक
या अहंपूर्वमहंपूर्वमितिभाषणेनसहयुगपत् अभिषेणनवत: शत्रून्प्रति धार्ष्ट्येनगमनंकुर्वत: दिविषद्भि: देवै: अवध्यभावात् वरप्रभाव
न अवध्यत्वाद्धेतो: नध्यातंमरणंयैस्तान् क्षिप्रै: शीघ्रगामिभि: क्षुरप्रै: क्षुरसदृशबाणै: विश्राणितं दत्तंविवरं निर्गमनमार्गोयस्मिन्तस्मात् उरस: वक्षस्थ
लात् कृतप्रयाणै: प्राणै: कृत्वात्रिकोटिश: तिस्र: कोटी: निवातकवचानपि वातहीनकवचानपितत्संज्ञकांश्च दैत्यान् प्रवातकवचानेवप्रकृष्टवातयुक्तकव

॥गद्यं॥ तावदनाकर्णितपूर्वगांडीवविस्फारश्रवणादहंपूर्विकयायुगपदभिषेणनवतोदिविषदवध्यभावादध्यातमरणान्क्षिप्रै:
क्षुरप्रैर्विश्राणितविवरादुरस: कृतप्रयाणै: प्राणैस्त्रिकोटिशोनिवातकवचानपिप्रवातकवचानेवविरचय्यनिवर्तमानोयंनभसि
प्रमादादापतितेनपतंगपरिवेषेणेवस्फाटिकप्राकारेणपरिगुप्तिमतोहिरण्यपुराद्विदितबंधुजनवृत्तांततयारोषादभिगम्यकलहा
यमानान्कालकेयानपिकालगेहातिथीन्प्रथमंपाशुपतेनमंत्रपूर्वंनिमंत्रयांचक्रे॥ २॥ चानेवविरचय्यकृत्वागतप्राणान्कृत्वेत्यर्थ: निवर्त
मान: अर्जुन: नभसिप्रमादेन अनवधानतयापतितेनसूर्यत्यक्तान्यत्रपतितेनेत्यर्थ: पतंगस्यसूर्यस्यपरिवेषेणस्फाटिकप्राकारेणपरिगुप्तिमत: परित: गो
पनविशिष्टात् हिरण्यपुरात् विदित: ज्ञात: बंधुजनानांनिवातकवचानांनिधनवृत्तांतोयैस्तेषांभाव: तत्तातयारोषात् अभिगम्यबहिर्निर्गत्यकलहायमाना
न्युद्धंकुर्वाणान्कालकेयानपिएतत्संज्ञकदैत्यानपिकालगेहस्य यमगृहस्य अतिथीन्प्रथमंपाशुपतेनपाशुपताख्यमंत्रोच्चारणेनमंत्रपूर्वंनिमंत्रयांचक्रे पा

श्रुपतारुव्रप्रयोगेणजघानेत्यर्थः २ पद्यं॥सःजिष्णुःअर्जुनःदैतेयसंहारभवाःकीर्तीःदिविस्वर्गेप्रतिष्ठापयतिस्म कीदृशीःकीर्तीःवायुनानेयाःनभवंति न
थाभूताःशरदभ्रपंक्तीःशरत्कालिकमेघपक्तीःतथा अविद्यमानःअस्तमयोयासांतथाभूताःताराःतारकाःशुभ्रतयाइत्यभेदाधिक्यरूपके॥१२॥ हृताःरि
पवःनिवातकवचादयोयेनतंविनिवृत्तंमहाकार्यंकृत्वाआगतंतं अर्जुनं अवेक्ष्य सुरैःदेवैःसहतुष्यतःहरिहयस्य इंद्रस्य नयनवारिभिःअनाप्लुतं अ-
क्लिन्नंतिलमात्रमपितिप्रमाणमपि स्वकंस्वकीयं अंगंनददृशे नदृष्टं अंगस्यस्वकमितिविशेषणात् इंद्रेणनदृष्टमित्यवगंतव्यं॥१३॥सुराणांनतिभिः

प०अवायुनेयाःशरदभ्रपंक्तीरविद्यमानास्तमयाश्चताराः दैतेयसंहारभवाःसजिष्णुर्दिविप्रतिष्ठापयतिस्मकीर्तीः१२ हृतारिपुं
विनिवृत्तमवेक्ष्यतंहरिहयस्यसुरैःसहतुष्यतः नयनवारिभिरंगमनाप्लुतंनददृशेतिलमात्रमपिस्वकं१३ पुरिवज्रिणःसुरनुति
प्रसरत्पुलकावमग्नभुजचापकिणः मनसेसपंचशरदोप्सरसांवसतिस्मपंचशरदोविजयः॥१४॥

नमस्कारैःप्रसरत्सुपुलकेषुरोमांचेषु अवमग्नौ निमग्नौ भुजयोःसंबंधिनौ चापकिणौ धनुर्गुणाघातजन्यव्रणकिणौ यस्यसःअप्सरसांमनसेपं
चशरं मदनं ददातीतिपंचशरदःसःविजयःअर्जुनःवज्रिणःपुरिअमरावत्यांपंचशरदःसंवत्सरान्वसतिस्म उवास इंद्रपुत्रत्वात् नारायणावता
रत्वात् शौर्याद्यतिशायित्वाच्च सुराणांनतिःएतेपिमानमंतीतिहर्षेणमहतोलघवेनतिकरणेआपुर्नाम्यादिस्मरणाद्वलघुमल्पवयसंनरंमांदेवान
मंति अतोमेकादशाप्सवेदितिभयेनवापुलकोद्गमः॥१४॥ ॥श्रीकृष्णायनमः॥ ॥ ॥७॥ ॥७॥ ॥७

रोमशात् ऋषेः तस्य अर्जुनस्य वृत्तं चरित्रं अधिगम्य ज्ञात्वा अनुजैः सह मुदितः प्राप्तं तीर्थमुनीनां सेवनं येन सः धर्मराजोपि क्रमात्पावनं पवित्रं बदरिकावनं ययौ जगाम ॥ १५ ॥ सः पार्थः धर्मराजः तत्रवने ब्रम्हपरायणैः ब्रह्मनिष्ठैः मुनिगणैः संसेव्यमानः अंतिकः समीपभागो ययोस्तौ सध्यञ्चौ सह वरौ यमिनौ योगिनौ आख्ययानाम्ना नरनारायणं च निरीक्ष्य अंतरेण अंगेन अंतःकरणेनेत्यर्थः महतीं क्षमां शांतिं अनिशं सर्वदा स्पृशन् धारयन् बाह्यैः अष्टभिः अंगकैरपि उरसा शिरसा दृष्ट्येति श्लोकोक्तैः रवपवैरपि परां अन्यां क्षमां पृथिवीं पस्पर्श स्पृष्टवान् साष्टांगनमनं चकारेत्यर्थः

तस्यवृत्तमधिगम्यलोमशाद्धर्मजोपिमुदितः सहानुजैः प्राप्ततीर्थमुनिसेवनः क्रमात्पावनं बदरिकावनं ययौ १५ तत्रब्रम्हपरायणैर्मुनिजनैः संसेव्यमानांतिकौ सध्यञ्चौ यमिनौ निरीक्ष्य सनर नारायणं चाख्यया अंगनानिशमंतरेणमहतीमकांक्षमां संस्पृशन् बाह्यैरष्टभिरंगकैरपिपरां पस्पर्शपार्थक्षमां ॥ १६ ॥ विलोकनैर्विश्रमशाखिभिस्तयोर्भवाध्वगानां परिधूनितश्रमः निवासमालव्य तपोवनेतदाविवासदुःखाद्विरराम पार्थिवः ॥ १७ ॥ ॥ ॥ ॥

॥ १६ ॥ तदा भवाध्वगानां संसारमार्गगतानां विश्रामशाखिभिः विश्रांतिप्रदवृक्षरूपैर्विलोकनैः नरनारायणरूपादर्शनैः परिधूनितः अपसारितः श्रमः क्लमो यस्य सः पार्थिवः युधिष्ठिरः तपोवने बदरिकावने निवासस्थितिं आलव्य धृत्वा विवासदुःखात् प्रवासजन्यदुःखात् विराम विरामं प्राप प्रवासदुःखरहितो बभूवेत्यर्थः ॥ १७ ॥ ॥ श्रीकृष्णायनमः ॥ ॥ ५ ॥ ॥ २ ॥ ॥ ७ ॥

॥ गद्यम् ॥ एकदा नल बदरिकावने स्नुषायां द्रौपद्यां वत्सलतया अतिस्नेहेनेवेत्युत्प्रेक्षा मारुतेन पुरतः अग्रभागे नीतं प्रापितं कमपि अदृष्टपूर्वं सौरभ्यं कल्हारमुकुलं सौगंधिक कमलकुड्मलं आदाय गृहीत्वा पुनरेतादृशं क्कस्मिंस्थले लभ्येत इति भाषणे यौ कौतुकहर्षौ ताभ्यां कृता सूचितः ज्ञापितः तर्षः अभिलाषातिशयो यया तया पार्षत्या द्रौपद्या रहसि एकांते याचितः एतादृशमन्यत्पुष्पमानीय दातव्यमित्युक्तः पार्षदश्विः पृषदश्वा

॥ गद्यम् ॥ एकदा नल स्नुषावत्सलतयेव मारुतेन पुरतोनीतमसासहिमटवीपर्यटनखेदसंपदामंधंकरणमलिकुलचेतसामासेचनकमक्ष्णांकमपि कल्हारमुकुलमादाय क्क लभ्येत पुनरेतादृशमिति कुतुकहर्षाभ्यां सूचिततर्षया पार्षत्या रहसि याचितः पार्षदश्विः क्षणं विचिंत्य तद्विचिचीषया दिशमुदीचीं प्रतस्थे ॥ ३ ॥ ॥ ॥ ॥

वायुः तत्पुत्रः भीमः क्षणं विचिंत्य विचारं कृत्वा तस्य पुष्पस्य विचिचीषया गवेषणेच्छया उदीचीं दिशं प्रतस्थे जगाम कथंभूतं कल्हारमुकुलं अटवीपर्यटने अरण्यसंचारे याः खेदसंपदः दुःखसमूहाः तासां असासहिं असहिष्णु तथा अलिकुलस्य भ्रमरकुलस्य चेतसां अंधंकरणं अंधानि क्रियंते अनेनेत्यंधंकरणं येन भ्रमरचेतांसि स्वत्यागं कृत्वान्यत्र गंतुमशक्तानि क्रियंते इत्यर्थः तथा अक्ष्णां नेत्राणां आसेचनकं मनोहरत्वात् तृप्तिकारकं ॥ ३ ॥ ॥ ६५ ॥ ५

॥पद्यं॥ गिरिशैवलिनीवनानि पर्वतनदीवनानि क्षिप्रं शीघ्रं विलंघ्य गच्छन्नसौ भीमः पथि महांतं कपिं वानरं ददर्श कपिमुत्प्रेक्षते अरिपत्तनस्य लं
कानगर्याः दाहकाले भयात् दाहभयात् कुंभकर्णात् उपनतां शरणागतां निद्रां दृग्भ्यां नेत्राभ्यां अवंतमिव रक्षंतमिव यथा कश्चित् शरणागतं
द्वारं पिधाय गृहमध्ये रक्षति तद्वत् नेत्रपिधानं कृत्वांतरे रक्षंतमिवेत्यर्थः॥१८॥ ग० अभीः निर्भयः असौ भीमः गभीरं यथा तथा अभाणीत् अवो-

॥पद्यं॥ क्षिप्रं विलंघ्य गिरिशैवलिनीवनानि गच्छन्नसौ पथि ददर्श कपिं महांतं दृग्भ्यामवंतमरिपत्तनदाहकाले निद्रां
भयादुपनतामिव कुंभकर्णात् १८ गद्यं॥ अभीरसौ गभीरमभाणीच्च॥४॥ कस्त्वं निरुध्य पदवीमविनीतबुद्धे निद्रास्यपेहि
न सहे गमने विलंबं क्रोधो भुजामिव ममाद्य हिडिंबहंतुरुद्यद्गदा न वतनूमपि मूढ कुर्यात्॥ १९॥ ॥ ॥

चत्॥ ४॥ प० हे अविनीतबुद्धे अशिक्षितबुद्धे पदवीं मार्गं निरुध्य निद्रासि त्वं कोसि अपेहि मार्गमुत्क्रांतिष्ठ अहं गमने विलंबं न सहे विलंबकरणे
शासनमाह हे मूढ मूर्ख अद्य हिडिंबराक्षसस्य हंतुः मम क्रोधः भुजामिव महाबाहुमिव न वतनूमपि उद्यद्गदा उद्यती ऊर्ध्वं गच्छंती गदा यस्यास्तां अन्य
च उद्यत् आविर्भवत् गदः रोगः महारदुःखमिति यावत् यस्यास्तां कुर्यात् मार्गं न त्यजसि चेत्तर्हि गदाप्रहारं कुर्यामित्यर्थः॥ १९॥ ॥ ॥७॥

कौर्यस्पृशेति आवालधेरिति पद्यद्वयं क्षेपकं क्वचित्पुस्तके दृश्यते तद्व्याचक्ष्महे कौर्यस्पृशा कौर्ययुक्तया तया कौरवाणां मध्ये सार्वभौमस्य श्रेष्ठस्य भीमस्य वाचा स पदि मारुतनंदनस्य हनूमतः दृग्द्वारसंबंधिपक्ष्मपुटयोः युग्ममेव कपाटकूटं कपाटसमूहः तस्य निद्रैव अर्गला विष्कंभः तस्य हरणे निष्कासने कुंचिकया महाराष्ट्रभाषायां किली इति संज्ञया बभूवे जातं यथा कुंचिकयार्गलाहरणे कृते कपाटोद्घाटनं भवति न हन्त भीमवाचा निद्राहरणेन हनुमद्दृगुन्मीलनं जातमित्यर्थः २० इत्थं तस्य भीमस्य गिरा वाण्या किंचिदुदीक्ष्य लांगूलमात्रे पुच्छमात्रे तरलः चंचलः पुच्छचालनकर्तेत्यर्थः स्वयं स्वापेन निद्रया अरुणे आरक्ते अक्षिणी यस्य सः कपींद्रः हनुमान् कोपेन अरु

कौर्यस्पृशा तद्नु कौरवसार्वभौमवाचा तया सपदि मारुतनंदनस्य दृग्द्वारपक्ष्मपुटयुग्मकपाटकूटनिद्रार्गलाहरणकुंचिकया बभूवे ॥२०॥ इत्थं गिरा किंचिदुदीक्ष्य तस्य लांगूलमात्रेतरलः कपींद्रः कोपारुणाक्षं कुरुसिंहमेनं स्वापारुणाक्षः स्वयमेवमूचे ॥ २१॥ आवालधेररिमहागृहदाहशौंडादाचौषधाचलधृतिस्थपुटान्किरीटात् अंगेष्वजातचलनोप्यखिलेषु भीममालोक्य मंदमधरोष्ठपुटं चकंपे ॥ २२॥

णेक्षिणी यस्य तं कुरुसिंहं एनं भीमं एवं वक्ष्यमाणं ऊचे बभाषे ॥२१॥ अरेः शत्रोः रावणस्य महागृहाणां दाहे शौंडात् प्रवीणात् वालधेः आपुच्छमभिव्याप्य औषधाचलस्य द्रोणाचलस्य धृत्या धारणेन स्थपुटात् नतोन्नतात् किरीटात् किरीटपर्यंतं अखिलेषु अंगेषु अवयवेषु न जातं चलनं यस्य तादृशोपि कपिः भीमं आलोक्य अधरोष्ठपुटं मंदं यथा तथा चकंपे चचाल ओष्ठचलनं विना भाषणं न भवत्यतो भाषणोपक्रमं चकारेति भावः ॥२२॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ५

हे भद्र कल्याण तुभ्यं स्वस्तिकल्याणमस्तु. जरसा जरया निद्रयापि आतुरः पीडितः अतः अवयवैः प्रत्युत्थानादिकर्मणि प्रत्युद्गमनादिक्रियायां अपटुः असमर्थः अस्मि तस्मात्त्वमेव जात्या अवस्थानरीत्या शरीरस्थितिरीत्यापि च एवं एतत्प्रकारकं यथा तथा प्राप्तं तिर्यक्त्वं अध्वनि तिर्यगवस्थानं चये-नतं मां वालाग्रे पुच्छरोमाग्रे विकृष्य अभिलषितं इष्टं द्रुतं शीघ्रं साधय इति प्रार्थये याच्ञां कुर्वे ॥ २३ ॥ अरातिसंघातस्य शत्रुसमूहस्य निघातक-

भद्रस्वस्त्यस्तु तुभ्यं चिरमिह जरया निद्रयाप्यातुरोहं प्रत्युत्थानादिकर्मण्यपटुरवयवैरस्मि तस्मात्त्वमेव जात्यावस्थान रीत्यापि च विपिनपथे प्राप्ततिर्यक्त्वमेवं वालाग्रे मां विकृष्य द्रुतमभिलषितं प्रार्थये साधयेति ॥ २३ ॥ अरातिसंघातनि-घातकर्मण्यवालहस्तो मम वालहस्तं उत्धृत्य याहि द्रुतमुत्तरत्रेत्युक्तेवस श्रांतिमुपाजहार ॥ २४ ॥ ॥ ॥

र्मणि वधकर्मणि अवालः प्रौढः दृढ इति यावत् हस्तो यस्य सः त्वं मम वालहस्तं पुच्छं उत्धृत्य द्रुतं उत्तरत्र परस्मिन् देशे याहि गच्छ इति उक्ते वसः हनूमान् श्रांतिं श्रमं उपाजहार स्वीकृतवान् अत्र बवयोरभेदात्त्वं अबालहस्तः मम वालहस्तं उत्धृत्य याहीत्यनेन त्वं समर्थोहमसमर्थ इति ध्व न्यते ॥ पुच्छोस्त्री लूमलांगूले वालहस्तश्च वालधिरित्यमरः ॥ २४ ॥ ॥ श्रीगोपालकृष्णायनमः ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६

इतिउक्तः एषः भीमः परिघंगदां भूमौनिधाय वल्कंवल्कलरूपंवस्त्रं दृढंयथातथापरिधाय भुजार्गलाभ्यां अर्गलासदृशदृढबाहुभ्यांतं वालधिं कृष्टुंआकृष्टुमेवनशशाकनशक्तोबभूव सतुप्लवंगः वानरः वालस्ययापुच्छलोमनिष्ठयाघननयादार्ढ्येन अस्यभीमस्यमनश्चकर्ष स्वाधीनंचकारेत्यर्थः एतस्यपुच्छकेशस्यैतादृशं दार्ढ्यंतस्मादयंकोपिदेवविशेषोभवेदित्यनुमितवान् इतिभावः २५ग० तदनुतदनंतरंविनयविस्मयव्रीडायांनम्रताश्च

इत्युक्तएषधरणोपरिघंनिधायवल्कंदृढंचपरिधायभुजार्गलाभ्यां तंकृष्टुमेवनशशाकसतुप्लवंगोवालस्यया घननतयास्यमनश्चकर्ष ॥ २५ ॥ गद्यं ॥ तदनुविनयविस्मयव्रीडापारदृश्वनामातरिश्वसूनुनात्वंवासवलोक वासिषुकोसीतिपृष्टःकपिकुंजरःस्वमंजनायांप्रभंजनेनसंजनितंजानकीजानेर्हृदयरंजकंलेखवाहंव्याज हार ॥ ५ ॥ सबहुमानंतस्यवचनमाकर्ण्य ॥ ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

र्यलज्जानांपारदृश्वना पारंगतेनतद्विशिष्टेनेतियावत् मातरिश्वसूनुनावायुपुत्रेण भीमेनतं वासवलोकवासिषुदेवेषुकोसिइतिपृष्टःकपिकुंजरःवानरश्रेष्ठः स्वंआत्मानंअंजनायांएतन्नाम्न्यांवानर्यांप्रभंजनेनवायुनासंजनितंउत्पादितंजानकीजायायस्यतस्यरामस्यहृदयरंजकंप्रियंलेखवाहंलिखितपत्रप्रापकं दूतमित्यर्थः व्याजहारकथितवान् ॥ ५ ॥ सबहुमानं सादरंयथातथा वचनं हनुमद्वाचंआकर्ण्य ॥ ६ ॥ ॥६॥ ॥६॥ ७

प्रीतेनतेनभीमेनपुनरपिकपीनामधिपः हनूमानूचेउक्तः किमुक्तस्तदाह नथेति भवान् तथावायुपुत्रः रामदूतोयदितर्हि अहं अधुनासात्वासौ ताद्दशी
वतत्ताद्दशींतांतावकींतांत्वदीयांतनुंनयनयोः पथिकर्तुंद्रष्टुमित्यर्थः प्रार्थये कीद्दशींतनुं उदधौसमुद्रेपल्वलतायाः अल्पसरस्त्वत्वस्यतायाः सवित्रींउ
त्पादयित्रींपद्दित्वंहनूमान् तर्हि यथा अनायासेनसमुद्रलंघनंकृतं तांविशालांतवतनुंदर्शययेनमेसंदेहनिवृत्तिर्भवेदितिभावः ॥ २६ ॥ इतिभीमेन
उक्तः अयंहनूमान् प्रवृत्तःसन् यथानिजैः अंगैः अवयवैः वैमात्रेयस्यमातृसपत्नीपुत्रस्यतस्यभीमस्य मार्गमिवदिविषदांदेवानामपिमार्गंरुरुधे-

प० ॥ प्रीतेनतेनपुनरप्यधिपःकपीनामूचेतथायंयदिभवानधुनार्थयेहं कर्तुंतनुंनयनयोःपथितावकींनांतत्ताद्दशीमुदधिपल्वलता
सवित्रीं २६ इत्युक्तोयंप्रवृत्त्योंगैर्हेलयारुरुधेनिजैः वैमात्रेयस्यतस्यैवमार्गंदिविषदामपि २७ त्रस्तस्यतद्वपुरुदीक्ष्यसजा
तिशंकिमैनाकसंशयकुठारितपक्षलोपं मोहेयथानयनयोर्मुकुलीबभूवबोधेतथैवकरयोरपियुग्ममस्य ॥ २८ ॥ ॥

रुद्धवान् ताद्दशः प्रवृद्धः येनाकाशमपि व्याप्तमित्यर्थः ॥ २७ ॥ तद्वपुः उद्वीक्ष्यत्रस्तस्यभीमस्यमोहे मूर्छायांसत्यांनयनयोः युग्मं यथासंकुचितं बोधेतन्माह
त्म्यज्ञानेसति तथैवकरयोर्युग्ममपिमुकुलीबभूव प्रथमंभयेन मूर्छायांकृतनयनमीलन आसीत्पश्चात्तत्स्वरूपज्ञानेसतिविनयेनविरचितांजलिरा
सीदितिभावः कीद्दशंतद्वपुः सजातिंसमानजातीयंपर्वतंशंकतेसौतथाभूतायोमैनाकपर्वतः तस्ययः संशयः अयंपर्वतइतिसंदेहः तस्यकुठारितः
कुठारवदाचरितः नाशकइतियावत् पक्षलोपः पक्षाभावोयस्यतत् ॥ २८ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥

अथभीमेनापि प्रमोदात् हर्षात् प्रतिक्षणं पुष्यद्भिः पुष्टिंस्वीकुर्वद्भिः अंगकैः अवयवैः करणैः भ्रातुः हनूमतः वृद्धेर्विडंबना अनुकरणं उदघाटीव उ
द्घाटितेवेत्युत्प्रेक्षा ॥ २९ ॥ गद्यं ॥ अथच सविनयं यथातथा एवंवक्ष्यमाणं व्यजिज्ञपत् विज्ञापितवान् ॥ ७ ॥ पद्यं ॥ हेवीरवर्य हनूमन् प्रार्थ्यमानं पदयो
दर्शनं यस्य तं भवंतं अग्रजं श्रेष्ठबंधुं पथि मार्गे चिरात् बहुकालेन पश्यतः मे एषः विस्मयांबुनिधिः आश्चर्यसमुद्रः भवनापि शतयोजनजलनिधिमु
ल्लंघयता त्वयापि दुस्तरः तरीतुमशक्यः अकस्मात् भवच्चरणदर्शनेन ममम हदाश्चर्यमभूदितिभावः ॥ ३० ॥ राघवस्य रामचंद्रस्य प्रेमवृत्तिः स

प्रमोदात्परिपुष्यद्भिःप्रतिक्षणमथांगकैः भीमेनाप्युदघाटीवभ्रातुर्वृद्धेर्विडंबना ॥ २९ ॥ ग० सविनयमेवंव्यजिज्ञप
त्‌ ॥ ७ ॥ प० प्रार्थ्यमानपददर्शनंचिरात्पश्यतःपथिभवंतमग्रजं विस्मयांबुनिधिरेषमेधुनावीरवर्यभवनापिदुस्तरः ३०
राघवस्यसहजादपित्वयिप्रेमवृत्तिरधिकेतिमेमतिः यामिनीचरवधोत्सवेयतोलक्ष्मणादधिकमंशमग्रहीः ॥ ३१ ॥ ॥

हजादपि बंधोर्लक्ष्मणादपि त्वयि अधिका इतिमेमतिः बुद्धिः भवति यतः त्वं यामिनीचराणां राक्षसानां वधोत्सवे हननमेव उत्सवः तस्मिन् ल-
क्ष्मणात् अधिकमंशं अग्रहीः स्वीकृतवानसि त्वया लक्ष्मणापेक्षया अधिका राक्षसा हता इतिभावः अन्योपि कश्चित् वस्तुविभागसमये बंधोर ८
प्यधिकमंशं स्वप्रियाय ददाति ॥ ३१ ॥ ॥ श्रीगोपीजनवल्लभायनमः ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥

हनूमानिति आभाष्य चरणयोः आनतं अवरजं कनिष्ठबंधुं भीमं चुबुके गृहीत्वा धृत्वा शिरसि जिघ्रन् सन् मुमुचे तं त्यक्त्वान्यत्र जगामेत्यर्थः इतिकिं हे आर्य श्रेष्ठबंधो उग्रं कठोरं वागपराधं वाण्याकृतमपराधं दुर्भाणरूपमपराधमितियावत् क्षमस्वेति अमुष्य हनूमतः विरहं न सहते सोविरहासहनः भीमोपि अश्रुबिंदून् मुमुचे ॥ ३२॥ पथि गच्छतः अस्य मारुतेः वायुपुत्रभीमस्य पुरः अग्रतः गंधमादनं एतन्नामक कुलाचलः विंध्यादिसप्तकुलाचलांतर्गतः पर्वतः अभूत् पर्वतमुत्प्रेक्षते गाढाभिः वीक्षिकानां दर्शनानां वासनाभिः संस्कारैः कृत्वा अविमुक्तः दृक्पथः दर्शनमार्गः चाक्षुष

आर्यक्षमस्वममवागपराधमुग्रमित्यानतंचरणयोश्चिबुके गृहीत्वा जिघ्रन्शिरस्यवरजंमुमुचेहनूमान्भीमोप्यमुष्यविरहा-
सहनोश्रुबिंदून् ३२ गच्छतोस्यपथिमारुतेःपुरोगंधमादनमभूत्कुलाचलः वानरेंद्रइवगाढवीक्षिकावासनाभिरविमुक्तदृक्प
थः ३३ अलकेशयोषिदलकेशयैःसुमैःसुरभिंप्रमोदसुरभिंनभःसदां शिखरेसनस्यमहतीमुदग्दिशोमणिदर्पणीमिवददर्शवापिकां

प्रत्यक्षविषयंततियावत् येनसः वानरेंद्रइवसमुद्रलंघनकालिकस्वरूपदर्शक हनूमानिव ॥ ३३॥ सः भीमः तस्य गंधमादनस्य शिखरे महतीं विपुलां वापिकां मानससरोवरं ददर्श कीदृशीं वापिकां अलकायाः एतन्नाम्न्याः नगर्याः ईशस्य स्वामिनः कुबेरस्य योषितां पत्नीनां अलकेशयैः केशवासिभिः सुमैः पुष्पैः सुरभिं सुगंधितां नभः सदां देवानां प्रमोदसुरभिं हर्षकामधेनुं हर्षदात्रीमित्यर्थः तामुत्प्रेक्षते उदग्दिशः उत्तरदिशः मणिदर्पणीमिव हीरकादिरत्नमयादर्शमिव ॥ ३४॥ ॥श्रीराधाकृष्णा॥ ॥ध॥ ॥ध॥ ॥ध॥ ॥ध॥

भा ९

गृहीतदेहे यक्षाधिपस्य कुबेरस्य यशसीवेत्युत्प्रेक्षा हंसयूथे हंससमूहे भीमं दृष्ट्वा भयात् अपयातेसति कक्षायांविनिवेशितास्थापितागदायेनसः भीमः टी० स०
तोयं सरोजलं विगाह्य प्रविश्य फुल्लानि विकसितानि अखिलानि सर्वाणि हल्लककुलानि कमलविशेषकल्हारवृंदानि अलावीत् अच्छिंदत् ३५ग० नदा ५
त्वे एवसौगंधिकलवनसमये एवतेषां सौगंधिकानां रक्षिणः हेसाहसिन् स्वबलमविचार्य महाकर्मकारिन् आयुषः अग्रभूमिं चरमस्थलं आरुरुक्षसि आ
रोढुमिच्छसि मर्तुमिच्छसीत्यर्थः इत्युक्त्वा समंततः निरुंधानान् निरोधं कुर्वाणान् अन्वर्थतायाः क्रोधवशनाम्नोऽन्वर्थतायाः कोपयुक्ततायाः इतियावत्

यक्षाधिपस्ययशसीवगृहीतदेहे दृष्ट्वाभयादपगतेसतिहंसयूथे कक्षानिवेशितगदः सविगाह्यतोयंफुल्लानिहल्लककुलान्यखिलान्य
लावीत् ३५ग० नदात्वएवतद्रक्षिणः कस्त्वंसाहसिन्नायुरग्रभूमिमारुरुक्षसीतिसमंततोनिरुंधानानन्वर्थतावलंबिततयालोहि-
तानांलोचनानांप्रतिबिंबैस्तांसरसीं पुनरपिसौगंधिकांतर्वलीमिवकुर्वतः क्रोधवशान्नामयातुधानान्सभीमोरंहसासमुपबृं
हितसिंहनादश्चिरतरमुपोषितस्यपरिघस्यपारणांपरिकल्पयांचक्रे॥ ८॥ ॥ ॥ ॥

अवलंबिततया स्वीकृततया लोहितानां लोचनानां प्रतिबिंबैः तां सरसीं सरोवरं पुनरपिसौगंधिकांतर्वलीमिवसौगंधिकगर्भवतीमिवकुर्वतः क्रो
धवशान् नाम्नाप्रसिद्धान् यातुधानान् राक्षसान् सः भीमः रंहसा स्वबलेन समुपबृंहितः वृद्धिंनीतः सिंहनादो येन तथाभूतः सन् चिरं बहुकालं उपो ९
षितपरिघस्य गदायाः पारणं व्रतांते भोजनं परिकल्पयामास गदया तान् जघानेत्यर्थः॥ ८॥ ॥ ॥ ॥

पद्यं॥ महाद्रेः गंधमादनात् विष्वक् सर्वतः पतंती रक्षोभ्यः सृता निर्गता रक्तनदी रुधिरनदी वियति आकाशे स्थितानां देवादीनां क्षरंती नदी धातुझरी पर्वततटसंबंधिरक्तधातुसंपृक्तनदी इति बुद्धेः करावलंबं कलयांचकार ददौ अधःपतंतीं रुधिरनदीं दृष्ट्वा लोहितधातुयुतनदीयमिति बुद्धिरभूदिति भावः ॥२६॥ सः भीमः पर्वतस्य गंधमादनस्य अग्रवस्तुभ्यः श्रेष्ठपदार्थेभ्यः ऊर्ध्वगतवस्तुभ्यश्च प्रवस्तुं प्रवासं कर्तुं निर्गंतुमित्यर्थः नेच्छतीं दृशं महायत्नात् उत्खाय आकृष्य उपत्यकां अद्रिसमीपभूमिं उपासीदत् अधिगतवान् पर्वतोर्ध्वभागस्थितवस्तुदर्शनासक्तां दृशमाकृष्यागमनमार्गेणाधोगत इति भावः ॥२७॥

प॰ रक्षःसृता रक्तनदी महाद्रेर्विष्वक् पतंती वियति स्थितानां क्षरत्तटी धातुझरीति बुद्धेः करावलंबं कलयांचकार २६ पर्वतस्याग्रवस्तुभ्यः प्रवस्तुं नेच्छतीं दृशं उत्खाय स महायत्नादुपासीदत् उपत्यकां २७ ग॰ इदानीमितरेष्वपि भ्रातृषु कमलपालिकासूनोः स्कंधभागशिबिकामधिरुह्य तस्यैव कटकमागतेषु सत्सु मारुतिरादरेण रहसि विकसितां कुसुमसंहतिं मूर्तानुरागभ्रमदां प्रमदां प्रत्युपदामकरोत् १ प॰ सरसीव कचेष्वस्या धार्तराष्ट्राकुलीकृते ऊषितया वरतनोरूर्मिमत्यलिभास्फुरे २८॥ इ॰ सौगंधिकाहरणं॥

ग॰ इदानीं इतरेषु भ्रातृषु युधिष्ठिरनकुलसहदेवेषु कमलपालिकासूनोः हिडिंबापुत्रस्य घटोत्कचस्य स्कंधभाग एव शिबिका नरयानं तत् आरुह्य तस्यैव गंधमादनस्यैव कटकभुवं आगतेषु सत्सु मारुतिः भीमः रहसि आदरेण मूर्तः मूर्तिमान् योनुरागः तस्य भ्रमदां भ्रांतिदात्रीं तां विकसितां कुसुमसंहतिं प्रमदां द्रौपदीं प्रति उपदां उपायनं अकरोत् १ प॰ तदा कुसुमसंहत्या सरसीव सरोवरे इव तस्याः वरतनोः द्रौपद्याः कचेष्वपि केशेष्वपि जातावेकवचनं ऊषे उषितं स्थितमिति यावत् कथंभूते सरसि कचे च॥

धार्तराष्ट्रैः हंसैः धृतराष्ट्रपुत्रैश्च आकुलीकृतेव्यासे मर्दितेच तथा ऊर्मिमति वीचिमति कौटिल्यवतिच तथा अलिभिः भ्रमरैः भासुरे शोभावति
अलिवत् भ्रमरवत् भासुरे कृष्णकांतिमतिच ॥३८॥ ॥इतिसौगंधिकाहरणं॥ ॥गद्यं॥अथकदाचित्तस्मिन् बकद्विषि बकराक्षसशत्रौ भीमे
आखेटाय मृगयायै तदाटवीं पर्यंत तदारण्यं अटति विशातिसति दुर्घटः दुर्जयः जटोनामक्रूरारिः जटासुरः उटजं पांडवपर्णशालां एत्य वैदिकयासह

गद्यं॥अथकदाचिदाखेटायतदाटवीमटतितस्मिन्बकद्विषिजटोनामदुर्घटःक्रूरारिरुटजमुपेत्यवैदिकयावैतान
तनूनपातइवदयितयासहत्रीनपितान्वीरान्स्कंधमानीयजवात्केनचिदपदिशापथेनप्रतस्थे॥१०॥प॰गतागतेतत्रघ-
टोत्कचेनजटेनचस्कंधधृतस्यराज्ञः पादार्पणालाभशुचावनंतत्पतत्रिनादैरिवरोदितिस्म॥३९॥ ॥

वैतानतनूनपातइव यज्ञसंबंधिनस्त्रीन् अग्नीनिव दयितया द्रौपद्या सह त्रीनपितान् वीरान् युधिष्ठिरनकुलसहदेवान् स्कंधं आनीय स्कंधे गृहीत्वा
जवात् वेगात् केनचिदपदिशापथेन क्षुद्रमार्गेणेत्यर्थः प्रतस्थे॥१०॥प॰ तत्रस्थले गतागते गमनागमने घटोत्कचेन जटासुरेण च स्कंधे धृतस्य राज्ञः १०
धर्मराजस्य पादयोः अर्पणस्य स्थापनस्य यः अलाभः तस्य शुचा शोकेन तद्वनं पतत्रिनादैः पक्षिशब्दैः रोदितिस्मेव रुरोदेवेत्युत्प्रेक्षा॥३९॥ ॥

कठिनेसभांतेसभामध्येवनंयियासोःजिगमिषोःयस्यजरासुरोधःप्रतिबंधःनबभूवकिंनृभंतोवर्धमानाकरुणारूपायस्मिन् अथचकिंनृभंतःकरुणाःदयाविशेषाःयस्मिंस्तस्मिन्वनेतुतस्यधर्मसूनोःजरासुरोधःअजनिजातःइत्यास्वर्यविरोधश्चजरासुर अथइतिपदच्छेदनस्कंधारोहणात्जरासुरःअथःअजनीत्यर्थस्वीकारेणविरोधपरिहारः॥४०॥क्षितिपानुभावात् धर्मराजमाहात्म्यात् पदात्पदमपिगंतुं अनुष्णो मंदेजंघेयस्यसःअयंसुरारिःजरासुरः अथवनसीमनि एतान्युधिष्ठिरादीन्नीत्वा हन्मिकिंवा सहसाविचारमकृत्वा अत्रैवहन्मिइतिधियाबुद्ध्यातिष्ठन्निवअलक्ष्यतदृष्टः॥४१॥वनांतात्वनप्रदेशात्आ

वनंयियासोःकठिनेसभांतेजरासुरोधोनबभूवयस्य वनेविजृंभत्करुणेनुतस्यजरासुरोधोजनिधर्मसूनोः ४० नीत्वाकिमद्य
वनसीमनिदूरमेतानत्रैवहन्मिसहसेतिधियेवतिष्ठन् आलक्ष्यतायममरारिरनुष्णजंघोगंतुंपदात्पदमपिक्षितिपानुभावा
त् ४१ मध्येमार्गंवनातान्मदगजगमनेमारुतौसंमुखेस्मिन्सार्धंतेनाथयोद्धुंधृतरभसमनस्तीव्रदर्पप्रसारः दैत्यस्तान्राजपु
त्रान्क्षितितलमनयद्बाहुनास्कंधमध्यात्क्रोधांधोऽरत्निसीम्नासपुनरनिलभूर्दारुणंतस्यशीर्षं ४२ गच्छतिमध्येमार्गंमार्गस्यमध्ये

मदयुक्तगजगमनवत् गमनंयस्य अस्मिन्मारुतौ भीमेसंमुखेसति अथअनंतरं तेनसार्धंभीमेनसह योद्धुं धृतःरभसःक्रोधवेगोयेनतादृशंमनोयस्य सःतीव्रदर्पस्यगर्वस्यप्रसारःविस्तारोयस्यसःदैत्यस्तान् राजपुत्रान् धर्मनकुलसहदेवान् स्कंधमध्यात् बाहुनाक्षितितलमनयत् क्षितितलेस्थापयामासेत्यर्थः पुनःसःअनिलभूःभीमःक्रोधेनअंधःअविचारीसन् अरत्निसीम्नाप्रसृतकनिष्ठिकामात्रस्यहस्तस्याग्रेणतस्यदैत्यस्यदारुणंभयंकरंशीर्षं

मस्तकंक्षितितलमनयत् तस्यमस्तकंछित्वाक्षितितलमानयामासेत्यर्थः ॥ ४२ ॥ निकृत्तः छिन्नः मूर्धा मस्तकं यस्यतस्यनिपेतुषः निपतितस्य जटा
[illegible] नितांतभारेण बहुभारेणवनांतभूमिः दूरं अत्यंतं निम्नागर्तरूपा अभवत् भूमिसुतेक्षते निजेः स्वीयेः प्रतीकेः अवयवेः संकुचंतीव दुष्टदैत्यश
रीरस्य [illegible]र्शोमाभूदिति अवयवसंकोचं कुर्वतीवेत्यर्थः अन्यापिस्त्री चांडालादिस्पर्शभियावयवसंकोचंकरोति ॥ ४३ ॥ अस्मिन्दैत्येनिहतेसतिसर्वा
वनावनिः वनभूमिः निष्कंटकाक्षुद्र दुष्टशत्रुरहिता अभवत् सापार्षती द्रौपदीतु भीतेः उन्मत्ता आधिक्येन उद्गताः कंटकाः रोमांचाः यस्यास्तथाभूता अ

निपेतुषस्तस्यनिकृत्तमूर्ध्नोनितांतभारेणवनांतभूमिः निम्नाभवद्दूरममुष्यसंगेनिजैः प्रतीकैरिवसंकुचंती ४३ निष्कंटकाभ
वत्सर्वानिहतेस्मिन्वनावनिः उत्कंटकाभवद्भीतेरुन्मत्त्यासातुपार्षती ४४ ततस्तेश्वेताद्रिंचिरमधिवसंतः कुरुवराः सिताश्वस्यप्रा
प्त्यामुदमनुबभूवुर्निरवधिं कथाशोषीकारान्त्रिदशारिपुवर्गस्यबहुधाधनुर्ब्रह्मोज्झत्वशतमखपुजेस्थापितवतः ॥ ४५ ॥

भवत् दैत्यहननेन सर्वावनभूमिः निष्कंटकाजाता द्रौपदीतु उदितकंटकाजातेतिवाचोवैचित्र्यं ॥ ४४ ॥ ततः जटासुरवधानंतरं श्वेताद्रिंहिमाचलंचिरं
अधिवसंतः नकुरुवराः धर्मराजादयः सिताश्वस्य अर्जुनस्य प्राप्त्यासंगमलाभेननिरवधिं अमर्यादां मुदं अनुबभूवुः कथंभूतस्यसिताश्वस्यत्रिदशा
रिपूणांनिवातकवचकालकेयाद्यसुराणांवर्गस्यसमूहस्य बहुधाबहुप्रकारेण कथायांशेषीकारात् वधाद्धेतोरित्यर्थः शतमखस्य इंद्रस्यसुते धनुर्ब्रह्म
धनुर्वेदंउज्झन्तित्यजन्तिस्मः धनुर्ब्रह्मोज्झः तस्यभावंशास्त्रविद्यात्यागमित्यर्थः स्थापितवतः स्थिरीकृतवतः ॥ ४५ ॥ ॥ ५ ॥ ॥ ५ ॥ ११

सः नृपतिः धर्मराजः अनुक्रमेणभाषितं कथितं ईशस्यशिवस्ययुद्धं येननं अर्जुनं चलाचलेनश्लाघायांसकंपेनमूर्ध्नामस्तकेनबहूकृत्यअनेनशिवेन-
महयुद्धंकृतमितिअत्यादरं कृत्वानितांतं अत्यंतं हृष्टः सन् सहजैः समं बंधुभिः सहमहाद्रेः हिमाचलात्सकाशात् द्वैतवनं न्यवृतत्ननिवृत्तः॥४६॥तत्रव
नेनियमैः कृशांगाः याज्ञसेन्याद्रौपद्यासहनरेंद्रपुत्राः पांडवाः केवलतपोधनानामुनीनांनेत्राणिस्वेषांरमणीयत्वात् नयनानि नजह्रुः नहृतवंतः अपितु
नेदीयसीनां अतिसमीपवर्तिनीनांवनवीरुधांवनवल्लीनांनेत्राणिजटाः तंतूनितियावत् जटादिबंधनार्थंजह्रुः स्याज्जटांशुकयोर्नेत्रमित्यमरः॥४७॥

तमनुक्रमभाषितेशयुद्धं सबहूकृत्यचलाचलेनमूर्ध्ना नृपतिःसहजैः सममहाद्रेर्न्यवृतद्वैतवनंनितांतहृष्टः ४६ नरेंद्रपु
त्राःसहयाज्ञसेन्यानकेवलंतत्रतपोधनानां नेत्राणिजह्रुर्नियमैःकृशांगानेदीयसीनांवनवीरुधांच ४७ तदनुसखलु-
मानीसर्वसाम्राज्यलक्ष्मींप्रविकटयिषुरेषांप्राप्तकार्श्योन्नतीनां कुरुनृपतितनूजोघोषयात्रापदेशादभजतबलसंघे
रावृतस्तंवनांतं॥४८॥

तदनु तदनंतरं खल्वित्याश्चर्ये प्राप्ताकार्श्योन्नतिःसंपदस्यतानिप्राप्तोपेयेस्तेषां-
एषांपांडवानांसर्वांसाम्राज्यलक्ष्मींसार्वभौमसंपदंप्रविकटयिषुः प्रकटयितुमिच्छुः मानीसः कुरुनृपतेः धृतराष्ट्रस्यतनूजः पुत्रोदुर्योधनः बल सं-
घैः सेनासमूहैः आवृतः सन् घोषयात्रायाः घोषस्यगोवृषभादिदर्शनार्थं गमनस्य अपदेशात्कपटात् तंवनांतं द्वैतवनमध्यभागं अभजत् प्रापत् प्र-
मदारिप्याणांपांडवानां स्वसाम्राज्यलक्ष्मींदर्शयितुंस्वकीयगोपनदर्शनव्याजेनतद्वनंप्राप्तइतिभावः॥४८॥ ॥५ . ५ ५

तत्रवनेकरिव्रजानांगजसमूहानांकर्णानिलैः कर्णचालनसमुत्थ्यवायुभिः सर्वेषुचमूरजःसु सेनारेणुषुचलत्सु गच्छत्सु सत्सु अस्यदुर्योधनस्य चित्ताश्रितं अंतःकरणनिष्ठरजः रजोगुणास्तु बलादिव अचंचलमेव चलनरहितमेव तस्थौ वायुनासर्वसेनारजोगमनेपिसेनाधिपतेर्नृपस्यरजोनच लितंतत्बलान्नचलितंकिमितिहेतूत्प्रेक्षा श्लेषेणवाचोवैचित्र्यंच ॥४९॥ तत्रवनेभाविनःगंधर्वैःसहयुद्धानंतरंभविष्यतःरज्जुना हननस्यस्थानसूचनकृतीइव इदंस्थानमितिसूचकेइव अंगदेबाहुभूषणेभुजयुगेन धारयन् कौरवःदुर्योधनः सैनिकान् पंक्तिशःविबभाज विभागंकृतवान् पंक्तिशोविभा

कर्णानिलैस्तत्रकरिव्रजानांचलत्सु सर्वेषुचमूरजस्सु रजस्तुचित्ताश्रितमस्यराज्ञो बलादिवाचंचलमेवतस्थौ ॥४९॥ तत्ररज्जुनहननस्यभाविनःस्थानसूचनकृतीइवांगदे धारयन्भुजयुगेनकौरवःसैनिकान्सविबभाजपंक्तिशः ॥५०॥ अभ्रंलिहस्यवटभूमिरुहस्तलेसौस्थित्वाशृणोत्तदनुवैणिकगीतिरीतिं संगीतभंगिरसिकंसहवंधुवर्गैराकारयन्निवसुराधिपगायकेंद्रं ॥ ५१ ॥

गत्सु अश्वारोहेषु अश्वारोहः हस्तिपकेषु हस्तिपकः धानुष्केषु धानुष्कः खड्गिषु खड्गी इत्यादिज्ञेयः ॥ ५० ॥ तदनु असौदुर्योधनः अभ्रंलिहस्य अत्युच्चस्य वटभूमिरुहः वटवृक्षस्यतले अधोभागेबंधुवर्गैः सह स्थित्वावैणिकानां वीणावादनशिल्पिनां गायकानांगीतिरीतिं गानपद्धतिं अशृणोत् किंकुर्वन्निवसंगीतस्य गानवादनस्यभंग्यांरसिकंसुराधिप स्यइंद्रस्यगायकेंद्रंचित्रसेनगंधर्वराजं आकारयन्निव आव्हानंकुर्वन्निवेत्युत्प्रेक्षा ॥५१॥ ॥५॥ ॥५॥ ॥५॥ १२

॥गद्यं॥ यावद्ज्ञानंशृणोति तावत् अस्य धार्तराष्ट्रस्य दुर्योधनस्य चेष्टितेरोक्ष्यं पांडवान्प्रतिस्वसंपत्ति दर्शनेनलज्जेर्ष्यादिदानक्रियायाः पारुष्यंनिरीक्ष्यनित-
रां अत्यंतंक्रुधा कोपेन अंधः व्याप्तइत्यर्थः स्फधांधसां देवानांपत्युः इंद्रस्यनिदेशेन आज्ञयावनावनिदेशे अवतीर्णःस्वर्गात् भूमितलमागतः तूर्णंशीघ्रंविधृ
ताःकृपाणाःखड्गाः बाणाश्चचापानिच कलापाः तूणीराश्चतनुत्राणि कवचानिचतेषांसेनासमूहोयेनसः चित्रसेन नामागांधर्वः अमूं चमूंसेनांनिवार्यभर्त्स
यित्वा क्ष्वेडयासिंहनादेन लोलयांचक्रे मूर्छयापातयामास कः कामिव चिरं क्षुधितः तरक्षुः व्याघ्रसदृशवत्सपशुश्चमृगुरुततिमिव हरिणसमूहमिव य

॥गद्यं॥तावदस्यधार्तराष्ट्रस्यचेष्टितंरोक्ष्यंनिरीक्ष्यनितरांक्रुधांधःस्फधांधःपतिनिदेशेनवनावनिदेशेवतीर्णस्तूर्णंविधृतकृपाणबा
णचापकलापतनुत्रसेनश्चित्रसेनश्चिरंक्षुधितस्तरक्षुश्चमृगुरुततिमिवचमूममूंनिवार्यक्ष्वेडयालोलयांचक्रे॥११॥प॰ भटेषुधा
वत्सुभयेनकर्णः क्रुधारहसन्कुंजरमंजुचारः करेणविस्फारितकालपृष्ठोजगामशत्रुंजगदेकवीरः ५२ स्वसमाननाम्न्यवयवेनट
द्गुणाद्धनुषश्च्युतेःसयुधिदेवगायिनां अतिरक्ततांगलतलैकवर्तिनिंभखिलेवपुष्यपिचकारसायकैः ५२ यातरक्षुः हरिणसमूहंस्वशब्देनमूर्छ

ति तद्वदित्यर्थः॥११॥ पद्यं॥ भटेषुयोधेषु भयेनगंधर्वभयेन धावत्सुसत्सु जगति एकवीरः कुंजरस्येवमंजुः सुंदरः चारोगमनं यस्यसः करेणविस्फारितसश
ब्दंकालपृष्ठंएतत्संज्ञकंस्वधनुर्येनसः कर्णः क्रुधाक्रोधेनहसन् सन् शत्रुंचित्रसेनं जगाद निर्भयोजगामेतिभावः॥५२॥ स कर्णःयुधियुद्धे देवगायिनांदेवगा
यकानांगंधर्वाणां गलतले एकस्मिन्नवयवेवर्तिनींस्थितिमतीं अतिरक्ततां अतिसुस्वरतां धनुषः च्युतैः सायकैः अखिलेवपुषि देहेपिचकारेति आश्चर्यं॥

अतिशयेनरक्तं शोणितं यस्मिन्‌तत् अतिरक्तं नक्तां अरिविलेवपुषि चकारेतिश्लेषेणाश्चर्यपरिहार: कथंभूतात्धनुष: स्वेनसमानं नामसंज्ञायस्य तस्मिन्‌अ
वयवे कर्णेइत्यर्थ: नटनूगुणोमौर्वीयस्यतस्मात् आकर्णचापगुणाकर्षणेनक्षिप्तैर्बाणैरितिभाव:॥ ५३॥ युद्धश्लाघाक्रियायांगगनेशिरश्चलयत: कलहजी
विन: कलहप्रियस्य मुने: नारदस्यश्रवोंचलात् कर्णाग्रात् दूरंगलितापिपतितापि अवतंसमंजरीकर्णावतंसमंदारादिपुष्पमंजरीउन्नमद्भि: ऊर्ध्वंगच्छद्भि: इषू
णां ऊर्ध्वगामिनां कर्णबाणानांपक्षवायुभि: पुन:पुरत: ऊर्ध्वंगत्वापूर्वस्थले कर्णे अभवत् बहुयुद्धदर्शीनारदोपियुद्धश्लाघांचकारेतिभाव:॥ ५४॥ प्रकृष्टा:

गगनेशिरश्चलयत:श्रवोंचलाद्गलितापिदूरमवतंसमंजरी पुनरुन्नमद्भिरिषुपक्षवायुभि:पुरतोभवत्कल
हजीविनोमुने:॥ ५४॥ हस्तै:प्रवीणैररिविलोपिकर्णे सुधांविमुंचन्स्मरगायिवर्ग: अयुक्तमेतत्पुनरत्रक
र्णेविषाक्तवर्षंविससर्जघोरं॥ ५५॥ ॥ ॥ ॥ ॥

वीणा: येषुते: कुशलैश्चहस्तै: अरिविलोपिकर्णे जात्यभिप्रायेणैकवचनं कर्णेष्वित्यर्थ: सुधांविमुंचन् प्रक्षिपन् स्मरगायिवर्ग: गंधर्वसमूह: अत्रअस्मिन्
कर्णे पुन: घोरंभयंकरं विषाक्तवर्षं विषदिग्धवर्षणं वृष्टिंविससर्ज एतत् अयुक्तं कर्णेअव एव सुधांसुधासदृशामधुरस्वरं विसृजन् अस्मिन् शत्रौ कर्णेवि
षाक्तवर्षं विषदिग्ध बाणवृष्टिंविससर्जेत्यर्थस्वीकारेयुक्तमेवेतिवेद्यं॥ ५५॥ ॥ श्रीकृष्णायनम:॥ ॥७॥ ॥७॥ १२

॥गद्यं॥ तदनु विश्वस्मिन् अतिशायिनो विश्वावसोः कुमारस्य चित्रसेनगंधर्वस्य शरगणेन सहजकवचकृते सहजकवचार्थे युष्माकं मम च समान एव जय इति कृतः पणबंधो येन तस्मिन्निवराधेये कर्णे धावति युद्धात्पलायमाने सति कुरूणां वृंदेषु कंदलत्सु सत्सु च सर्वेपि गंधर्वभटाः आयोधनधरण्याः युद्धभूम्याः मध्यभाजं मध्यवर्तिनं सुयोधनं रश्मिभिः अवबध्य गर्जंतः हर्षशब्दं कुर्वंतः संतः रभसवर्जं मंदं यथा तथा निर्जरपथं गगनमार्गं अनैषुः नीतवंतः

॥गद्यं॥ तदनुविश्वातिशायिनोविश्वावसुकुमारस्यशरगणेनसहजकवचकृतेकृतपणबंधइवधावतिराधेयेकं-
दलत्सुकुरुवृंदेषुसर्वेपिगर्वेणगंधर्वभटासुयोधनमायोधनधरणिमध्यभाजंरश्मिभिरवबध्यगर्जंतोरभ-
सवर्जंनिर्जरपथमनैषुः॥१२॥ पद्यं॥ नयत्स्वमुंवैरिषुनाकमार्गंविषादभाजांविपिनेकुरूणां तत्तादृशो-
व्रीडभरेपितेषामुत्तानभावंनजहुर्मुखानि॥ ५६॥ ॥ ॥ ॥ ॥

॥ १२॥ पद्यं॥ विपिने अरण्ये वैरिषु गंधर्वेषु अमुं सुयोधनं नाकमार्गं आकाशमार्गं प्रति नयत्सु सत्सु विषादभाजां दुःखिनां तेषां कुरूणां मुखानि तत्तादृशि तस्मिन् अनिर्वाच्ये व्रीडाभरेपि लज्जातिशयेपि उत्तानभावं न जहुः न तत्यजुः लज्जया अधोमुखे कर्तव्येपि केन मार्गेण कथं नीयते इति दर्शनार्थं केवलमूर्ध्वं ददृशुरिति भावः॥ ५६॥ ॥ श्रीगोपालकृष्णायनमः॥ ॥ ९॥ ॥ ९॥ ॥ ९॥ ॥ ९

विगलितैः बाष्पांबुभिः पंकिलेपांसूदकयोर्योगात्कर्दमवतिमार्गे मंदितः वेगोयस्याः तादृशीपादानांगतिर्यासांताः वक्षस्सु उरस्थलेषु स्खलंतः प
तंतः पाणयोयासांताः दुःखेन उरस्ताडयंत इत्यर्थः तस्यदुर्योधनस्य अंतःपुरसंबधिन्यः स्त्रभ्रुवः सुंदर्यः भार्याइत्यर्थः नजातः शत्रुः शत्रुभावोयस्यतं
यस्यकस्मिन्नपिशत्रुभावोनासीदित्यर्थः नजहत् नत्यजत् कारुण्यं करुणायंतं कारुण्यमेवयंनत्यजतीत्यर्थः तंधर्मराजं अंघ्रिद्वये पादयुग्मेपुरतः

तस्यांतःपुरसुभ्रुवोविगलितैर्बाष्पांबुभिःपंकिलेमार्गेमंदितवेगपादगतयोवक्षःस्खलत्पाणयः॥
आजग्मुस्तमजातशत्रुमजहत्कारुण्यमंघ्रिद्वये कुर्वंत्योनमितंह्रियेवपुरतोदत्तार्द्धसाह्यंशिरः॥ ५७॥
॥ गद्यं॰ सगद्गदमेवमभिदधुश्च॥ १२॥ ॥ ॥ ॥ ॥ ॥

आदौह्रियैव लज्जयैव दत्तं अर्धसाह्यं यस्मिन्कर्मणि यथाभवतितथानमितंकुर्वत्यः सत्यः आजग्मुः स्वभर्तृमोचनार्थं शत्रुंप्रतिशरणागमने लज्जयैवनमितंशिर
स्तस्यकरुणोत्पादनार्थंप्रतिनमितमितिभावः ५७ ग॰ सगद्गदंदुःखातिशयात्स्पष्टाक्षरंयथातथा एवंवक्ष्यमाणप्रकारेण अभिदधुः ऊचुश्च॥ १२॥ ५ ५

॥पद्य॥ हे देवराजन् अधुना तवैव पादमूलं संद्रष्टुं सर्वैः भ्रातृभिः समं अरण्ये आगतं भ्रातरं बंधुं दुर्योधनं पापः पापी कश्चन कश्चित् दिविषदां देवानां गायकः गंधर्वः ह्यादृतिरवेदे हंत इति अनुकंपायां हेतोः अपराधरूपकारणस्य लेशेन विना दृढं यथा तथा बध्वा उच्चकैः अभ्रं आकाशं नयति कथंभूतो गायकः निःशंकैः एतन्मोचनार्थं पश्चात्कश्चिदायास्यतीति शंकारहितैः निजभटैः स्वकीयसेवकगंधर्वयोधैः उपवीणितः वीणाशब्देन सह स्तुतः

॥पद्यं॥ संद्रष्टुं तव पादमूलमधुना सर्वैः समं बंधुभिर्देव भ्रातरमागतं वनतले लेशेन हेतोर्विना पापः कश्चन गायको दिविषदां ह्याहंत बध्वा दृढं निःशंकैरुपवीणितो निजभटैरभ्रं नयत्युच्चकैः ॥ ५८॥ तदद्य नः कंठभुवि स्नुषाणां तवैव पादं शरणं गतानां वास्तव्यतां मंगलसूत्रिकायाः प्रसीद दातुं प्रथमानकीर्ते ॥ ५९॥ ॥ ॥ ॥

उच्चकैः स्तुत इति वा संबंधः ॥ ५८॥ प्रथमाना महती कीर्तिर्यस्य तत्संबुद्धौ हे प्रथमानकीर्ते तत्तस्मात् अद्य तवैव पादं शरणं रक्षितारं गतानां प्राप्तानां स्नुषाणां ज्येष्ठभ्रातुः पितृतुल्यत्वात् तव स्नुषाणां नः अस्माकं मंगलसूत्रिकायाः कंठभुवि कंठदेशे वास्तव्यतां स्थितिं दातुं प्रसीद गंधर्वजयेन तज्जीवदाने कृते अस्मत्सौभाग्यस्य स्थैर्यं भविष्यति तद्भवता कृपया कर्तव्यमिति भावः ॥ ५९॥ ॥ राधाकृष्णाभ्यां नमः ॥ ७ ७ ७

॥गद्यं॥ ताभिःस्त्रीभिः इतिपूर्वोक्तं दीनभावं पुरोधाय अग्रतः कृत्वा निवेदितस्य कृतवृत्तांतनिवेदनस्य राज्ञः धर्मराजस्य निदेशेन आज्ञया सत्वरमनु धावतां भ्रूदंड इव कोदंडमपि कोपेन कुटिलीकुर्वतां भ्रूदंडस्य कुटिलीकरणं वक्रीकरणं कोदंडस्य गुणारोपणेन नमनं भीमप्रभृतीनां चतुर्णां क्ष्वेडि तविस्फाराभ्यां सिंहनाद धनुर्ज्याशब्दाभ्यां कृत्वा तत्क्षणं अखिलं वियत् आकाशं विकस्वरः वृद्धिंप्राप्तः निजगुणः शब्दो यस्मिन् तथाभूतमासीत् आकाशं

॥गद्यं॥ इतिताभिर्दीनभावंपुरोधायनिवेदितस्यराज्ञोनिदेशेननिर्गत्यसत्वरमनुधावतांभ्रूदंडमिवकोदंडमपिकोपेन कुटिलीकुर्वतांभीमप्रभृतीनांक्ष्वेलितविस्फाराभ्यांतत्क्षणंवियदखिलंविकस्वरंनिजगुणमासीत्॥१४॥ प॰ क्वगायकायूय मुपात्तवीणाः क्वचापधुर्याः कुरुवंशभूपाः अहोरणेचापलमीदृशंवः स्वमूलकंवापरमूलकंवा॥ ६०॥ ॥

सिंहनादधनुर्ज्याशब्दाभ्यांव्याप्तमा सीदितिभावः॥१४॥ प॰ अर्जुनस्तु एवं वक्ष्यमाणं उवाच उपात्ताः गृहीताः वीणायैस्ते यूयं गायकाः क्वचापधुर्याः चापविद्यायांप्रवीणाः कुरुवंशभूपाः क्व युष्माकमस्माकंचमहदंतरमितिभावः अहोइत्याश्चर्ये रणेयुद्धेवःयुष्माकं ईदृशंचापलं स्वपरबलमनालोच्य साहसकर्म स्वं आत्मामूलंकार णं यस्यतथाभूतं अथवा परःमूलंयस्यतथाभूतं स्वबुध्याकृतमथवापरबुध्याकृतमितिमर्मः॥ ६०॥ ६ ६ ६ ६ १५

वृषांकमौलेः शिवमस्तकस्य व्रणमेव चिन्हं तद्ददाति सः युद्धे सदाशिवमस्तके व्रणकर्ता महावीर इत्यर्थः अर्जुनः अस्मिन्वने वसति इति वार्ता भवतां कर्णे न प
तिता किंस्वित् यद्यस्मात् यूयं ईदृशं साहसं स्वशक्त्यपेक्षया अधिकं अस्मद्बंधुबंधनकर्म आतनुध्वे यद्यस्मिन्वने स्मद्भ्रातृवासवार्ता श्रुता स्यात्तर्हि इदं साहसं क
र्म भवद्भिर्न कृतं स्यादिति भावः ॥६१॥ अधुना असौ भ्राता अस्मद्बंधुः सुयोधनः न विमुच्यते चेत्तर्हि अत्र मे गांडीवनामा चापः तथा तेन प्रकारेण सन्नह्यतु युद्धा
र्थं सन्नद्धो भवतु यथा येन प्रकारेण महेंद्रः वीणां परिगृह्य स्वबाहुकीर्तिं स्वयमेव गायेत् गास्यति मया क्रोधेन जगति निर्गंधर्वे कृते सति स्वर्गे नायकाभा

वृषांकमौलेर्व्रणचिन्हदायी वनेऽर्जुनोऽस्मिन्वसतीति वार्ता पपात कर्णे भवतां न किंचिद्यदीदृशं साहसमातनुध्वे ६१ भ्राताधुनासौ न
विसृज्यते चेत्तथात्र सन्नह्यतु गांडिवं मे यथा महेंद्रः परिगृह्य वीणां स्वबाहुकीर्तिं स्वयमेव गायेत् ६२ ग० इति विजयस्य वीरवादेन
पुनरपि निवर्तमानैर्वीणामंसेषु निबध्य बाणासनमेव कूजयद्भिस्तैर्नभश्चरैः सममेषां सकलवैमानिकपरिषदंगरुहवितीर्णनिद्राभंगो
महान्संगरोऽभूत् १५ वात् स्वकीर्तिं स्वयमेव गास्यतीति भावः ॥६२॥ ग० इति विजयस्य शत्रुपराभवकर्तुः अर्जुनस्य वीरवादेन अस्मिन् जगति अह
मेक एव वीर इति सूचकभाषणेन पुनरपि निवर्तमानैः वीणां अंकेषु स्कंधेषु निबध्य बाणासनमेव धनुरेव कूजयद्भिः वादयद्भिः नभश्चरैः गगने तिष्ठद्भिः तैः गंधर्वैः
समं एषां पांडवानां महान् संगरः संग्रामः अभूत् सकलानां वैमानिकानां विमानचारिणां देवानां परिषदः समूहस्य यानि अंगरुहाणि लोमानि तेषां वि-
तीर्णः दत्तः निद्राभंगो येन सः यमद्भुतं संगरं दृष्ट्वा सकलदेवानामंगेषु रोमांचोत्पत्तिर्जातेति भावः ॥ १५॥ ॥६१॥ ॥६२॥ ॥६३॥

।।पद्यं।।गंभीरात् दृढात् गांडिवात् गुणात् गलितैः निर्गतैः पृषत्कैः बाणैः गंडस्थले कपोलस्थले हृदि भुजे च गमितव्रणाः प्रापितव्रणाः ते गंधर्वाः चकिताः भीताः संतः गर्वं गगनचारिणां देवानामस्माकं मनुष्याः किं करिष्यंतीति गर्वं विहाय संत्यज्य गगनांतराले गगनमध्ये गंधर्वभावसदृशं गंधर्वत्वानुरूपं गमनं वितेनुः चक्रुः पुंस्त्वमत्वा गगने पलायनं चक्रुरित्यर्थः तत्पलायनं गंधर्वत्वानुरूपं श्लेषेण अश्वत्वानुरूपं अश्ववत् अतिजवेन पलायनं चक्रुरिति भावः वाजिवाहार्वगंधर्वेत्यमरः ।। ६३।। विजयेन अर्जुनेन कृत्ताः छिन्नाः समस्ताः वीणाः गंधर्वसैन्यात् गलिताः भुवि पतिताः बभूवुः दिविलोके स्वर्गलोके नार

पद्यं।।गंभीरगांडिवगुणाद्गलितैः पृषत्कैर्गंडस्थले हृदि भुजे गमितव्रणास्ते गर्वं विहाय चकिता गगनांतराले गंधर्वभावसदृशं
गमनं वितेनुः ६३ वीणाः समस्ता विजयेन कृत्ता गंधर्वसैन्याद्गलिता बभूवुः आयुष्मती केवलमास लोके हस्ताग्रवीणा दिवि नार
दस्य ६४ एतावतीति युधि मार्गणचारशक्तिः स्पष्टी बभूव स्फुरगायकपांडवानां तेषां ययुः शरकुलानि हि लक्ष्यमात्रं लक्ष्यं विभिद्य
पुनरायमुरंतमेषां ६५

दस्य हस्ताग्रवीणा हस्ताग्रस्थिता वीणा केवलं आयुष्मती छेदरहिता आस आसीत् ।। ६४।। युधि स्फुरगायकानां गंधर्वाणां
पांडवानां च मार्गणचारशक्तिः बाणगमनशक्तिः एतावती इयत्प्रमाणा इति स्पष्टी बभूव कथं तदाह हि यतः तेषां गंधर्वाणां शरकुलानि बाणसमूहाः
लक्ष्यमात्रं ययुः एषां पांडवानां शरकुलानि लक्ष्यं विभिद्य पुनः अंतं स्वसमीपभागं ययुः गंधर्वबाणैः पांडवानां व्रणाः न जाताः पांडवबाणैः गंधर्वा १६
णां देहभेदपर्यंतं व्रणा जाता इति भावः ।। ६५ ।। ।।श्रीगोपालकृष्णाय नमः।। ।।छ।। ।।छ।। ।।छ।।

।।गद्यं।। तत्रशात्रवस्तस्य अर्जुनस्य तादृशंविक्रमं पराक्रमं अभिनंद्य श्लाघित्वा कृतसंधानं अर्जुनेन सहसंधिर्येन तेनगंधर्वराजेन समर्पितंपौरुषही नं पराक्रमहीनं इदंपुरस्करणीयं अग्रतः करणीयं नभवतीति बंधमिषेणपश्चात्पृष्ठभागे उपनीतंकृतंबाहोर्युगलं यस्यतं सुयोधनं आदायतेभीमा दयःवसुधाधिपस्य धर्मराजस्यसन्निधिं अधिरोपयामासुःस्थापयामासुः तादृशंगंधर्वकृतबंधनमुक्तमेवसुयोधनं अग्रतःस्थापयामासुरितिभावः।१६

।।गद्यं।। तत्रशात्रवस्तस्यतादृशंविक्रममभिनंद्यकृतसंधानेनगंधर्वराजेनसमर्पितंपौरुषहीनमिदंनपुरस्कर णीयमितिबंधमिषेणपश्चादुपनीतबाहुयुगुलंसुयोधनमादायतेभीमादयोवसुधाधिपस्यसन्निधिमधिरो पयामासुः।।१६।। पद्यं।। तंवीक्ष्यतत्रतरुमावरणंभजंतीसापार्षतीसविधवल्लिपरंपरासु हासैःकरांगुलि बिलादसकृद्गलद्भिराकालिकींकुसुमपंक्तिमिवव्यतानीत्।। ६६।। ।। ।। ।।

।।पद्यं।। तत्र आश्रमे तरुः वृक्षः आवरणं आत्मनः आच्छादकंभजंती स्वीकुर्वती सापार्षती द्रौपदी तं तथाबद्धंसुयोधनंवीक्ष्य करांगुलिबिलात् हा स्याच्छादनार्थमुखेलापितयोः करयोः अंगुलिसंधिच्छिद्रात् असकृत्मुहुर्मुहुः गलद्भिः हासैः सविधवल्लीनां समीपस्थलतानां परंपरासु आका लिकीं अकालेउत्पत्तिनाशशालिनीं कुसुमपंक्तिंव्यतानीदिव अकार्षीदिव हासानांशुभ्रत्वात्कुसुमपंक्तिविस्तारणोत्प्रेक्षा।।६६।। ।।७।। ।।

सं·भा· तद्धार्मासुयोधनंप्रति धर्मराजोक्तिमाह वीरेति हेवत्सत्वंत्रिभुवनभवेः वीराणांव्रातैः समूहैः संस्तुतेविश्रुतेइतिपाठविशेषेणश्रुतेअस्मिन् नः कु टी· मा·
१७ ले बहुभिः अनुजैः कनिष्ठबंधुभिः सह उद्भूय उत्पद्य आधिपत्यराजाधिपत्यं आस्थितोपिप्राप्तः सन्नपिइहलोके नीचैः अल्पैः प्रणीतंकृतंएवंए ५

नादृशाबस्था नयनरूपं भंगपराभवं किंभजसे कुतोभजसि हियतः राजन्यानांक्षत्रियाणां परस्मात् शत्रोः सकाशात् परिभवः कीर्तेः राजयक्ष्मास्थय·

रोगः कीर्तिनाशक इत्यर्थः अस्मत्कुलभवस्य तवपराजयेनास्मत्कीर्तिनाशभयात्तन्मोचनंकृतमितिभावः ॥ ६७ ॥ सरलेन ऋजुबुद्धिना युधिष्ठिरे

वीरव्रातैस्त्रिभुवनभवैःसंस्तुतेनः कुलेस्मिन्नुद्भूयत्वंबहुभिरनुजैरास्थितोप्याधिपत्यं एवंभंगंकिमिहभजसेवत्स

नीचैःप्रणीतंराजन्यानांपरपरिभवोराजयक्ष्माहिकीर्तेः ॥ ६७ ॥ इत्थंनिगद्यसरलेनयुधिष्ठिरेणबंधाद्विमोच्यबक

विद्विषताविसृष्टः मानंच्युतंमृगयमाणइवानिनम्रोवाचंयमेनसययोमहताबलेन ॥ ६८ ॥ ॥ ॥

ण इतिनिगद्य उक्त्वा बकविद्विषताबकासुरशत्रुणा भीमेन प्रयोज्य कर्त्राबंधाद्विमोच्य मोचयित्वाविसृष्टः गच्छेत्युक्तः सः दुर्योधनः च्युतंगलितंमा-

नं अभिमानं मृगयमाणइव अन्विष्यन्निव अतिशयेन नम्रः लज्जयानतः सन् वाचंयमेननिःशब्देन महताबलेन सैन्येनसह ययौ जगाम अन्योपि १७

गतं पदार्थंमृगयितुं नतोभूत्वाधोदृष्ट्यापश्यन् गच्छति ॥ ६८ ॥ ॥ श्रीगोपालकृष्णायनमः ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

जीवितुमुत्सुकाः उत्कंठिताः जनाः यंप्रायं बहुमन्यंते बहुमानयंति असौदुर्योधनः पथिमार्गेप्राणान् समुज्झितुं त्यक्तुं तमेवप्रायं उपाविक्षत् अशि
श्रियत् इतिविरोधः पूर्वार्द्धे प्रकृष्ट आयः शुभदैवं उत्तरार्द्धेप्रायंमरणपर्यंतमनशनव्रतमितिविरोधपरिहारः ॥ ६९ ॥ तस्मिन्व्रते मरणपर्यंतान-
शनव्रते स्वपने स्वप्ने लब्धं सुरारीणां दैत्यानांसाह्यं त्वमिदमनशनव्रतंत्यक्त्वायुद्धोद्योगं कुरु तत्रवयं सहायाभविष्यामइति वचनरूपंसहायं येनसः

यंप्रायंबहुमन्यंतेजनाजीवितुमुत्सुकाः उपाविक्षत्तमेवासौपथिप्राणान्समुज्झितुं ६९ तस्मिन्व्रतेस्वपन
लब्धसुरारिसाह्यस्त्यागेतनोस्तदनुबंधुतयानिषिद्धः तस्माद्वनात्पुनरपिप्रतिपद्यधैर्यंघुष्यद्बलोनिववृतेकुरु
राजधानीं ७० ॥ गद्यं ॥ तत्रखलु ॥ ॥ पद्यं ॥ कदापिमाबंधयगायकेर्मामितीवहव्यैरमृतायमानैः संप्रीण
यन्निंद्रमयाभिमानीसपौंडरीकंक्रतुमाजहार ॥ ७१ ॥ ॥ ॥ ॥ ॥

तदनु तदनंतरं बंधुतया बंधुसमूहेन तनोः शरीरस्य त्यागेविषये निषिद्धः दुर्योधनः पुनरपि धैर्यं प्रतिपद्यप्राप्य घुष्यन् गर्जन् बलंसैन्यंयस्य त
थाभूतः सन् तस्मात् वनात् कुरुराजधानीं हस्तिनापुरीं निववृतेनिवृत्तः ॥ ७० ॥ गद्यं ॥ तत्रराजधान्यांखलु ॥ ॥ पद्यं ॥ अथअभिमानीसः दुर्योधनः
कदापिगायकैः गंधर्वैः मांमाबंधय इतिहेतोरिव अमृतायमानैः अमृततुल्यैः हव्यैः होमद्रव्यैः इंद्रंसंप्रीणयन्सम्यक्प्रीतिमुत्पादयन्पौंडरीकंक्रतुंयज्ञंआजहार च
कार ७१

जः धर्मराजः भूयोपि पुनरपि तां वनभुवं द्वैतवनभुवं प्रविहाय त्यक्त्वा काम्यकतपोवनस्य मंडलानि भूयः बहुतरं यथा तथा भेजे सिषेवे कीदृशानि मंड
लानि किर्मीरस्य राक्षसस्य नाशेन भीमकृतवधेन मुदितानां हृष्टानां अखिलानां तापसौघानां स्वाध्यायघोषैः मुखरितानि सशब्दीकृतानि दिङ्मुखा
[illegible] आरंभाः येषु तानि ॥७२॥ तत्र वने मृदुभिः नवैः वल्लीनां कंदफलैः विहितः आतिथ्यविधिः अतिथिसत्कारविधिर्यस्य सः पार्थः धर्मराजः हृष्ट
चेताः सन् तृणबिंदोः ऋषेः वचने आज्ञायां तपोवने च स्थितिं अनुवर्तनं वासं च आचरति स्म चकार ॥७३॥ या असंख्याः पट्टपटीः कौशेयवस्त्राणि प्रासूत स्व

भूयोपि तां वनभुवं प्रविहाय भेजे भूयः स काम्यकतपोवनमंडलानि किर्मीरनाशमुदिताखिलतापसौघस्वाध्यायघोषमु
खरीकृतदिङ्मुखानि ७२ मृदुभिर्नववल्लिकंदमूलैर्विहितातिथ्यविधिः स तत्र पार्थः स्थितिमाचरति स्म हृष्टचेता
स्तृणबिंदोर्वचने तपोवने च ७३ प्रासूत या सदसि पट्टपटीरसंख्याः सैषा समागतवतीति सकौतुकाक्ष्यः वेणीध
रामुटजसीमनि याज्ञसेनीं विस्मित्य वल्कलवसं ददृशुर्गृहिण्यः ॥ ७४ ॥ ॥ ॥ ॥

शरीरादुत्पादयामास सा एषा स्त्री समागतवती अत्रागता इति सकौतुकानि दर्शने उत्सुकानि अक्षीणि यासां ताः गृहिण्यः तापसपत्न्यः उटजसी
मनि पर्णशालाप्रसरे वेणीधरां तैलादिसंस्काररहितैकवेण्याः धारयित्रीं वल्कलं वृक्षत्वचं वस्ते परिधत्ते तेन तथाभूतां याज्ञसेनीं द्रौपदीं विस्मित्य विस्मयं
प्राप्य ददृशुः या अमूल्यानेकवस्त्रप्रसवित्री सा इदानीं वल्कलं परिधत्ते कोयं विधेश्चमत्कार इत्याश्चर्येण ददृशुरिति भावः ॥७४॥ ॥६५॥ ६५

मुनीनां धर्मदाराः धर्मपत्न्यः तस्मिन् तादृक्षे लोकविलक्षणे अस्याः द्रौपद्याः करे द्विविधं द्विप्रकारं यत् वनं उदकं अरण्यं च तस्मिन् भवति तादृशं उदकभवं अरण्यभवं च कंदमूलोपहारं कंदमूलरूपोपायनं दातुं लज्जापयोधेः लज्जासमुद्रस्य तलं अधोभागं अभिममृशुः पस्पृशुः लज्जासमुद्रे मग्ना बभू वुरित्यर्थः करस्य लोकवैलक्षण्यमाह यस्येति वनांते वनमध्ये किंचित् किंचन भांडं पात्रं यस्य करस्य स्पर्शानुभावात् अविरतं अजस्रं उदितैः उत्पन्नैः दि व्यैः अलौकिकैः पायसैरेव पयोविकारपरमान्नैरेव अतिथिजनस्य तनुं देहं अन्यथार्थां विपरीतार्थां अतनुमित्यर्थः अतनोत् अकरोत् तनुं पुष्टामकरो

तत्तादृक्षे करेस्या द्विविधवनभवं कंदमूलोपहारं दातुं लज्जापयोधेस्तलमभिममृशुर्धर्मदारा मुनीनां यस्य स्पर्शा नुभावादविरतमुदितैः पायसैरेव दिव्यैः किंचिद्भांडं वनांते तनुमतिथिजनस्यातनोदन्यथार्थां ७५ गद्यं ॥ त त्रांतरे ॥ ॥ पद्यं ॥ दिशि दिशि मृगयायै तेषु यातेषु जातु स्वयमुटजमवाप्तः सोमकेंद्रस्य पुत्र्याः लपनशशि महिम्ना लंघयामास वेलां तरलितमकरांकस्तत्क्षणं सिंधुराजः ॥ ७६ ॥ दित्यर्थः ७५ गद्यं ॥ तत्रांतरे तस्मिन् समये ॥ ॥ पद्यं ॥ जातु कदाचित् तेषु पांडवेषु मृगयायै मृगयार्थं दिशि दिशि यातेषु गतेषु सत्सु स्वयं उटजं पांडवपर्णशालां अवाप्तः प्राप्तः सोमकेंद्रस्य द्रुपदस्य आत्म जायाः द्रौपद्याः लपनशशिनः मुखचंद्रस्य महिम्ना अनुभावात् तरलितः क्षुब्धः मकरांकः मदनो यस्मिन् सः अन्यत्र तरलिताः मकराः ग्राहाः अंकाः चिन्हा नि यस्य सः सिंधुराजः सिंधुदेशस्वामी जयद्रथः समुद्रश्च तत्क्षणं तस्मिन् क्षणे वेलां मर्यादां तीरं च लंघयामास ॥ ७६ ॥ ॥ ८५ ॥ ॥ ८७ ॥

॥गद्यं॥ तत्रउटजे कुररीमिव पक्षिणीविशेषमिवक्रंदंतीं क्रोशंतीं निंदंतींतन्निंदांकुर्वतीं एनांद्रौपदीं पुरस्तात् अग्रभागे आरोप्य शतांगेन रथेननिमिषे
णनिमिषमात्रकालेन चूषितःपीतःपरिणाहोदीर्घतायस्य तथाभूतःवनीपथःवनमार्गोयस्यतं जयद्रथंप्रति जटारिकिरीटिनौभीमार्जुनौरोषएवविद्रुमल
ताप्रवालवल्लीतस्याःकिसलयैरिवेत्युत्प्रेक्षा लोचनैः शरासनं अवकीर्य अभिदृष्य ग्रहणार्थं विलोक्येतिभावः मृगयाविहारात् निवृत्तमात्रेणचरणे
नद्रुतंशीघ्रं अन्वदुद्रुवतांपश्चाद्धावतां आश्रमप्रवेशं कृत्वैवान्वधावतामितिभावः कीदृशेनशतांगेन सूतस्यसारथेःकरेयःतोत्रदंडःतेनअध्यापि

॥गद्यं॥ ततःक्रंदंतींकुररीमिवनिंदंतीमेनांपुरस्तादधिरोप्यसूतकरतोत्रदंडाध्यापितवेगतंत्रपारीणरथ्येनघनतरत
ज्जघनपयोधरभाराक्रमणाविनम्रीभूतपूर्वभागतयापार्थदर्शनशंकयानिकुब्जीभूयेवधावताशतांगेननिमिषचूषितप
रिणाहवनीपथंजयद्रथंपुनरप्याश्रमपदमाश्रित्यनिशमितप्रमदावार्तेनदावार्तेनेवपूर्वजेननियुक्तोजटारिकिरीटिनौरो
षविद्रुमलताकिसलयैरिवलोचनैःशरासनमवकीर्यमृगयाविहारनिवृत्तमात्रेणचरणेनद्रुतमन्वदुद्रुवतां॥ १७॥

तस्यपाठितस्य वेगतंत्रस्यवेगशास्त्रस्य पारदृश्वानःपारद्रष्टारःरथ्याःअश्वाःयस्यतेनसूतकशाघातात् धावदश्वेनेत्यर्थःपुनःकथंसूतेन घनतरा
णांगुरुतराणांतस्याःद्रौपद्याःजघनपयोधराणांकटिपुरोभागस्तनानांभारस्याक्रमणेनविनम्रीभूतःपूर्वभागोयस्यतस्यभावःतत्तातयापार्थदर्शन
शंकयापार्थाःद्रक्ष्यंतीतिशंकयानिकुब्जीभूयेवनम्रीभूत्वेव धावताभारेणरथस्यनम्रतायांदर्शनशंकयाकुब्जीभवनोत्प्रेक्षा कीदृशौजटारिकिरीटिनौ

पुनरपि आश्रमपदं आश्रित्यप्राप्यनिशमिताश्रुता प्रमदायाः द्रौपद्याः वार्तायेनतेन दावार्तेनेव दावाग्निनापीडितेनैव पूर्वजेनज्येष्ठबंधुनानियुक्तोआज्ञप्तो॥१७॥ ततः क्षणादेव कर्णपूरं कर्णावतंसं यत्‌वनकुसुमंतस्यसौरभंसुगंधं जिघ्रंती सिंजिनीमौर्वीयस्यतेन आकर्णमाकृष्टगांडीवेनेत्यर्थः धनंजयेन अर्जुनेनसपत्राकृतः शरीरे आपुंखशरारोपेणबहिर्वशिष्टशरपक्षसहितः कृतः धृतः त्रासः भयंयेनसः तस्यभावः तत्तातयाविनयविपर्य

॥गद्यं॥ ततः क्षणादेवकर्णपूरवनकुसुमसौरभजिघ्रत्सिंजिनीकेनधनंजयेनसपत्राकृतोधृतत्रासतया विद्यामिवविनयविपर्ययः कृष्णांविमुच्यकृतपलायनः सदुर्मेधाः पुरःप्रधावितेनमागधविरोधिनारुरुधे॥ १८॥ पद्यं॥ कचेगृहीत्वाभुविपातितस्यकठोरचारित्रपरस्यशत्रोः संताडनेमारुतिरात्मपाणेः सच्छात्रयामासपदंचवामं॥७७॥ श्रीकृष्णा॥ ॥ ॥ ॥ ॥

यः विद्यामिववेदशास्त्रविद्यामिव कृष्णांद्रौपदीं विमुच्य कृतपलायनः दुर्मेधाः दुर्बुद्धिः सः जयद्रथः पुरः अग्रतः प्रधावितं प्रकृष्टंधावनं यस्यतेनमागधविरोधिना जरासंधशत्रुणाभीमेनरुरुधे रुद्धः॥ ॥१८॥ पद्यं॥ कचेकेशेगृहीत्वाभुविपातितस्य कठोरंसाहसं यत्‌ चारित्रंकर्मतदेवपरंमुख्यंकरणीयं यस्यतस्य शत्रोःजयद्रथस्यसम्यकृताडनेविषयेमारुतिः भीमः आत्मपाणेः स्वहस्तस्यवामंपदंचरणंसच्छात्रयामाससच्छिष्यंचकारसहायंचकारेत्यर्थः॥७७॥ ॥६७॥ ६७

अथताडनानंतरं सौवीरभर्तुःजयद्रथस्यमूर्धनिमस्तकेपवनात्मभुवाभीमेनक्षुरेणक्षुरभबाणेनक्लृप्ताःकृताःपंचचूडाःविरेजुःशुशुभिरेचूडाःउत्प्रेक्षते
त्रासांबुभिःभयजन्यघर्मांबुभिःत्रासात्मकांबुभिर्वाअंतःअंतःकरणेशाम्यतःशांतिंप्राप्नुतःस्मरशरानलानांमदनबाणाग्नीनांपंचकस्यइंगालसंबंधि
धूमकलिकाइवनिर्वापितस्यबाणानलपंचकस्यपृथक्पृथक्पंचधूमकलिकाःकिमित्यर्थः॥७८॥भूपःधर्मराजःअनुजेनभीमेननीतंआनीतमित्यर्थःके
शानांभारेहृतेपिदूरीकृतेपिकृतानतिःलज्जयाननमनंयस्यतथाभूतंशिरोयस्यतंविमतंशत्रुंजयद्रथंवीक्ष्यस्मितास्यःहास्यमुखःसन्नूनःअस्माकं

सौवीरभर्तुरथमूर्धनिपंचचूडाःक्लृप्ताःक्षुरेणपवनात्मभुवाविरेजुः इंगालधूमकलिकाइवशांम्यतांतस्त्रासांबुभिःस्मरशरानल
पंचकस्य७८विमतमनुजनीतंवीक्ष्यभूपःस्मितास्यःकृतनतिशिरसंतंकेशभारेहृतेपि त्वदसुहरणमार्गेदुःशलैवार्गलानःक्व
चिदपिकुरुमेवंकुत्सितेत्युत्ससर्ज७९दीनधीःसतपसाहिमशैलेदृक्पथंपुरहरात्गृहयालोःआददेवरमथोविजयोद्वावंतरेणपृथिपां
डवरोधं८०

त्वदसूनां त्वत्प्राणानांहरणस्यमार्गेदुःशलैवएतन्नाम्नीभगिन्येवअर्गलाप्रतिबंधिकाजयद्रथस्यभगिनीपतित्वात् हेकुत्सितनीच
कर्मकारिन् एवंपरजायाहरणरूपंकुत्सितंकर्मक्वचिदपिकुत्रापिमाकुरु इत्युक्त्वा उत्ससर्ज गच्छेत्युक्त्वाविसृष्टः॥७९॥ अथोदीनधीःअल्पबुद्धिः
सःजयद्रथःहिमशैले तपसा कृत्वा दृक्पथंनेत्रेंद्रियविषयतांप्रत्यक्षतामित्यर्थः गृहयालोः गृहीतुःपुरहरात् शिवात् द्वौविजयौ अंतरेणअ-
र्जुनं अथचविनापांडवानां रोधंकेवलंप्रतिबंधं वरं आददेजग्राह॥८०॥ ॥श्रीगोपालकृष्णायनमः॥ ॥५॥ ॥५॥ ॥५

पर्याप्त्रकृच्छ्रात् संकष्टात् उत्तीर्णां निर्गतां पार्षतीं द्रौपदीं प्राप्य रेमिरे [illegible] बभूवुः यथा हेलेः सूर्यस्य करांकुराः किरणोद्गमाः हेमंतात् हिमर्तोः मुक्तां पद्मिनीं कमलिनीं प्राप्य रमंते तद्वत् ॥ ८१ ॥ ॥ इति जपद्मपंक्त्युद्धाकरणं ॥ तत्रांतरे तदवसरमध्ये कदाचित् भासांपतिः सूर्यः अंगेषु मध्ये कर्णं रात्रौ [illegible] शब्दः अंगेषु अवयवेषु मध्ये कर्णं अवयवं प्राप्नोति तद्वत् कृतं नमस्करणं नमस्कारो येन तस्मै कर्णाय प्रेम्णा स्नेहेन आशिषः यवीयसीं अनुजां वाणीं मणिजगाद उवाच आशीर्वादानंतरं गिरमुवाचेत्यर्थः कथंभूतः सूर्यः ज्वलितः देदीप्यमानः प्रीतो वर्णो यस्य तथाभूतं वपुः शरीरं

पार्याप्त्रकृच्छ्रादुत्तीर्णां पार्षतीं प्राप्य रेमिरे हेमंतात्पद्मिनीं मुक्तां हेलेरिव करांकुराः ॥ ८१ ॥ तत्रांतरे ज्वलितवर्णवपुः कदाचिदंगेषु शब्द इव कर्णमवाप्य रात्रौ भासांनिधिः कृतनमस्करणाय तस्मै प्रेम्णाशिषः मणिजगाद यवीयसीं गां ॥ ८२ ॥ अहमहरधिनाथोनुग्रहान्मे पृथायामयि जननमभूस्त्वं वत्स कोशो गुणानां तदिदमिह रहस्यं शासनं गृह्य तां मे तनय कुशलयोगे तात पादायतं ते ॥ ८३ ॥ ॥ ॥ ॥ ॥

यस्य सः शब्दपक्षे ज्वलितं स्पष्टं वर्णरूपं अक्षररूपं वपुर्यस्य सः ॥ ८२ ॥ अयि वत्स अहं अहरधिनाथः आह्नांपतिः सूर्यः अस्मि मे मम अनुग्रहात् पृथायां कुंत्यां गुणानां कोशः भांडारगृहं त्वं जननं जन्म अभूः प्राप्तवानसि ततः इह इदं वक्ष्यमाणं रहस्यं गोपनीयं मे शासनं आज्ञां गृह्य तां त्वं हे तनय हे तात [illegible] पितृचरणाः तव तस्य पुत्रस्य कुशलयोगे कुशलप्राप्तिविषये यतं ते यत्नं कुर्वंति ॥ ८३ ॥ ॥ ॥ ॥

मुखयोः संधानविश्लेषाभ्यां संधिपृथक्भावाभ्यां मुक्तेरहिते लोकविलक्षणे इत्यर्थः एते कवचकुंडले नवभूषणे परैः दुर्लभांशोभांतन्वाने कुर्वाते ॥८४॥ त्वंइहस्थले एनानिकवचकुंडलानि याचितुंद्विजवेषेणब्राम्हणरूपेणगूढंगुप्तं अमराधिपतिं इंद्रंलब्धकामं कवच कुंडलप्राप्त्यालब्धमनोरथं माकृथाः माकुरु अस्मात् आज्ञापथात् अणुमात्रं अत्यल्पमपिस्खलसिचेत् तर्हि त्वंरणेयुद्धेरिपूणांस्मरत्वेन वध्यः भविष्यसि ॥८५॥ इत्थंपूर्वश्लोकोक्तांतांवाणींनिशम्य श्रुत्वा रचितं कृतंस्मितं ईषद्धास्यंयेनसः राधेयः कर्णः अंजलिनासाकंयुक्तेन हस्तांजलिना सह हर्षात् प्रतिभाषितं प्रत्युत्तरं आददे स्वीचकार ददावित्यर्थः ॥ ८६॥ ममदानं अर्थिजनेषु आर्य श्रेष्ठं एतिगच्छति नव अर्यमाइतिशब्देनाम्नि प्रथितेपि प्रसिद्धे सत्यपि भवदीया-त्वदीयाजिव्हायाचितं पदार्थमादत्स्वेतिनिषेधरूपेमार्गेपदंकथंवानिदधाति यः खलुददातिसोर्यमेतिश्रुतेः त्वयियाचितपदार्थदातृत्वेसतिमयिच याचकश्रेष्ठे इंद्ररूपार्थिनेयाचितपदार्थंददतिसतिभवदीयजिव्हादानंमाकुर्विंतिनिषेधंकथंवदतीतिभावः॥ ८७॥ ॥७॥ ॥७॥

मुखसंधानविश्लेषमुक्तेकवचकुंडले नवेतेभूषणेशोभांतन्वातेपरदुर्लभां॥ ८४॥ एतानियाचितुमिहद्विजवेषगूढंमालब्धकाममधिपतिंकृथास्त्वं आज्ञापथात्स्खलसिचेदणुमात्रमस्माद्वध्योभविष्यसिस्मरत्वेनरणेरिपूणां॥ ८५
इत्थंनिशम्यतांवाचंराधेयोरचितस्मितः हर्षादंजलिनासाकमाददेप्रतिभाषितं॥ ८६॥ तवार्यमेतिप्रथितेपिशब्दे ममार्यमेत्यर्थिजनेषुदानं निषेधरूपेनिदधातिमार्गेपदंकथंवाभवदीयजिव्हा॥ ८७॥ ॥ ॥

जगत्यां लोके सदर्थिनां उत्तमयाचकानां सदसे सभायै सततं बहु यथा तथा दातुं सकुतूहलस्य कौतुकसहितस्य पुरुषस्य करे धृता उदकोर्मिकाउदकांजलिरित्यर्थः विभूषाभूषणं कनकोर्मिका हेमांगुलीयकं तुपरं केवलं अंगुलिभारः ॥ ८८ ॥ हे दिवसेश सूर्य पः शयः हस्तः अर्थिषु दैन्यं दीनतां प्रतिकर्तुं निराकर्तुं धृतालालसा महतीच्छा येन सः धृतलालसः नभवति खलु पुरुषस्य सतु शयः प्रतिलोमाः विपरीताः वर्णाः अक्षराणि यस्य-तस्य निजनाम्नः पदस्य यशः इति सुबंतपदस्य अर्थं अभिधेयं कीर्तिं कथं प्रतिपादयेत् संपादयेत् शयः इतिपदं विपरीतवर्णं कृतं चेत् यशः इति-

सततंसदर्थिसदसेबहुदातुंसकुतूहलस्यपुरुषस्यजगत्यां उदकोर्मिकाकरधृताहिविभूषाकनकोर्मिकातुपरमंगुलिभारः ॥ ८८ ॥ दिवसेशयःखलुशयःप्रतिकर्तुंधृतलालसोभवतिनार्थिषुदैन्यं प्रतिपादयेत्सतुकथंपुरुषस्यप्रतिलोमवर्णनिजनामपदार्थं ॥ ८९ ॥ यश एवजन्मफलमात्मवतामिदमेषितव्यमतियत्नभरात्
अपिभूषितंगुणगणैरपरैरयशस्विनंनजगदाद्रियते ॥ ९० ॥ ॥ ॥ ॥ ॥

भवति तदर्थं कीर्तिं कथं संपादयेदिति भावः ॥ ८९ ॥ किमिति यशः संपादनीयमिति चेदाह यश इति आत्मवतां बुद्धिमतां यश एव जन्मनः फलं पुरुषार्थः तस्मादिदं यशः अतियत्नभरात् एषितव्यं अभिलषणीयं अपरैः सौंदर्यधनिकत्वादिभिः गुणगणैः भूषितमपि अयशस्विनं पुरुषं प्रतिजगत् नाद्रियते ॥ ९० ॥ ॥ श्रीकृष्णायनमः ॥ ॥ गोपालकृष्णायनमः ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७

ह्रियतः वितरणोपनिषत्सु दानरहस्येषु व्यापृताः विपश्चितां शास्त्रज्ञानवतां अधीशाः श्रेष्ठाः स्पर्शनेन दानेन स्पर्शेन च रहितौ इति हेतोः लु
ब्धकः कृपणः कुणपश्च शवश्च समानौ इति व्याहरंति वदंति शवतुल्यतामाभूदिति दातव्यमिति भावः ॥ ९१ ॥ ननु अयं यत्नो विफल इत्याह
दृष्टे इति यः दाता वनीपकजने याचकजने दृष्टे सति स्वयमेव विवशः दानकर्मणि परवशः सन् वदनं स्मितेन आनंदात् हास्येन शुभ्रीकरोति
दानांबुना दानसंकल्पोदकेन करतलं शुभ्रीकरोति तादृशं दातारं प्रतिनिवर्तयितुं दानकर्मणो व्यावर्तयितुं कः क्षमेत ॥ ९२ ॥ ननु जीवनार्थं ममा

व्यापृता वितरणोपनिषत्सु व्याहरंति हि विपश्चिदधीशाः स्पर्शनेन रहिताविति हेतोर्लुब्धकं च कुणपं च समा
नौ ॥ ९१ ॥ दृष्टे वनीपकजने वदनं स्मितेन दानांबुना करतलं यशसा दिशश्च शुभ्रीकरोति विवशः स्वयमेव दा
ता कस्तादृशं प्रतिनिवर्तयितुं क्षमेत ॥ ९२ ॥ वांछामनाप्तेन वनीपकेन सहासवो दातृजनस्य यांति तदद्य
शक्रार्चनया धृतासोर्भावी वधो मे परमो हि लाभः ॥ ९३ ॥

यं यत्न इति चेत्तत्राह वांछेति वांछां मनोरथं अ-
नाप्तेन अप्राप्तेन वनीपकेन याचकेन सह दातृजनस्य असवः प्राणाः यांति तत्तस्मात् अद्य शक्रार्चनया इंद्रसंमानेन धृतासोः धृतप्राणस्य मे-
भावी कालांतरेण भविष्यन् वधः परमो लाभः हि निश्चयेन एतत्कालिकमरणापेक्षया कालांतरे मरणं लाभ एवेति भावः ॥ ९३ ॥ ॥७२॥

इदानीं स्वनिश्चयमाह यद्गेहेति यस्य इंद्रस्य गेहप्रतिहारस्य गृहद्वारस्य भूतलशिलाभूतलसंबंधिपाषाणः चिंतामणिः चिंतितपदार्थदाता मणिः यस्य आरामसंबंधिनः महीरुहाः वृक्षाः कल्पकाः वांछितपदार्थदातारः कल्पवृक्षाः पुनः सा प्रसिद्धा सकललोकपूज्या सुरभिः कामदोग्धी धेनुः होमधेनुः होमार्थधेनुः पात्यते तत्सदृशी तादृक् उक्तमहैश्वर्यवान् मघवा इंद्रः मां उपेत्य याचति चेत्तर्हि तस्य कामनां संपूर्य पूरयित्वा त्रैलोक्यस्य आनां-

यद्गेहप्रतिहारभूतलशिलाचिंतामणिः कल्पका यस्यारामम हीरुहश्च सुरभिः सा होमधेनुः पुनः तादृग्याचति चेदुपेत्य मघवा संपूर्य तत्कामनां त्रैलोक्यस्य वदान्यसंसदुपरि स्यामेष मे निश्चयः ॥ ९४ ॥ वीक्ष्य वंध्यवचनोपि गुणज्ञो विस्मयांबुनिधिवीचिषु मग्नः पद्मबंधुरिति वादिनमेनं पाटलस्मितरुचिर्गिरमूचे ॥ ९५ ॥ ॥

वदान्यानां दातॄणां संसदः सभायाः उपरि सभायां श्रेष्ठ इत्यर्थः स्यां भवेयं एषः मे निश्चयः ॥ ९४ ॥ वंध्यं निष्फलं वचनं यस्य तथाभूतोपि गुणज्ञः अत एव विस्मयांबुनिधिवीचिषु आश्चर्यसमुद्रलहरीषु मग्नः पद्मबंधुः सूर्यः इति वादिनं पूर्वोक्तभाषणकर्तारं एनं कर्णं वीक्ष्य पाटला ओष्ठयोः रक्तत्वात् श्वेतरक्तवर्णा स्मितरुचिर्यस्य तथाभूतः सन् गिरं ऊचे जगाद ॥ ९५ ॥ ॥ गोपालकृष्णाय नमः ॥ ॥ ७ ॥ ॥ ७ ॥

गद्यं॥ अयिवत्स भवताभाषितंस्थूललक्ष्याणांदानशूराणां क्षममेव योग्यमेव ईदृशंतवमतं पुनरपिममरसनांजिव्हांनिदेशस्य आज्ञायाः अवशे षपथस्य अवशिष्टमार्गस्य पांथिनीं अध्वगांनिर्मिमीते॥ इंद्रेणयाचितंचेन् ददामीतितवमतंचेत् तर्हि देहि परंतु किंचिदाज्ञाशेषं वच्मीतिभावः॥१९॥ हेवत्सत्वं शुनासीरस्य इंद्रस्यमनोरथपूरणात्पूर्वमेव आदावेव पूर्वदेवानांदैत्यानां गर्वस्यनिर्वापणेनाशनेधूर्वहतया भार वाहकतया कुलिशम पि वज्रमपि चिरं आरूढः उत्पन्नः यः कलंकः मलः तेन आकुलंव्याप्तं अतएवजर्जरितंजीर्णभावंप्राप्तंधाराशतंयस्यतथाभूतं आतन्वतीं कुर्व-

॥गद्यं॥अयिवत्सभवताभाषितंक्षममेवस्थूललक्ष्याणामीदृशंतवमतंपुनरपिममरसनांनिदेशावशेषपथपांथिनींनि र्मिमीते॥ १९॥ त्वंशुनासीरस्यमनीषितस्यपूरणात्प्रागेवपूर्वदेवगर्वनिर्वापणधूर्वहतयाकुलिशमपिचिरारूढकलं काकुलजर्जरितधाराशतमातन्वतींतदीयांशक्तिमादत्स्वेति॥ २०॥ ततस्तथेतिपरमंगीकृत्यपश्यतस्तनूजस्यसम क्षमचिरेणसमरीचिमालीचरमाचलशिखरपरिशील्यमानविहारमिहापिसमाचचार॥ २१॥ ॥ ॥

तीं तदीयांशक्तिंआदत्स्व तांशक्तिंददासिचेत्तर्हितवयाचितंददामीत्युक्त्वा गृहाणेतिभावः॥ २०॥ ततः तथेति तथाकरिष्यामीत्युक्त्वापरं केवलमि दमेव अंगीकृत्यपश्यतः तनूजस्य पुत्रस्य कर्णस्यसमक्षं अचिरेण शीघ्रं मरीचिमालीसूर्यः चरमाचलस्य अस्ताचलस्य शिखरे परिशील्यमानंअभ्य स्यमानंविहारंअंतर्धानक्रीडां इहापिपुत्रसमीपेपिसमाचचार कृतवान् कर्णस्यपश्यतःसतोंतर्धानंप्राप्तइत्यर्थः॥ २१॥ ॥५॥ ॥५॥

॥पद्यं॥ ततः कतिपयानि दिनानि यस्मिन् तस्मिन् काले याते सति मरुतां देवानां पतिः इंद्रः अर्थिनां याचकानां चाटुशतैः मिथ्याप्रियवचनशतैः आकुले
सदसि सभायां भानोः तनयं कर्णं प्राप्य अतुलं निरुपमं सकुंडलं कुंडलाभ्यां सहितं कवचं वाचा अयाचत् अयं कर्णोऽपि आदरात् तथेति दास्यामीत्युक्त्वा त
तः इंद्रात् अद्भुतां लोकविलक्षणां शक्तिं जगृहे॥ ९६॥ रवेः सुतः कर्णः एते कवचकुंडले मम रिपुं नकारं वहतः धारयतः इति अमर्षभारादिव क्रोधातिशया

॥पद्यं॥ कतिपयदिने काले याते ततो मरुतां पतिः सदसि तनयं भानोरेत्यार्थिचाटुशताकुले कवचमतुलं वाचायाचत्सकुंड
लमादरादयमर्पितथेत्युक्त्वा शक्तिं ततो जगृहेऽद्भुतां॥ ९६॥ नकारमेते वहतो रिपुं ममेत्यमर्षभारादिव शस्त्रधारया सु
तो रवेर्दशनकर्णवेष्टनेस्वयं समुत्कृत्य ददौ बिडौजसे ॥ ९७॥ निशाम्य तत्कल्पतरोर्भ्रियाच्युतैश्चिरार्जितैस्त्यागय
शोभरैरिव स्रुपर्वमुक्तैः कुसुमैर्न केवलं तदंगमंगाश्च सुगंधयोऽभवन् ॥ ९८॥ ॥ ॥ ॥

दिव दशन कर्णवेष्टने स्वयमेव शस्त्रधारया उत्कृत्य छित्वा बिडौजसे इंद्राय ददौ अत्र दशनकर्णवेष्टनार्थयोः कवचकुंडलयोः नकारवाहकत्वं वाच्यवाचक
योरभेदाध्यवसायात् ज्ञेयं॥ ९७॥ तत् शस्त्रेण छित्वा कवचकुंडलदानं निशाम्य श्रुत्वा ह्रिया च्युतैः भ्रष्टैः चिरार्जितैः बहुकालं संपादितैः त्यागस्य दानस्य यशोभरैः
यशःसमूहैरिव स्रुपर्वमुक्तैः कुसुमैः केवलं तदंगं कर्णशरीरं सुगंधि नाभवत् अपितु अंगाः अंगदेशाश्च सुगंधयः अभवन्॥ ९८॥ ॥६७॥ ॥६७॥

सर्वावयवेषु आग्रत्सु विद्यमानेषु सत्सु तस्य कर्णस्य कर्णः अवयवः पुनः अर्थिने स्वां स्वकीयां हिरण्मयीं भूषां भूषणं यत् यस्मात् विततार ददौ नत्तस्मात् अत्र भूषादानकर्मणि नाम्नोः अवयवावयविनोः कर्ण इति नाम्नोः साम्यं हेतुः कारणं ध्रुवं निश्चयेन ॥ ९९ ॥ तदनंतरं नाकपतिः इंद्रः तं कर्णं आपृच्छ्य गच्छामीति प्रश्नं कृत्वा सुधर्मां स्वर्गस्थां देवसभां आसाद्य प्राप्य सिद्धमरुदप्सरसां समाजे अस्य कर्णस्य चरितं स्वसहोत्पन्नकवचकुंडलयोश्छेदेन दानरूपं चरित्रं प्राशंसत् प्रशशंस किंभूतां चरित्रं सविधे समीपे स्रग्ध्याकामधेन्वा रोमंथमपि चर्वितस्याकृष्य पुनश्चर्वणमपि अविगणय्य निशाम्यमानं श्रूय

आग्रत्सु सर्वावयवेषु तस्य कर्णस्य कर्णः पुनरर्थिने स्वां हिरण्मयीं तद्वितताऱ भूषां तन्नामसाम्यं ध्रुवमत्र हेतुः ९९ आपृच्छ्य तं तदनु नाकपतिः सुधर्मामासाद्य सिद्धमरुदप्सरसां समाजे प्राशंसदस्य चरितं सविधे स्रग्ध्या रोमंथमप्यविगणय्य निशाम्यमानं १०० तावत्पार्थास्तेपि पुनः काम्यकसीमां हित्वा संघैर्भूविबुधानामनुयाताः तीर्थव्रातान्वि स्मृतपूर्वानवगादुं वध्वा सार्धं द्वैतवनारण्यमवापुः ॥ १०१ ॥

माणं धेनूनां विश्रांतिसमये रोमंथे परमादरोस्ति तत्रादरं त्यक्त्वा अलौकिकपदार्थदानेन याचकमनोरथपूरयित्र्या कामधेन्वाप्याश्चर्येण श्रूयमाणमिति भावः ॥ १०० ॥ यावत् इतः कर्णचरितं जातं तावत् ते पार्था अपि वध्वा साकं द्रौपद्या सह पुनः काम्यकवनस्य सीमां हित्वा त्यक्त्वा भूविबुधानां ब्राह्मणानां संघैः अनुयाताः अनुगताः संतः विस्मृतपूर्वान् पूर्वं विस्मृतान् तीर्थानां व्रातान् समूहान् अवगादुं अंतः प्रविश्य पस्नातुं द्वैत २५
वनसंज्ञम् अरण्यं अवापुः प्रापुः ॥ १०१ ॥ ॥ श्रीगोपालकृष्णायनमः ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥

॥ गद्यं ॥ तत्रद्वैतवने कदाचित् आश्रमद्वारि पांडवपर्णशाला द्वारे हा इति खेदे हे महाभागाः पांडवाः ममहोमस्यसाधनं उपकरणं अपहृत्य अयं हरिणः धावति इत्युक्त्वा बाष्पायमाणस्य नेत्राभ्याम् अश्रूणि त्यजतः कस्यचित् अग्रजन्मनः ब्राह्मणस्य शोकनिवारणाय चापं चक्रीकृत्य बाणसंधानं कृत्वा आकर्णमाकृष्य अनुधावतः पश्चाद्धावमानान् पांडवान् कोपि कृष्णसारः कृष्णमृगः दूरं देशं अपाकृष्य नीत्वा स्वयं अंतरधात् अदर्शनमगात् कथंभूतः कृ

॥ गद्यं ॥ तत्र कदाचिदाश्रमद्वारि हा महाभागा मम होमसाधनमपहृत्य हरिणोयमितस्ततो धावतीति बाष्पायमाणस्य कस्यचिदग्रजन्मनः शोकनिवारणाय चक्रीकृत्य चापमनुधावतस्तान् पार्श्वलताताडनानुषक्तनवकिसलयजालमुत्प्लवनवेगपवनबहिर्ज्वलितगर्भवह्निशिखाकंदलमिवारणिं विषाणयोर्बिभ्राणः कतिषुचित्पदेषु स्पृश्य इव कतिषुचिद्दुरासद इव चित्रगतिः कोपि कृष्णसारो दूरमपाकृष्य स्वयमंतरधात् ॥ ॥ ॥

ष्णसारः पार्श्वलतानां पार्श्वभागस्थलतानां ताडनेन अनुषक्तं संलग्नं नवानां किसलयानां पल्लवानां जालं समूहो यस्य तं उत्प्लवनवेगस्य उड्डानवेगस्य पवनेन बहिर्भागे ज्वलितं गर्भस्थवन्हेः शिखाकंदलं ज्वालासमूहो यस्य तमिव इत्युत्प्रेक्षा अरणिं अग्निमंथनकाष्ठं विषाणयोः शृंगयोः बिभ्राणः ॥ पुनः कथंभूतः कतिचित्पदेषु स्पृश्य इव स्पर्शेन ग्रहीतुं शक्य इव कतिचित्पदेषु दुरासदः दुःखेनापि प्राप्तुमशक्य इव विचित्रा लोकविलक्षणा गतिर्यस्य सः ॥ २१ ॥ ॥ ६७ ॥ ६७

तदनंतरं ललाटं तापयति ललाटंतपः नस्वान् पचति नसंपचः ललाटंतपनसंपचे हेलिधूली सूर्यरेणू ययोः ताभ्यां द्यावापृथिवीभ्यां आकाशभूमिभ्यां-उदन्यायाः पिपासायाः वदान्यः दाता महिमा स्वभावो यस्य तस्मिन् दिनयौवने मध्यान्हे प्रकृतं प्रस्तुतं अर्थं अरणिमिव पानीयमपि इतस्ततः विचिन्वद्भिः मृगयमाणैः अनुजैः भीमादिभिः सह कस्यचित् विशालस्य वनसालस्य वनवृक्षस्य मूलमुवंतच्छायस्य तस्य वृक्षस्य छायायाः मंडलमिव पांडवः धर्मराजः शनैःशनैः उपससर्प जगाम मध्यान्हे वृक्षच्छायायथा वृक्षमूलतले गच्छति तद्वद्धर्मोपि जगामेत्यर्थः॥ २३॥ पद्यं॥ अथ तत्र वृक्षमूले कमलगंधिभिः कमलसुगं

॥गद्यं॥ तदनंतरं ललाटंतपनसंपच हेलिधूलिभ्यां द्यावापृथिवीभ्यामुदन्यावदान्यमहिमनि दिनयौवने प्रकृतमर्थमिव पानीयमपि इतस्ततो विचिन्वद्भिरनुजैः सह कस्यचिद्विशालस्य वनसालस्य मूलमुवंतच्छायमंडलमिव पांडवः शनैःशनैरुपससर्प॥ २३॥ पद्यं० तत्रानिलैः कमलगंधिभिरुच्यमानामाशां गतेषु सलिलाय चिरायितेषु भीमादिषु क्षितिभुजा परितप्य भेजे तेषां पदानुसरणाद्यकापि वापी॥ १०२॥ ॥ ॥ ॥

धयुतैः अनिलैः उच्यमानां अस्याः आशायाः पद्मगंधयनिलाः आगच्छंति तस्मादस्यां पद्मयुक्ता वापी वर्तते इति सूच्यमानां आशां दिशां सलिलाय सलिलमानेतुं गतेषु भीमादिषु चिरायितेषु चिरकालं कुर्वत्सु सत्सु क्षितिभुजा धर्मराजेन परितप्य संतापं प्राप्य तेषां भीमादीनां पदानुसरणात् पदचिन्हितमार्गानुसरणात् कापि वापी दीर्घिका भेजे प्राप्तेत्यर्थः॥ १०२॥ ॥७॥ ॥७॥ ॥७॥ ॥७

तस्याः याप्याः तटे तीरे कमलिन्याः दलान्येव पत्राण्येव पात्राणि पाणिषु येषां तान् पंक्तिशः पंक्तिक्रमेण निपतितान् तान् वीरान् भीमादीन् अवलोक्य बाष्पांबुभिः नेत्रांबुभिः प्रथमं दर्शितः मार्गो यस्याः तयेव नृपस्य तन्वा सहसा अकस्मात् धरणौ निपेते निपतितं नृपस्य बाष्पांबुना आदौ यत्र निपतितं ततस्तन्वा तत्रैव निपतितमिति भावः ॥१०३॥ अधिकवत्सलः भ्रातृषु परस्नेहवान् सपदि तत्काले मूर्च्छितधीः निःसंज्ञः निभृतानि निश्चेष्टितानि अंगानि अवयवाः यस्य सः नृपतिः तदा अनुजैः आश्रितां तां निःसंज्ञतां दशां प्रविभज्य अनुभवन्निव ददृशे दृष्टः लोकैरिति शेषः ॥१०४॥ तत्रस्थले

॥ तस्यास्तटे कमलिनीदलपात्रपाणींस्तान्पंक्तिशो निपतितानवलोक्य वीरान् बाष्पांबुभिः प्रथमदर्शितमार्गयेव तन्वा नृपस्य धरणौ सहसा निपेते ॥१०३॥ स नृपतिर्ददृशेऽधिकवत्सलः सपदि मूर्च्छितधीर्निभृतांगकः स्वयमपि प्रविभज्य तदा दशामनुभवन्निव तामनुजाश्रितां ॥ १०४ ॥ नासाविलोभनपटून्नवपुष्पगंधानादाय तत्र मधुपैरनुसेव्यमानाः वर्धिष्णुचेतनमिमं वनवापिकायाः कल्लोलमल्लपवनाः कलयां बभूवुः ॥ १०५॥ ॥ ॥

नासायाः घ्राणेंद्रियस्य विलोभने लोभोत्पादने पटून् कुशलान् नवपद्मानां गंधान् सुगंधान् आदाय मधुपैः भ्रमरैः अनुसेव्यमानाः पद्मगंधभ्रमरैर्युक्ता इत्यर्थः वनवापिकायाः कल्लोलमल्लानां महाकल्लोलानां पवनाः तत्संबंधिवायवः वर्धिष्णुः चेतना ज्ञानं यस्य नमिमं नृपं कलयां बभूवुः सिषेविरे चेतनां प्रापुः वं तममुं शीतलगंधिवायवोनुकूला बभूवुरिति भावः ॥१०५॥ ॥७॥ ॥ ७॥ ॥७॥

॥ गद्यं ॥ ततः क्षणादेव किंचित् उत्क्रम्य उत्थाय परितः सर्वतः शून्येभ्यः शून्याः किंचिदपिप्रियपदार्थप्राणिवर्जिताः दिशः विलोकयमानः शनैः उपसृत्य समीपंगत्वा शोकचंचलेन पाणिना तान् भ्रातॄन् भीमादीन् पर्यायवृत्त्या परामृश्य संस्पृश्य वनविहगमृगाणां पानस्य जलप्राशनस्य सौकर्याय सुखेन करणाय दुरवतरां विषमाधोगमनमार्गां तां सरसीं वापीं पूरयितुमिव बाष्पधारां दुःखेनाश्रुधारां अभिवर्षन् धर्मसूनुः एवंवक्ष्यमाणं विलपितुं आरभत ॥ २४ ॥ पञ्चेति

॥ गद्यं ॥ ततः क्षणादेव किंचिदुत्थाय परितः शून्यशून्या दिशो विलोकयमानः शनैः शनैः उपसृत्य शोकचंचलेन पाणिना तान् भ्रातॄन् पर्यायवृत्त्या परामृश्य परामृश्य वनविहंगमृगपानसौकर्याय दुरवतरां तां सरसीं परिपूरयितुमिव बाष्पधारामभिवर्षन्धर्मसूनुरेवं विलपितुमारभत ॥ २४ ॥ पद्यं ॥ वीरा भवद्विपदि दैवपरंपरापि दूरा परान्प्रतिनरान्न गिरां प्रवृत्तिः हाहा दशेयमिह वो घकुतो वतीर्णा मामंतरेण किमिदं भवतां प्रयाणं ॥ १०६ ॥

गाः भवतां विपदि अनिष्टविषये दैवपरंपरापि देवसमूहोपि दूरात् समीपे स्थातुमशक्या अशक्तेतियावत् अपरान् नरान् प्रतितु गिरां प्रवृत्तिर्नास्ति मनुष्या अनिष्टं कुर्युरिति वक्तुमप्यसंभवः हाहा इतिदुःखातिशये द्विरुक्तिः अद्य इह वः युष्माकं दशा मरणरूपा कुतः कस्मात्सकाशादवतीर्णा आगता मामंतरेण मां विना भवतामिदं प्रयाणं लोकांतरगमनं किं अयोग्यमित्यर्थः इह स्वदेशेपि मां विहाय भवद्गमनं नासीत् लोकांतरगमनं कथं जातमिति प्रश्नो वा ॥ १०६ ॥ ॥ ९७ ॥ ॥ ९७ ॥ २६

दैवं प्रारब्धं कठोरचरितं दययाविहीनं निर्दयंच अहह इतिखेदे यतः माद्रीसुतौ नकुलसहदेवौ मातुः सुखस्य अनभिज्ञौ माद्र्याः पुत्रोत्पत्तिसमये मृतपतिनासह दाहात् अज्ञातारौ कंदांकुराणि फलानिच भक्षयित्वा कांतारसीमनि दुर्गमारण्य प्रांत देशे मयासह चरितुं संचारं कर्तुं नसेहे तावपि

दैवंकठोरचरितंदययाविहीनंमाद्रीसुतावहहमातृसुखानभिज्ञौ कंदांकुराणिचफलानिचभक्षयित्वा
कांतारसीमनिमयाचरितुंनसेहे ॥ १०७ ॥ स्वयमव्रणएवयोरणेव्रणमादत्त हरस्यमस्तके व्रणमायुषि
पार्थतस्यतेविदधातिस्ममृधेविनैवकः ॥ १०८ ॥ ॥ ॥ ॥ ॥

नीतौ अतः कठोर चरितंनिर्दयंचेत्यर्थः ॥ १०७ ॥ यः रणेस्वयं अव्रणएवसन् हरस्य ईश्वरस्यमस्तके व्रणं अधत्तचकारेत्यर्थः हे पार्थ अर्जुन तस्य ते आयुषिव्रणं नाशं मरणमित्यर्थः मृधं युद्धं विनैवकः विदधातिस्म चकार मृत्युंजयशिवापेक्षया जगति को बलवानस्तीत्यहं नवेद्मी तिभावः ॥ १०८ ॥ ॥ श्रीगोपालकृष्णाभ्यांनमः ॥ ॥ श्रीकृष्णायनमः ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

हे वत्स बाल हे द्विषिभिः शत्रुभिः सह नियुद्धं बाहु युद्धं जीवनं अति प्रियं यस्य तत्संबुद्धौ हे भुजप्रख्यानिधे हे भुजकीर्तिनामाकर हे मारुते भीम भवता प्राप्तां इमां अवस्थां मरणरूपां कर्णाकर्णिकया जनानां कर्णे कर्णे उपांशु कथनरीत्या एकचक्रा नगरीभाजां तन्नगरीस्थमनुष्याणां शोकेन अनिशं अहोरात्रं बाष्पायितुं बकराक्षसवधेन तत्रत्यानां सुखप्रदातुस्तव मरणश्रवणेदुःखेन नेत्राश्रूणि मोचयितुं स्वस्रीयैः भागिनेयैः दुर्योधनादिभिः सहसौबलेः शकुनेरपि मुदा त्वन्मरणवार्ताश्रवणजन्यहर्षेण बाष्पायितुं आनंदाश्रूणि मोचयितुमित्यर्थः कोपि अनिर्वचनीयः कालः अभूत् प्रादुरभूत्

वत्स द्विषि नियुद्धजीवन भुजप्रख्यानिधे मारुते कर्णाकर्णिक यानिशाम्य भवता प्राप्तामवस्थामिमां शोकेनानिशमेकचक्रन गरीभाजां च बाष्पायितुं स्वस्रीयैः सहसौबलस्य च मुदा कोप्येष कालोभवत् ॥१०९॥ मय्यप्यसूनिह विमुंचति याज्ञसेनी साश्वाप दामिषमबुद्धगतिर्भवेन्नः हा माद्रि कुंति युवयोर्वनभूमिरेव पुत्रप्रसूति विपदोः पदतां प्रपेदे ॥११०॥

एतद्वार्ताश्रवणेन एकचक्रनगरस्थानां दुःखं शकुनिदुर्योधनादीनां हर्षश्च स्यादिति भावः ॥१०९॥ इह स्थले युष्मच्छोकेन मय्यपि असून् प्राणान् विमुंचति त्यजति सति नः अस्माकं अबुद्धगतिः अज्ञातस्थितिः सा याज्ञसेनी द्रौपदी श्वापदानां वन्यपशूनां वृकव्याघ्रादीनां आमिषं भक्ष्यं भवेत् हा खेदे हे माद्रि हे कुंति वनभूमिरेव पुत्राणां प्रसूति विपदोः प्रसवमरणयोः पदतां आश्रयत्वं प्रपेदे मातरा आप्तजनरहिते स्थले दीनवत् युष्मत्पुत्रोत्पत्तिं विना शोजातावितिभावः ॥११०॥ ॥६॥ ॥६॥ ॥६॥ २७

कूटस्थस्य अस्मत्कुलादिपुरुषस्य शीतकरस्य चंद्रस्य कुक्षौगतं विद्यमानं कुरंगं मृगं स्वजात्या स्वजातीयेन कृष्णसारेण कृतः ब्राह्मणारणिहरणात् स्वाश्रयचंद्रकुलस्थपुरुषमारणेन संपादितः कोपरसस्य अतिरेकः आधिक्यं यस्य तथाभूतं कुर्वन् असौ वनमृगः अरणिहर्ता कृष्णसारः कुलिशा-स्त्रसूनोः शस्त्रपाणेरिंद्रस्य सूनोः अर्जुनस्य कोदंडमपि अग्निदत्तगांडीवधनुरपि अगणयन् सन् नः कुलस्य हानये नाशं कर्तुं क्वास्थितः ॥१११॥ नृपतो इत्थं विलप्य अमीषां भ्रातॄणां अंतस्य मरणस्य हेतुः कारणं सरस्याः वाप्याः इदं उदकं इति ज्ञात्वा स्वयमपि तदेव पातुं प्रवृत्तवति सति गगनस्थित एव-

कूटस्थ शीतकर कुक्षिगतं कुरंगं कुर्वन् स्वजातिकृतकोपरसातिरेकं कोदंडमप्यगणयन् कुलिशास्त्रसूनोः क्वासौ स्थितो वनमृगः कुलहानये नः ॥१११॥ इत्थं विलप्य नृपतौ स्वयमप्यमीषामंतस्य हेतुरिदमित्युदकं सरस्याः पातुं प्रवृत्तवति कोपि पुमानदृश्यो गंभीरमाह गगनस्थित एव वाचं ॥११२॥ राजन्मदुक्तिसरणेः प्रतिवाक्यदानं देवोप्युपेक्ष्य जलमत्र तु पातुमीष्टे एतं मदीयमवमत्य वचोवलेपात्पीतांभसः सपदि बिभ्रति दीर्घनिद्रां ॥११३॥ कोपि अदृश्यः पुमान् वाचं गंभीरं प्र-

यातया आह उवाचेत्यर्थः ॥११२॥ हे राजन् मदुक्तिसरणेः मत्प्रश्नपद्धतेः प्रतिवाक्यदानं प्रत्युत्तरदानं उपेक्ष्य अत्र वाप्यां जलं पातुं देवोपि अमरोपि नई-ष्टे न समर्थो भवति अमरोप्यनादरात् मरिष्यति इतरेषां का वार्तेति भावः एते त्वद्भ्रातरः अवलेपभरात् बलगर्वात् मदीयं वचः अवमत्य अनादृत्य पी-तं अंबु यैस्ते तथाभूताः संतः सपदि तत्काल एव दीर्घनिद्रां मरणदशां बिभ्रति धारयंति मृता इत्यर्थः ॥११३॥ ॥५५॥ ॥५६॥ ॥५७॥

ततः असौ धर्मराजः मत्प्रश्नोत्तरमदत्वा सलिलंनपिबइतिवक्तुः दिविचरस्य देवस्य मश्नान् वनदेवतानां बहुमतैः स्वैःस्वकीयैः पटूत्तरैः म
नोहरप्रतिवचनैः प्रत्युद्ययौ प्रत्युज्जगाम सुंदरोत्तरैः तत्प्रश्नानां बहुमानंचकारेत्यर्थः कः कैः कानिव यथापयोधिः समुद्रः तरंगकुलैः वीचिवृं
दैः इंदोः चंद्रस्य करान् किरणान् प्रत्युद्गच्छतितद्वत् प्रत्युत्तरैः देवः संतुष्टोबभूवेतिभावः ॥११४॥ ततः कटेः सकाशात्लंबितंवल्कलंयस्यसः

तत्प्रत्युदीर्यसलिलंतुपिबेतिवक्तुःप्रश्नानसौदिविचरस्यपटूत्तरैःस्वैः प्रत्युद्ययौबहुमतैर्वनदेवतानामिंदोः
करानिवतरंगकुलैःपयोधिः॥११४॥ तदनंतरं॥ कटिलंबितवल्कलोजटालःकमनीयस्मितधौतयज्ञसूत्रः
कुशबर्हवतंसिनःसदेवःकुरुराजस्यपुरोवतीर्यतस्थौ॥११५॥ ॥ ॥ ॥ ॥

वल्कलंवसानइत्यर्थः जटालः जटावान् कमनीयं सुंदरंस्मितंयस्यसः धौतंविशदंयज्ञसूत्रंयस्यसः ततःकर्मधारयः कुशानांबर्हैःपर्णैः वतंसि
तः अवतंसविशिष्टः सः प्रश्नकर्ता देवः कुरुराजस्यधर्मराजस्यपुरोदेशेअवतीर्य प्रकटीभूयतस्थौ॥११५॥ ॥श्रीकृष्णायनमः॥ ॥७॥ ॥

॥गद्य॥ सतु तत्र लोकातीतेन लोकविलक्षणेन अतएव राकाशतं पूर्णचंद्रयुक्त पूर्णिमारात्रिशतं आकारयतेव पर्धयाह्वानं कुर्वतेव चंद्रशतस्य मानेत्यर्थः निजेन तेजसा कुड्मलीभूतं करकमलयुग्मं यस्य तं आत्मसंभवं पुत्रं धर्मराजं प्रेममेदुरं प्रेम्णासहितं यथातथा एवं वक्ष्यमाणं अ

॥गद्यं॥ सतु तत्र लोकातीतेन राकाशतमिवाकारयता निजेन तेजसा कुड्मलीकृतकरकमलयुग्मं तमात्मसंभवं प्रेममेदुरमेवमवादीत् ॥ २५॥ अयेवत्स मां धर्ममवेहि संप्रति विमतजनवितीर्णविविधविपिनक्लेशमनुभवतो भवतो भावं बुभुत्सुरेवमाचरिषं तद्बहुधा परीक्षितेन भवतः शीलेन समंजसेन प्रश्नोत्तरेण च प्रसादितवानस्मि

२६

वादीत् शशिकिरणेन कमलमुकुलीभवनं युक्तमेव॥२५॥ अयेवत्स मां धर्मं अवेहि जानीहि संप्रति विमतजनैः शत्रुजनैः वितीर्णं दत्तं विविधं अनेकप्रकारं विपिनक्लेशं अरण्यदुःखं अनुभवतः तव भावं धर्मेस्थितिकर्तारमपि भावं बुभुत्सुः बोद्धुमिच्छुः [illegible] अरणिहरणादिकं आचरिषं [illegible] प्रसादितवानस्मि॥ २६॥

ततस्मात् बहुधापरीक्षितेन भवतः शीलेन स्वभावेन समंजसेन ज्ञानपूर्वकेण मत्प्रश्नोत्तरेण च प्रसादिवानस्मि प्रसन्नोस्मि तस्मात् ममानुग्रहेणास्य प्राग्निवृत्तैरिवाभि द्रांविहायप्रबुद्धैरिव अनुजन्मभिः सह त्रयोदशीं शरदं वर्षरूपांतरमिव वेषांतरवंतं भवंतं कोपि न जानीयात् इति वरं तं अरणिं च विस्मयेन विस्मारिनः विस्मृतिं प्रापितः नयनपरिस्पंदो नेत्रनिमेषो यस्य तस्मै निजनंदनाय धर्मराजाय प्रतिपाद्य दत्वा सः पुमान् पुनः अंतर्दधे अदृश्यो बभूव ॥ २७॥ पद्यं ॥ मत्वा सोनाद् कृत्व तस्य भगवतः अचिंतनीयशक्तेः देवस्य वचसा निकामं अत्यंतं आमोदभरं हर्षसमूहं आसाद्य आश्रमं आगतानां अमीषां पांडवानां महान् सम

तस्मान्ममानुग्रहेणास्वभाग्निवृत्तैरिव भूयोप्युत्थितैरनुजन्मभिः सह त्रयोदशीं शारदं रूपांतरवंतं भवंतं कोपि न-
जानीयादिति वरं च तमरणिं च विस्मयविस्मारितनयनपरिस्पंदनाय निजनंदनाय प्रतिपाद्य स पुमानंतर्दधे ॥ २७॥
पद्यं ॥ तत्तादृशोभगवतो वचसा निकाममासाद्य मोदभरमाश्रममागतानां प्राप्तारणेर्द्विजवरस्य शुचेव साकमंतर्जगा
म समयोपि महानमीषां ॥ ११६॥ ॥ इत्यनंतभट्टकविकृतौ चंपूभारते पंचमस्तबकः ॥ ५ ॥ ॥ छ ॥ ॥ छ ॥

योपि द्वादशवर्षात्मककालोपि प्राप्तारणेः द्विजवरस्य शुचा शोकेन साकमेव सहैव अंतर्जगाम यथा देवः अंतर्धानं प्राप्तस्तथा ब्राह्मणशोकः द्वाद शवर्षात्मकवनवासकालश्चांतर्धानं जगामेत्यर्थः ॥ ११६॥ ॥ इति श्री चंपूभारतटीकायां श्रीखंडोपाध्ह्यनारायणसूरिकृतायां पंचमः स्त बकः समाप्तिमगमत् ॥ ॥ ॥ श्रीकृष्णायनमः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ अथभारतचंपौषष्ठस्तबकःप्रारभ्यते ॥ श्री ॥

श्रीगणेशायनमः॥ तदनुद्वादशवर्षवनवाससमाप्त्यनंतरंतेप्रसिद्धाःभरताःभरतवंशोत्पन्नाधर्मराजादयःनराश्चव्यवधाश्रयान्तेषांनराश्रयान्चरमहायन स्यत्रयोदशवर्षस्यलंघनंक्षपनंकांक्षंतेइच्छंतिनिनेनयाभूताःसंतःअतिचिरंबहुकालंरविभांडेनरविदत्तपात्रोत्पन्नान्नेनविवर्धितान्अनुचरानिवब्राम्हणादिप्रभि जनानिवतांअटवींद्वैतवनंजहुःतत्यजुःपथावेषांतरंणत्रयोदशवर्षयापयितुंब्राम्हणादीन्नतत्यजुःतथातद्वनमपितत्यजुरित्यर्थः१ग॰तदनुतदनंतरंतस्यनहुषस्य अनुचि तंअयोग्यंयत्साहसंब्राम्हणवाहकशिबिकारोहणंतेन अधिगतंप्राप्तंवाहसाधिपस्यमहाजगरसर्पस्यवपुर्यस्यतंनहुषंएतन्नामकंराजानंऔदरंक्षुत्तत्सन्तापे शमनायसु

तदनुतेभरताव्यवधाश्रयाच्चरमहायनलंघनकांक्षिणः अतिचिरंरविभांडविवर्धितानचुरानिवतामटवीं जहुः॥१॥ गद्यं॥ तदनुतदनुचितवचनसाहसाधिगतवाहसाधिपवपुषनहुषप्रमोदरदमुनःशमनायचतुर र्णववारिकांक्षिणःपारिकांक्षिणःकोपोदिताच्छापोदधेरुत्तरैरमुमुत्तार्यतस्मादेवविस्मारितनिजविधिदुर्वि लासादासादितवराःवरारोहयातयासहदुःसहनिजधामपिधानवैदग्ध्यमभ्यसितुकामाइवमत्स्यनगरस्या नतिसमीपगामिनींपितृवनशमीमभजन्॥१॥

धानिवारणायेत्यर्थःचतुरर्णववारीणिकांक्षतेसोतस्यपारिकांक्षिणःअगस्त्यमुनेः कोपेनउदितात्उत्कात्त्वंसर्पोभवेतिशापोदधेःशापसमुद्रात्उत्तरैःप्रश्नोत्तरैःउत्तार्यबहिर्निष्कास्यविस्मारितःविस्मृतिंप्रापितःनिजविधेः स्वप्रारब्धस्यदुर्विलासोविषमपरिपाकोयस्य ... शापविमुक्ताद्देवत्वंगतान्नहुषादेवआसादिताःप्राप्ताःवराःयेषांतेपांडवाःवरारोह १

या सह द्रौपद्या सङ्गम त्स्य नगरस्य विराटनगरस्य अनतिसमीपगामिनीं किंचिद्दूरं स्थितां पितृवनशमीं श्मशानस्य शमीवृक्षं अभजन् आश्रयन् आदौ श्मशानशमीं किमिति भेजुः तत्र हेतूत्प्रेक्षामाह निजेति निजधाम्नः निजतेजसः पिधानस्य आच्छादनस्य वैदग्ध्यं चातुर्यं अभ्यसितुं कामा इच्छा येषां ते तथाभूता इव शम्यां स्वांतर्गताग्नेस्तेजोगोपनकौशलं वर्तते स्वतेजोगोपनाय तदभ्यसितुकामा इवेत्युत्प्रेक्षा अगस्त्यशप्तसर्पवपुर्धर नहुषवेष्टितभीमो युधिष्ठिरेण तत्प्रश्नोत्तरदानेन मोचित इति भारतीकथाऽनुसंधेया ॥ १ ॥ पद्यं ॥ ते पांड-

॥ पद्यं ॥ क्रमेण मत्स्येंद्रपुरोपकंठे करालमापुः पितृकाननं ते वधूद्रुहां भाविनि सूतजानां वधप्रदेशस्य दिदृक्षयेव ॥ २ ॥ शमीतरौ तत्र निधाय शस्त्रमभीत दंतज्वलदग्निकल्पं जगाहिरे वेषमिवान्यमुच्चैर्ध्वजं विराटस्य पुरं प्रवीराः ॥ ३ ॥

वाः क्रमेण मत्स्येंद्रस्य विराटस्य पुरोपकंठेन नगरसमीपे करालं भयंकरं पितृकाननं श्मशानं आपुः प्रापुः श्मशानप्राप्तौ हेतूत्प्रेक्षामाह वधिति वधूद्रुहां द्रौपद्याः द्रोहकर्तॄणां सूतजानां कीचकानां भाविनि भविष्यति वधे प्रदेशस्य स्थलस्य दिदृक्षयेव समीचीनो वा न वेति द्रष्टुमिच्छयेव ॥ २ ॥ अमी प्रवीराः पांडवाः तत्र श्मशाने शमीतरौ तस्याः शम्याः अंतः गर्भे ज्वलन् योग्निः तत्कल्पं तत्सदृशं शस्त्रं जातावेकवचनं शस्त्राणीत्यर्थः निधाय संस्थाप्य अन्यं भिक्षुबल्लवादिरूपं वेषमिव उच्चैः उच्चाः ध्वजाः यस्मिन् नत् विराटस्य पुरं जगाहिरे प्रविविशुः अन्यं वेषं गृहीत्वा पुरं जगाहिरे इति भावः ॥ ३ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥

धर्मसूनुः उत्कर्षनिकर्षयोः उत्कृष्टत्वनिकृष्टत्वयोः स्वंस्वकीयं समत्वं दर्शयिष्यन्निव क्रमेण परमः हंसोपि परमहंससंन्यासी हंसपक्षी वा
पिभूत्वासद्यः तत्कालेएव कंकत्वं कंकनामकविप्रत्वं गृध्रसदृशपक्षित्वंच आपद्यत प्रापत् हंसगृध्रयोर्महदंतरं लोकेप्रसिद्धं ॥ ४ ॥ कृष्णाद्रौ ६
पदी तथाविधं यतिवेषं धर्मराजंवीक्ष्य एतत् यतित्वं पुरा तीर्थयात्राप्रसंगे अर्जुनस्येव अस्यापि धर्मस्यापि एतत् यतित्वं मम कामपि अपरां
अन्यांसपत्नीं संपादयेत् किंनु इतिशशंके यथार्जुनस्य यतित्वेसुभद्रा सपत्नी संपादिता तथा धर्मस्य यतित्वं अन्यां सपत्नीं संपादयेत्किंनुइति

समत्वमुत्कर्षनिकर्षयोःस्वंसंदर्शयिष्यन्निवधर्मसूनुः क्रमेणहंसःपरमोपिभूत्वाकंकत्वमापद्यतसद्यएव ४ पुरार्जु
नस्येवयतित्वमेतदस्यापिकामप्यपरांसपत्नीं संपादयेत्किंनुममेतिकृष्णातथाविधंवीक्ष्यनृपंशशंके ५ त्रिदंडकाषाय
कमंडलूज्ज्वलोजपस्फुरद्दंतपटोयुधिष्ठिरः उपानहंदारुमयींपदास्पृशन्नुपासदत्संसदिमेदिनीश्वरं ॥ ६ ॥

शंकितवतीत्यर्थः ॥ ५ ॥ त्रिदंडं दंडत्रयंच काषाये रक्तवस्त्रेच कमंडलुश्च तैःउज्वलः शोभमानः जपेन ओंकारजपेन स्फुरंतौ किं-
चिच्चलंतौ दंतपटौ ओष्ठौयस्यसः युधिष्ठिरः दारुमयींकाष्ठमयीं उपानहं पादुकां पदा चरणेनस्पृशन् धारयन् संसदि सभायांमेदिनी- २
श्वरं विराटंउपासदत् समीपेजगाम ॥ ६ ॥ ॥७॥ ॥७॥ ॥७॥

तंयतिंदृष्ट्वासमुत्थितः मात्स्यः विराटः धृतोमश्चर्यविस्मयोनम्रताश्चर्यौयेनतथाभूतः सन्तस्ययतेः पादस्थपांसुधूलिंफालांतेललाटमध्ये
चक्रे तंयतिंपुनः आसनेस्वसिंहासनेचक्रे स्वसिंहासनेउपवेशयामासेत्यर्थः ७ अथदुर्वाराणांराक्षसार्दनांगर्वनसहनेसोढुर्वीरगर्वासह
नः अयंभीमः शोणाधरायांद्रौपद्यांलोलुपः अतिलुब्धोयः सूनसूनुः कीचकः तस्यप्राणानिलान्पापयितुंकिल दर्वीमहाराष्ट्रभाषयापळीकरे
यस्यसः सर्पश्चदर्शितः सूदभावः पाचकत्वंयेनतथाभूतः आसीत् सर्पावायुपानंकुर्वंति ८ सूदाकृतिः पाचकवेषः सः निःशुल्केनराक्षस

हृष्टासमुत्थितोमात्स्योधृतमश्चर्यविस्मयः नत्वाऽदपांसुफालांतेचक्रेतंपुनरासने ७ दुर्वीरगर्वासहनो
थभीमोदर्वीकरोदर्शितसूदभावः शोणाधरालोलुपसूतसूनोःप्राणानिलान्पाययितुंकिलासीत् ८ पितुः
सखायंपरिपूज्यमग्निंदिनेदिनेतृप्तिमिवोपनेतुं सूदाकृतिःसोपिययौविराटंवृकोदरोवृत्तशरावपाणिः ९
कुलशैलशृंगइवजंगमेतदाकुरुकुंजरेचलतिकंपनंमुहुः वसुधेवतस्यनपुनरस्यकेवलंवहतिस्मकिंत्वक
भुजाथदक्षिणा १०

हंतावृकोदरोपिभीमोपिपरिपूज्यंसर्वतः पूजार्हंपितुः वायोः सखायंमित्रंअग्निंदिनेदिनेएधैः काष्ठैः तृप्तिं
उपनेतुमिव वृत्तशरावपाणिः दर्वीहस्तः सन्विराटंययौ ९ तदाजंगमेकुलशैलस्यविंध्यादिपर्वतस्यशृंगइवेत्युत्प्रेक्षा कुरुकुंजरेकुरुश्रेष्ठेभी
मेचलतिगच्छतिसतितस्यपुरस्यवसुधेवकेवलंमुहुः कंपनंवहतिस्मनउवाह किंतु अदक्षिणासव्याभुजापिकंपनंवहतिस्म. मृत्युसूचकसव्यभु
जास्फुरणंबभूवेतिभावः १० छ

महानसेपाकशालायांअवतरतः वसतः जनस्यपतिः अध्यक्षः कृतः महान्सः भीमः स्वादुषुकर्मसुपाकक्रियासुरतः सन् मात्स्यंविराटंअसेवत ११
स्त्रीत्वेनयोगः वीरस्यगर्ह्यः निंद्यः खलुसत्यंपुंस्त्वेनयोगस्तुअंतःपुरेराजपत्नीगृहेवासस्यविघ्नःप्रतिबंधकः इतिहेतोरिवअवश्यभाव्यंउर्वशीशा
पेनभविष्यत्षंढत्वंनपुंसकत्वंआदायगृहीत्वापार्थोपिअर्जुनोपिमात्स्यंजगाम १२ नृपस्यगृहेषुविकृतवसतिः असौअर्जुनः तालः तालक्रिया
मानकर्ताकरायाघातःपाणौयस्यतथाभूतःसन् कन्याः नर्तयतिस्म कः काइव यथावनांतेवनमध्येमधुकरैः भ्रमरैः कृत्वासुस्वरः सशब्दः मल

महानसेऽवतरतोजनस्यसपतिः कृतः महानसेवतरतोमात्स्यंस्वादुषुकर्मसु ११ स्त्रीत्वेनयोगःखलुवीरगर्ह्यः
पुंस्त्वेनचांतःपुरवासिविघ्नः इतीवषंढत्वमवश्यभाव्यमादायपार्थोपिजगाममात्स्यं १२ कृतवसतिरसौनृपस्य
कन्यागृहेषुविनर्तयतिस्मतालपाणिः मधुकरसुस्वरोलतावनांतेमलयगिरेरिवमारुतप्ररोहः १३ ममध्वजांकस्य
बिभर्तिसंज्ञामसाविनिप्रेमभरादुपेतः प्रसूनधन्वेवसुतोपिमाद्यामात्स्येंद्रमागत्यननाममूर्ध्ना १४

यगिरेः मारुतप्ररोहः वातांकुरः लताः नर्तयतितद्वत् १३ माद्याः सुतः नकुलोपिअसौविराटः ममध्वजांकस्यमत्स्यसंज्ञांमत्स्यइतिनामबिभर्ति-
धारयति इतिहेतोः प्रेमभरात्प्रेमातिशयात् उपेतः प्राप्तः प्रसूनधन्वेवमत्स्येंद्रंआगत्यमूर्ध्नाननाम १४

२

राजाविराटः नकुलंपश्यन्सन्दृशोः निमेषणेमीलनेतंद्रालुः अलसः सन् निजांमात्स्येश्वरइतिअभिख्यांनामप्रकटः अर्थोयस्याःसाप्रकटार्थातन्
तांनिनाय मत्स्यस्यानिमिषत्वात् राज्ञानकुलसौंदर्यदर्शने अनिमिषत्वेननिजमत्स्येश्वरनाम अन्वर्थंकंकृतमित्यर्थः १५ करेणाकशांअश्वादे
स्ताडिनींचर्ममयींरज्जुंबिभ्राणंशशांककुलस्यभूषणवत्शोभाकरंदुरापः दुष्प्रापः पराक्रमोयस्यतंनकुलंमंदुरायाः वाजिशालायाः पतिंआ
तेनेचकार १६ अत्रएतत्गवांवृंदंकतिपयैः दिनैः अस्माकंविरोधिविरतेः गुप्तस्थित्यंतस्यहेतुः अपहरणेनकारणंभविताभविष्यतिइति

तंप्रश्यन्नकुलंराजातंद्रालुर्दृङ्निमेषणे निजांमात्स्येश्वराभिख्यांनिनायप्रकटार्थतां १५ कशांकरेसबिभ्रा
णंशशांककुलभूषणं मंदुरापतिमातेनेतंदुरापपराक्रमं १६ अस्मद्विरोधिविरतेर्भविताअत्र हेतुरेतद्दिनैः कति
पयैरितिजानतेव पांडोःसुतेनचरमेणचतस्यराज्ञोवृंदंगवांप्रजुगुपेपृथुकौतुकेन १७ आगतानगरवासवां
छयादेवतेवविपिनस्यपार्षती केलिपुष्पमिवदंतकंकतंबिभ्रतीनृपवधूमुपागमत् १८

जानतेवचरमेनकनिष्ठेनपांडोःसुतेनसहदेवेनतस्यराज्ञः विराटस्यगवांवृंदंसमूहंपृथुकौतुकेनप्रजुगुपेरक्षितं कौरवैरेतद्धरणसमयेऽस्मा
कंप्राकट्यंभविष्यतीतिजानतेवेत्युत्प्रेक्षा १७ नगरवासवांछयाआगताविपिनस्यवनस्यदेवतेव केलिपुष्पमिवदंतमयंकंकतंकेशप्रसाधनो
पकरणंबिभ्रतीपार्षतीद्रौपदीनृपवधूंविराटस्त्रियंसुदेष्णांउपागमत् १८ श्रीसीतारामचंद्राभ्यांनमः ॥ ७ ॥

चं० का० सैरंध्रीरूपभाजः अस्याः द्रौपद्याः जाते स्वीकृतसैरंध्रीजाते नैच्यान्नीचत्वात् शिरः नतं सुदेष्णायाःसुशिरः सुंदरीं एनां द्रौपदीं वीक्ष्य व्रीडेनल
५ ज्जयापीडनात् नतं १९ असौ द्रौपदी माधवोदयस्य वसंतप्रादुर्भावस्य श्रीः शोभा वनभुवः वनभूमेरिव मनुजपतेः विराटस्य अवरोध
योषितः सुदेष्णायाः अनुदिनं प्रतिदिनं अखिलालिभिः समस्तसखीभिः अन्यत्र समस्तभ्रमरैः लालनीयैः श्लाघनीयैः अतीवहृद्यैः म

सैरंध्रीरूपभाजोस्या जाति नैच्यान्नतं शिरः सुदेष्णायास्तु वीक्ष्यैनां सुंदरीं व्रीडपीडनात् १९ वनभुव इव माध
वोदयश्रीर्मनुजपतेरवरोधयोषितोसौ अनुदिनमखिलालिलालनीयैरलमकरोत्तिलकैरतीवहृद्यैः २० गृ०
अनंतरं स्ववशात्क्षमाहृतकंकतमतिरसोत्पादनचणमधिगतशोभनाटनपाटवमिश्रितगंधर्वकुलमाकलितगो
त्रापलापं पंचानामपि रूपं समुदंचयंती पांचालनृपतिसुता पंचापि पतीननुयातवती ३ प० विमतानपि तैर्जित्वा
विवासमिवदायकः अक्षेष्वकुरुतावृत्तिमवनींद्रेणधर्मभूः २१ नोहरैः तिलकैः ललाटे विशेषकैः अन्यत्र तिलपुष्पैः अ
लमकरोत् अलंकृतवती वसंतलक्ष्मीः वनभुवं तिलकपुष्पैरिव द्रौपदी सुदेष्णां विशेषकैरलंकृतवतीत्यर्थः २० ग० एतद्द्वयं क्षेपकत्वा
न्नव्याख्यातं ३ प० तैरपि अक्षैरपि अपिशब्दात् सुहृत्संग्रहः विमतान् शत्रून् जित्वा विवासं प्रवासं दायक इव धर्मभूः अवनींद्रेण विराटेन ४
सह अक्षेषु पाशकक्रीडासु आवृत्तिं अकुरुत अन्योपि अभ्यासदार्ढ्यार्थमावृत्तिं करोति अवनींद्रेण सहास्य क्रीडया तद्वीतिं वर्धयामासेति
भावः २१

ग० एवं तैस्तैः [illegible] पांडुसुता [illegible] नाम्ना अध्यासिता अध्यासिता रूपस्वस्वकृत्यैः संपादितं शिरःकंपं श्लाघा[illegible]
नया [illegible] वयसा वार्धक्येन कृतमिव संततं अनुभवता अनेन महीपतिना विराटेन बहुमानिता: पृथासुता: धर्मराजादयः यथावि
वस [illegible] देशांतरप्रवासखेदं दु: खं न आज्ञासिषुः न ज्ञातवंतः तथा इतरे जना: तत्र नगरे तदीयं पांडवीयं स्वरूपमपि न आज्ञासिषुः २

ग० एवं तैस्तैः स्वकृत्यैः संपादितं शिरःकंपं वयः कृतमिव संततमनुभवतानेन महीपतिना बहुमानिताः पृ
थासुताः यथा विवासनखेदं तथा तदीयमपि स्वरूपमितरे जनास्तत्र नाज्ञासिषुः २ ग० अथैकदा तत्र सु
देष्णायाः प्रेषणेन मदनोत्सवावसरायवासवायतनसदृशं वासगेहमागतां कौरवाधमकरपरिक्लेशदुःखादिव
विवर्णां नवासस्सावगुंठितांगीं नरवशशिपरंपरासेवनलालसतयेव प्रपदसंमुखीनलोचननीलोत्पलां राजीवमु
कयानुव्रजतां राजहंसेनेव रजतभाजनेन राजितकरां चलां पांचालसुतां विलोक्य पंचेषुबाणवंचितविवेकोमं
चादुपसृत्य किंचिदाकुंचितमौलिः कीचकोनीचां वाचमुवाच ३ ग० अथ [illegible] विराटगृहे एकदा मदनोत्सवार्थं आस-
वाय [illegible] यथा प्रेषणेन [illegible] निभाव [illegible] तेन चंद्रगृहे एकदा सहशं वासगेहं स्वकुल [illegible] आगतां पांचालसुतां
[illegible] सर्वांगतः [illegible] किंचिदाकुंचित [illegible] मौलि: नतको [illegible] कीचक [illegible] सेना [illegible]

 चातमंचकात्उपसृत्यकिंचित्तस्याः समीपंगत्वावाक्उवाच कीदृशींपांचालसुतां कौरवाधमस्यकुरुकुलोत्पन्नेषुनीचस्यदुःशासनस्य
करेणपरिक्लेशः आकर्षणादिः तज्जन्यदुःखादिवविवर्णेननिस्तेजस्केनमलिलेनचवाससावस्त्रेणअवगुंठितांगीं तथांनखाएवशशि ६
नः [illegible] तेषांपरंपरापंक्तिः तस्याः सेवनेयालालसताअतितृष्यातयेवप्रपदयोः पादाग्रयोः संमुखीनेलोचनेएवनीलोत्पलेयस्यास्तां
परपुरुषदर्शनंमाभूदित्यधःपश्यंतीमितिभावः राजीवशंकयाकमलभ्रांत्याअनुव्रजताराजहंसेनेवराजतभाजनेनराजितंशोभि-

प॰ इदमेवहिसद्मभद्रभद्रंयदिदानींतवमार्दवज्ञमंघ्रेः अयमप्यहमस्मिधन्यधन्योहरिणाक्षित्वदपांगगोच
रोयः २२ नतगात्रियदागमेनमानयसेमोदगिरेरधित्यकां चिरपुण्यफलांकुरश्रियोदिवसोवैजननस्तदेषमे २३

तंकरांचलंकराग्रंयस्यास्तां ३ प॰ इदमेवहिसद्ममममगृहंभद्रात्भद्रंअतिकल्याणरूपमित्यर्थः यद्यतः इदानींतवअंघ्रेः मार्दव-
ज्ञं अंघ्रिस्पर्शवदित्यर्थः हेहरिणाक्षि यस्तवअपांगस्यअपांगदर्शनस्यगोचरः विषयः अयमहमपिधन्यधन्यः अतिधन्योस्मि २२
हेनतगात्रिहेकृशांगि यत्यतः आगमनेनमोदगिरेः हर्षपर्वतस्यअधित्यकांउपरिभागंनयसेप्रापयसे तत्तस्मात्एषः अद्यतनः दि
वसः चिरपुण्यस्यचिरकालिकपुण्यस्यफलांकुराः फलप्रादुर्भावाः तेषांश्रियः संपत्तयः तासांवैजननः प्रसूतिमासः यतः त्वागमने- ५
नमत्यंहर्षंदर्शिततः प्राचीनपुण्यफलोदयः प्राप्तइतिभावः २३

हेमालिनिपुष्पमालाकर्त्रिस्रैरंभिमालावतिच्चअधुनातेतवअभिधायाः मालिनीनाम्नः अन्वर्थंतामालावैशिष्ट्येनअर्थयुक्तत्वंकचेषु केशेषुकुतः नजागर्तिनविद्यतेइत्यर्थः अथवातस्याः अभिधायाः प्रतीपंविपरीतंयथातथाउदितानांउक्तानांवर्णानांअक्षराणांपं क्तेः अर्थः नीलिमाअमीषुकचेषुअलंकरणंभूषणंवर्ततेइतिशेषः तवकचेषुमुक्तापुष्पादिमालापेक्षयानीलिमैवशोभाकारकइ तिभावः आक्षेपालंकारः आक्षेपस्स्वयमुक्तस्यप्रतिषेधोविचारणात्इतिलक्षणात् २४ हेबालेतेतवबाह्वोः भुजयोः अनंगदत्तस्य

अन्वर्थतामालिनितेभिधायाःकुतोनजागर्त्यधुनाकचेषु तस्याः प्रतीपोदितवर्णपंक्तेरर्थोथवालंकरणंत्व मीषु २४ बाह्वोरनंगदत्तस्यबालेतेकारणेउभे एकंतयोस्तुलावण्यमितरंनावगम्यते २५अरम्यभावंभ जतेजगत्यामंगेषुकिंचिद्विकलोपिलोकः निरीक्ष्यसेत्वंतुविचित्रमेतन्मध्येनहीनापिमनोज्ञमूर्तिः २६

अंगदसंज्ञकबाहुभूषणसहितस्यमदनदत्तस्यचउभेद्वेकारणेभवतः तयोर्मध्येमदनदत्तस्यकारणंएकंलावण्यंसौंदर्यंअवगतं - इतरत्बाहुभूषणराहित्यस्यकारणंनावगम्यतेनज्ञायते अलौकिकसौंदर्यवत्यास्तवभूषणाभावेदारिद्र्यसौकुमार्यादिकारणंन जायतेइतिभावः २५ जगत्यांविश्वस्मिन् अंगेषुअवयवेषुमध्येकिंचिदपिस्वल्पमपिविकलःअवयवक्लेशेनहीनःलोकः अरम्यभा वंअरम्यत्वंभजतेधारयति त्वंतुमध्येनहीनापिरहितापिमनोरमामूर्तिर्देहोयस्यास्तथाभूतानिरीक्ष्यसेदृश्यसे एतद्विचित्रंआश्चर्यका रकं मध्यस्यातिसूक्ष्मत्वेनवर्णनंकटिकुलक्षुण्णं २६ श्रीराम

हेतन्वितवताम्रः आरक्तः अयंअधरः अधरोष्ठः पल्लवोनभवतिविद्रुमः प्रवालश्चनभवति किंतुबिंबमेव कुतइतिचेदाह चंद्रइति हि यतः एतत्तववक्त्रंमुखंचंद्रः यदिस्यात् तर्हिलोकेचंद्रस्यबिंबंसहजंसहोत्पन्नंभवेत् अधरबिंबत्वकल्पनाश्लेषेणचंद्रबिंबत्वंस्थापितं २७ हेकांतेधात्राब्रह्मणापुराइदंतवाननंसरसिकमलानांआवलीषुपंक्तिषुस्रष्टुंउत्पादितुंविस्मृतमेव पश्चाद्धिचिंतनवताकमलमध्येस्रष्टव्यंयत्तदत्रसृष्टमितिमनसिआनीतवताधात्रातस्याः कमलावल्याः उपांतभागेसमीपभागेविचरतः हंसपादः लक्ष्यतेएव

नपल्लवस्तन्विनविद्रुमश्चताम्रोधरोयंतवबिंबमेव चंद्रोयदिस्यात्तववक्त्रमेतच्चंद्रस्यबिंबंसहजंहिलोके २७ कांतेतवाननमिदंकमलावलीषुस्रष्टुंपुरासरसिविस्मृतमेवधात्रा पश्चाद्धिचिंतनवतातदुपांतभागेसंलक्ष्यतेविचरितः खलुहंसपादः २८ कूपस्यतीरेनिवसन्नपायंकोवानधत्तेवदकोमलांगि त्वन्नाभिकूपस्यतटेनिवासीनदृश्यतेसंप्रतिमध्यभागः २९

लु हंसानांतत्रविद्यमानत्वात्तत्पादोपितत्रवर्ततेएव लिपिलेखनसमयेयत्रयत्किंचित्विस्मृतंतत्रहंसपादसदृशंचिन्हंक्रियते २८ हेकोमलांगिमृद्वंगिकूपस्यतटेतीरेनीवसन्वासंकुर्वन् कोवापुरुषः अपायंअनर्थंनधत्तेनधारयति यतः तवनाभिरेवगंभीरत्वात्कूपः तस्यतटेनिवासीमध्यभागः संप्रतिनदृश्यते तस्मात्कूपेपतितोदृष्टश्चेत्यनुमीयतेइतिभावः मध्यस्यातिकृशत्वेपर्यवसानं सामान्यस्यविशेषणसमर्थनात्मकोर्थांतरन्यासालंकारः २९ छ छ

[illegible] पितु [illegible] के [illegible]

[illegible] भिः सह जनो [illegible] मरः [illegible]

[illegible] तेन तोषात् हर्षात् मिथः अन्योन्य आलिंगिता [illegible]

[illegible] मिव रात्रे भर्तुर्यं प्रहरस्य परदिवसांतर्गतत्वान्नियामतं ३० शोभनाः दंताः यस्याः सा सुदती [illegible] सुदति [illegible]

[illegible] शशिसेवनला मनो [illegible] लिंगितामिव मिथो रजनेस्त्रियामीं [illegible] रञ्जितां वहसे युवेर्षी

[illegible] संहननमूहयितुं वियुक्तं ३० सुदति बहुपरागधूसरापि त्वमपहरस्यधुना मनो मदीयं रतिरिव [illegible] पद

[illegible] मलया विलासि विलांगी ३१ त्वामुद्वसदिव फलाधरां मेमाम [illegible] गमर्दितं विशंकम

सिम्वि जने प्रदेशे पश्चाननेपातुमयं हि कालः ३२ भिः परागैः धूलिभिः धूसरा मलिनापि त्वं मदीयं मनः अपहरसि [illegible]

[illegible] तनुः तस्याः धूमलवेन अविलं मलिनं [illegible] विलांगं यस्याः सा [illegible] वधूरिव ३१ हे [illegible]

[illegible] अधरोष्ठरसपानकृतमित्यर्थः [illegible] कालः समयः [illegible]

[illegible]

ग॰ इतितस्यकीचकस्यवचनंआकर्ण्यापिचित्तमेवचंपकमंजरीतस्यांचंचरीकायमाणः भ्रमरवत् आचरन्पंचशरस्यमदनस्यविकारो-
यस्याः सा यथा चंपकमंजर्यांभ्रमरोनगच्छातिनहत्सैरंध्रीचित्तंप्रतिमदनविकारोनागच्छदित्यर्थः पांचालीद्रौपदीस्मररागतिमिर
स्यस्मरकृतभीत्यात्मकतमसः कौमुदींनाशकर्त्रींज्योत्स्नांइमांवक्ष्यमाणांगिरंउदीरयामासउवाच तदनुरागप्रतिकूलांवाणींजगा
इत्यर्थः ४ प॰ हेकीचकत्वंअंतःपुरेषुअंतःपुरसंबंधिराजपत्नीषुविरहन्क्रीडन् सन्नपिसैरंध्रयेराजपत्नीप्रसाधनकारिण्यैस्पृ

इतितस्यतादृशंवचनमाकर्ण्यापिचित्रचंपकमंजरीचंचरी कायमाणंपंचशरविकारापांचालीगिरमिमांस्मरराग
तिमिरकौमुदीमुदीरयामास ४ प॰ अंतःपुरेषुविहरन्नपिकीचकत्वंसैरंध्रयेस्पृहयसीतिविगर्ह्यमेतत् र
म्येषुकल्पकुसुमेषुचरन्द्विरेफोरज्येतकिंपितृवनद्रुमगुच्छिकायां ३३ प्रतायतेचपलतापतिवल्लीषुयाहठा
त् इष्टार्थसिद्धःप्रागेवदिष्टांतंदोग्धिसानृणां ३४

हयसिअभिलाषंकरोषिइत्येतद्विगर्हितंनिंद्यं रम्येषुमनोहरेषुकल्प
कुसुमेषुकल्पवृक्षपुष्पेषुचरनसंचरन्द्विरेफः भ्रमरः पितृवनद्रुमस्यश्मशानवृक्षस्यगुच्छिकायांपुष्पमंजर्यांरज्येतकिंआसक्तोभवेत्किं नै
वभवेदित्यर्थः उत्तमपदार्थान्सेवमानोधमपदार्थाभिलाषंतेवकुर्यादितिभावः ३३ पतिवल्लीषुसभर्तृकासुस्त्रीषुहठात्बलाद्याचप ७
लताअविचारःप्रतायतेक्रियते साचपलतानृणांइष्टार्थस्यरतेःसिद्धेः प्राक्आदावेवदिष्टांतंमृत्युंदोग्धिददातीत्यर्थः पतिवत्न्यभिलाषोमरणहे
तुरितिभावः ३४

नव भर्तानास्तीत्यतोवक्षीनिचेदतआह गंधर्वाइति गंधर्वाः मेकांताः पतयः संति नान्गंधर्वान्स्मरः मद्देतुकमदनः अनिशंसदाबाधते व
हुवचनोक्तागंधर्वाः कतिसंतीनिचेत्तत्संख्यांबाधनहेतूत्प्रेक्षयाह स्वेति स्वाभिरव्यांस्वलावण्यशोभांस्वास्त्राणांस्ववाणानांसंख्यांपं
चत्वसंख्यांवहंतिधारयंतिइतिईर्ष्ययाकिलईर्ष्ययेव मय्यनुरक्ताः पंचगंधर्वामत्पतयः संतीतिभावः ३५ दोष्मतांप्रशस्तबाहुमतां-
अवतंसाः शेखरीभूताः वीरश्रेष्ठाइत्यर्थः मानिनः अभिमानवंतः तेगंधर्वाः स्वरूपंकेवलंअप्रमादेनसावधानतयानगोपायंतिनप्र

गंधर्वाः संतिमेकांताबाधतेयान्स्मरोनिशं स्वाभिरव्यांस्वास्त्रसंख्यांचवहंतीतीर्ष्ययाकिल ३५ दोष्मताम
वतंसास्तेस्वरूपंनैवकेवलं गोपायंत्यप्रमादेनपरेभ्योमांचमानिनः ३६ तदद्यपथिवामेस्मिन्संप्रतिष्ठास
सेयदि नेतुत्वांचारयिष्यंतिदक्षिणेपिधृतक्रुधः ३७ इत्यूचिषीसामहिषीकुरूणांशेमुषीमती सद्योनिव
वृतेतस्माच्चित्तवृत्तिरिवात्मनः ३८

कटंकुर्वंति किंतुपरेभ्यः पुरुषांतरेभ्यः मांचगोपायंतिरक्षंति ३६ ननुतस्मादद्यवामेव
केअदक्षिणेचपथिवीरवनिताभिलाषरूपेमार्गेयदिसंप्रतिष्ठाससेसम्यक्प्रस्थानंकर्तुमिच्छसितर्हिधृताक्रुत्क्रोधोयैस्तेगंधर्वास्तुत्वांद
क्षिणेपिपथियमादिमार्गेचारयिष्यंतिगमयिष्यंति मदभिलाषंकरोषिचेत्तर्हिगंधर्वास्त्वांहनिष्यंतीतिभावः ३७ इतिएवंप्रकारेणऊचि
षीउक्तवतीशेमुषीमतीबुद्धिमतीसाकुरूणांमहिषीद्रौपदीसद्यः तदानीमेवतस्मात्कीचकान्निववृतेनिवृत्ता केव आत्मनः चित्तवृत्तिरिव य

टी॰ ...ततस्तया ...निवृत्ता न यासापि निवृत्तेत्यर्थः ३८ धावंत्या इति तत्त्वदृष्टिः स्यादिति भयात्पलायमानया अथवा सैवं... टीका
८ ...स्त्रस्वपेनेनस्वलद्गमनेन पदोः चरणयोः युगं यथा यथा आरुण्यं रक्ततां अधत्त दधौ तथा तथा अस्य कीचकस्य दृशोः युगं ... ६
आरुण्यं अधत्त पलायमानायाः तस्याः गृहणविषये कीचकः रोषेण पश्चाद्धावेतेतिभावः ३९ ततः कृतांतभासा ...

यथायथास्याधावंत्यास्त्रिवणेनपदोर्युगं तथातथारुणारण्यंनस्याधत्तदृशोरपि ३९ कृष्णा
ततस्तेन कृतांतभासाकेशेगृहीत्वाभुविपातितासा पर्यायबद्धोद्यमविभ्रमाभ्यांपद्भ्यांकराभ्यामपि
पर्यभावि ४०

...केशे गृहीत्वा भुवि पातिता सा कृष्णा द्रौपदी पद्भ्यां कराभ्यामपि पर्यभावि पराभूतेत्यर्थः ...
... [illegible] ...
... [illegible] ...

पद्यं॥ तदापराभवसमये यामृगाक्ष्याः द्रौपद्याः संज्ञाज्ञानं प्रहारभीत्येव स्वस्यापि प्रहारः स्यादिति भयेन क्वचित् नाड्यां अंतरधत्त गुप्ताबभूव मूर्च्छायां ज्ञानाभावो भवति सा संज्ञा प्रहर्तरि दूरगते सति चिराय बहुकालेन उद्गम्य प्रकटीभूय दृशौ उद्घाटयामास अस्मात् प्रस्तुतवृत्तांतात् काचित् स्त्री कस्मिंश्चिदन्यां स्त्रियं स्वसमीपे ताडयंति सति स्वस्मिन् प्रहारभयेन कपाटं पिधाय गृहमध्ये कुत्रचित् गुप्ता भूत्वा प्रहर्तरि गते सति पश्चादुत्थाय कपाटं उद्घाट्य तीत्यप्रस्तुतवृत्तांतस्फुरणात् समासोक्तिरलंकारः समासोक्तिः परिस्फूर्तिः प्रस्तुते प्रस्तुतस्य चेदिति लक्षणात्॥ ४१॥ ग० तदनु संज्ञाप्राप्त्यनंतरं शनैः रुदंत्युषी उत्थितवती धरातलस्य परागैः पांसुभिः

प्रहारभीत्येव तदा मृगाक्ष्या नाड्यां क्वचिद्यांतरधत्त संज्ञा। उद्गम्य सा दूरगते प्रहर्तर्युद्घाटयामास दृशौ चिराय ४१॥ गद्यं० तदनु शनैः रुदंत्युषी धरातलपरागधूसरिमतिरोहितदीधितितया वासरापलापितमहामहौषधिलतेव विलुलितचूर्णकुंतलतया चक्रयानाकुलीकृतबालपूलिका चरममृगीव सूतान्ववायजनपदस्य प्रथमामौर्मीतिश्लाघामिव बाष्पधारामुत्सृजंती क्वचिदपि शरणमलभमाना सा याज्ञसेनी मंदं मंदं तं देव भूपतिभवनमभिजगाम॥ ५॥

धूसरिम्णा धूसरत्वेन तिरोहिता अंतर्हिता दीधितिः शरीरकांतिर्यस्याः सा तस्याः भावस्तत्ता तया वासरेण दिवसेन अपलापितं निह्नुतं महः तेजो यस्याः सा महौषधिलतेव विलुलिताः मर्दिताः चूर्णकुंतलाः वक्रकेशाः यस्याः सा तस्याः भावस्तत्ता तया चक्रयानेन आकुलीकृता मर्दिता बालपूलिका पुच्छकेशगुच्छो यस्याः सा चरममृगीव चमरीव सूतान्ववायजनपदस्य कीचककुलजनपदस्य प्रथमां ऊर्मितिश्लाघामिव अतिदृष्टिमिव नाशकर्त्रीमित्यर्थः बाष्पधारामुत्सृजंती क्वचिदपि शरणं रक्षितारं अलभमाना सा याज्ञसेनी द्रौपदी तं देव भूपतिभवनं मंदं मंदं यथा तया अभिजगाम॥ ५॥ ॥८२॥ ॥८२॥ ॥८२

॥पद्यं॥ तांसैरंध्रींदृष्ट्वाज्ञातः वृत्तांतः कीचककृतनताडनादिर्येनसः देव्याः राजपत्न्याः गेहेचरन् जनः नयनयोः अंभः बाष्पंविमुमुचे नत्याजभाषितंभाषणंतु
किंचनकिमपिनविमुमुचे राजगृहस्थोजनः कीचककृतताडनांसैरंध्रींदृष्ट्वादुःखात्केवलंरुरोद तद्भयात्सदसद्भाषणंनुनचकारेत्यर्थः॥४२॥ साद्रौपदी
सायंसायंकाले रात्रेः प्रथमप्रहरे सायंप्रातर्द्विजातीनामशनंश्रुतिचोदितमित्यत्रसायंपदस्यतथार्थदर्शनात् महानसेपाकशालायां शनैसोमहानसशयः तं
पृथुनाविपुलेनशरावेण पाकपात्रविशेषेण कृतंउपधानं उच्छीर्षकंयेनतं धूमाधिरोहेण धूमलेपेनमलिनंवसनंवस्त्रं वसानंपरिदधानं अतएवनीलेनअं

॥पद्यं॥ दृष्ट्वातांज्ञानवृत्तांतोदेव्यागेहेचरन्जनः नयनांभोविमुमुचेनतुकिंचनभाषितं॥४२॥ सायंमहानसशयंशनकैर्ययौ
साभीमंरहःपृथुशरावकृतोपधानं धूमाधिरोहमलिनंवसनंवसानंनीलांबुवाहपरिवीत मिवाचलेंद्रं॥४३॥ निश्वस्यदीर्घमि
यमंतिकमावसंती स्पृष्टेनबाष्पसलिलैःकुचयोःस्खलद्भिः बुध्येनतेनकिमिदंव्यसनंतवेतिपृष्टासगद्गदमुवाचविषण्णचेताः॥४४

बुवाहेनमेघेन परिवीतं आवृतं अचलेंद्रं महापर्वतमिव स्थितंभीमं रहः एकांते शनैःमंदंमंदं यथातथाययौ जगाम॥४३॥ अंतिकंसमीपभागंआ
वसंती स्थिताविषण्णंविषादयुक्तंचेतोयस्याःसा इयंद्रौपदीदीर्घंनिःश्वस्य कुचयोःस्खलद्भिःपतद्भिःबाष्पसलिलैःउष्णनेत्रोदकैः स्पृष्टेन अतएवबु ९
द्धेनजागृतेनतेनभीमेन इदंतवव्यसनंदुःखंकिंकीदृशंकिन्निमित्तंचइतिपृष्टाकृतप्रश्नासतीसगद्गदंदुःखात् असपष्टाक्षरंयथातथाउवाच॥४४॥ ॥७॥

अद्यमेदुःखंकिं किमपिनास्तीतिसोल्लुंठनंवचनंएवमग्रेपि अपत्रपा अन्यतोलज्जान्वका वीरपत्नीत्वपदेवीरभार्यात्वस्थाने अभिमानश्चकःएतत्त्वयंकेवलंना
स्तीतिन अपितु कीचकनामानीचषिड्गःनीचविटःतस्मात्कचंधृत्वाताडनंआप्तवत्याःमेसर्वगतं सर्वनाशोसतिपृथक्कस्यनाशंवच्मीतिभावः॥ ४५॥ मत्स्याधि
पस्यविराटस्यसभांतरेसभामध्येमयिदुःखेनघुष्यंत्यां आक्रोशंत्यांसत्यांतथ्यस्यसत्यस्य यतेरिवसंन्यासिनइव धर्मसूनोःउपेक्षणंउपेक्षा आसीत्॥ ४६
उपेक्षाकारणंकल्पयित्वाह बुभुक्षतेइति नृपःधर्मराजःजीवंतींमांनबुभुक्षते उपभोक्तुंनेच्छति अपितुमारितांगतप्राणामेव बुभुक्षते उपभोक्तुमिच्छति

किमद्यमेदुःखमपत्रपाकाकोवीरपत्नीत्वपदेभिमानः सर्वंगतंकीचकनीचषिड्गात्धृत्वाकचेताडनमाप्तवत्या॥ ४५॥
मयिदुःखेनघुष्यंत्यांमत्स्याधिपसभांतरे तथ्यस्येवयतेरासीत्धर्मसूनोरुपेक्षणं॥ ४६॥ बुभुक्षतेनजीवंतींमारि
तामेवमांनृपः कल्याणंखलुतत्तस्यकंकभावभृतोधुना॥ ४७॥ तस्यैवाज्ञापथेजस्रंचलतास्खलनंविना भव
तांखलुनिःशंकंपरामृश्येकचेपरैः॥ ४८॥

भक्षयितुमिच्छतिच अधुनाकंकभावभृतःकंकभावंकंकसंज्ञांगृध्रत्वंच धारयतःतस्यधर्मराजस्य तत्खलुतदेवमृतभक्षणमेव कल्याणंसमीचीनंप्रि
यमितियावत्॥ ४७॥ तस्यैवउपेक्षाशालिनोधर्मसूनोरेव आज्ञापथेस्खलनंविनाप्रमादंविना अजस्रंनिरंतरंचलताभवता खलुभवद्भिरेवनिःशंकंकचे
परैःअन्यैःकरणभूतैःअहंपरामृश्येधृता त्वदुपेक्षयैवपरैर्मत्कचधारणंक्रियतेइतिभावः॥ ४८॥ ॥ ५॥ ॥ ५॥ ॥ ५ ॥ ५

आत्मनोनिश्चयमाह दुःशासनादिति अपराधविषये दुःशासनादपि अधिकः लत्ताप्रहारताडनादिकरणात् अयंसूतात्मजः कीचकः ननिहन्यतेचेत् तर्हिआद्येप्राथमिके कचग्राहिणिदुःशासनेनाशितेपिहतेपिमांवेणिंकचग्रंथनंचसमायुषो अवोढ् नानीह् भयंभावः वस्त्रहरणसमये दुःशासनवध पर्यंतवेणिमोक्षंनकरिष्यामीतिप्रतिज्ञाकृता अतस्तद्वधेकृतेपिद्वितीयकचधारककीचकवधोनकरिष्यतेचेत् तर्हियावज्जीवंवेणिमोक्षंनकरिष्यामीतिभावः ॥४९॥ तत्क्रोधोद्दीपनार्थमाह अयमिति अयंकीचकः बलीयान्इतितेमतिश्चेत्तर्हिमारुमां अन्यत्रक्वापिकुत्रचित्स्यल्केनय अज्ञातवासे

दुःशासनादप्यधिकोपराधेसूतात्मजोयंननिहन्यतेचेत् आद्येकचग्राहिणिनाशितेपिसमायुषोवेणिमवोढ्हिमांच ॥४९॥
अयंबलीयानितितेमतिश्चेदन्यत्रमांक्वापिनयस्वभीरु अज्ञातवासेप्यनुभूयमानेरक्ष्यंहिशीलंगृहिणीजनानां ॥५०॥
श्रुत्वावधूगिरमिमांस्वपनोपनीतंशोणत्वमक्ष्णिपुनरुक्तयतोरुषापि तस्याधरोष्ठमुदवेपतनिर्गमिष्यत्क्रूराक्षरावलिविमर्दनशंकयेव ॥५१॥

तद्दर्शयति कथंकरोमीतिचेदाह अज्ञातेति हियतः अज्ञाते वासे अनुभूयमानेपि न रुणीजनानां तरुणस्त्रीणां शीलं सदाचरणं रक्ष्यंरक्षितुंयोग्यं ॥५०॥ इमांवध्वाः द्रौपद्याः गिरंश्रुत्वा स्वपनेन निद्रया उपनीतं प्रापितं अक्ष्णिनेत्रे शोणत्वंरक्तत्वं रुषापिक्रोधेनापि पुनरुक्तयतः द्विगुणंकुर्वतः तस्यभीमस्य अधरोष्ठं निर्गमिष्यंती या क्रूराक्षराणांआवलिः तयाविमर्दनस्य घर्षणस्य शंकयेवउदवेपत अकंपत क्रोधेनोष्ठस्फुरणेक्रूराक्षराविमर्दशंकात्मकहेतूत्प्रेक्षा अन्यापिभाविघर्षणासहनशंकयावेपने वधूवाणींश्रुत्वाक्रुद्धःसन्नुवाचेतिभावः १०

त। गभीरा दृढत्वस्यांगेन सहिता मे गदापि तिष्ठतु त्वयि नियुद्धं बाहुयुद्धमात्रं निर्ममाणे कुर्वति सति मेघवाहः इंद्रः क्व कुत्र तिष्ठेत् न मनुरस्थातुं नेव शक्तो भवेदित्यर्थः मरालवाहः ब्रह्मा क्व तार्क्ष्यवाहः विष्णुश्च क्व महोक्षवाहः सदाशिवश्च क्व एतेषु किमपि पुरस्थातुं नेव शक्नुयुरित्यर्थः ॥५२॥ हिडिंबश्च किर्मीरश्च बृहद्रथभूः जरासंधश्च बकश्च आदयो येषां तेषां हत्या हननं तेन रणांबुधौ लज्जासमुद्रे तरतः मे भुजस्य निमज्जनायैव भु

गदापिसातिष्ठतुमेगभीरानियुद्धभाजस्त्वयिनिर्ममाणे क्वमेघवाहः क्वमरालवाहः क्वतार्क्ष्यवाहः क्वमहोक्षवाहः ॥५२॥
हिडिंबकिर्मीरबृहद्रथात्मभूबकादिहत्यातरतस्त्रपांबुधौ निमज्जनायैवभुजस्यमेधुनासृजस्यमुकुंदचक्रसूदनोद्यमं ॥५३॥
तथाप्यौदास्यमेतस्मिन्नौपाधिकमेवमे क्षोदीयानपिवध्योहिकुलस्त्रीभुग्महीयसां॥५४॥ ॥ ॥

मुकुंदचक्रस्य सूदनोद्यमं वधोद्योगं सृजसि उत्पादयसि दैत्यराक्षसक्षत्रियादीनां निहननस्य मद्योग्यकर्मणः अभावात् लज्जाम्बुधौ पतितस्य भुजस्य निमज्जनायैव कु तिष्ठतु ... इति भावः ॥५३॥ तथापि एतद्वधकर्मणि अतितुच्छेपि अस्मिन् चक्रे औदास्यं उदासीनत्वं मम ... औपाधिकमेव ... क्षोदीयानपि अतिक्षुद्रोपि कुलस्त्रीभुक् कुलस्त्रियं भुक्तवान् द्रोग्धा वध्यः ... ॥५४॥ ॥

॥पद्यं॥ अथेतन्विबहुनाउक्तेनकिं॥ पद्यं॥ तस्यकीचकस्य असृजारक्तेनयावकितोसंजात लाक्षारसरागो अंघ्रीयस्यास्तांतस्य अस्थ्नांचूर्णेनकर्पूमयः अंगरागोलेपनं यस्यास्तांतस्य अकीर्तिरेव मषीकज्जलरसःवेनापि अभिलिप्तेनेत्रे यस्यास्तां ममवीरलक्ष्मीं अलंकरिष्ये विशेषणोक्तरीत्याप्र- साधनंकरिष्यामि तंहनिष्यामीतिभावः॥५५॥ हेप्रियेत्वंमयाइदंउक्तं वीरश्रियःशिल्पंप्रसाधनं यथार्थभावात् सत्यतयासद्यःअनुभूयमांसैरंध्रि कान्चार एवविनोदनंविनोदःतद्विषयेपितव अनुसारेच्छुं अनुकरणेच्छुं अवेहिजानीहि अहंराज्ञाःप्रसाधनकर्मकरोमि अयमपिश्रियःप्रसाध नंकृत्वामदनुकरणंकरोतीतिज्ञास्यसीतिभावः५६ त्वयापुनःश्वःउत्तरदिने कटाक्षाणांखेलैःक्रीडाभिः सह प्रत्युत्पतंत्येव सम्मुखोद्गमनंकुर्वत्येव स्मितपूर्वया वाचा क्रीडांरतिक्रीडां विधातुं कर्तुं अयं तांडवमंडपः अमुष्य कीचकस्य संके तभूः संकेतस्थानं क्रियतां अद्य पूर्वरात्रौ अस्मिन् मंडपे एकाकिना त्वयाइष्टसिद्ध्यर्थमागन्तव्यं अहंमप्यागमिष्यामीति संकेतःक्रिय तामित्यर्थः॥ ५७॥ ॥श्रीकृष्ण॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ११

॥पद्यं॥ अथेतन्विकिंबहुना॥ ॥प॰ तस्यासृजायावकितांघ्रिमस्थ्नांचूर्णेनकर्पूरमयांगरागां अकीर्तिमष्यायवि
लिप्तनेत्रामलंकरिष्येममवीरलक्ष्मीं॥५५॥ वीरश्रियःशिल्पमिदंमयोक्तंयथार्थभावादनुभूयसद्यः सैरंध्रिका
चारविनोदनेपितवानुसारेच्छुमवेहिमांत्वं॥५६॥ त्वयापुनःश्वःस्मितपूर्ववाचाप्रत्युत्पतंत्येवकटाक्षखेलैः क्रीडांविधातुंक्रि
यतामभुष्यसंकेतभूस्तांडवमंडपोयं ५७

॥गद्यं॥ इति पूर्वप्रकारेण आश्वासितवतः पत्युः भीमस्य अनुमत्या अनुमोदनेन पुनः आगत्य नेपथ्यभवनं राज्ञाः करणीय नेपथ्यगृहं अधिशय्य आलो नेपथ्यगृहे शयाना या इत्यर्थः अस्याः द्रौपद्याः चेतसः सकाशात्पलायमानस्य भयभरस्य सा विभावरी रात्रिरपि सहचरी सहगमनकर्त्री बभूव तस्याः भयं यतं रात्रिरपि गतेत्यर्थः ६ प० चपलः अस्थिरचित्तः कीचकः अन्येद्युः अन्यस्मिन्द्वितीये दिवसे एत्य समीपमागत्य पुनः तां सैरंध्रीमब्रवीत् हे सुमुखि सुंदरि तुल्यनिकारस्य मया कृतनतत्पराभवतुल्यपराभवस्य पात्रे मयि प्रसीद केलीषु रतिक्रीडासु हार्दकलहेषु स्नेहकलहेषु च केशाकृष्टिं केशेषु गृहीताकर्षणं

॥गद्यं॥ इत्याश्वासितवतः पत्युरनुमत्या पुनरागत्य नेपथ्यभवनमधिशय्यालोरस्याश्चेतसः पलायमानस्य भयभरस्य सापि विभावरी सहचरी बभूव॥ ६॥ प० अन्येद्युरेत्य चपलः पुनरब्रवीत्तां सकुमसीद मयि तुल्यनिकारपात्रे केलीषु हार्दकलहेषु च केशाकृष्टिं पादाहतिं च दधती कुरु वैरशुद्धिं॥ ५८॥ पंच संतु धवास्तेभ्यो मुंच भीतिं मयि स्थिते पंचवक्त्रे वने दृष्टे किं चरेयुः परे मृगाः ५९॥ मस्तके जलिपद्मस्य मम संप्रति भामिनि प्रसादशंसिनं पादं प्रयच्छ सहचारिणं॥ ६०॥

पादाहतिं लत्ताप्रहारं च दधती कुर्वती सती वैरशुद्धिं वैरस्य प्रतीकारं कुरु॥ ५८॥ ते पंच धवाः गंधर्वपतयः संतु मयि स्थिते सति तेभ्यः सकाशात् भीतिं मुंच त्यज वने पंचवक्त्रे सिंहे दृष्टे सति परे मृगाः चरेयुः इतस्ततः गच्छेयुः किं अपि तु भयान्नैव गच्छेयुरित्यर्थः॥ ५९॥ हे भामिनि कोपेन संप्रति मम मस्तके अंजलिपद्मस्य सहचारिणं सखायं प्रसादशंसिनं प्रसादसूचकं पादं प्रयच्छ निधेहीत्यर्थः॥ ६०॥ ॥६॥ ॥६॥

[illegible] १२

॥ग॰ इत्थं अतिवेलं अत्यंतं प्रलपंतं अनर्थकं वचो वदंतं एनं कीचकं प्रतिजुगुप्सया कुत्सया मुखस्य साचीकरणे तिर्यक्करणे त्रपाहेतुकतां त्रपाहेतु टी॰ स॰

कमिदं मुखसाचीकरणे अभिनयंती मुखोपरि वसनांचलानयनाद्यभिनयं कुर्वती सा कुंती स्नुषा द्रौपदी तृषाभिभूते व कीचकरतीच्छापराभूते व इदं ६

वक्ष्यमाणं वचनं उदंचयांचकार प्रकटीचकार उवाचेत्यर्थः ॥७॥ अयि भद्र कल्याण को वा जनः आरुद्धं रुद्धं अभिव्याप्य इदं जगत् विश्वं क्षद्रयितुं

दीनं कर्तुं अनिद्राणस्य सावधानस्य शंबरद्रुहः मदनस्य शासनमुद्रणाय शासनपिधानाय को वा जनः द्रुह्यति मदनाज्ञानुसरणं को वा न करोति अस्य

॥ग॰ इत्यतिवेलं प्रलपंतमेनं प्रतिजुगुप्सया मुखसाचीकरणे त्रपाहेतुकतामभिनयंती सा कुंती स्नुषा तृष्णाभिभूतेव वचनमिदं

किंचिदुदंचयांचक्रे ७ अयि भद्र जगदिदमारुद्धं क्षद्रयितुमनिद्राणस्य शंबरद्रुहः शासनमुद्रणाय द्रुह्यति को वा जनः किंतु इयानेव

प्रस्तुते विशेषः ८ प॰ स्त्रीपुंसयोर्भावनटौ मिथो यो पूर्वस्तयोर्व्रीडतिरःपटेन चिरायते स्पष्टयितुं स्वरूपं परस्तु तन्नोत्सहते नुमंतुं ८१

श्रीगोपालकृष्णायनमः ॥ ॥ ॥ ॥ ॥ ॥ ॥

र्थः अपि तु सर्वोप्यनुसरणं करोत्येव किंतु इयानेव प्रस्तुते विशेषः ॥८॥ प॰ स्त्रीपुंसयोः मिथः भावनटौ परस्परं नर्तकौ स्तः तयोः पूर्वः स्त्रीभावनटः स्त्री

इव लज्जैव तिरःपटः अंतर्धानपटः तेन स्वरूपं स्पष्टयितुं प्रकाशयितुं चिरायते विलंबं करोति परस्तु पुरुषभावनटस्तु तत् विलंबकरणं अनुमंतुं १२

अनुमोदितुं नोत्सहते स्त्री लज्जया स्वेच्छां चिराय प्रकटयति पुरुषस्तु तामुत्सुकतया सद्यः प्रकटयतीत्यर्थः ॥ ८१ ॥ ॥८१॥ ॥८१॥

॥गद्यं॥ बहुनाउक्तेनकिं॥ प० अथचतुराभिः चातुर्ययुक्ताभिः तवगीर्भिः कर्त्रीभिः तव अवाप्तेः विघ्नः मेगंधर्वाणांदंडनभयंशासनभयंउदस्यतेत्याज्य
ते तस्मात् रतिसौख्यभराय रात्रौभीमे भयंकरे तमसि स्थितेसतिनर्तनगेहमध्यं भजस्व अत्ररात्रौ तमसि भीमे भीमसेनेस्थितेसतीत्याकूतं॥६२
नत्रमंडपे नेतव तल्पांतस्यशय्यासमीपस्थलस्यसीमानं उपेयुषः प्राप्तवतः सतः तथैवलीलां क्रीडां तनवानिकुर्यां यथात्वं अंतःपुरिकाजनानांअं

॥गद्यं॥किंबहुना॥ ॥पद्यं॥ गीर्भिस्तवाथचतुराभिरुदस्यतेमे गंधर्वदंडनभयंत्वदवाप्तिविघ्नः तस्मा
द्भजस्वरतिसौख्यभरायरात्रौभीमेस्थितेतमसिनर्तनगेहमध्यं॥ ६२॥ तथैवलीलांतनवानितत्र तल्पांत
सीमानमुपेयुषस्ते भूयोयथांतःपुरिकाजनानांवक्त्रंनपश्येर्नपुनस्पृशेश्च॥ ६२॥ ॥ ॥

तःपुरस्यस्त्रीजनानां वक्त्रंभूयःपुनः नपश्येःपुनर्नस्पृशेश्च ममक्रीडावैदग्ध्यमनुभूयांतःपुरस्त्रीणां तादृशवैदग्ध्याभावात् तच तासां मु
खदर्शनेच्छानैवस्यात् तथातन्मुखचुंबनार्थं स्पर्शेच्छापिनैवस्यादिति प्रकृतार्थः तयालीलांयुद्धक्रीडां कुर्यां यथाक्रीडयातवमरणंसतिपु
नरंतःपुरस्त्रीणामपिवक्त्रदर्शनस्पर्शनेनैव करिष्यसीत्याकूतं॥ ६२॥ ॥६३॥ ॥६३॥ ॥६३॥ ॥६२॥

 ॥गद्यं॥एवंमृगाक्ष्याःद्रौपद्याःवचनमेवमाक्षिकंमधुतस्य क्षौद्रपटलीभूतोमधुमक्षिकावल्मीकसमूहात्मकोकर्णपुटोयस्यसःप्रमोदार्णवस्य
 आनंदसमुद्रस्यजलमानुपायमाणंहृदयंमनोयस्यसःसदनं आसाद्य एत्य समालंभनंसुगंधितैलद्रव्यरसविलेपनंपूर्वंयस्यतेनसलिलाव
गाहेनजलस्नानेनविरजीकृतंनिर्मलीकृतंअंगंयेनसःअयंअंतरिवबहिरपि अवलिप्तःअंतःगर्वितः बहिश्चंदनादिलिप्तश्च ततःपरंभगवति
कमलबंधौ सूर्येनिजननयस्यकर्णस्यप्रजावत्याःभ्रातृजायायाःमनोरथस्यकीचकवधूरूपेच्छायाःसिद्धिंसंपादयितुमिवचरमसिंधौपश्चिमसमुद्रे

॥गद्यं॥एवंमृगाक्ष्यावचनमाक्षिकस्यक्षौद्रपटलीभूतकर्णपुटःप्रमोदार्णवजलमानुषायमाणहृदयःसदनमासाद्यसमारं
भणपूर्वेणसलिलावगाहेन विरजीकृतांगोयमंतरिवबहिरप्यवलिप्तः॥ततःपरंभगवतिनिजतनुजप्रजावतीमनोरथसिद्धिं
संपादयितुमिवकमलबंधौचरमसिंधौनिमग्नेनिरुध्यमानदिविषदध्वांतेध्वांतकदंबेसंभृतसंभोगसंविधानःकीचकोनिर्वर्तितराज
भोजनपरिवेषणकृत्येनपवनसूनुनाप्रविष्टपूर्वंतदेवनर्तनगेहमगाहत॥१०॥प०हसालभंजिकेवासिमानिनिस्तंभपार्श्वगा इत्यसौ
भीमतल्पांतमाससादशनैःशनैः६६ निमग्नेसतिसूर्यास्तेसतीत्यर्थःनिरुध्यमानःदिविषदध्वांतःआकाशमध्यभागोयेनतस्मिन्ध्वांतकदंबेत
मःसमूहेसंभृतंसंपादितंसंभोगसंविधानंतांबूलपदार्थादिसंभोगोपकरणंयेनसःकीचकःनिर्वर्तितंकृतंराजभोजनस्यपरिवेषणकृत्यंयेनतेन पवमानसू
नुनाभीमेनप्रविष्टपूर्वंआदौप्रविष्टंतदेवनर्तनगेहंअगाहतप्राविशत् १५०हेमानिनित्वंसालभंजिकेवपुत्तलिकेवस्तंभपार्श्वगासतीकासि इत्युक्त्वाअसौ-

कीचकः भीमस्य पर्यंतं शय्यासमीपभागं शनैः शनैः आससाद प्राप ॥ ६४ ॥ गद्यं ॥ ततः बल्लवोपि पाचको भीमोपि स्त्रैणस्य स्त्रीकामुकस्य समुचितेन भाव्यतया योग्येन कंठस्वरेण मृदुलं यथा तथा एवं वक्ष्यमाणं जगाद ॥ १० ॥ प० यस्मात् वधूशतं अंतःपुरस्त्रीशतं अनादृत्य मां अपेक्ष्य आगमः आगतोसि तत्त स्मात् अधुना मे मनः त्वां बहिर्गतप्राणं बहिर्मार्गे विद्यमानमद्रूपप्राणं मनुते मन्यते इति प्रकृतार्थः यतः स्वस्त्रीत्यागं कृत्वा मदभिलाषं करोषि ततस्त्वां गतप्रा णं मन्ये इत्याकूतं ॥ ६५ ॥ गद्यं ॥ एवं उक्तवते वृकोदराय भीमाय कीचकः पुनरपि मृदूनि पदानि यस्यां तां वाचं उपदां उपायनं विदधे चक्रे श्लक्ष्णां वाचमु

॥ गद्यं ॥ ततस्तं बल्लवोपि स्त्रैणसमुचितेन कंठस्वरेण मृदुलमेवं जगाद ॥ १० ॥ प० वधूशतमनादृत्य मामपेक्ष्य यदागमः तत्त्वां ब
हिर्गतप्राणं मन्यते मे मनोधुना ॥ ६५ ॥ ग० एवमुक्तवते वृकोदराय कीचकः पुनरपि वाचं मृदुपदामुपायनमाददे ॥ ११ ॥ प० गंध
र्वानपि दयितांस्तृणाय मत्वा मामेवं रतिविधये प्रतीक्षसे यत् देवत्वादपि सुतनु त्वयाधुना भिमर्त्यत्वं जगति महत्तरं प्रकृष्टं ६६
सुराधिकत्वेपि पदे वितीर्णे महं तवास्त्येव हि कृत्यशेषः कुरुष्व मेरोरधिके कुचे मां सुधाधिकं पायय चाधरोष्ठं ॥ ६७ ॥ ॥

वाचेत्यर्थः ११ प० हे सुतनु दयितान् पतीन् गंधर्वानपि तृणाय मत्वा तृणसदृशान् तुच्छान् मत्वा यत् यतः रतिविधये रतिविधानार्थं एवं एकांते रात्रौ नमसि स्थितम् मां प्रतीक्षसे तत् तस्मात् अधुना देवत्वादपि मे मर्त्यत्वं मनुष्यत्वं जगति महत्तरं अतिशयेन श्रेष्ठं प्रकृष्टं हि कृतमेव ६६ त्वया महं सुराधिकत्वे पदे वितीर्णे दत्तेपि तव कृत्यशे षः कर्तव्यशेषः अस्त्येव हि प्रसिद्धं कृत्यशेषमेवाह मेरोः विपुलतया सुवर्णतया च अधिके कुचे मां कुरु सुधाधिकं अधरोष्ठं पायय प्राशय च महापदस्थाने तदनुरूपाः पदार्थाद्या इति भावः ६७

प०स:भीम:इत्थंससांत्ववचनोदयंसांत्ववचनाविर्भावसहितंयथातथा अर्धमंचंमंचकस्यार्धआरोढुंआनमितापूर्वंतनुःकटेरूर्ध्वशरीरंयेनतस्यशत्रोःकीचकस्य
निटिलसीम्निभालदेशे धात्राब्रम्हणादत्तांआयुषःलिपिंअक्षरविन्यासंशिथिलयन्निवशिथिलांकुर्वन्निवमुष्ट्या आहतिंप्रहारंचकार ६८ गंभीरंधैर्ययुक्तंचेतोय
स्यस्रःकीचकोपिगंधर्वबुध्या एनंप्रतिहंतुंसद्यःतदानीमेव भवित्र्याःशवतायाःप्रेततायाःदशायाःअवस्थायाःसाधारणीमेवतुल्यामेवमुष्टिंबबंधचकार इदा
नींप्रहारार्थयामुष्टिर्बध्यासैवमरणदशायांस्थास्यतीतिभावः ६९ तौभीमकीचकौनिशिनियुद्धकेलिंनिर्मिमातेनिर्मितवंतौ कीदृशौतौ परस्परंप्रतिजवंवेगंभ

इत्थंससांत्ववचनोदयमर्धमंचमारोढुमानमितपूर्वतनोःसभीमः मुष्ट्याहतिंनिटिलसीम्निचकारशत्रोरायुर्लिपिंशिथिलयन्निवधातृ
दत्तां ६८ गंभीरचेताःसचकीचकोपिगंधर्वबुध्याप्रतिहंतुमेनं सद्योभविन्याःशवतादशायाःसाधारणीमेवबबंधमुष्टिं॥६९॥जवं
भजंतौजयतर्षवंतौरुषंवहंतौरुधिरंकिरंतौ परस्परंतौपटुशब्ददंतौनियुद्धकेलिंनिशिनिर्मिमाते॥७०॥अक्ष्वेलितारावम-
वीरवादमवीक्षकश्लाघनबाहुगुंफं अनुच्चनिश्वासमहुंक्रियाकमभूतपूर्वंतदभून्नियुद्धं॥७१॥ जंतौजयस्यतर्षःतृष्णासा

स्तियमोस्तौरुषंरोषंवहंतौरुधिरंकिरंतौवर्षंतौपटुशब्दाःव्यक्तशब्दाःदंताःययोस्तौ ७० तत्नियुद्धंबाहुयुद्धंअभूतपूर्वंपूर्वंनभूतंएतादृशंअभूत्जातंअपूर्वत्व
मेवाह नविद्यतेक्ष्वेलितारावःसिंहनादोयस्मिन्तत् नविद्यतेवीरवादःपतुरस्त्वंकइत्यादिवीरवादोयस्मिन् नविद्यतेवीक्षकाणांयुद्धचमत्कारद्रष्टॄणांश्लाघन
बाहुगुंफःस्तुतिरचनायस्मिन्तत् नविद्यतेउच्चनिश्वासोयस्मिन्तत् नविद्यतेहुंक्रियाप्रहारसमयेहुंकारोयस्मिन्तत्युद्धशब्दश्रवणेनलोकमेलनभयात्निःशब्दंयुद्धंकृ
तमितिभावः ७१॥ १२

चित्तजचापं मदनधनुः पुष्पं तज्जुष्टं सेवितं यैस्तैः शिलीमुखैः बाणैः भ्रमरैश्च दत्तानि रंध्राणि क्षतानि च निजांगे दधत् समीरजातेन भीमेन वायुसमुद्भू-
तेन विधूनितोपि सः कीचकः सूतपुत्रः वेणुविशेषश्च किंचिदपि नैव चुकूज नैव शब्दं कृतवान् अत्र प्रकृताप्रकृतश्लेषालंकारः अत्रापि कूजनाभावे लोकमे-
लनभयं कारणं ।।७२।। बकवैरिणः भीमस्य मुष्ट्याहते ताडिते तस्मिन् कीचके पतिते सति तेन रंगेण नृत्यमंडपेन चलंत्यः पताकाः यस्मिन् कर्मणि यथा भव-
ति तथा सम कंपि कंपितं रंगमुत्प्रेक्षते उत्तराद्यैः कन्याजनैः पार्थात् अर्जुनात् चिरेण बहुकालं परिशीलितं अभ्यस्तं नाट्यं नृत्यं अभिविडंबयतेव अनुक-

शिलीमुखैर्वेष्चित्तजचापजुष्टैर्दत्तानि रंध्राणि दधत्स निजांगे समीरजातेन विधूनितोपि स कीचको नैव चुकूज किंचित् ७२
तस्मिन्हते निपतिते बकवैरिमुष्ट्या रंगेण तेन समकंपि चलत्पताकं पार्थाच्चिरेण परिशीलितमुत्तराद्यैः कन्याजनैरभिविडंबयतेव ना
ट्यं ७३ ग० तत्र मंडपे पिंडतया कृतं तस्य दस्योस्तरसं तरसा विलोक्य प्रहर्षवत्या पार्षत्या श्लाघापूर्वमाघ्रातभुजः कुरुव्याघ्रो निर्गत्य यथा
पुरमविकृतमानसो महानसोदरं प्रविश्य सुखेनाधिशिश्ये १२
रणं कुर्वतेव ७३ ग० तदनु तस्मिन् मंडपे पिंडतया कृतं पिंडीकृतं तस्य दस्योः शत्रोः तरसं मांसं
तरसा वेगेन विलोक्य हर्षवत्या पार्षत्या द्रौपद्या श्लाघापूर्वं यथा तथा आघ्रातः भुजो यस्य सः कुरुव्याघ्रः कुरुश्रेष्ठः भीमः अत्र व्याघ्रपदेन क्रूरकर्मकारित्वं व्यज्यते
निर्गत्य मंडपाद्बहिरागत्य यथापुरं यथापूर्वं अविकृतं रोषभयादिरहितं मानसं यस्य तथाभूतः सन् महानसोदरं पाकशालामध्यं प्रविश्य सुखेन अधिशिश्ये निद्रां चकार १२

प॰मालिन्यपिसैरंध्र्यपितत्रमंडपेशत्रुंकीचकंनिपात्यपातयित्वाभीत्येवभयेनेवचलः अग्रपाणिःकराग्रंयस्यास्तथासतीचक्रंद आर्तस्वरंचकार ततआ
क्रंदनंनिशाम्यश्रुत्वाकिंकिमिति ब्रुवाणाःवदंतःसर्वेपितस्यकीचकस्य अवरजाःकनिष्ठबंधवःसमीयुःसंघीबभूवुः७४ आत्तशोकाः स्वीकृतशोकाः
अमीउपकीचकाःमृत्युरेवद्विपःगजःतस्यपिधानंपिंडमिवआच्छन्नभक्ष्यपिंडमिवतंभ्रातरंकीचकंविलोक्यज्यायानिवज्येष्ठभ्रातेवतांस्थलींमंडप

प॰निपात्यमालिन्यपितत्रशत्रुंचक्रंदभीत्येवचलाग्रपाणिः निशाम्यतत्किंकिमितिब्रुवाणाःसर्वेपितस्यावरजाःसमेयुः७४
विलोक्यतंभ्रातरमात्तशोकामृत्युद्विपस्येवपिधानपिंडं ज्यायानिवामीविदधुःस्थलींतामस्त्रेणगुल्फद्वयसींनिजेन७५ग॰
ततस्तेसोदरविपत्तिनिमित्तमियमेवेतिरोषरूषितंचेतसोनिवेशितशवपिंडभरस्यमूर्तेर्भीममुष्टिभिरिव नारिकेलफले
रुपबध्यमानस्यचरमविमानस्यस्तंभदारुणिसंदानितांकौंतेयसीमंतिनींतिमिरमुदिरसौदामिनीभिःकरदीपिकाभिःदी
यमानचंक्रमावकाशेनपितृवनमुपनीयंस्वकीयविवेकसंपत्त्यासहन्वित्यामत्याक्षुः॥१२॥ मध्यस्थलींनिजेन अस्त्रेणनेत्राश्रुणारक्ते

नचगुल्फद्वयसींगुल्फप्रमाणांविदधुःचक्रुः यथाभ्रातुःरक्तंगुल्फप्रमाणंपतितं तथोपकीचकानांदुःखेनाश्रुपतितमितिभावः॥७५॥ग॰ततःतेउ
पकीचकाःसोदरविपत्तेःभ्रातृमरणस्यनिमित्तंकारणंइयमेवइतिरुषारोषेणरूषितंकलुषितंचेतोयेषांतेतथाभूताःसंतःनिवेशितःस्थापितःश १५
वपिंडभारोयस्मिन्तस्यमूर्तेःभीमस्यमुष्टिभिरिव नारिकेलफलैःउपबध्यमानस्यग्रथ्यमानस्यचरमविमानस्यश्मशानंप्रतिशवनयनार्थंस्थास्यवि

मानस्य पार्श्वस्तंभदारुणिसंदानितां बत्वा कौंतेयसीमंतिनीं द्रौपदीं विपिनाम्येव नभांस्येव मुदिराः मेघाः तेषां सौदामिनीभिः विद्युद्भिः दर्शनप्रका शाभिरित्यर्थः करदीपिकाभिः दीयमानः चंक्रमावकाशोगमनावसरो यस्मिन् तेन पथा मार्गेण पितृवनं श्मशानं उपनीय स्वकीयपापविवेकसंपत्याक र्तव्याकर्तव्यविचारसंपत्या सहचितां शवदाहार्थं कृतकाष्ठरचनायां अत्याक्षुः चिक्षिपुः द्रौपद्या सह कीचकदाहार्थं चितां विमानं निक्षिप्तुरित्यर्थः ॥१३॥

॥ गद्यं ॥ तावदेषा चकितचकित ह्यनाथजगत्प्राणभूतविपत्समयबंधो संप्रतिकांतां रसवतीं परिगृह्य मु ग्धामिमां कथं न गणयसीत्युच्चैररोदीत् ॥ १४ ॥ ॥ ॥ ॥ ॥ ॥

॥ गद्यं ॥ यावत् शवेन सह बध्वा नीयते तावत् चकिताच्चकिता अतिभीता एषा द्रौपदी ह्यनाथ जगति प्राणभूत मत्प्राणस्वरूप अथवा जगत्प्राण भूतवायुजात भीम विपत्समये बंधो रक्षक संप्रति कांतां मनोहरां रसवतीं पाकशालां शृंगारादिरसयुक्तां कांतां भार्यां च रसवत्यां तु पाकस्थान महानसे इत्यमरः परिगृह्य मुग्धां अज्ञां इमां मद्रूपां कथं न गणयसि इत्युक्त्वा उच्चैः अरोदीत् ॥ १४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

अथतत्रनगरेअस्याःद्रौपद्याःरुदितस्वनैःजवात् आकारितःआहूतःमारुतिःभीमःसक्थ्नोःऊर्वोःवायुबलात् गमनवेगजन्यवायुसामर्थ्यात् अल्प
नमहसां ज्वलत्काष्ठतेजसांईषल्लभानिलब्धुं शक्यानि यानिउन्मीलनानितैःकृतागारूडभित्तिभंगस्य हरिन्मणिभित्तिरचनायाःपिशुनेसूचकेतत्स
दृशेइत्यर्थः ध्वांतेपिद्विषांशत्रूणांउपकीचकानांओघंसमूहंज्येष्ठस्यभ्रातुःकीचकस्यअध्वनि यमनगराध्वनि धावितुंशीघ्रगत्याभ्रातृसंगंविधातुंदो
र्दर्पएव बाहुबलमेवसित्थांजनानितैःदिव्यादृष्टिर्यस्यतथाभूतमकरोत् भीमस्तानपि सर्वान् जघानेतिभावः॥७६॥ सःवीरःभीमःअरण्यतलेउत्पात

पद्यं॥ तत्रास्यारुदितस्वनैरथजवादाकारितोमारुतिःसक्थ्नोर्वातबलादलातमहसांमीषल्लभोन्मीलनैः ध्वांतेगारुडभि
त्तिभंगिपिशुनेप्योघंद्विषांधावितुंज्येष्ठस्याध्वनिदिव्यदृष्टिमकरोद्दोर्दर्पसित्थांजनैः ७६ निपातितान्स्वेननिरीक्ष्यतत्रसूतान्
सवीरःसुमनायतेस्म उत्पातमुद्रांदधतास्वपित्रातरून्निवारण्यतलेविरुग्णात्॥७७॥ गंधर्वभीरुषुजनेष्वितरेषुतत्रविष्वक्प
लायनपरेषुविमुक्तबंधा कृष्णाचकीचकरिपुश्चकृतप्रशंसावन्योन्यमभ्यगमतांनगरंपुनस्तौ॥७८॥

मुद्रांउत्पातस्वरूपंदधता
स्वपित्रा वायुना विरुग्णान् भग्नान्तालानिव तालवृक्षानिव तत्रश्मशाने स्वेनआत्मनानिपातितान् सूतान् उपकीचकान् निरीक्ष्यसुमनायतेस्म
स्वस्थचित्तोबभूव॥७७॥ तत्रश्मशानेगंधर्वेभ्यःभीरुषुइतरेषुजनेषुविष्वक् आसमंतात्पलायनपरेषुसत्सुविमुक्तःबंधोयस्याःसाकृष्णाद्रौप
दीकीचकरिपुःभीमश्चतौअन्योन्यंपरस्परंकृतप्रशंसौसंतौपुनःनगरसमीपनगरमभिमुखंअगमतांगतवंतौ॥७८॥ ॥६॥ ॥६

ग० ततः क्षणादेव संध्याया: अरुणिम्ना रागेण कृत्वा करबितन आवृतेन अंबरमणिबिंबेन परिचुंब्यमाने पुंके शंबायुधस्य इंद्रस्य हरिदंगणे पूर्वदि
ग्भागे परितः सर्वतः रुधिराणां वीचीः मुंचति यस्तेन पिशितपिंडेन मांसपिंडेन कृतानुषंगं कृतसंबंधं रंगं विडंबयति अनुकुर्वति सूर्योदये सतीत्यर्थः सु
चा शोकेन निरस्ताः त्यक्ताः मौलय उष्णीषादयो यैस्तैः निर्गलितवाग्भिः भाषणरहितैः निष्पंदतनुभिः अचंचलदेहैः निखिलैः संपूर्णैरपि पौरैः पुरवासिज
नैः नृपतेः निलयद्वारं गृहद्वारं निबिडितं सांद्रं अभूत् रात्रौ जातं गंधर्वकृतकीचकवधादिवृत्तांतं श्रुत्वा कथं जातमिति द्रष्टुं भयेन सर्वे जना राजद्वारि मिलिता इ

त्यर्थः ॥ ततः क्षणादेव संध्यारुणिमकरंबितेनांबरमणिबिंबेन परिचुंब्यमाने शंबायुधहरिदंगणे परितो रुधिरवीचिमुचापि पिशितपिं
डेन कृतानुषंगं रंगं विडंबयति सति शुचा निरस्तमौलिभिर्निर्गलितवाग्भिर्निष्पंदतनुभिर्निखिलैरपि पौरैर्नृपतिनिलयद्वारं निबिडित
मभूत् ॥ ७८ ॥ प० वध्वस्तदा मंडलशो निविष्टा रुंधद्भिराशा रुरुदुर्विलापैः महत्सु दुःखेष्वपि जृंभितेषु मालिन्युपालंभनमस्पृशद्भिः ॥ ७९ ॥
तस्मिन्दिने सन्निधिमागता सा कृष्णा तु शंके कयराजपुत्र्याः मषीशलाकार्पणया विनापि मंदेतरामश्रुकणैरकार्षीत् ॥ ८० ॥

तिभावः ॥ ७८ ॥ प० ततः मंडलशः मंडलाकारेण निविष्टाः निषण्णाः वध्वः कीचकानां भार्याः आशाः दिशः रुंधद्भिः रुंधानैः महत्सु दुःखेषु जृंभितेषु वृद्धिं गतेष्वपि मा-
लिन्याः सैरंध्र्याः उपालंभनं निंदां अस्पृशद्भिः दुर्विलापैः सह रुरुदुः ॥ ७९ ॥ तस्मिन्दिने सन्निधिं आगता सा कृष्णा द्रौपदी केकयराजपुत्र्याः सुदेष्णायाः दृशं मषीश
लाकायाः कज्जलरसशलाकायाः अर्पणया समर्पणेन विनापि अश्रुकणैः अश्रुबिंदुभिः मंदेतरां समृद्धं अकार्षीत् प्रतिदिनं सुदेष्णायाः दृगश्रुबिंदूनां कज्जल

भा॰
१०

टी॰स॰
६

शलाकार्पणं कारणं तस्मिन्दिने कीचकवधनिमित्तं सैरंध्री दर्शनं कारणं जज्ञे इति भावः॥ ८०॥ तावत्ते युधिष्ठिरमुखा अपि करणीयार्थस्य सिद्ध्यर्थं
अमुकस्थाने अमुककाले त्वया आगंतव्यं मया चागम्यते इत्यादिभाषणेन कृतः स्थानादिनियमः संकेतः स एव शैलः तं अधिरुह्य निशश्वसुः द्रौपदी
विपत्तिदर्शनजन्यदुःखेन निश्वासं तत्यजुः कीदृशं संकेतशैलं वातजातेन भीमेन व्याधूतं हतं यत् कीचककुलं तेन आकुलः व्याप्तः कोटिभागः अग्र
भागो यस्य तं वातजातेन वातसमूहेन व्याधूतं भग्नं यत्कीचककुलं वेणुवृंदं तेन आकुलः कोटिभागः उपरितनभागो यस्य तं निर्यती दुःखात् निर्गच्छं

तावद्युधिष्ठिरमुखा अपि वातजातव्याधूतकीचककुलाकुलकोटिभागं निर्यत्प्रियानयनवारिझरीपरीतं संके
तशैलमधिरुह्य निशश्वसुस्ते ॥ ८१॥ तदनु विदितवार्तो धार्तराष्ट्रश्चरेभ्यः शुभगुणचरितेभ्यः सूतजानां शत
स्य वसतिमरिजनानां मात्स्यभूपालपुर्यां हृदयमुकुरलग्नैर्हेतुभिर्निश्चिकाय ॥ ८२॥ ॥ ॥

ती प्रियायाः द्रौपद्याः नयनवारिझरी तया परीतं युक्तं शैलोपि वारिझरीपरीतो भवति ॥ ८१॥ तदनु शुभाः गुणाः सत्यभाषणादयः चरितानि अव्य
भिचरितकर्माणि च येषां तेभ्यः चरेभ्यः चारेभ्यः सकाशात् सूतजानां शतस्य विदिता वार्ता वधादिवृत्तांतो येन सः धार्तराष्ट्रः दुर्योधनः मात्स्यभूपालपुर्यां १०
विराटनगरे अरिजनानां पांडवानां वसतिं हृदयमुकुरलग्नैः चित्तात्मकादर्शप्रतिबिंबितैः हेतुभिः कीचकवधदर्शनसमूहादिभिः कारणैः निश्चिकाय निश्चयं कृतवान्
८२

अन्येद्युः पार्श्वभवणात् द्वितीयदिने कुरूणां अधिपः दुर्योधनः अंगेश्वरसौबलिभ्यां कर्णशकुनिभ्यां सह गोष्ठीं सभां आस्थाय अधिष्ठाय भीष्मादि-
कान् भीष्मप्रमुखान् बंधुजनान् आप्तजनान् विलोक्य गंभीरं यथा तथा एवं वक्ष्यमाणां गिरं बभाषे ॥१५॥ ग० भोभो भवतामपि इदं वक्ष्यमाणं विदितं किं
ज्ञातं खलु मात्स्यपुरे विराटनगरे कामपि कामिनीं कामयमानः इच्छन् कीचकः निशि रात्रौ तस्याः कामिन्याः पतिभिः अदृश्यैः पंचभिर्गंधर्वैः अनुरहसि
एकांते स्वेषां संख्यापदस्य पंचत्वस्य अभिधेयतां मरणरूपार्थतां अनीयत नीतः हत इत्यर्थः ॥१६॥ पुनरपि तस्यै कामिन्यै द्रुह्यंतः तदनुजाः कीचक

अन्येद्युरंगेश्वरसौबलिभ्यामास्थाय गोष्ठीमधिपः कुरूणां भीष्मादिमान्बंधुजनान्विलोक्य गंभीरमेवं गिरमाबभाषे १५
ग० भोभो विदितं किं भवतामपीदं संप्रति खलु मात्स्यपुरे कामपि कामिनीं कामयमानः कीचको निशि तस्याः पतिभिरदृश्यैः पंचभिर्गं
धर्वैरनुरहसि स्वसंख्यापदाभिधेयतामनीयत १६ तस्यै पुनरपि द्रुह्यंतस्तदनुजा अपि तथैवेति काचिदियं किंवदंती कर्णात्कर्णमधि
रोहति १७ एवं चेदसंशयं सा चतुष्पथमंडपिकास्तंभसालभंजिकेव सर्वकरावमर्शभाजनं पांचालसुता १८ कनिष्ठबंधवोपि तथै

व अदृश्यतयैव तैर्हताः इति काचिदियं किंवदंती जनवार्ता कर्णात्कर्णमधिरोहति आगच्छति केनचित् कस्यचित्कर्णे उक्तं तेन अन्यस्येति प्रकारेण
मत्कर्णं प्राप्तेत्यर्थः ॥१७॥ एवं चेत् इत्थमस्ति चेत्तर्हि असंशयं सा कामिनी चतुष्पथमंडपस्तंभसंबंधिनी सालभंजिकेव सर्वकरावमर्शस्य सर्वेषां करस्पर्शस्य भा
जनं पात्रं पांचालदुहिता द्रौपदी यथा चतुष्पथमंडपस्थसालभंजिकायाः सर्वैः करस्पर्शः क्रियते तथास्या अपीत्यर्थः एवं च इयं सर्वजनसाधारणेति भावः ॥१८॥ ॥

नेपांडवाअपिपुनः अज्ञातवासिनः परेतपतिः यमः पवमानः वायुश्च पाकशासनः इंद्रश्च अश्विनो अश्विनीकुमारौचतेषांपारस्त्रैणेयाः परस्त्रियांभवाः पुत्राः तस्याः पतिविडंबकाः पतित्वानुकरणशालिनः तेषु पंचस्वपिद्वितीयेनैव बाहुशालिनाबलीयसावधूद्रुहांनिहंत्राकीचकानांवधकारिणाभवितव्यं १९ अहो इत्याश्चर्ये सर्वत्रसर्वस्थलेषुविशृंखलं अप्रतिबंधं अमीषांपारस्त्रैणेयानांदौःशील्यम् दुःस्वभावत्वं २०॥ तथाहिदौःशील्यंसमर्थयति।।प॰देशेज रासंधमुखैः व्यरुंधन् विरोधंचक्रुः वनेपिकिर्मीरहिडिंबौमुख्यौयेषुतैः जटासुरादिभिः व्यरुधन् गूढेनिवासे अज्ञातवासेपिसूतपुत्रैः कीचकैः व्यरुंधन्

तेपिपुनरज्ञातवासिनःपरेतपतिपवमानपाकशासनाश्विनांपारस्त्रैणेयास्तस्याःपतिविडंबकाःतेष्वपिद्वितीयेनैवबाहुशालिना वधूद्रुहांनिहंत्राभवितव्यं १९ अहोसर्वत्रविशृंखलममीषांदौःशील्यं॥२०॥ तथाहि।।प॰देशेजरासंधमुखैर्व्यरुंधन्वनेपिकिर्मीरहिडिंबमुख्यैः गूढनिवासेपिचसूतपुत्रैः क्वनुस्थितास्तेकलहंविनान्यैः ८४ ग॰ अत्रैवस्थित्वावेषांतरकंचुकैरकिंचनैरेतैर्वंचितः खलुवृद्धोविराट इत्यभिधायसुयोधनोराधेयेनसहकृतहस्ततालोवल्गद्भुजशिखरमुच्चैर्जहास॥२१॥ तस्मात्तेकलहंविना

क्वनुस्थिताः सर्वत्रकलहेनैवस्थिताइतिभावः॥८४॥ ग॰ अत्रैवविराटनगरे एवस्थित्वावेषांतरं कंचुकं आच्छादकंयेषांतैः अकिंचनैः दरिद्रैः एतैः पांडवैः वंचितः खलुवृद्धेनविराटः इत्यभिधायसुयोधनः राधेयेनकर्णेनसहकृतः हस्ततालः तद्धस्तोपरिस्वहस्तताडनंयेनतथाभूतःसन् वल्गंती चलंती भुजशिखरे स्कंधौयस्मिन्कर्मणियथाभवतितथा उच्चैःजहास अन्योपि अतिहर्षेसतिस्वमित्रेणहस्ततालंकरोति॥२१॥ ।।६।।

ततः तस्मात् ॥ पद्यं ॥ मत्स्यनृपतेः नगरस्य विराटनगरस्य संक्षोभे लुंठनादिना उपसर्गे सति स्वयं आत्मनैव योद्धुं निर्गतान् तान् पांडवान् दृष्ट्वा अवकीर्णि
नः अज्ञातवासव्रतात् भ्रष्टान् वितनुमः कुर्मः अधुना अद्यैव त्वं पुरः आदौ गच्छ विराटनगरमिति शेषः इति कुरु भूभुजा दुर्योधनेन सदसि उक्तः त्रिगर्तानां
ईश्वरः सुशर्मा गाः धेनुवृषभादीन् हर्तुं तस्य विराटस्य पुरीमवाप कः कामिव यथा दिनावधिः सूर्यास्तमयः अर्यम्णः सूर्यस्य गाः किरणान् हर्तुं प्रतीचीं दिशं

॥ ततः ॥ पद्यं ॥ संक्षोभे नगरस्य मत्स्यनृपतेर्योद्धुं स्वयं निर्गतान् दृष्ट्वा तानवकीर्णिनो वितनुमो गच्छाधुना त्वं पुरः इत्युक्तः कुरुभू
भुजा सदसि गा हर्तुं त्रिगर्तेश्वरस्तस्यैवाप पुरीं दिनावधिरिवार्यम्णः प्रतीचीं दिशं ॥ ८५ ॥ ग० तत्र दक्षिणेन पुरं व्यग्रतरसैन्येन काल्य
मानं क्वचिदरुणनयानिमग्नजमदग्निकुमारोष्णनिश्वासवेगविलुलितवीचीप्रपंचमिव स्यमंतकपंचकं क्वचिन्नीलतया मंदकंडूलवेतंड
शुंडाविधूनितविटपमालमिव सालवनं क्वचित्स्ववल्लतया मंदरगिरिमंथनपरिक्षोभितफेनकूटमिव क्षीरोदमध्यमुन्नमितलांगूलमुद्गू
मितहुंकारमुल्लसितधूलीकमुद्दामघंटारवं गोधनं निशाम्य सेनाकुंभिकुलगंभीरबृंहितारंभैर्मंदिराग्रसिंहप्रतिच्छंदवृंदमुखकंदरमौ
ननियमं विभिंदन्ननुकूलपवमानपुरोनाटितपटैर्वैरिभटजीवितहरणायेवेवस्वतमिवाह्वयद्भिः केतनदंडैः परिमोटितगगनतटिनी
तटविटपिवाटो विराटो परिणप्रयाणारंभटीमटीकत ॥ २२ ॥
अवापत ह्रत् अनयोपमया सूर्यास्तमये प्राप्त इति गम्यते ॥ ८५ ॥ गद्यं ॥ तत्र अस्त
मये परे दक्षिणेन पुरस्य दक्षिणादिग्भागे व्यग्रतरं गोग्रहणे त्वरमाणं सैन्यं यस्य तेन सुशर्मणा काल्यमानं रुध्वा बलान्नीयमानं गोधनं गोसमुदायं निश

॥
श्रुताविराटोपरणप्रयाणस्ययुद्धविषयेगमनस्य आरभटींउद्योगं अटीकनचकारेत्यर्थः कथंभूतंगोधनं क्वचित्कस्मिंश्चिद्भागेअरुणतयाधेनूनांलोहिततयाभिम
ग्नःरुधिरह्रदेस्नानार्थंमग्नःयःजमदग्निकुमारःपरशुरामःतस्यउष्णनिश्वासस्यवेगेनलुलितःइतस्ततःप्रसृतःवीचीप्रपंचःऊर्मीसमुदायोयस्यतत्स्यमंतकंपंच
कमिव क्षत्रियरुधिरकृतह्रदपंचकतीर्थमिव क्वचिद्भागेनीलतया धेनूनांकृष्णतयामदेन कंडूलाः कंडूविशिष्टाः येवेतंडाःगजाः तैःशुंडाभिः
विधूनिताकंपिता विटपमाला शाखासमूहोयस्यतत् सालवनमिव तमालादिवृक्षवनमिव क्वचिद्भागेधवलतया धेनूनां शुभ्रतया मंदरगिरेः
प्रमथनेनपरिक्षोभितः इतस्ततःपतितःफेनकूटःफेनसमूहोयस्यतत् क्षीरोदस्य क्षीरसमुद्रस्य मध्यमिव उन्नमितं ऊर्ध्वीकृतं लांगूलंयेनतत्
उद्भमितः आविष्कृतःहुंकारोयेनतत् उल्लसिताःखुरैःउत्क्षिप्ता धूलीयेनतत् उद्दामाः महांतः घंटारवाःयस्मिन्तत् कथंभूतोविराटः सेनायाः
कुंभिकुलस्य गजसमूहस्य गंभीराःयेबृंहितारवाः हस्तिजातिशब्दाःतैःकृत्वा मंदिराग्रेषु नगरगृहाग्रेषु सिंहप्रतिच्छंदानांसिंहप्रतिमानांवृंद
स्यमुखकंदराणां मुखबिलानां मौननियमं विभिंदन् समापयन् अनुकूलःउत्तरदिग्भागात् पृष्ठतोवहमानःयःपवमानः वायुःतेनपुरःअग्र
भागेदक्षिणादिगभिमुखं नाटिताःचालिताःपटाःयेषुतैः अतएववैरिभटानांजीवितहरणाय वैवस्वतंयमं आव्हयद्भिरिव आव्हानाभिनये
न आकारयद्भिरिव केतनदंडैःध्वजदंडैःकृत्वापरिमोटितःभंजितः गगनतटिन्याः आकाशगंगायाः तटविटपिवाटःतीर वृक्षसमुदायोये
नसः॥ २२॥ ॥ ॥श्रीकृष्ण॥ ॥ ॥राधाकृष्ण॥ ॥ ॥गोपालकृ॰
॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

संख्याय युद्धाय यानेषु वाहनेषु समारुरुक्षाकेलीं समीचीनां आरोढुमिच्छयाक्रीडांस्पृशंतिस्वीकुर्वंति येषां कीचकस्य बांधवानां कुलजानां अश्वप्र-
संगेपि अयंगंधर्वःसमीचीनःअयंनीलोगंधर्वोधवलंगंधर्वं आरोक्ष्यामीत्याद्यश्वोद्देशेनाप्यभिधीयमानःकेनचिदुच्चार्यमाणःगंधर्वशब्दःगरलायते-
स्म विषवद्बभूव यथाविषभक्षणं शरीरदाहादिकरोतितद्वच्छब्दाकर्णनं मनसस्तापाद्यकरोदितिभावः॥८६॥धीरःसःविराटःसभ्यैःसभासदैःसूदैःब
न्दिवैश्चतुरंगिभिःअश्वारोहैश्चपौरैःगोपालैश्चविज्ञापितःराज्ञोनिवेदितःवीर्यभूमाशौर्यबाहुल्यं येषांतान् धर्मभीमनकुलसहदेवान्पुरोधायअग्रतः

॥पद्यं॥संख्याययानेषुसमारुरुक्षाकेलिस्पृशांकीचकबांधवानां अश्वप्रसंगेप्यभिधीयमानोगंधर्वशब्दोगरलायतेस्म॥८६
सभ्यैश्चसूदैश्चतुरंगिभिश्चपौरैश्चविज्ञापितवीर्यभूम्नः दंतानिवेंद्रद्विरदःसपार्थान्धीरःपुरोधायरुरोधशत्रुं॥८७ तृणकल्प
मपित्रिगर्तभूपंतमुपेक्ष्यैवतदागवांकुलानि सहदेवविलोकमात्रहर्षात्सहसामात्स्यचमूसमीपमापुः॥८८॥

कृत्वा शत्रुं रुरोध कःकानिव यथाइंद्रद्विरदःऐरावतःदंतान्चतुरो दशनान्पुरोधाय शत्रुंरुणद्धितद्वत्॥८७॥ तदायुद्धारंभेगवांकुलानितृण
कल्पमपितृणतुल्यमपितंत्रिगर्तभूपं सुशर्माणंउपेक्ष्यैव सहदेवस्यविलोकनमात्रेणदर्शनमात्रेण योहर्षःतस्मात् सहसा बलेनमात्स्यपुरीस-
मीपंविराटपुरसमीपं आपुःअन्योपिस्वभक्ष्यं उपेक्ष्यैवेष्टंप्रतिगच्छति॥८८॥ ॥५॥ ॥५॥ ॥५॥

अथमौर्व्याःगुणाएवकुशाःतैःअंकिताःयुक्ताःकराःययोस्तौबत्थेपंक्तीयाभ्यांतौमत्स्यत्रिगर्ताधिपयोःविराटसुशर्मणोःअनीकौसेने आ
ध्माताःमुखवायुभिःपूरिताःयेशंखाःतेषांनिनदःशब्दएवप्रणवःॐकारःप्रधानःअग्रसरोयस्मिन्तत् आयोधनंयुद्धमेवअध्ययनं वेदाध्यय
नंआरभेतांआरंभंचक्रतुःयथाकुशपाणयोब्राह्मणाःअभिमुखपंक्तीभ्यांस्थित्वाॐकारोच्चारणपूर्वकंवेदंपठंतितद्वत् व्याहस्ताभटाःशंख

मौर्वीकुशांकितकरावथबत्थपंक्तीमात्स्यत्रिगर्तवसुधाधिपयोरनीके आध्मातशंखनिनदप्रणवप्रधा
नमायोधनाध्ययनमद्भुतमारभेतां॥८९॥ मत्स्येंद्रमंदिरमहानसभक्ष्यवृंदस्वच्छंदभक्षणरहस्यवदा
वदेन क्ष्वेडारवेणवललस्यतदारिपूणांचित्तंनकेवलमकंपिदिशोदशापि॥९०॥ ॥ ॥

शब्दपूर्वमुत्थारंभंचक्रुरित्यर्थः॥८९॥मत्स्येंद्रमंदिरस्यविराटगृहस्ययत्महानसंपाकशालातत्संबंधिनःभक्ष्यवृंदस्यलड्डुकशष्कुल्यादिसमूहस्ययत्
भक्षणंतस्यरहस्यस्यवदावदेनवक्त्रावललस्यबल्लवस्यभीमस्यक्ष्वेडारवेणसिंहनादेननदायुद्धारंभेकेवलंरिपूणांचित्तंनअकंपिनकंपितंअपितुदश-
दिशोपिकंपिताःएतादृशोमहान्कठोरोबल्लवस्यसिंहनादस्तस्माद्विराटगृहेघृतशर्करायुक्तभक्ष्यवृंदभक्षणेनबलाढ्योसीतिज्ञायतेइतिभावः॥९०॥ ॥ २०

समरस्यउद्ये प्रारंभे उभयेषांसैनिकानां असिधेनवः छुरिकाः निखिलं संपूर्णं निजनामपदस्य असिधेनुइति शब्दस्य यत् अपरार्धं धेनुइति उत्त-
रार्धं तस्यवाच्यं गोधनरूपार्थं ग्राहयितुं अपहारयितुं रक्षितुंच ववल्गुः चंचलाबभूवुः समरार्मणः सैनिकानां असिधेनवोनिखिलधेनूरपहारयितुं
विसटस्यसैनिकानांताः रक्षितुमित्यर्थः ॥ ९१ ॥ यावत् युद्धप्रारंभोभवति तावत् अहरधीश्वरस्य सूर्यस्य तुरंगः अंबरपथात् आकाशमार्गा-

उद्येसमरस्यसैनिकानामुभयेषामसिधेनवोववल्गुः निजनामपदापरार्धवाच्यंनिखिलंग्राहयितुंच
रक्षितुंच ॥ ९१ ॥ तावदंबरपथादभिगंतुस्तामनीकधरणींशमनस्य कासरादहरधीशतुरगः कांदिशीकइव
दूरमयासीत् ९२ पाटलीकृतपयोधरपंक्तिःप्रादुरासशनकैरथसंध्या वासरस्यरजनेरपिसीमामध्यभागकुरुविंदशिलेव ९३

त् तां अनीकसरणिं युद्धमार्गं अभिगंतुः आगंतुः शमनस्य यमस्य कासरात् महिषात् कांदिशीकइव भयेन पलायितइव दूरं अयासीत् अग-
मत् युद्धारंभेसूर्यास्तमयोबभूवेतिभावः ॥ ९२ ॥ अथसूर्यास्तानंतरं शनकैः पाटलीकृता रक्तीकृता पयोधरपंक्तिः यस्याः सा संध्यावासरस्यदिव-
सस्यरजनेश्च सीमामध्यभागे कुरुविंदशिलेव माणिक्यशिलेव प्रादुरासप्रादुर्बभूव ॥ ९३ ॥ ॥ ७ ॥ ॥ ७ ॥

सासंध्या समरे युद्धे भटौघः योधसमूहः बिंबं विभिंद्यात् इति भीतिभरात् विद्रवता पलायमानेन विवस्वता सूर्येण वियत्स्थले आकाशे विसृष्टा त्यक्ता अग्नये देया दीप्तिरिव बभौ सूर्योस्तसमये स्वदीप्तिं अग्नौ निधाय गच्छति पुनः प्रातःकाले तां गृह्णातीत्यागमः द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ परिव्राड्योगयुक्तश्चरणे चाभिमुखो हतइति भारते॥ ९४ ॥ नभः पयोधेः आकाशसमुद्रस्य नवविद्रुमाणां नूतनप्रवालरत्नानां श्रीरि

संध्याबभौसासमरे भटौघो बिंबंविभिंद्यादिति भीतिभारात् विवस्वताविद्रवताविसृष्टादिवस्थलेदी
प्तिरिवाग्निदेया॥ ९४ ॥नभःपयोधेर्नवविद्रुमश्रीःक्रमेणसंध्याकृशिमानमागात् उद्यत्प्रकोपैरुभयैर
नीकैर्विभज्यनीतेवविलोचनानि ॥ ९५॥ ध्वजिनीजनितंरजोंधकारंत्वरितंबांधवकौतुकातिरेकात्
परिरब्धुमिवांधकारसंघःपरमार्थोरणचत्वरंजगाहे॥ ९६॥ ॥

व श्रीः शोभा यस्याः सा संध्या उद्यन् प्रकोपः क्रो
धो येषां तैः उभयोः विराटसुशर्मणोः अनीकैः सैन्यैः विभज्य विभागं कृत्वा विलोचनानि नेत्राणि प्रतिनीतेव क्रमेण कृशिमानं कृशत्वं आगात् अयम
र्थः कोपेन नयनेषु रक्तता यापि यथुमेक्षा॥ ९५ परमार्थः रात्रिजन्यः सत्यः अंधकारसंघः ध्वजिनीभ्यां सेनाभ्यां जनितं उत्पादितं रजसां धूलीनां अंधकारं बांध २१
वस्य सजाते कौतुकातिरेकात् कौतुकातिशयात् परिरब्धुमिव आलिंगितुमिव त्वरितं रणचत्वरं रणांगणं जगाहे प्रविवेश॥ ९६॥ ॥ ॥

तत्र रणांगणे एकेषु पत्रिषु पक्षान् संकोच्य संविशत्सु प्रविशत्स्वपि अपरे अन्ये पत्रिणः पक्षान् विस्तार्य विच्चेरुः जग्मुः इत्याश्चर्यं पत्रिणः पक्षिणः बा णप्रहारभयेन पक्षान् संकोच्य विचेरुः अपरे पत्रिणः बाणाः प्रहारभयाभावात् पक्षान् विस्तार्य विचेरुरिति आश्चर्यपरिहारः ॥ ९७ ॥ तत्र युद्धे सकलेकं ककुले गृध्रसमूहे शरवर्षभयेन दूरंगते सत्यपि भीमः भयंकरः पक्षयोः पातः चालनं तेन भीमस्य यः पक्षपातः साहाय्यं तेन च सहितः अतएव प्रमदं

संकोच्य पक्षानेकेषु संविशत्स्वपि पत्रिषु विस्तार्य पक्षानपरे विचेरुस्तत्र पत्रिणः ९७ शरवर्षभयेन तत्र युद्धे सकले कंककुले गतेविदूरं प्रमदं दधदेक एव कंकः परिबभ्राम सभीमपक्षपातः ॥ ९८ ॥ अन्योन्यपट्टसविघट्टभवैः स्फुलिंगैराजिस्थ लेरुधिरकर्दम भाजियोधाः आगामिनीषु समितिष्वधिकं विधातुमासन्प्रतापनवबीजमिवावपंतः ॥ ९९ ॥ ॥

दर्षं दधत् एक एव कंकः युधिष्ठिरः परिबभ्राम ॥ ९८ ॥ योधाः प्रतापस्य नवं स्फुलिंगरूपं बीजं आगामिनीषु समितिषु संग्रामेषु अधिकं विधातुं कर्तुं ति- ग्मेव कर्दमः बहुलाजितायुक्ते आजिस्थले रणांगणे अन्योन्येषां पट्टिशानां खड्गसदृशायुधानां विघट्टात् प्रहारात् प्रभवः उत्पत्तिर्येषां तैः स्फुलिंगैः अ ग्निकणैः आवपंत इव आसन् अन्यः कर्षकोपि व्रीह्यादिबीजं अधिकं निधानं कर्दमवत्यां भूमौ आवपति ॥ ९९ ॥ ॥ ७७ ॥ ॥ ७ ॥

स्फ्राणांमृगास्य: अप्सरस: नवेषुयुद्धमरणभूतेषु वीरस्फरेषु नलिनीशविंबपयेन सूर्यविंबमार्गेण चारंगमनं अलब्ध्वा नभसि आकाशेष्ममत्स्फ़स
स्फकरपल्लवेपरिनिपीड्य घर्षित्वा अयंस्त्रीस्वभाव:नक्तंकलहायरात्रियुद्धाय अथापंतशापंददु:युद्धेअभिमुखंहतस्य सूर्यविंबभेदेन स्वर्गगम
नानूरात्रौ तद्विंबाभावात् स्वर्गगमनाभावेन वरणाभावात् अप्सरसांसंतापइतिभाव:॥१००॥ प्रकीर्णै:सर्वत:प्रसृतै:रक्तकणै:रक्तबिंदुभि:रज्यंत:
पटा:वस्त्राणियस्या:सा हैमीसौवर्णीरथकेतूनांराजि:पंक्ति:युद्धस्य अद्भुतंवृत्तांतं आकर्ण्य द्रष्टुं अर्धमार्गात् निवृत्ता वरमा सायंकालिकासंध्येव र-

नलिनीशबिंबपथचारमलब्ध्वानभसिष्ममत्स्फनववीरस्फरेषु करपल्लवोपरिनिपीड्यमृगास्य:कलहायनक्तम
शपंतस्फराणां॥१००॥ रराजहैमीरथकेतुराजीरज्यत्पटारक्तकणै:प्रकीर्णै: आकर्ण्ययुद्धाद्भुतमर्धमार्गाद्द्रष्टुंनिवृत्तावर
मेवसंध्या॥१॥ग०तत्रतावदरिशरनिकृत्तमत्तगजसप्तिकुलपत्तिनवरक्तसिक्तरणचत्वरमनुभूयभूयसारोषेणसंवर्तसम
वर्तिसममूर्तिर्हृदिनर्तितधूर्तधार्तराष्ट्रशासनवार्तस्त्रिगर्त:कैवर्तइवमत्स्यचक्रवर्तिनमाहर्तुंमुहूर्तादुपावर्तत॥२२॥

राज॥१॥ग०तत्रसायंकालेतावत् अरिशरै:निकृत्ता:छिन्ना:मत्तगजाश्वसप्तिकुलं अश्वसमूहश्च पत्तय:पदाश्चतेषांनवरक्तेनसिक्तंरणचत्वरंरणांगणं अनुभूय
दृष्ट्वा भूयसा बहुतरेणरोषेण अमर्षेणक्रोधेन संवर्तसमवर्तिना प्रलयकालसंबंधियमेन समामूर्तिर्यस्यस:हृदिमनसिनर्तिताधूर्तस्यशठस्यधार्तराष्ट्रस्यदुर्यो
धनस्यशासनवार्ताआज्ञावार्तायेनस:त्रिगर्त:सुशर्माकैवर्तइवधीवरइवमत्स्यचक्रवर्तिनंमत्स्यदेशराजंविराटंमत्स्यमेवंच आहर्तुंधर्तुं आनेतुंमुहूर्तात्उपावर्त
नसमीपमगमत्॥२२॥

प॰ अयमानिनां अवरमः प्रथमः सुशर्मा झटितिसंमुखः सन् अनीकपयोधेः सेनासमुद्रस्य मध्यवर्तिनं रिपुं विराटं ज्ययामौर्व्या बंधं अनैषीत् नीतवान् अपत्रपया परस्मात् लज्जया बबंधं अनैषीत् युक्तमकार्षीदित्यर्थः ॥ २ ॥ युधि भूपे विराटे पराभवपदे पराजयस्थाने सति धर्मसूनोः भ्रूवल्लिकंपकलिकां अवतंसयन् शिरसिधारयन् भ्रूकंपसूचितां सुशर्मणः सकाशात् राजमोचनरूपाज्ञां मानयन्नित्यर्थः सः मरुतः कुमारः भीमः सैन्यानिमथ्नन्

मानिनामवरमोथसुशर्मामध्यवर्तिनमनीकपयोधेः संमुखोझटितिबंधमनैषीत्सज्ययारिपुमपत्रपयात्त ॥ २ ॥ भूपेपराभवपदेयुधिधर्मसूनोर्भ्रूवल्लिकंपकलिकामवतंसयन्सः मथ्नन्बलानिरिपवेमरुतः कुमारोमात्स्यंविमुच्यवितताः ददशांतदीयां ॥ ३ ॥ विराटसैन्येषुमिषत्सुयुद्धेत्रिगर्तनेतुर्दृढबंधनाय कोदंडयुक्तोगुणएवतत्रकर्ताचजज्ञेकरणंचजज्ञे ॥ ४ ॥

सैन्यानिमथ्नन् दर्पयन् मात्स्यं विराटं विमोच्य रिपवे सुशर्मणे तदीयां विराटीयां दशां मौर्व्या बंधनरूपावस्थां विततान ददौ विराटं विमोच्य सुशर्माणं मौर्व्या बबंधेत्यर्थः ॥ ३ ॥ युद्धे विराटसैन्येषु मिषत्सु पश्यत्सु सत्सु त्रिगर्तनेतुः सुशर्मणः दृढबंधनाय तत्र बंधनक्रियायां कोदंडयुक्तगुणएव कर्ता जज्ञे करणं जज्ञे बल्लवो मौर्व्या सुशर्माणं बबंधेत्यर्थात् गुणः बल्लवो भीमः कर्ता जातः गुणः मौर्वी करणं जातेति भावः सूदा औदनिका गुणा इत्यमरः ॥ ४ ॥ [illegible]

तस्यांनिशायां तमसां कदंबकं वृंदंतु यथादृशो र्मीलनोन्मीलनयोः समानरूपं दर्शनाभावरूपं फलं संददौ तथा तमसा नेत्राणांमीलनोन्मीलनयोर्दर्शनाभावःतथायु द्धेन मात्स्यसुशर्मणोर्बंधनं बभूवेतिभावः॥ ५॥ वायुभुवा भीमेन विमानितः अपमानितः दयालुना धर्मभुवा विराटतः विमोचितः सः सुशर्मा तयार जन्येव सामिशेषया अर्धशेषया ध्वजिन्यासेनयासमं यथागतं तयानिरगात् निर्जगाम सुशर्मानिशीथाद्दुपरि अर्धावशिष्टसैन्येनसह येनमार्गेणा गतस्तेनैव मार्गेण अगमेत्यर्थः॥ ६॥ व्याकृत्तं छिन्नं शीर्षमेव करकः कमंडलुर्यस्यसः विमलानि अस्थीन्येव दंताः यस्यसः रक्तहृदा एव अंशु

तस्यांनिशायांतुतमः कदंबकंनिमीलनोन्मीलनयोर्दृशांयथा युत्थंतयोर्मात्स्यसुशर्मणोस्तथासमानरूपंफल मेवसंददौ॥५॥विमानितोवायुसुवाविराटतोविमोचितोधर्मभुवादयालुना तयारजन्येवससामिशेषयासमं ध्वजिन्यानिरगाद्यथागतं॥६॥ व्याकृत्तशीर्षकरकोविमलास्थिदंतोरक्तहृदांशुकधरोरथकेतुदंडः सेनाक्षधृ ग्धृतशमःस्वयमाजिरंगःकंकादिवापचरमाश्रमसंप्रदायं॥१०७॥ ॥ ॥ ॥ ॥

कानिरक्तवस्त्राणितेषांधरः धर्ता रथकेतुरेव दंडः वेणुदंडोयस्यसः सेनायाः अक्षान् रथावयवविशेषान् रुद्राक्षांश्च धृष्णोति धरतीतिसेनाक्ष धृक् धृतः शमः युद्धावसाने शांतिर्येनसः आजिरंगः रणरंगः स्वयंकंकात् युधिष्ठिरसकाशात् चरमाश्रमस्य संन्यासाश्रमस्य संप्रदायं अवापेव- २२
अन्योपिकंकतुल्यात् सकाशात् चतुर्थाश्रमदीक्षांगृहीत्वा तदुपदिष्टदंडकमंडल्वादिपदार्थसंपादनंकरोति॥ १०७॥ ॥ ॥ ॥ ॥

॥गद्यं॥ तदनु मृदुसेनसमानाः मुहुर्मुहुः केवलं घललमेव बहुलमेव अवलोकमाना घलमाना गंत्री बलशासनदिशायां ओजायमानेन ओज-
स्वीयाचरता तेजस्विनेत्यर्थः चंद्रमसा प्रसूतैः प्रकटीकृतैः मदकरटिघटायाः मदयुक्तगजसमूहस्य विषाणांगणेषु दंतचत्वरेषु प्रतिफलनेन प्रतिबिं-
बनेन शतगुणिताः धवलिमवीचयः शुभ्रतोर्मयो येषां तैः मरीचिभिः चंद्रिकाभिः दलिता नाशिता रणविमर्दश्रमदुर्दशा युद्धसंमर्दश्रमात्मकदुर्द-
शा यस्याः सा विराटस्य चमूरपि प्रतिनिवर्तनवेगो यस्य तच्च तत् हर्षमाणं यत् गोधनं गवां वृंदं तस्य पयसः क्षीरस्य स्रवनधाराणां क्षरणधाराणां पा-

॥गद्यं॥ तदनु मुहुर्मुहुर्वललमेव केवलमवलोकमाना घलमाना बलशासन दिशायामोजायमानेन चंद्रमसाप्र
सूतैर्मदकरटिघटाविषाणांगणप्रतिफलनशतगुणितधवलिमवीचिभिर्मरीचीभिर्दलितरणविमर्दश्रमदुर्दशा वि
राटस्य चमूरपि प्रतिनिवर्तनवेगहर्षमाणगोधनपयःस्रवनधारापातशीतलितसिकतायां पदव्यां पक्ष्मपंक्तिनिमी
लनेन समरभूरेणुभारेण लोचनयोर्निमीलनशिल्पकल्पितबहुसाहाय्यकमुद्र्या निद्रया तां यामिनीं पाश्चा
र्धसीमामत्यवीवहत् ॥२५॥

तैः शीतलिता शीतलीकृता शर्करा यस्यां तस्यां पदव्यां मार्गे निद्रया तां यामिनीं रात्रिं पश्चा
र्धसीमानं उत्तरार्धावसानं अत्यवीवहत् प्रापयामास विराटचमूः मार्गे वशिष्टां रात्रिं निद्रया यापयामासेत्यर्थः कथंभूतया निद्रया पक्ष्मपंक्ति-
षु निमीलनेन स्थितेन समरभुवः रणभूमेः रेणुभारेण धूलिसमूहेन लोचनयोः निमीलनशिल्पे निमीलनक्रियायां कल्पिता कृता बहुसाहायक

कं०भा० मुद्रासंह्यपत्वं यथातयानिद्रयापक्ष्मनिमीलनंभवतितत्र रेणुभारेणसहायत्वंकृतमितिभावः॥ २४ ॥ ॥ इत्यनंतभट्टकृतचंपूभा टी०स्त०
२४ रतटीकायांश्रीखंडोपाध्यायबाजीरायात्मजनारायणसूरिकृतायांषष्ठस्तवकः॥६॥ ॥७॥ ॥श्रीकृष्णायनमः॥ ॥७॥ ॥७॥ ६

अथचंपूभारतेसटीक सप्तमस्तबक प्रारंभः॥ श्रीकृष्ण॥

श्रीगणेशायनमः॥ अथभारतचंपूसप्तमस्तबकमारंभः॥ ॥प॰ अपरेद्युः दक्षिणगोग्रहणात् द्वितीयदिवसे अर्कबिंबे द्यां आकाशं आरूढेसति सूर्योदयेसतीत्यर्थः पार्थात् धर्मराजात् एकांगोत्रां पृथिवीं आहृत्य द्यूतेन अपहृत्य बिभ्रत् दधानः कुरूणांसार्वभौमः दुर्योधनः मात्स्यात् विराटात् अन्यांद्वितीयां गोत्रां गवांसमूहं हर्तुं सैन्यैः साकं तत्पुरे विराटनगरस्योत्तरदिग्भागे आगात् आगमत् ॥ १॥ विदूरमार्गे अतिदूरमार्गे यः श्रमः तेनविह्वलानि

आरूढेद्यामर्कबिंबेपरेद्युःसाकंसैन्यैःसार्वभौमःकुरूणां पार्थादेकांबिभ्रदाहृत्यगोत्रांमात्स्यादन्यांतत्पुरेहर्तुमागात्॥ १॥ विदूरमार्गश्रमविह्वलांगीसेनासमस्ताधृतराष्ट्रसूनोः आभीरवाटांतिकएवतस्थौसद्योनिरुद्धेवतदाज्यगंधैः२
ग॰ तावत्तस्यपादातंसर्वाभिसारेणगाहंगाहंगवांप्रजंव्रजगृहेजगृहे॥ १॥

किंचिदपिकर्तुमसमर्थानि अंगानि यस्याः सा समस्ताधृतराष्ट्रसूनोः सेनातस्य आभीरवाटस्य यानि आज्यानि तेषांगंधैः सुगंधैः निरुद्धेव अस्मत्सेवनं कृत्वागंतव्यमितिकृतनिरोधेव आभीरवाटस्यगोपालनिवासस्थानस्य अंतिके एवसद्यस्तस्थौ गोग्रहणफलकस्थिताचाज्यगंधग्रहणफलकत्वमुत्प्रेक्ष्यते॥ २॥ ग॰ यावत् सेनास्थितिः तावत्तस्यदुर्योधनस्यपादातंसमूहः सर्वाभिसारेण सर्वतः सर्वेषांसहैवागमने [illegible] गृहे घोषगृहे गाहं गाहं [illegible] प्रविश्यगवांव्रजं [illegible] गृहे॥ १॥ ॥७॥ ॥८

पद्य॥ यस्मिन् दंडाघाते दंडप्रहारे दीयमानेपि भूयः बहुशः दोहशेषं दुग्धं वहंत्यः धावं यत्नात् घोषात् व्रजात् निःसरंतिस्म निर्जग्मुः घोषस्तु यल्लले शंविनैव गोप्यः निःससार ग्रामांतरस्य घोषस्यस्थावरत्यागमनमसंभवि तत्राथियल्लले शंथिनैवेत्याश्चर्यं गोप्यः घोषः आर्तस्वरः निःससारेत्याश्चर्यपरिहारः २॥ इतस्ततः संभ्रमं लता ईयुषीणां प्रापुषीनां गोपांगनानां कुचदर्शनेन निषादिनां हस्तिपकानां पंक्तिः निजहस्तिनः मस्ते मस्तके कुंभस्थले सृणिं अंकुशं विधातुं आरोपयितुं श्लथपाणिः शिथिलहस्ता आसीत् हस्तिपकाः कुचभ्रांत्या हस्तिमस्तके बलेनांकुशारोपणं नविदधुरितिभावः॥४॥ भीमसेनः भिषक् वैद्य

पद्यं॥ दंडाघातेदीयमानेपियोधैर्देर्ग्धुं भूयोदोहशेषंवहंत्यः घोषाद्गावोनिःसरंतिस्म यत्नाद्गोप्योघोषोयल्ललेशंविनैव २ इतस्ततः संभ्रममीयुषीणां गोपांगनानांकुचदर्शनेन निषादिपंक्तिर्निजहस्तिमस्तेसृणिंविधातुं श्लथपाणिरासीत्॥४॥ भीमसेनभिषजाद्य मितोयोदक्षिणेझटितितस्यपुरस्य उत्तरेप्युदभवत्सतुपार्श्वे पक्षवातइवकोरववेधः॥५॥ ॥ ॥

स्तेन झटिति शमितः शांतिंनीतः तस्य पुरस्य विराटनगरस्य दक्षिणे पार्श्वे यः पक्षवातइव अर्धांगवायुरोगइव कौरवाणां वेधः गोग्रहणरूपः उपसर्गः सतु कौरववेधः उत्तरेपि पार्श्वेभागे वामांगेच पक्षवातइव उदभूत् यथादक्षिणांगे जातोर्धांगवायुर्भिषजाचिकित्सया शांतिंनीतः सन् वामांगे प्युद्भवति तथा भीमेन दक्षिणभागेशांतिंनीतः कौरववेधः उत्तरेप्युदभवदित्यर्थः॥५॥ ॥५॥ ॥५॥ ॥५॥

व॰भा॰ अथशत्रुभिः कृतगोग्रहणानंतरं विविग्नः भीतः कश्चित् गोपेषु युवाइदं वृत्तं राजसूनवे निवेदयितुं अतीववेगात् आधाव्य घोषसीम्नि रिंखत्पदाः टी॰स॰
२ स्खलच्चरणाः क्षितिपतेः गाः धेनूरिव नृपसूनोः गोष्ठ्यांसमायां रिंखंति स्खलंति पदानि स्फालितशब्दायासांताः स्वस्यापिगाः वाचं विमुमुचे यथा ७
घोषसीम्निगाः विमुमुचे तत्याज तथागोष्ठ्यांगाः विमुमुचे विससर्ज उवाचेत्यर्थः ॥६॥ हेकुमारराजपुत्र कुरवः ते अखिलाः गाः गृह्णंति इदं औदास्यं तवोदा

वृत्तंनिवेदयितुमेतदतीववेगादाधाव्यकश्चिदथगोपयुवाविविग्नः रिंखत्पदःक्षितिपतेरिव घोषसीम्निस्वस्यापिगाविमुमुचे
नृपसूनुगोष्ठ्यां ॥६॥ औदास्यंकिमिदंकुमारकुरवोगृह्णंतिगास्तेखिलास्त्वद्दोष्णोः समयोयमाजिषुपरैर्दुष्प्रापमाप्तुंयशः दे
वींकेकयनंदिनींकुरुमहावीरप्रसूंमूर्धसद्रागारोहरथंगृहाणचधनुर्धत्स्वाभ्यमित्रीणतां ॥७॥ ॥ ॥

सीनत्वंकिं आजिषु संग्रामेषु परैः दुष्प्रापं दुर्लभं यशः आप्तुं त्वद्दोष्णोः तवभुजयोः अयंसमयः देवींराज्ञीं केकयनंदिनीं स्वदेष्णां मातरं वीरप्रसूत्वां
रमत्रूणां मूर्धसु कुरु आत्मनु भावमवेन वीरप्रसूषुश्रेष्ठांकुर्वित्यर्थः त्वंद्राक् शीघ्रंरथमारोह धनुः गृहाण अभ्यमित्रीणस्य धार्ष्ट्येनशत्रोः अभिमुखं गा २
च्छतः भावः अभ्यमित्रीणतातां धत्स्व धारयच निर्भयः सनशत्रोरभिमुखंत्वंगच्छेत्यर्थः ॥७॥ ॥७॥ ॥७॥ ॥७॥

अयंउत्तः अंतःपुरमात्रं स्त्री सभामात्रेण धीरः अयमुत्तरः वधूनांकामिनीनां पुरतः समुल्लासयन् उच्छोष्ठोर्ध्वकेशायमान् सत्वाग्रे उल्लासयन् ऊर्ध्वविकासयन् अनेनपरस्परामर्शादि माधुतामित्यं कुर्वन् किंचित् मणिमयस्तंभात् वियोजितं अंगमेनतृणमूतः सन् पूर्वमणिस्तंभमध्ये स्थितः इदानीं कोपि नाटचार्यं सरलः स्थितः इत्यर्थः गिरं वृधे उवाचेत्यर्थः ॥ ८ ॥ इह युयुत्सोः योद्धुमिच्छोः मे एतासारथिः यदिस्यात्तर्हि एतमुत्तं तथाविक्रममेयमप्राप्य

युक्तोयमित्थंपुरतोवधूनामुल्लासयन्श्मश्रुलवान्सवांग्रैः किंचिन्मणिस्तंभवियोजितांगोगिरंदधेंतःपुरमात्रधीरः ॥ ८ ॥ तथाप्युत्तंविक्रमयेयमेतंपतायदिस्यादिहमेयुयुत्सोः षष्ठोपिनःकश्चनपांडवोभूदितित्रसेयुःकुरवोयथाते ॥ ९ ॥ इदंनिशम्यस्मितलांछितोष्ठानन्नोत्तराकेशकृतामणुन्ना बृहन्नलांसारथिकृत्यदक्षांयात्रेनिवेद्यानयतिस्मवेनां ॥ १० ॥ ॥

ममुत्तं कुर्यां यथाते कुरवः नः अस्माकं कश्चन षष्ठोपि पंडवः अभूत् इतिमत्वात्रसेयुः भयंप्राप्नुयुः ममकश्चनसमीचीनसारथिर्मिलेच्चेत्तर्हि मयापाण्डवसदृशः पराक्रमंकृत्वा कुरुपराभवः कृतःस्यादितिभाव ॥ ९ ॥ इदंउत्तरोक्तवचनंनिशम्यस्मितेन हास्यमभयालांछितौ ओष्ठौयस्याः वर्याकेशकृताकेशप्रसाधनकर्म्याद्रौपद्यामणुन्ना प्रेरिता सत्वरा बृहन्नलांसारथित्वेसारथ्यकर्मणि दक्षांकुशलांयात्रेनिवेद्यपश्चात् बृहन्नलां आनयतिस्म आनीतवती ॥ १० ॥ ॥ ७ ॥

चं. भा. २

तां संसदं सभां अवाप्य आहूत: नाभिः स्त्रीभिः उत्तरेण च कृतादरः इंद्रनंदनः अर्जुनः क्रमात् हृयं अवाक् अधोभागे बभार दधौ तदेव द्वयमाह नृपेति नृपात्मजं उत्तरं पूजयितुं नमनेन संमानयितुं मस्तकं अवाक् बभार नितंबिनीवधूः त्रासयितुं कंचुकं अवाक् कटेरधोभागे बभार कंचुके करप्रवेशनं मुक्त्वा पादप्रवेशनं चकारेति भावः ॥११ फाल्गुनः उत्तरफल्गुन्यां जातः अर्जुनः षंढोपि क्लीबमपि तत्र सभायां सारथ्यसदृशी सारथिकर्मानुरूपा आकृतिर्यस्य तथाभूतः सन् तेजसा कासां पौरदृष्टीनां च चकासामास न प्रकाशयामास सारथितेजोदर्शनार्थकैः पौरैः नेत्राणि न विकासितानि अ टी. त्त. ७

अवाप्य तां संसदमादृतः क्रमादवाग्बभार द्वयमिंद्रनंदनः नृपात्मजं पूजयितुं च मस्तकं विलासिनीर्हासयितुं च कंचुकं ॥११॥ षंढोपि तेजसा तत्र सारथ्यसदृशाकृतिः न कासां पौरदृष्टीनां चकासामास फाल्गुनः ॥ १२ ॥ तं सारथिपदे कृत्वा विधातारमिवेश्वरः परसेनां हसन्नेव प्रधक्ष्यामीत्यमन्यत ॥ १३ ॥ ॥ ॥

पितु सर्वैर्विकासितानीत्यर्थः यद्वा पौरदृष्टीनां पौरज्ञानानां एवं च एतत्तेजो दृष्ट्वा अयं सम्यक् सारथ्य कर्म करिष्यतीति केषां पौराणां ज्ञानेषु प्रकाशो नाभूत् अपि तु सर्वेषां प्रकाशो भवदित्यर्थः दृष्टिर्ज्ञानेक्ष्णि दर्शने इत्यमरः ॥१२॥ सः उत्तरः ईश्वरः शिवः धातारमिव त्रिपुरदाहे ब्रम्हाणमिव २
तं अर्जुनं सारथ्ये पदे स्थाने कृत्वा हसन्नेव परसेनां प्रधक्ष्यामि भस्मीकरिष्यामीत्यमन्यत ॥१३॥ ॥४॥ ॥५॥ ॥५॥

मालिनी सैरंध्री द्रौपदी तादृशा: क्लीबत्वं प्राप्तस्य पत्युः अर्जुनस्य तस्मिन् क्लीबत्वापहारकाय सोमाय श्यामाकचरोः निर्वापं वपनपूर्वकं होमप्रक्षेपं जज्ञे ज्ञातवती पुंस्त्वकामः सोमाय वाजिने श्यामाकचरुं निर्वापं कुर्यादिति विधिः एवं वास्यैतादृग्गणोद्यमेन पुंस्त्वं प्रकटी भविष्यतीति ज्ञातवतीति भावः ॥१४
कुतूहलिन्यः कन्या उत्तराद्याः कुमार्यः अद्य अकृत्रिमाणि वस्त्रहरणसमयेतं तु वानादिक्रियारहितानि अलौकिकानि पांडुस्नुषायाः द्रौपद्याः व

मालिनीतादृशः पत्युर्महांतं तं रणोद्यमं श्यामाकचरुनिर्वापं जज्ञे सोमाय वाजिने ॥१४॥ अकृत्रिमाण्यद्य वशे कुरूणां
पांडुस्नुषाया वसनानि संति आहृत्य नस्तानि दिशेति कन्यास्तमभ्ययाचंत कुतूहलिन्यः ॥१५॥ गद्यं ॥ तत्क्षणयाना
याते रभसराजलेखवाहमुखश्रुतबल्लवभुजबलावलेपवृत्तांतमोदमानसूदकुलवीरपत्नीवीरजननीतितवयुगप
त्प्रसिद्ध्यैर्वैजननो वासरोपमिति कात्यायनीजनस्तूयमानसुदेष्णां मस्तकतलविन्यस्तहस्तपल्लवतल्लजवृत्थबल्लवयोषि
द्भयया श्वावचनप्रतिशब्ददानदक्षगवाक्षमात्रोपलक्षितं कुमारप्रयाणपरिहार्यमाणमातुलशतांतःपुरवधूदीन
वविलापघोषं तत्पुरमासीत् ॥ २॥ सनानि वस्त्राणि कुरूणां वशे संति तानि आहृत्य तान् जित्वा तेभ्यः अपहृत्य नः अस्मभ्यं देहीति
तं उत्तरं अयाचंत याच्ञां कृतवत्यः ॥१५॥ गद्यं ॥ तत्क्षणं तस्मिन् समये यानायानेषु गमनागमनेषु सरभसाः सवेगाः ये राजलेखवाहाः लिखित
पत्रप्रापकाः स्वाराः तेषां मुखेभ्यः श्रुतः यो बल्लवस्य भुजबलावलेपवृत्तांतः भुजपराक्रमवृत्तांतः तेन मोदमानाः सानंदाः सूदकुलस्य पाचकसमूहस्य यस्मि

ननु पतिर्विजयी भूव: पुत्रो विजयी भविष्यतीत्यत: वीरपत्नी वीरजननी इति तव युगपद्भासितेऽवैजनन: प्रसूतिमास: प्रसूतिसमय इत्यर्थ: इति
कात्यायनीजने : अर्धवृद्धत्वादिलक्षणयुतस्त्रीभि: स्तूयमानासु देष्णा यस्मिन् तत् कात्यायन्य र्धवृद्धाया काषायवसनाधवेत्यमर: मस्तकतले
विन्यस्ता: नमनार्थं स्थापिता: हस्ता: याभिस्तासां वृत्य वल्लुवयोषितां वृत्यगोपालस्त्रीणां अभयवा क्वावचनस्य प्रतिशब्ददाने उत्तरदाने दक्षं निपु-
णं यत् गवाक्षमात्रं वातायनान्येवते: उपलक्षितं युक्तं गोपालस्त्रीणां अभयदाने राजपुरुषाभावात् तत्राभयया क्वाशब्दजन्यवातायनबिलप्रति

॥पद्यं॥ लाजाभिवर्षी ललनासमाजो राज्ञ: कुमाराय रयस्थिताय मुदाशिषं मूल्यमिव
व्यतानीत् जिघृक्षितानां द्विषदंसुकानाम् ॥ १८॥ ॥ ॥ ॥

ध्वनौ मत्युत्तरत्वारोप: अनेन तत्र राजपुरुषाभावो द्योत्यते कुमारस्य उत्तरस्य प्रयाणे युद्धार्थगमने परिहार्यमाण: निवार्यमाण: मातुलशतस्य कीच
कशतस्य अंत:पुरवधूटिनीनां अंत:पुरसंबंधितरुणस्त्रीणां नव: नूतन: विलापघोष: आक्रंदशब्दो यस्मिन् तत् प्रयाणे अमंगलत्वात् कृतविला
पघोषनिवारणमिति भाव: तत्पुरं आसीत् ॥ २॥ पद्यं ॥ लाजाभिवर्षी मंगलार्थं लाजावृष्टिकर्ता स्त्रीसमूह: जिघृक्षितानां ग्रहीतुमिष्टानां द्विषदंसु ५
कानां शत्रुवस्त्राणां मूल्यमिव रथस्थिताय राज्ञ: कुमाराय मुदा हर्षेण आशिषं विजयी भवेत्याशीर्वचनं व्यतानीत् ददौ॥ १८॥ ॥७॥ ॥

स उत्तरः आलेख्यदत्तैः चित्रितैः चित्रलिखितैः पुरुषैः रूपैः उपेतां राजपथप्रतोलीं राजमार्गसंबंधिनीं रथ्यां विलोकयन् मन राजपुरुषरहितां रथ्यां प
श्यन्नित्यर्थः रथनिबल्थान् घोटान् तुरगान् नुदती प्रेरयंती पोटा श्मश्र्वादि पुरुषलक्षणयुता स्त्रिया पुरस्कृत्य रथाग्रतः कृत्वा पुरात् नगरात् अनंतरं १७ ॥ग०
दक्षिणदिङ्मुखात् उदयमानः निर्गतः पव मानः वृंदारकैः देवैः मुक्तानां मंदारकुसुमानां कल्पवृक्षपुष्पाणां वर्षेण वृष्ट्या मंदायितः धूपगंधा पस्य
तं बल्लवस्य चिकुरबंधं केशबंधं निशि आघ्राय पुत्रत्वात् स्नेहेन मूर्धन्याघ्राणं कृत्वा तस्य भीमस्य जयोत्सवं विज्ञापयितुं अवसरं समयं विचिन्वन् निवमृग्य

आलेख्यदत्तैः पुरुषैः रूपेतामालोकयन्राजपथप्रतोलीं घोटान्नुदंती सरथेनिबल्थान् पोटां पुरस्कृत्य पुरात्मनस्य ॥१७॥ग० तदनुदक्षि
णदिङ्मुखादुदयमानः पवमानो वृंदारकमुक्तमंदारकुसुमवर्षमंदायितधूमगंध बल्लवचिकुरबंधमाघ्राय निशि तस्य जयोत्सवविज्ञा
पयितुमवसरं विचिन्वन्निव विसदृकुरुनंदनयोः स्यंदनसमीपे मंदमंदमस्पंदत ॥२॥ पद्यं ॥ प्रस्वापितेभ्यः परभूपतिभ्यः स्वजाति
वर्गः सुलभो रणेस्मिन् भविष्यतीति प्रणनर्त हृष्टा शतांगशाटी शतमन्युसूनोः ॥१८॥

मागइव विराट्कुरुनंदनयोः उत्तरार्जुनयोः स्यंदनसमीपे मंदं मंदं अस्पंदत अगच्छत् ॥२॥ पद्यं ॥ शतमन्युसूनोः अर्जुनस्य शतांगशाटी रथध्व
जपटी अस्मिन् रणे प्रस्वापितेभ्यः प्रस्वापनास्त्रेण निद्रां प्रापितेभ्यः रिपुभूपतिभ्यः सजातिवर्गः स्वजातिवस्त्रसमूहः सुलभो भविष्यतीति इतिहे
तोः हृष्टा सती प्रणनर्तेति सुप्तानां चेन नर्तनोत्प्रेक्षा अन्यापि स्वज्ञातिदर्शनसंभाविष्यति सति हर्षात् नृत्यति ॥१९॥ ॥७॥ ॥५॥

ततः कुरूणां अनीकः सेनाजलेमत्स्यान्दधानोपिस्थलेमत्स्यान्विलोकितुं द्रष्टुं आगतः अब्धिरिवददृशे उभाभ्यां दृष्ट इत्यर्थः स्थलेकीदृशान्म-
त्स्याः संतीतिद्रष्टुमागतः समुद्र इवेक्षुसेना॥ १९॥ तत्रजिष्णुः अर्जुनः विसृत्वरीं प्रसरणशीलां अरेः सेनाधूलिंनसेहे उक्तमर्थं श्लेषेण अर्थांत
रेन्यस्यति प्रायेणेति तथाहि मानिना अभिमानवतापुंसापरागः धूलिः अन्यापराधश्चप्रायेणनसह्यते॥ २०॥ तत्ररणे अरिसैन्यं अपलोकितुं

जलेमत्स्यान्दधानोपिस्थलेमत्स्यान्विलोकितुं आगतोब्धिरिवानीकः कुरूणांददृशेततः॥ १९॥ सेहेजि
ष्णुर्नतत्रारेः सेनाधूलिंविसृत्वरीं प्रायेणमानिनापुंसापरागोनहिसह्यते॥ २०॥ तत्रारिसैन्यमवलोकितुमुत्तरस्य
स्त्रीगोष्ठिकाजनिरणेनिजवेश्मनीव भीश्चित्तमश्रुलहरीनयनंविमूर्छाबुद्धिंप्रवेपथुरुजावपुरानशेयत्॥ २१॥

दृष्टुं उत्तरस्य स्त्रीगोष्ठिका स्त्रीसभानिजवेश्मनीव अजनिजाता यथागृहेस्त्रीसभा आसीत् तथारणेपिस्त्रीसभाभिरिस्त्येत्यर्थः तामाह यत् यतः भीः
भीतिः चित्तं आनशे व्याप अश्रुलहरी बाष्पलहरी नयनं आप विमूर्छा बुद्धिं प्राप प्रवेपथोः कम्पाव्यथावपुः शरीरमापत्॥ २१॥ ॥७॥ ॥५॥

मात्स्यैकतेनंतरे त्रासः शत्रुसैन्यदर्शनजन्यभयं षण्णांकनूनां वसंतादिऋतूनां क्रमात् वसंतादिक्रमात् चकार किं कुर्वन् चकार तदाह गले कुरवं वचयोग्य
दात् कुरवक पुष्पस्वर संगेन कुत्सितशब्दं वव्यातन्वन् प्रकटयन् तथा तालुनि अपांजलानां शोषणं विरचयन् कुर्वन् अक्षिणि नेत्रे वृष्टीः जलवृष्टीः वा
यवृष्टीश्च विवर्धयन् द्यां आकाशं धार्तराष्ट्ररवैः हंसशब्दैः युद्धार्थमेकरथी आगतः सोपि भीत इति ज्ञात्वा धृतराष्ट्रपुत्रकृतसिंहनादैश्च विपुलयन्
अंतः शब्दभरेण विस्तृतां कुर्वन् धनंजयपदस्य अग्निस्थानस्य आत्ममोचनार्थं अर्जुनचरणस्य च सेवायां तरयन् त्वरामुत्पादयन् अंतर्बहिश्च शरी

व्यातन्वन्कुरवं गले विरचयस्तालुन्यपां शोषणं वृष्टीरक्ष्णि विवर्धयन् विपुलयन् द्यां धार्तराष्ट्ररवैः॥ सेवायां त्व
रयन् धनंजयपदस्यांतर्बहिः कंपयन्त्रासो मात्स्यकेतेनचकार चरितं षण्णांऋतूनां क्रमात्॥ २२॥ गद्यं॥ अथ
रथादवप्लुत्य पुरं प्रति पलायमानो यमुत्तरः पश्चादनुधाव्य कचेषु गृहीतवते फाल्गुनाय फल्गुना कंठरवेणम्ला
नजीर्णं चित्रमिव प्रमुषितार्धवर्णं वचनमेवमवादीत्॥ ५॥

रस्य अंतर्बहिर्भागयोः अंतःकरण शरीर बहिर्भा
गयोश्च कंपयन् कंपमुत्पादयन्॥ २२॥ गद्यं॥ अथ शत्रुसैन्यदर्शनजन्यभयानंतरं रथात् अवप्लुत्य पुरं प्रति निष्क्रायमानः अयं उत्तरः पश्चादनुधा
व्य कचेषु गृहीतवते फाल्गुनाय अर्जुनाय फल्गुनानीचेन कंठरवेण म्लानं जीर्णं चित्रमिव आलेख्यमिव प्रमुषिताः लुप्ताः अर्धवर्णाः अकारादीन्य
क्षराणि शुष्कत्वाद्यो अर्धवर्णाश्च यस्मिन्तत् एवं वक्ष्यमाणं वचनं अवादीत्॥ ५॥ ॥ ७॥ ॥ ८॥ ॥ ९॥ ॥ १०

च०भा० ५

प० हंतइतिखेदे हे बृहन्नले त्वं मां धृत्वा किं वा चिकीर्षसि वाशब्दो वाक्यालंकारे अमूनि कुरुवर्याणां बलानि सैन्यानि मे अक्ष्णोर्न मांति अनंतत्वात् दृष्टिगो टी०स० ७
चरीकर्तुमपि न शक्नोमीति भावः तस्मात् सद्यः रथं निवर्तय समरेच्छया अलंपूर्यतां त्वया मया च युद्धेच्छा न कर्तव्येत्यर्थः अहं अवशेषं आयुः गृहेषु ने
ष्यामि २३ मरणभयेन रणं त्यक्त्वा गृहं प्रति गमने महाहानिः स्यादिति चेदत आह गा इति कुरवः अशेषैः वत्सकुलैः सह गाः कालयंतु दंडप्रहारं कृत्वा
बलान्नयंतु घोषान् गोपालग्रामान् दहंतु गोपान् प्रहरंतु मह्यं पलायनमेव महोत्सवं देहि मे मम राजपुत्रस्य प्राणेषु गुरुतां इतरापेक्षया महत्वं किंचिद्

॥पद्यं॥ किं वा चिकीर्षुरसि हंत बृहन्नले त्वमक्ष्णोर्न मांति कुरुराजबलान्यमूनि सद्यो निवर्तय रथं समरे
च्छया लं नेष्याम्यहं निजगृहेष्ववशेषमायुः ॥२३॥ गाः कालयंतु सह वत्सकुलैरशेषैर्घोषान्दहंतु कुरवः
प्रहरंतु गोपान् मह्यं पलायनमहोत्सवमेव देहि प्राणेषु किंचिदपि मे गुरुतां न वेत्सि २४ मातुर्मुखं मम पुरः पुर एत्य
तिष्ठत्युत्कंठितस्य नय तत्सविधं कृपालो यावंति संति मम कोशगृहे सवित्री तावद्भिरेव कनकैरभिषेक्ष्यति त्वां ॥२५॥

पि न वेत्सि अतस्त्वं पितारं तस्याभावात् अविचार्यसीतिभावः ॥ २४ मातुर्मुखं उत्कंठितस्य मम वीक्षाभ्यासबाहुल्यात् पुरः पुरः एत्य तिष्ठति अतः हे कृपालो
तस्याः मातुः सविधं समीपं मां नय ननु रणादपवाहने मदुपरि त्वन्मातुः कोपः स्यादिति चेदत आह सवित्री माता कोशगृहे यावंति कनकानि संति तावद्भिः ६
कनकैः त्वां अभिषेक्ष्यति अभिषेकं करिष्यति कुमारानयनजन्यहर्षातिशयात् पारितोषिकत्वेन बहूनि कनकानि तुभ्यं दास्यतीति भावः ॥ २५॥ ५

शत्रुसैन्यदर्शनमात्रेण भीतोसि तर्हि योद्धुं रणांगणे किमित्यागतोसीत्यत आह चित्रइति अहं चित्रे भित्तिस्थलेस्थे युद्धं विलोक्य चापल्यत अवि
चारात् एत्य एतद्रणांगणं प्राप्य तत्र चित्रयुद्धे असद्भिः अविद्यमानैः इहयुद्धांगणेउ घद्भिः प्रादुर्भवद्भिः क्ष्वेडाहेषितबृंहितैः सिंहनादाश्वशब्दगजश
ब्दैः वंचितोस्मि यदि चित्रयुद्धे क्ष्वेडादयस्युस्तर्हि नागच्छेयमिति भावः ॥ २६ ॥ अहं यथायेन प्रकारेण भूतलं त्यक्त्वा उत्प्लुतं उन्नतं रथं आरूढः आरूढ
वानस्मि तथा तेन प्रकारेण प्राणः हृदंतरं हृदयमध्यभागं त्यक्त्वा कंठं अधिरोहति रथादधोगंतुं मां न मुंचसि चेत्तर्हि मम प्राणोत्क्रमणं भवेदिति भावः २७

चित्रयुद्धं विलोक्याहं चापलादेत्य वंचितः तत्रासद्भिरिवोद्यद्भिः क्ष्वेडाहेषितबृंहितैः २६ यथाहं भूतलं त्यक्त्वा रथमारु
ढमुत्प्लुतं तथा हृदंतरं त्यक्त्वा कंठं प्राणोधिरोहति २७ ग० इति बहुधा विलप्य पादयोः प्रणिपतंतं नृपसूनुं अपरांगे करपुटेन मु
हुरास्पृश्यालिंगयन् सस्मितं गिरममरपतिसूनुरपि प्रवर्तयामास ॥ ५ ॥ पद्यं ॥ उदितोसि विराट् भूपते रुद्राङ्गद्रकथं त्वमी
दृशः प्रथया अपि यः कुतूहलात्परसैन्यैरधुनापि युध्यते ॥ २८ ॥

॥ गद्यं ॥ इति बहुविलप्य दीनभाषणं कृत्वा
पादयोः प्रणिपतंतं पादौ धृत्वा नमस्कुर्वन्तं उत्तरं अपरांगे पृष्ठभागे करपुटेन मुहुः आस्पृश्य आलिंगयन् अर्जुनोपि गिरं सस्मितं यथा तथा प्रवर्तयामा
स उवाचेत्यर्थः ॥ ५ ॥ पद्यं ॥ हे भद्र कल्याण त्वं विराटराजस्य उदरे ईदृशः युद्धे भीरुः कथं उत्पन्नोसि यः विराटः प्रथया अपि वृद्धत्वेनापि कुतूहलात्
अद्यापि शत्रुसैन्यैः सह युध्यते एतत्स्वभावेन पितुर्लांछनकारी जातोसीति भावः ॥ २८ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥

सारथ्योगतभयेसत्यपि त्वंरथीसन् संगरे युद्धे रिपुभ्यः यदि बिभेषितर्हि मत्स्यकेकयभुवांपितृ मातृकुलोत्पन्नानांभुजभाजांबाहुपराक्रमशालिनां राज्ञांमानकर्तनं माननाशकं इतः युद्धात्पलायनकर्मणः सकाशात् अन्यत् किंवर्तते एतद्द्वेभयकुललांछनकारीत्यर्थः ॥ २९ ॥ संसदि सभायां विश्रृंखलं अमर्यादंवीरेणवक्तव्यं वादं विस्तीर्य बहूक्त्वा अद्ययुद्धात्पलायितवतः तव अंगकंपः अंतःपुरेषु हसतां अबलाजनानां स्त्रीजनानांनिर्बलानामपीतिध्वनिः कुब्जवल्लानानां कुब्जवामनानां आचार्यएवउपदेष्टा गुरुरेव भविताभविष्यतिएवंतवभयजन्यकंपंदृष्ट्वा हसिष्यंतीतिभावः

सारथौगतभयेपिरथीत्वंसंगरेयदिबिभेषिरिपुभ्यः मत्स्यकेकयभुवांबलभाजांमानकर्तनमितोपिपुनः किं ॥ २९ ॥ विस्तीर्यसंसदिविश्रृंखलवीरवादंयुद्धात्पलायितवतोघनवांगकंपः अंतःपुरेषुहसतामबलाजनानामाचार्यएवभविताकुब्जवल्गितानां ॥ ३० ॥ कियद्द्विषामंशुकमाहृतंतेसहोदरेणेतिसखीभिरुक्ते मानोत्तरायाभृशमुत्तरायाकिमुत्तरंब्रूहितदुत्तरत्वं ॥ ३१ ॥ ॥ ॥

गुरूक्तंशिष्योनुवदति ॥ ३० ॥ हेउत्तर ते सहोदरेण एकोदरेण बंधुना द्विषां शत्रूणां अंशुकं वस्त्रं कियत् आहृतं आनीतं इतिउपहासवादे सखीभिः उक्तेसति भृशं मानेन उत्तरायाः वीरकुलोत्पन्नत्वाभिमानेन श्रेष्ठायाः उत्तरायाः तद्रा तत्समये उत्तरं किंतत् ब्रूहि तदोत्तरायामहतीमानहानिः स्यादितिभावः ॥ ३१ ॥ ॥ श्रीकृष्ण ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ५ ॥ ७

जीवन्नरो भद्रशतानि पश्येदिति वचनात् सुखेच्छुना प्राणरक्षणमवश्यं कर्तव्यं इति चेत्तत्राह अरठ इति तव जनकोपि अरठः वृद्धः यातमपि मातु-
ला अंतं मृत्युं अगुः प्रापुः नन्वहं एककः असि अत्र युद्धे यदि धैर्यं न यासि न प्राप्नोषि तर्हि इदं राष्ट्रं राज्यं ते वशे न भविष्यति तदधीन वायान स्यात् स्वीत्यर्थः
शत्रुपराजयं विना ते करस्थं न भविष्यतीति भावः २२ ततस्मात् साध्वसं भयं विजहीहि त्यज पाणौ कुरुष्व अपि नृणतां धनुः तृणतुल्यतां न कुरु मत्स्यपतेः म

जरठो जनकोपि मातुलाः शतमप्यंतमगुस्त्वमेककः यदि यासि न धैर्यमत्र तेन वशे राष्ट्रमिदं भविष्यति २२ तदिदं विजहीहि सा
ध्वसं कुरु पाणौ तृणतां कुरुष्व अपि तव मत्स्यपतेस्तु वाहिनीमुखभागे खलु वल्गनं क्षमं २३ ग० इत्याश्वास्य पितृवनाटवीतटमुपेत्य
शमीविटपिकोटिसमाटीकितकिरीटशंखचापनिषंगो जयलक्ष्मीपरिणयनयोग्यतां संपादयितुमिव खंडितषंढभागो यमारख
डलसूतो जिजतत्वव्याकरणात् स्मृतभापल्लवितधाष्टर्येन तेनैव सुदेष्णापत्येन परिकल्पितसारथ्यशिल्परथमारुह्य क्षणेन वारि
धिपूरस्य वडवावन्हिरिव सपत्नसैन्यस्य संमुखीनो बभूव ॥ ६॥ त्स्यदेशाधीश्वरस्य मीनश्रेष्ठस्य च तव तु वाहिनीमुखभागे सेनाग्रे नदीप्र

वाहाग्रभागे च वल्गनं चांचल्येन इतस्ततो गमनं क्षमं योग्यं ॥ २३ ॥ ग० इत्युक्त्या आश्वासितः पितृवनाटवीतटं श्मशानारण्यसमीपभागं उपेत्य शमी
विटपिकोटेः शमीवृक्षाग्रात् समाटीकिताः समानीताः किरीटश्च शंखश्च चापश्च निषंगौ च येन सः जयलक्ष्म्याः परिणयने विवाहविषये योग्यतां सं
पादयितुमिव खंडितः विसर्जितः षंढभावो नपुंसकत्वं येन सः अर्जुनः निजतत्वस्य स्वनामादिरहस्यस्य व्याकरणात् व्याख्यानात् शतधा अनेकप्र

कारेणपल्लवितं पुष्टीकृतं धार्ष्ट्यंपस्यतेनैव सुदेष्णापत्येनउत्तरेणपरिकल्पितं संपादितं सारथ्यशिल्पं सारथ्यचातुर्ययस्यतंरथमधिरुह्यक्षणेनवा-
रिनिधिपूरस्यसमुद्रपूरस्य वडवावन्हिरिवसपत्नसैन्यस्यशत्रुसैन्यस्य संमुखीनः संमुखगमनकर्ताबभूव॥ ६॥ एषः सव्यसाचीअर्जुनः संख्या
तीतं असंख्यं तत्कौरवाणां बलंसैन्यं अवेक्ष्य पुरः अग्रभागेतादृशि अलौकिकेचापेकिंचित्साचीभवंतीं तिर्यक्भवंतीं दृशंदृष्टिंविदधे चापग्रहणे-
च्छामकरोदित्यर्थः कीदृशः सव्यसाची पार्वत्यास्नेहयोः प्रीतितैलयोः द्वयेन आर्द्रंयुक्तंनिजपट्टवस्त्रस्यस्वकौशेयवस्त्रस्य शकलंखंडंस्वयंआत्म

पद्यं॥ संख्यातीतमवेक्ष्यकौरवबलंतत्सव्यसाचीपुनश्चापेतादृशिकिंचिदेषविदधेसाचीभवंतींदृशं॥
पार्वत्यानिजपट्टवस्त्रशकलंस्नेहद्वयार्द्रंस्वयंन्यस्यन्यस्यचिकित्सितव्रणशिरादेवोपियंश्लाघते २४ भस
सिप्रविसारिदेवदत्तेनरदत्तंध्वनितंतयादधाने मुमुहुर्द्विरदामुमूर्छुरश्वारथिनश्चुक्षुभिरेभयाश्वविभ्युः॥ २५॥

हस्तेनन्यस्यन्यस्यउपरिस्थापयित्वास्थापयित्वाचिकित्सितः शांतिंनीतः व्रणोयस्यतादृशंशिरोयस्यसदेवोपिशिवोपियं श्लाघतेव्रणव्यथांविस्मृ
त्यशिरश्चालनपूर्वकंश्लाघांकरोतिअन्येतुसुरासुरादयः श्लाघांकुर्वंतीतिकिमुवक्तव्यमित्यर्थः॥ २४॥ ततः देवदत्ते एतन्नाम्नि अर्जुनस्यशंखेन
भसिप्रविसारिविसर्पणशीलं नरेण अर्जुनेन दत्तं ध्वनितं शब्दंदधानेसतियुद्धारंभे अर्जुनेनशंखेवादितेसतीत्यर्थः द्विरदाः गजाः मुमुहुः मोहंप्रा ८
पुः अश्वाश्चमुमूर्छुः रथिनश्चुक्षुभिरे भयः वीराश्चबिभ्युः॥ २५॥ ॥ ६॥ ॥ ६॥ ॥ ७॥ ॥ ७॥

प्रकोष्ठयोः मणिबंधात् कूर्परपर्यंतं हस्तभागयोः पतिता ज्या मौर्वी यस्य सः अस्य अर्जुनस्य गांडीवः चापः कीर्व घोषयात्रासमये जातं गंधर्वयुद्धं आ

रभ्यकृतं मौनं समापयत् गंधर्वयुद्धानंतरं युद्धप्रसंगाभावेन गांडीवज्या शब्दाभावात् जातं मौनं इदानीं समापयत् सर्वः ज्याशब्दः कृत इति भावः

॥ ३६ ॥ गद्यं ॥ अथ करतलद्वयमेव मंडपः तस्मिन्कृतं तांडवं वाद्यसहितनृत्यं तेन तस्य गांडीवस्य विस्फारेण शब्देन अयं पांडवः अर्जुनः इति निश्चि

त्य लीलया अनायासेन अनिस्तीर्णः विस्तरः विस्तीर्णता यस्य तादृशः संधासिंधुः प्रतिज्ञासमुद्रो येन सोयं अर्जुनः पुनरपि निर्बंधं अस्मदीय पराभव

पर्यायेणास्य गांडीवः पतितज्यः प्रकोष्ठयोः गंधर्वयुद्धमारभ्य कृतं मौनं समापयत् ३६ ग० अथ करतलद्वयमंडपकृततांडवस्य गां

डिवस्य विस्फारेण पांडवोयमिति निश्चित्य लीलानिस्तीर्णविस्तरसंधासिंधुरयं पुनरपि निर्बंधमागत इत्य प्रधृष्यया निजेर्ष्यया रूक्षाः

विपक्षाः पूर्वपक्षा इव सिद्धांतमिव युत्थायतं पर्यवारयन् ७ प० विजयस्य रथे ततो निपेतुर्विमतानामिषवः परः सहस्राः जनमेजययागवे

दिमध्ये जगतां भीतिकरा इवाहिसंघाः ३७

ग्रहं आगतः प्राप्त इति अधृष्यया बलीयस्या ईर्ष्यया तदुत्कर्षासहनेन रूक्षाः कठिनाः विपक्षाः शत्रवः

कुरवः पूर्वपक्षाः आपाततः शास्त्रीयचोद्यानि सिद्धांतमिव तं अर्जुनं युत्थाय युद्धं कर्तुं पर्यवारयन् अवेष्टंत ७ प० ततः परः सहस्राः सहस्रेभ्यः परे अनंता इत्य

र्थः जगतां भीतिकराः विमतानां शत्रूणां इषवः बाणाः विजयस्य अर्जुनस्य रथे निपेतुः केकस्मिन्निव जनमेजयस्य रातः यागवेदेः मध्ये जगतां भीतिक-

राः अहिसंघाः सर्पसमूहा इव अनयोपमया बाणानामेव नाशोऽर्जुनस्योपसर्गाभावश्च व्यज्यते ॥ ३७ ॥ ॥ ७ ॥ ॥ ७ ॥

अथजगति एकवीरः जंभद्विषः इंद्रस्यतनयः अर्जुनोपि स्ववीर्यं स्वपराक्रमंजृंभयितुं वर्धयितुंजन्यं युद्धंसमारभत किंकुर्वन्निव शराणांपितृ
काननवासदोषं प्रत्यर्थिनांशत्रूणांरक्ततटिन्यां रुधिरनद्यांस्नपनैः भेत्स्यन्निव नाशयिष्यन्निव अन्योपिपदार्थदोषंगंगादिनद्यांस्नपनैर्नाशय
ति ॥३८॥ स्मरवामाः अप्सरसः चलंतः गच्छंतः येअश्वरथद्विपाः तेभ्यः उथ्यितान् रेणून् वरणस्रजांयुद्धमृतवीरवरणपुष्पमालानांमधुभिः
मकरंदैः शांतिंप्रणीयनीत्वासुखेन दृष्टःरणोयाभिस्ताःयथाभवेयुःतथागगनेसमीयुःआजग्मुः यासांवरणस्रजांमधुभिःपर्जन्योदकैरिव

जंभद्विषोपितनयोजगदेकवीरोजन्यंसमारभतजृंभयितुंस्ववीर्यं प्रत्यर्थिरक्ततटिनीस्नपनैःशराणांभेत्स्यन्निवायपितृका
ननवासदोषं॥३८॥ चलदश्वरथद्विपोत्थरेणून्वरणस्रङ्मधुभिःप्रणीयशांतिं सुखदृष्टरणायथाभवेयुःस्मरवामागग-
नेतथासमीयुः॥३९॥ कौंतेयकर्णहितयोपकंठमौहूर्तिकावेदितजैत्रयात्रैः आशातशल्यैरुरुधेःथभल्लैराशाकुबेरस्यचवैरिणांच
५०

सेनाधूलिःशांतिंनीता तावत्यं आगताइत्यर्थः असंख्याता आगताइतिभावः॥३९॥ अथकौंतेयस्य अर्जुनस्य यत्कर्णहितयुंतस्यउपकंठएव
समीपभागएवमौहूर्तिकःज्योतिर्वित्तेन आवेदिताकथिताजैत्रयात्रायेषांतैःअन्योपिज्योतिर्विदाकथितसमयेशत्रुजयार्थंगच्छति आशातानिस ९
मंतात्तीक्ष्णानिशल्यानिअयोमयाग्राणियेषांतैःभल्लैःबाणैःकुबेरस्यवैरिणांच आशाक्रमेणउत्तरदिग्जयेच्छावरुरुधे॥४०॥ ॥७

तेन शक्रसूतेन समीके युद्धे धनुषि चक्रीकृते सति अतिजवात् पुनः पुनराकर्णमाकर्षणेन वक्राकारे कृते सति तदा उत्धारः तूणीराभ्यां बहिर्निष्का सनं संधिः मौर्व्यालापनं परिमुक्तिः मोचनं च एतद्रूपाः अतिसृ षुमार्गणानां बाणानां क्रियाः आद्ये उत्धारसंधिरूपे उभे अपि क्रिये अंतिमया मुक्तिरू पक्रियया सायुज्यं ऐक्यं आपतुरिव सर्वदा बाणानां मुत्धारसंध्यदर्शनपूर्वकमुक्तिदर्शनात् पूर्वक्रिये अंतिमया क्रियया सायुज्यं प्राप्ते किमिति लोकैर मानीति भावः ॥ ५१ ॥ तत्र तस्यां युत्सी भ्मिसः अर्जुनः उच्छ्रिता[उच्चान् कटकेभ्यः गंडस्थलेभ्यः तटेभ्यश्च निःसृतं अंभः दानोदकं जलं च-

उत्धारसंधिपरिमुक्तिषुमार्गणानामाद्ये उभे अपि तदातिसृषुक्रियाः। सायुज्यमापतुरिवांतिमया समीके।
चक्रीकृते धनुषि शक्रसूतेन तेन ॥ ५१ ॥ युद्धसीम्नि भुजगर्वविभुषामुच्छ्रितान्कटकनिःसृतांभसः तत्र लक्ष्य
मकरोत्स कुंजरान् तस्य तातद्विपशैलसंचयान् ॥ ५२ ॥ कांडैरपातयदधः करिमंडलानां शुंडाः प्रचंडतरदोर्यु
धि पांडुसूनुः निद्रास्यतां निखिलवैरिमहीपतीनामुत्पादयन्निव पृथूरुपधानपंक्तीः ॥ ५३ ॥ ॥

एषां तान् कुंजरान् भुजगर्वस्य विभुषां लेशानां लक्ष्यं अकरोत् कः कानिव तस्य अर्जुनस्य तातः इंद्रः शैलसंचयानिव भुजपराक्रमलेशेन गजा नां विभेदेति भावः ॥ ५२ ॥ प्रचंडतरौ दोषौ भुजौ यस्य सः पांडुसूनुः युधि कांडैः बाणैः करिमंडलानां गजसमूहानां शुंडाः अधः भूतले अपातयत् - किं कुर्वन्निव निद्रास्यतां प्रस्वापनास्त्रेण निद्रां करिष्यतां निखिलानां वैरिमहीपतीनां पृथूः विपुलाः उपधानपंक्तीः शीर्षकपरंपराः उत्पादयन्निव

अन्योपिश्रीमतांसुखशयनार्थमुच्छीर्षकानिनिर्मिमीते॥४३॥विजयस्य अर्जुनस्य अस्त्रेणशस्त्रेणदत्तंकृतंविशालंरंध्रंछिद्रंदेहस्यमध्येदधानःम
हांतःकरिणःगजाःस्कंदस्यशक्त्याक्षतामेखलाकटकोयस्यतस्यक्रौंचस्यएतन्नाम्नःपर्वतस्यलीलांशोभांविवव्रुःवितेनुःअनेनंनिदर्शनालंका
रेणगजानामत्युच्चत्वमतिविपुलत्वंचव्यज्यते॥४४॥एकास्सरवधूःदेवांगनापतता आधोरणस्य हस्तिपकस्यशिरसासह अर्धमार्गेसंधान-
भाजिकबंधेकस्यचिद्वीरस्यमस्तकरहितशरीरेदिवंआकाशंउत्पतितेसतितस्मिन्स्रजंवरणमालांन्यस्य अवबद्धमौनात् शिरसिजीवाभा

विशालरंध्रंविजयास्त्रदत्तंदेहस्यमध्येदधतोमहांतः स्कंदस्यशक्त्याक्षतमेखलस्यक्रौंचस्यलीलांकरिणो
विवव्रुः॥४४॥आधोरणस्यशिरसापतताऽर्धमार्गेसंधानभाजिदिवमुत्पतितेकबंधे न्यस्यस्रजंसुरवधूर
वबद्धमौनात्तस्माद्भयाद्दिविपलायतदूरमेका॥४५॥ तुंगागजाश्चजवनास्तुरगाश्ववीरायोधाश्चतेननिहताभुवमाशुजग्मुः निद्रास्यतोनिबिडमत्रनरेंद्रसंघात्प्रागेवसम्यगवकाशजिघृक्षयेव॥४६॥ ॥

वेनधृतमौनात् तस्मात् तादृशपुरुषात् भयाद्धेतोःदिविआकाशेदूरंपलायत अत्रकविप्रौढोक्त्याद्भुतरसाविर्भावः॥४५॥तेनअर्जुनेननिहताःतुंगाः
उच्चाःगजाःजवनाश्चवेगवंतस्तुरगाश्चयोधाःवीराश्चतत्ररणांगणेनिबिडंनिरंतरंयथातथानिद्रास्यतःप्रस्वापनास्त्रेणनिद्रांकरिष्यतःनरेंद्रसंघात्प्रा
गेवआदावेवसम्यगवकाशस्थलंजिघृक्षयेवग्रहीतुमिच्छयेवआशुशीघ्रंभुवंआजग्मुःअन्योपिजनसंमर्देसतिसमीचीनस्थलंलाभायकथंदोस्थलंगृह्णाति॥

१०

निर्मित्य: ब्रह्मापुरासृष्टिसमयेगंगांसितां शुभ्रांरविसुतांयमुनांअसितांकृष्णांतयो:गंगायमुनयो:सहचरींसखींसरस्वतींपिशंगींपिंगलांचक्रे ... कृष्णाशोणारक्तातटिनीनदीचक्रुता इतिहेतो:अर्जुनेनबाणानां अलिभि:पंक्तिभि:असृक्सरितांरुधिरनदीनांव्रातंवितेनेकिल कृतं किं अनयोरितो ... संख्या असंख्यातंसैन्यं हतमितिव्यज्यते॥४७॥ कर्णच्छायास्तीत्युक्त्वा गवेषणस्य अन्वेषणस्यविषयेसति पुन:गांधाराधीशशकुनौचनिर्गंतुंयुद्धात्पलायितुं कृत:स्वीकृत:दिग्भ्रम:दिग्भ्रांतिर्येनतस्मिन्सति उत्तराभिमुखंगंतव्ये दक्षिणाभिमुखंगच्छतिसतीत्यर्थ:दुर्योधनेपिशकलितछत्रेछिन्नछत्रेसतिद्रो

गंगांसितांरविसुतामसितांपिशंगींचक्रेतयो:सहचरींचपुराविरिंचि: शोणाकृतानततटिनीतिकिलार्जुनेनबाणालिभि:शतमसृक्सरि तांवितेने ४७ कर्णेक्वेतिगवेषणस्यविषयेगांधारनाथेपुनर्निर्गंतुंकृतदिक्भ्रमेशकलितछत्रेपिदुर्योधने द्रोणेपिक्षपितध्वजकृतधनुर्भं गेपितस्यात्मजेमूर्छालेसरित:कृतेपियुधिसामम्लौकुरूणांचमू:४८ वीणामुनींद्रोविजयस्ययुद्धनीरंध्रभावेननिरीक्षमाण: आनंद जैरश्रुभिरेवचक्रेहस्तार्पितैराह्निककृत्यमत्र ४९

णेपिक्षपितध्वजेछिन्नध्वजेसतितस्यद्रोणस्य आत्मजे आश्वत्थाम्नि कृतधनुर्भंगेसतिसरि त:कृतेभीष्मेपिमूर्छाले प्रहारेणमूर्छितेसतिसाकुरूणांचमू:युधिमम्लौदीनाबभूव४८वीणयाउपलक्षित:मुनींद्र:नारद:विजयस्य अर्जुनस्ययुद्धनीरंध्रभा वेनएकाग्रतयानिरीक्षमाण:सन्अत्रगगनेहस्तार्पितै:हस्तेगृहीतै:आनंदेनजातै:अश्रुभि:नेत्रोदकैरेवआह्निककृत्यंसंध्यावंदनादिकर्मचक्रेकृतवान्युद्ध नेकपुरुदर्शीनारदोपि विजययुद्धचमत्कारदर्शनंत्यक्तुं अशक्नुवन् आनंदसमुद्रमग्नइतिभाव:॥४९॥ ॥७॥ ॥[illegible]॥

नभसि विस्मयार्णवस्य विभावरीविभुं पूर्णचन्द्रं विजयस्य विक्रमं वीक्ष्य वीक्ष्य अखिलाप्सरोगणैः सहसा अर्जुनेन भग्नमनोरथत्वात् रोषवतीउ
र्वश्यपि उत्तमांगं मस्तकं अकंपयत् मस्तकचालनपूर्वकं पुनःपुनः विजयपराक्रमश्लाघां चक्रे इति भावः॥५०॥ कुलिशायुधशास्त्री कस्य वृक्षः वपुः अ
स्त्रसात्कृतवतां शस्त्राधीनं कृतवतां धारातीर्थे मरणं प्राप्नुवतां सुभटानां वरणस्रजे वरणस्रगर्थं कुसुमात्यये सति पुष्पसमाप्तौ सत्यां विबुधानां देवानां

विस्मयार्णवविभावरीविभुं वीक्ष्य वीक्ष्य विजयस्य विक्रमं उत्तमांगमखिलाप्सरोगणे रुर्वशीनभसि साप्यकंपयत् ५०
वपुरस्त्रसात्कृतवतां सुभटानां वरणस्रजे विबुधचारवधूभ्यः कुसुमात्यये सति दलान्यपि दत्वा क्षपतामवाप कुलिशायु
धशाखी ५१ बाह्वोः प्रवृष्टकुसुमस्य ततो निलिंपैः प्रस्वापनास्त्रमहिमातिशयेन तस्य निद्रायते स्म निखिलारिपूर्णा युत्स्वा
वतीर्णमपनेतुमिव श्रमं स्वं॥५२॥

चारवधूभ्यः अप्सरोभ्यः दलान्यपि पर्णान्यपि दत्वा क्षपतां ह्रस्वशाखाशिफत्वं अवाप प्राप कल्पवृक्षोपि पुष्पपत्ररहितत्वं प्रापेत्यर्थः अनेनासंख्याता भट
हता इति व्यज्यते ५१ ततः युद्धानन्तरं निखिलारिपूर्णा पृतना सेना निलिंपैः देवैः बाह्वोः प्रवृष्टानि विकीर्णानि कुसुमानि यस्य तस्य अर्जुनस्य प्रस्वापनास्त्र
स्य महिम्नः अतिशयेन युद्धे अवतीर्णा प्राप्तं स्वं श्रमं अपनेतुं दूरीकर्तुमिव निद्रायते स्म निद्रां चकार अन्योपि स्वं श्रममपनेतुं निद्राति॥५२॥

॥ग०॥ ततः परिषदि सभायां समानीतायाः निजवध्वाः द्रौपद्याः परिभवानुरूपस्य फलस्य नग्नीभावरूपफलस्य प्रदित्सयेव दातुमिच्छयेव सारथि

ना उत्तरेण कृत्वा विद्विषां कर्णदुर्योधनादीनां अपहारितानि विविधानि परिधानानि अधोवस्त्राणि येन सः बीभत्सुः अर्जुनः गुरुप्रभृतिषु द्रोणभीष्मादि

षु दिवास्वापः धर्मशास्त्रनिषिद्धत्वात् दिवानिद्रा मा भूदिति कृपया मन्यमान इव पुनरपि तदस्त्रं क्षणादेव संजहार उपसंहृतवान् ॥५०॥ अथ अस्त्रोपसंहृमान

॥गद्यं॥ ततो बीभत्सुः परिषत्समानीतनिजवधूपरिभवानुरूपफलप्रदित्सयेव सारथिना विद्विषामप

हारितविविधपरिधानो गुरुप्रभृतिषु दिवास्वापो मा भूदिति कृपया मन्यमान इव पुनरपि तदस्त्रं क्षणादेव

संजहार॥५०॥ अथ दृशः परिमृज्य करांचलैररुणिताः परिमीलनमुद्रया प्रकटितास्यबिलैः पटुजृंभणात्

प्रबुबुधे कुरुराजचमूचरैः॥५३॥ पूर्वप्रयोगमुदिता इव तस्य बाणा निद्रां द्विषत्सु निखिला ददुरेव दीर्घां

पश्चात्प्रयुक्तममुनाहमितीव रोषात्प्रस्वापनं तु वितताार न तादृशीं तां॥५४॥ तरं परिमीलनमुद्रया अरुणिता आर

क्तीकृताः दृशः करांचलैः हस्ताग्रैः परिमृज्य परिशोध्य पटुजृंभणात् महाजृंभणात्प्रकटितानि आस्यबिलानि यैस्तैः कुरुराजचमूचरैः प्रबुबुधे प्रबु

द्धं॥५३॥ निखिलाः तस्य अर्जुनस्य बाणाः पूर्वप्रयोगेण प्रथमप्रयोगेण मुदिताः संत इव द्विषत्सु दीर्घां निद्रां ददुः अमुना अर्जुनेन पश्चात् युद्धसमाप्तो प्र

युक्तः अहमिति रोषादिव प्रस्वापनं अस्त्रं तु तादृशीं दीर्घां न वितताार न ददौ दीर्घनिद्रा मरणं शत्रुहिंसां विना विजयप्राप्तिरित्ययं चमत्कारः॥५४॥

कभा स:धार्तराष्ट्र:दुर्योधनस्तःसमितियुद्धे विराटसूतेन उत्तरेण आनीतानिचेलानि वस्त्राणियस्य तद्वपु:अनुशोच्यधिक्कृत्याकुलिशभृत:इंद्रस्य टी·स
१२ [illegible]भि:किंकरणात्लज्जातिशयजनकत्वेनैतद्युत्थापेक्षयाघोषयात्रायांबंधनंवरमित्यमन्यतेतिभाव:॥५५॥नग्नान्नृपतीन्निरीक्ष्य- ७
ह्रियाआर्ता:पीडिता:अमर्य:अप्सरस:नभसिपश्चाद्भागेविमर्दनयुत्थचमत्कारंद्रष्टुंआगतानांदेवानांवीरवर्णनार्थमागतानामप्सरसांचसंमर्दे
नवदनानिपरांचिपश्चात्कर्तुंअनीशा:असमर्था:सत्य:निमीलनविषयेअज्ञंअसमर्थंनयनंनेत्रंनिनिंदु:ब्रम्हणादेवजातेर्नेत्रनिमीलनंकृतंस्याच्चे

सतुवपुरनुशोच्यधार्तराष्ट्र:समितिविराटसूतापनीतचेलं कुलिशभृदनुजीविदत्तबंधांकुशलममन्यतघोषवाटयात्रां५५
पराञ्चिकर्तुंवदनान्यनीशा:पश्चाद्विमर्दननभस्यमर्य: निरीक्ष्यनग्नान्नृपतीन्ह्रियार्तानिमीलनाज्ञनयनंनिनिंदु:५६इति
परिभवलक्ष्म्यासंभृतांभोगमुद्रांतनुभिरभिदधाना:स्यास्नुभिर्नग्नभाव ध्वजपटशकलाग्रैःक्लृप्तकौपीनकृत्या:सबलदुहितृपुत्रा:
स्वांपुरीमत्यगच्छन्॥५७॥

तर्हीदानीमस्माभिस्तत्कृतंस्यात्तन्नकृत्वाव्यर्थमनिमिषत्वंकृत मितिमनस्यानीयनिनिंदुरितिभाव:॥५६॥इतिउक्तप्रकारेणपरिभवलक्ष्म्या
पराभवलक्ष्म्यासंभृतांसंपादितांभोगमुद्रांउपभोगचिन्हंनग्नभावस्यास्नुभि:स्थिरतराभि:तनुभि:अभिदधाना:ब्रुवाणा:प्रकटयंतइत्यर्थ:सबल १२
दुहितृपुत्रा:दुर्योधनादय:ध्वजपटशकलानांअग्रै:खंडै:क्लृप्तानिसंपादितानिकौपीनकृत्यानियैस्तथाभूता:संत:स्वांपुरींप्रतिअगच्छन्॥ ५७॥ ॥

[illegible] ॥ तदनु [illegible] नंतरं हरिदंगणेषु दिगंतेषु विश्रृंखलं यथा तथा विश्रमितः विश्रांतिं प्रापितः विजययशः स्वरवो यस्य सः निजायुधानां निक्षेपः [illegible]
[illegible] शिषु भूतकुटुंबेषु पिशाचकुटुंबेषु नवे नूतने समरे यद्रुधिरांजलिपानं तस्य परितृप्त्या किलिकिलितं [illegible] तज्जाता पकिलिकिलि [illegible]
[illegible] मनु भवितुकाम इव ज्ञातुकाम इव पुनरपि पितृवनं श्मशानं उपेत्य तरौ शमीवृक्षे निहितः स्थापितः शस्त्रसंभारो येन सः पुरा तु समभ्यागतेषु समागम
न आयातेषु गुणेषु आवामेव रणे यदद्भुतं तस्य दर्शनविषये त्वया प्रतिवंचिते इति उपालब्धुमिव तन्निद्राकर्तुमिव भूयोपि क्लैब्यसारथ्याभ्यां हाभ्यां गुणा-

॥ गद्यं ॥ तदनु हरिदंगणविश्रृंखलविश्रमितविजययशःस्वरवो निजायुधनिक्षेपरक्षिषु भूतकुटुंबेषु नवसमररुधिरांजलिपानप
रितृप्तिकिलिकिलितमनुभवितुकाम इव पुनरपि पितृवनमेत्य तरौ निहितशस्त्रसंभारः पुरा समायातेषु गुणेषु आवामेव रणा
द्भुतदर्शनप्रतिवंचितेति उपालब्धुमिव भूयोपि क्लैब्यसारथ्याभ्यां कृतानुषंजनः कुरुकुंजरो भूमिंजयमेवं जगाद ९ प० कुमारकेशी
कुमारकेशपाशं मुखे अश्रुणा मार्जय तातमार्गं तूण्या समं दोष्णि निधेहि चापं राशौ रूपर्यास्व रथ्ये पटानां ५८ भ्यां कृतं अनुषंजनं स्वीकारो यस्य सः कु-
रुकुंजरः अर्जुनः भूमिंजयं एतन्नामकमुत्तरं एवं वक्ष्यमाणं जगाद शमीतरौ आयुधानि स्थापयित्वा गृहीतपूर्वविषोऽर्जुनः उत्तरमुवाचेत्यर्थः ॥ ९ ॥ प० हाभ्या
तद्वचनमाह कुमारेति हे कुमार राजपुत्र केशपाशं केशसमूहं कोशीकुरु बधानेत्यर्थः मुखे अश्रुणः रोदनबाष्पस्य पातमार्गं पतनचिन्हं मार्जय हस्तेन परिमार्जय
[illegible] तूणीरेण सह चापं दोष्णि भुजमूले निधेहि रथे सकीपरथे पयनं प्रथम आनीतवस्त्राणां राशौ उपरि आस्व निषीद ॥ ५८ ॥ ॥ ५ ॥ ॥

धैर्यं बंधानधारय बंधुगोष्ठ्यां आप्तसभायां आत्मानमेव अरिजयस्य शत्रुपराभवस्य हेतुं कर्तारं वद मातुः पितुर्वा मंत्रिणां वा धुरि अग्रभागे मम तत्त्वगंध
अर्जुननामकस्य लेशमात्रमपि मा सूचय इति बृहन्नलया सारथ्यं कृतं मया शत्रूणां युद्धे पराभवः कृत इति धैर्येण ब्रूहीत्युवाचेत्यर्थः॥ ५९॥ ग॰ अथ तथेत्युक्त्या उप
गम्य ततः क्षतजपंकेन रुधिरकर्दमेन अरुणिता नेमिरेखा येषां तैः अत एव द्विषतां शत्रूणां औत्पातिकैः नाशसूचकोत्पातसंबंधिभिः अला

वधानधैर्यवद्बंधुगोष्ठ्यामात्मानमेवारिजयस्य हेतुं मातुः पितुर्वा धुरि मंत्रिणां वा मा तत्त्वगंधं मम सूचयेति॥ ५९॥ ग॰ अथ
तथेत्यभ्युपगम्य क्षतजपंकारुणितनेमिरेखैर्द्विषदौत्पातिककालचक्रैरिव परिभ्रमद्भिश्चक्रैः संक्रीडताश्वतांगेन परिगच्छ
न्नग्रेसरगोघटाखुरपुटकुट्टनत्रुटितधरणीतलोच्चलितरजोभाराक्रमणविनम्रीकृतपक्ष्मणापि कुरुभटजैत्रोऽयमिति विस्म
यबलविस्तारितेन चक्षुषा बृहन्नलामप्यनादृत्य मुहुर्मुहुरापिबद्भिः पौरैरनुगम्यमानो यमुत्तरो नलकूबरोऽलकामिव स्वां पु
रीं प्रविश्य परस्परोपमर्दनद्विगुणितबंदिवादित्रघोषेण महता राजमार्गेण पितुः सभामभिजगाम॥ १०॥ तचक्रैरिव ज्वलत्काष्ठच
क्रैरिव परिभ्रमद्भिः चक्रैः संक्रीडता कूजता शतांगेन रथेन पथि गच्छन् अग्रेसरायाः गोघटायाः गवां संहतेः खुरपुटानां कुट्टनैः आघातैः त्रुटितात् ध
रणीतलात् उच्चलितानां उद्गतानां रजसां भारेण आक्रमणात् विनम्रीकृते पक्ष्मणी यस्य तेनापि कुरुभटानां जेत्रः जेता अयमिति विस्मयबलेन
विस्तारितेन चक्षुषा बृहन्नलामपि प्रियसारथ्येन कुरुभटजेत्रीं तामपि अनादृत्य मुहुर्मुहुः आपिबद्भिः सादरमवलोकमानैः पौरैः अभिगम्यमानः तथ १२

यथा नलकूबर एतन्नामकः कुबेरपुत्रः अलकां एतन्नाम्नीं स्वनगरीमिव स्वां पुरीं प्रविश्य परस्परोपमर्दनार्थं अन्योन्यजयार्थं
मिथुनितः वादित्राणां वाद्यमानानां च घोषो यस्मिन्तेन महता राजमार्गेण पितुः विराटस्य सभां अभिजगाम ॥६०॥ प० अग्रे आदौ जयिनः पितुः पित्रर्थमित्यर्थः
पुरोपचाराः नगरमंडनार्थं संपादिताः पुष्पधूपादयः बभूवुः तान्येव पुष्पाणि त एव धूपाः त एव केतवः ध्वजाः त एव मणितोरणांकाः मणिमयद्वारोपरितोरण
चिन्हानि तस्य विराटस्य पुत्रस्यापि बभूवुः दक्षिणगोग्रहणे सुशर्मजेतुः पितुः कृते ये प्रातःकाले कृताः पुरोपचाराः त एवोत्तरगोग्रहणे कुरून् जित्वा म

॥पद्यं॥ तान्येव पुष्पाणि त एव धूपास्ते केतवस्ते मणितोरणांकाः पुत्रस्य तस्यापि पुरोपचारा बभूवुरग्रे जयिनः पितु
र्ये ॥६०॥ तदावनीन्द्रः प्रणतं कुमारमस्रैर्द्वयैरार्द्रतनुत्रमाजौ दोर्भ्यां द्विषद्बंधनखेदभाग्भ्यामपि प्रमोदाद्दृढमालिलिंग
६१ पार्थोऽप्युपानीय रथस्य गर्भात् पार्श्वस्थितायै पितुरुत्तरायै व्यादत्त पट्टांशुकमात्मसूनोः पाणिग्रहार्थं किल मंत्रवासः ॥६२॥

ध्याह्ने आगतस्य पुत्रस्यापि बभूवुः न तु नूतनाः कृता इत्यर्थः ६० तत्र सभायां अवनीन्द्रः विराटः आजौ युद्धे द्वयैः द्विविधैः अस्रैः रोदनाश्रुभिः रुधिरैश्च आर्द्रतनुत्रं
कवचं यस्य तं प्रणतं नमस्कुर्वाणं कुमारं पुत्रं द्विषद्बंधनेन सुशर्मकृतबंधनेन योः खेदः दुःखं तं नु भजतः अनुभवतः तथाविधाभ्यामपि दोर्भ्यां भुजाभ्यां प्रमोदा-
त् हर्षात् दृढं यथा तथा आलिलिंग ६१ पार्थोऽपि अर्जुनोऽपि रथस्य गर्भात् मध्यात् पट्टांशुकं कौशेयं वस्त्रं उपानीय पितुः पार्श्वस्थितायै उत्तरायै व्यादत्त दत्तवा
न् अंशुकमुवेक्षते आत्मसूनोः अभिमन्योः पाणिग्रहार्थं विवाहे कन्यां निश्चेतुं मंत्रवासः किल वाग्दानसमये दातव्यं मंगलसीहितवस्त्रमिव ॥६२॥ ॥

भा· टी·
५५ ५

कुमारः अन्यं अवशिष्टं अखिलं पटं आसक्देष्णं आवेटं सक्देष्णमारभ्य दासपर्यंतमित्यर्थः अंतःपुराय अंतःपुरवासिजनाय विभज्य यथायोग्यं विभागं कृत्वा ददौ मलीमसं मलिनं वासो यस्यास्तस्यै अपि सैरंध्र्यै न ददौ किं कृत्वा तां सैरंध्रिं बहूनां पटानां प्रभवः उत्पत्तिस्थानं अवलग्नं मध्यभागो यस्याः तत्तथाविधां संचिंत्य ज्ञात्वा अनेकदिव्यपटप्रसवित्र्यै एतत्पटप्रदानमयोग्यमिति ज्ञात्वा न ददावित्यर्थः ॥ ६३ ॥ विराटः समाजे सभायां अर्जुनं विना पांडुसुतान् धर्मादीन् चतुरः विस्मित्य विस्मित्य महाप्रतापिनोपि दास्येनेतरवत् स्थिता इति विस्मयं कृत्वा कृत्वा विलोकमानं पश्यंतं सूनुं पुत्रं नि

आवेटमन्यमखिलं पटमासक्देष्णमंतःपुरायसविभज्यददौकुमारः सैरंध्रयेनतुमलीमसवाससेपिसंचिंत्यतां
बहुपटप्रसवावलग्नां ॥ ६३ ॥ विनार्जुनंपांडुसुतान्समाजेविस्मित्यविस्मित्यविलोकमानं जिघ्रन्विराटस्मि
कुरेषुसूनुंजगादविन्यस्यनिजासनार्धे ॥ ६४ ॥ निपात्यपार्थान्कांतारेनिःसपत्नत्वमीयुषां कंठगल्लूयसेव
त्वंकोरवाणांत्वमेककः ॥ ६५ ॥ ॥ ॥ ॥ ॥

जासनस्य अर्धे विन्यस्य गृहीत्वा चिकुरेषु केशेषु जिघ्रन्सन् जगाद ॥ ६४ ॥ हे वत्स त्वं एककः कांतारे दुर्गमारण्ये पार्थान् निपात्य निक्षिप्य निःसपत्नत्वं ... प्राप्नुवतां कुरूणां कंठे गड्डुयसे गंडविलरोधकमांसगोलरोगवत् आचरसि निरोगिणः कस्यचित्पुरुषस्य कंठवि ... कुरूणां पार्तिदो जात इति भावः ॥ ६५ ॥ ॥ ॥ ॥ ॥ १२

बल्लवत्तमायाः नव्यंचतुलंगुरुंभुविनमार्गितुंलान्वेषितुंतादृशेसंमहारे युद्धेसुतंसारथिमपिसंरक्ष्यकन्यासुजन्मर्क्षजीवदिनयोः जन्मर्क्षगुरुवारयोः योग स्यमेतल्लेनस्यफलंज्योतिःशास्त्रोक्तंवक्तव्यमरूपंवदातुंकुरून्एत्यसंगम्य कथंकेनप्रकारेण अज्येष्ठाः विजितवानसि तस्मिन्युद्धे बृहन्नलारूपमास्थ रक्षणंतयानंकृतंस्याच्चेत्तर्हिइदानीसुत्तमायाः अन्वयसूत्रोरन्वेषणमस्माकंकर्तव्यंस्यात् किंचकन्याप्रार्थितवस्त्रदानार्थं कुरून् कथंजितवानसीत्यर्थः ६६ प॰ इतिप्रमोदात्हर्षात्चंचलेनपाणिनावरमांगपृष्ठपरामृश्य स्पृष्ट्वापुनःपुनःअनुयुंजानाय पृच्छते तानायविराटायसोदृष्णोयोपिउत्तरोपित्रपाप्रवाहस्यलज्जा

नव्यंगुरुंभुविनमार्गितुमुत्तरायाःसंरक्ष्यसूतमपितादृशिसंमहारे जन्मर्क्षजीवदिनयोगफलंचदातुंकन्यास्ववत्सकथमेतधुरून्व्यजेष्ठाः
६६ग॰ इतिप्रमोदचंचलेनपाणिनापरामृश्यवरमांगंपुनःपुनरनुयुंजानायतातायसोदृष्णोयोपित्रपाप्रवाहाभिमुखमवस्थातुमपारयन्नि
वविवलितकंधरोगिरमेवंविज्ञापयामास ११प॰ रोदःप्रसारिध्वनितमयाचक्रेधुरिद्विषां यावान्मेवेगसन्नाहस्तावांस्तत्रप्रदर्शितः॥६७

प्रवाहस्यअभिमुखंअवस्थातुंअपारयन्निवअशक्नुवन्निवविवलितकंधरःतिर्यक्कृतग्रीवः सन् एवंवक्ष्यमाणांगिरंविज्ञापयामास कुरूणांजेत्रीबृहन्नलातयाप्रदक्षणंकृतंमयातुकिमपिनकृतंनतत्रतातस्याविपरीतवादोलज्जाहेतुरितिभावः ११प॰ मयाद्विषांधुरिपुरोभागेरोदसोः द्यावापृथिव्योःप्रसारिप्रसारणशीलंध्वनितंसिंहनादःअथचरोदसारोदनेनप्रसारिध्वनितंआक्रंदःचक्रे यावान्वेगेनसंनाहः युद्धेसन्नद्धता। अथचपलायनार्थंवेगस्य सन्नाहः तावान्तत्रग्रामेप्रदर्शितः॥६७

॥श्रीकृष्ण॥ ॥५॥ ॥५॥ ॥५॥

नै॰भा॰ एकः अहं तस्मिन् रणे अपरैः अन्यैः अननुष्ठितां अनाचरितां रथिसारथिपत्तित्वेकर्तृतां त्वयामिस्म कृतवानस्मि प्रथमं पुरात् निर्गमनसमये रथित्वं मयाद्य टी॰स॰
१५ तस्मिन्नो युद्धसमये सारथित्वं कृतं ततः शत्रुसेनादर्शनेन भयात्पलायनसमये पत्तित्वं च कृतमित्यर्थः ६८ग॰ हे देवराजन् बहुना उक्तेन किं प्रयोजनं ॥ प॰ ७
आहवेषु [illegible] यातिषु शत्रुषु यत्मे कर्म युद्धादितत् अपार्थं व्यर्थं च पार्थरहितं नासीत् पुरः युद्धांतसमये विजयं शत्रुनयं अथ च पुरः रथाग्रे विजयं अर्जुनं
आदाय पुनः इमां पुरीं आगा आगमं ६९ग॰ यतींद्रकंके युधिष्ठिरे इति तादृशीं अधर्यां वचनचातुरीं भाषणकौशलं आकर्ण्य दुरोदरे तदानीं प्रवृत्तद्यूते प्रहारस्य-

अहमेको रणे तस्मिन् न परैरननुष्ठितां रथिसारथिपत्तित्वैस्त्वयामिस्म कर्तृतां ६८ग॰ अये देव किं बहुना ॥ प॰ अपार्थं कर्म मे नासीदाह
वे यद्यातिषु पुरो विजयमादाय पुनरागामिमां पुरीं ६९ग॰ इति तादृशीं तस्य वचनचातुरीमाकर्ण्य दुरोदरप्रहारवेदनामप्यविगणय्य नरलि
तेन शिरसा श्लाघमाने यतींद्रे वासरविरामशंसिनं यामशंखरवमाकर्ण्य यथोचितसभास्तारान् विसृज्य मेदिनीपतिर्मोदेन स्वदेष्णाप्रासादमास
सादः ७२

पाशकप्रहारस्य वेदनामपि अविगणय्य अगणयित्वा नरलितेन कंपितेन शिरसा श्लाघमाने सति मेदिनीपतिः विराटः वासरविरामशंसिनं सूर्यास्तसूचकं या
मशंखरवं महांतसूचकं शंखशब्दं आकर्ण्य यथोचितं यथायोग्यं सभास्तारान् सामाजिकान् विसृज्य गमने आज्ञां दत्वा स्वदेष्णाप्रासादं आससाद प्राप नरेंद्रे
युधिष्ठिरेण सह द्यूतक्रीडां कुर्वति आगतं विजयिनं पुत्रमुत्तरं मुहुर्मुहुः श्लाघमाने सति बृहन्नलायाः साहाय्ये सति किमपि नाश्चर्यमिति युधिष्ठिरः पुनः पुनः ज १५
गाद तदानीं क्रोधांधेन राज्ञा [illegible] क्लीबसाहाय्यं कुत्र अपि अकिंचित्करमित्युक्त्वा युधिष्ठिरभालोपरि दुरोदरपाशप्रहारः कृतः तेन तद्भालाद्रु [illegible] रसस्रावेति भारतीकथात्र

नुसंधेया॥१२॥प॰ सतावलोकेनकर्णनरेंद्रसूनुः मादेय्याया: सोदर्यत्वात् भ्रातृकीचकमरणात् च्युतानि गलितानि अखिलानि अश्रूणि येषां तेष्वपि विलोच
नांगेषु नेत्रात्मकानि अंगेषु नेत्ररूपांगदेशेषु च अतिहृष्टः संपदेसंपदे विभांडकापत्यविजृंभणायितं ऋष्यशृंगवदाचरितं यथा पुरा अंगदेशेषु अवृष्टौ सत्यां ऋष्यशृं
गऋषेरागमनेनातिवृष्टिरासीत् तथा पुत्रविलोकनेन सुधेष्णानेत्रयो: आनंदाश्रूणामतिवृष्टिरासीदित्यर्थः॥७०॥ अन्येद्यु: अन्यस्मिन् दिवसे आत्मजस्य उत्तरस्य
मुखात् अमीषां कंकवल्लवादीनां याथात्म्यं सत्यस्वरूपं पांडववत्वं वा अवगम्य ज्ञात्वा चकितचकितं भीतभीतं यथा तथा कुटुंबेन स्त्रीपुत्रादिना सह ससचिवान् पुरस्कृत्य

प॰ सुतावलोकेननरेंद्रसूनुश्च्युताखिलाश्रुष्वपिसोदर्यत्वात् विलोचनांगेष्वपिहृष्टिसंपदेविभांडकापत्यविजृंभणायितं॥७०॥ अन्ये
द्युरात्मजमुखादमीषांयाथात्म्यमवगम्यचकितचकितंकुटुंबेनसहससचिवान्पुरस्कृत्यसभामागतोविराटोनागंतरसंनिधानादिवहायनमेकै
कमनुसर्पद्भिःस्वैःस्वैर्वर्षैःप्रत्यासन्नेनसोदर्यजनेनसमुपास्यमानस्ययुधिष्ठिरस्यचरणनलिनयोःपलितंभावुकेनमौलिनामरालयुवकेलिमु
ल्लुलयांचकार॥७१॥ प॰ तदानुनोदस्मितपांडुरिम्णातपःसुतोक्ष्णक्ष्मनिहेतुमुग्रं महेंद्रसूनोर्द्विषिशोणिमानमात्स्यस्यचित्तेपिवनीलिमानं॥७२॥

सभां आगतः विराटः नामांतराणां कंकवल्लवादीनां सन्निधानात् सान्निध्यादिव एकैकं हायनं संवत्सरं अपसर्पद्भिः दूरं गच्छद्भिः स्वैःस्वैः वर्षैः सह प्रत्यासन्नेन समीप
मागतेन सोदर्यजनेन बंधुजनेन समुपास्यमानस्य सेव्यमानस्य युधिष्ठिरस्य चरणनलिनयोः पलितंभावुकेन जरसा शुक्लीभूतेन मौलिना मस्तकेन मरालयूनः तरुणहंस
स्य केलिं लीलां उल्लुलयांचकार प्रकटयामास यथा हंसः कमलवने शोभते तथा नतिसमये युधिष्ठिरचरणकमलयोः विराटस्य जरसा शुभ्रं मस्तकं शुशुभे इत्यर्थः॥७१॥ प॰ तदा

नतिसमये [illegible]सुतः धर्मराजः स्मितस्य ईषद्धास्यस्य पांडुरिम्णा शुभ्रतया अक्षस्य पाशस्य क्षतिः व्रणः हेतुः कारणं यस्य तं उग्रं भयंकरं महेंद्रसूनोः अर्जुनस्य दृशिनेत्रे शोणि
मानं क्रोधजन्यरक्तत्वं मात्स्यस्य विराटस्य चित्ते नीलिमानं महात्मनां पांडवानां सेवकतया स्वगृहे स्थापनेन कालुष्यं च नुनोद दूरीचकार शुभगुणाधिक्यं नान्येषां स्त[illegible]दिशु
णानामा[illegible]भवतीति प्रसिद्धं एवं च धर्मराजस्य स्मितसूचितक्रोधविकाराभावेनार्जुनस्य आस्य प्रहारजन्यक्रोधस्य विराटस्य दासग्रहणजन्यलज्जाहेतुकचिंतोद्गम
तायाश्च निराकरणं जातमिति भावः ७१ ततः प्रमुदितः मात्स्यः विराटः शौरिः श्रीकृष्णो बंधुवर्गैः सह समुपेयुषि प्राप्तवति सति महिते शुभगुणविशिष्टे अद्रिः शिरीषकुसुमाद

मात्स्यस्ततः प्रमुदितो महिते हि कन्यां शौरौ समेयुषि सह्याखिलबंधुवर्गैः मृद्वीं शिरीषकुसुमादपि पार्थसूनोः सौमाद्रिलामतनुत प्रथमाश्रमस्य ७२
तथोपचारं विदधे स कृष्णाजानिः स पार्थेषु समाधवेषु तमेव गांधारपतिं यथा ते जानीयुरत्यंतकृतोपकारं ७३ अथोल्लासयकुरून्नेतानृहरिर्मात्स्य
पुराद्ययौ मंदारप्रमुखान्वृक्षान्वसंत इव नंदनात् ७४॥ ॥इति सप्तमस्तबकः समाप्तः॥ पि मृद्वीं कन्यां उत्तरां पार्थसूनोः अभिमन्योः प्रथमाश्रमस्य ब्र

ह्मचारित्वाश्रमस्य सौमाद्रिलां सीमांतसूचकपाषाणं अतनुत चकार कन्यां दत्वाभिमन्युं गार्हस्थ्याश्रमवंतं चकारेत्यर्थः ७२ सः कृष्णाजानिः विराटः समाधवेषु कृष्णस
हितेषु पार्थेषु तथा तेन प्रकारेण उपचारं सत्कारं विदधे चकार यथा ते सकृष्णाः पार्थाः तमेव राज्यापहरणेनापकारिणमेव गांधारपतिं शकुनिं अत्यंतं कृतः उपकारो येन तथा
भूतं जानीयुः शकुनिना राज्यापहरणपूर्वकारण्यवासो नाकरिष्यत एतदुपचारा अस्माभिर्लब्धा इति मन्येरन्नित्यर्थः ७३ अथ अभिमन्युविवाहानंतरं हरिः एतान् कुरू
न् पांडवान् उल्लासयन् आनंदयित्वा मात्स्यपुरात् विराटनगरात् ययौ द्वारकां प्रति जगाम क इव वसंत इव यथा वसंतः मंदारप्रमुखान् कल्पवृक्षान् उल्लासयन् विकसितान्
कृत्वा नंदनवनात् गच्छति तद्वत् ७४॥ ॥ इति सप्तमस्तबकः समाप्तः॥७॥ १८

अथभारतचंपौअष्टमस्तबकःप्रारभ्यते॥

श्रीगणेशायनमः॥ अथाष्टमस्तबकप्रारंभः॥ ॥यावदभिमन्युविवाहोत्सवोजातस्तावत्कौतुकवता साम्परायोत्साहवतापांडुसुतेनयुधिष्ठिरेण युधियुद्धेप्रको
ष्ठांगणेप्रतिबंधकूर्परभागे एकांज्यांमौर्वींनर्तकींकर्तुं अपरांज्यांभूमिंभुजभुविभुजांगणेचिरस्थबहुकालंस्थास्नुस्थिरतरांकर्तुंयुद्धकर्मणाभूमिस्वकीयांक
बाहुबलेनतद्रक्षणंकर्तुमित्यर्थः आहूताःक्षितिपाःराजानःउन्मदेःमदस्राविभिःद्विपैःविराटनगरींप्रापुः केकैःकामिव प्रावृड्वासरसंचयाःवर्षाकालिक
दिनसमुदायाःघनैःसहमहाद्रेःतटीमिव॥१॥ पार्थस्युत्थायसेनानांयावतीःयावत्संख्याकाःअक्षौहिणीःदधौबभार धार्तराष्ट्रःदुर्योधनश्चपुनःचतसृभिःअ

तावत्पांडुसुतेनकौतुकवताकर्तुंप्रकोष्ठांगणेज्यामेकांयुधिनर्तकींभुजभुविस्थास्नुंचिरस्थापरां आहूताःक्षितिपाविराटनगरींसैन्यद्विपै
रुन्मदैःप्रावृड्वासरसंचयाइवघनैःप्रापुर्महाद्रेस्तटीं १ सेनानांयावतीःपार्थायुत्थापाक्षौहिणीर्दधौ धार्तराष्ट्रश्चतसृभिस्तावतीरधिकाःपुनः
२ उक्ताध्वप्रवृत्तांतमुवाचशल्यंपार्थस्ततोभानुसुतस्ययुद्धे आक्षेपवाचाहृदयंवितक्षन्नन्वर्थतामावरमातुलेति ३

धिकाःयावतीःतावत्संख्याकाःदधौ
युधिष्ठिरस्यमित्रनृपसेनानांसप्ताक्षौहिण्योमिलिताःदुर्योधनस्यतुएकादशाक्षौहिण्योमिलिताइत्यर्थः॥२॥ततःपार्थःधर्मराजःउक्तःअध्ववृत्तांतःहेदुर्योधन
तेसहायंकरिष्यामीतिवाग्दानरूपमार्गवृत्तांतोयेनतंशल्यंप्रतिवक्ष्यमाणमुवाच इतीतिकिं हेमातुल युद्धेभानुसुतस्यकर्णस्यहृदयंअंतःकरणंउरस्थलंच
आक्षेपवाचाधिक्कारवाक्यवितक्षन्व्यथयन्भिंदन्वसन् अन्वर्थतांशल्यनामार्थयुक्तत्वं आवरसंपादयेति कुंतबाणादीनांलोहमयाग्रंशल्यपदार्थःधर्मराज
नआहूतमार्गावंपुंसमातुलेशल्यंमार्गेसानुकूल्यार्थंगुप्तमत्याकृतातिथ्यात्संतुष्टंप्रतिदुर्योधनःसाहाय्यंयथाप्येनकरिष्यामीतिवाग्दानंकृतंइत्यध्ववृत्तांतः॥३॥

॥ गद्यं ॥ अथ भागिनेयेषु भागिनीपुत्रेषु पांडवेषु वत्सलतया स्नेहेन सत्यसंगरः सत्यप्रतिज्ञः शल्यः तथैव करिष्यामीति प्रतिश्रुत्य प्रतिज्ञाय ॥ १ ॥ पद्यं ॥ सः मद्राधिपः शल्यः हे युधिष्ठिर मां तव मद्राय कल्याणं कर्तुं निद्रामुचं जागरूकं विद्धि जानीहि इति ब्रुवन् सन् द्राक् द्रुतं पार्थात् सकाशात् दुर्योधनांतिकं समीपं जगाम ॥ ४ ॥ युद्धे साह्याय साह्यं कर्तुं सरसीरुहाक्षं श्रीकृष्णं वरीतुं कामो यस्य सः बलवैरिसूनुः अजातशत्रोः युधिष्ठिरस्य गां आज्ञावचनं अव

॥ गद्यं ॥ अथ भागिनेयेषु वत्सलतया सत्यसंगरस्तथेति प्रतिश्रुत्य ॥ १ ॥ पद्यं ॥ मद्राय तव मां विद्धि निद्रामु
चमिति ब्रुवन् मद्राधिपो ययौ पार्थात् सद्राग्दुर्योधनांतिकम् ॥ ४ ॥ ततः ॥ साह्याय युद्धे सरसीरुहाक्षं वरीतु
कामो बलवैरिसूनुः अजातशत्रोरवतंसयन् गां तुंगध्वजां द्वारवतीमयासीत् ॥ ५ ॥ म॰ तत्र चिरदृष्टस्य कुंजरकु
मारकोमलचंक्रमविलासस्य तस्य विलोकनाय वीथीषु वीथीषु जनाः संघीबभूवुः ॥ २ ॥ ॥ ॥

तंसयन् मूर्ध्नि गृह्णन् बह्वादरं कुर्वन्नित्यर्थः तुंगध्वजां उच्चध्वजां द्वारवतीं द्वारकां अयासीत् अगमत् ॥ ५ ॥ गद्यं ॥ तत्र द्वारकायां चिरदृष्टस्य बहुकालेन दृष्टस्य कुंजरकुमारस्य कलभस्येव कोमलः सुंदरः चंक्रमविलासो गमनविलासो यस्य तस्य अर्जुनस्य अवलोकनाय वीथीषु वीथीषु रथ्यासु रथ्यासु जनः संघीबभूव समुदितो बभूव ॥ २ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

पद्यं॥ सुभद्रायाः हरणे हेतुं तदीयां अर्जुनीयां यतिलबुद्धिं यतिलं संपाद्य तस्याः हरणं कर्तव्यमिति बुद्धिं हृदि अंतःकरणे कुर्वतीनां गवाक्षमार्गैः कृतवीक्षणानामिस्तासां स्त्रीणां मुखमेवेंदुः तस्मिन् स्मितमेव शुभ्रत्वादुज्वलत्वाच्च चंद्रिका आसीत् तं दृष्ट्वा सुभद्राहरणे यतिवेषधारणस्मरणेन हास्यं चक्रुरित्यर्थः॥ ६॥ तत्र दौवारकैः द्वारेभियुक्तैः पुरुषैः दत्तमार्गः सः अर्जुनः निकेतनमध्ये गृहमध्ये निद्रायमाणस्य शौरेः श्रीकृष्णस्य चरणोपधानं शय्यासंबंधिचरणस्थापनार्थमुपबर्हं अगात् अगमत् सेवकभावेन प्रभोः चरणास्थितिभागे जगामेत्यर्थः कीदृशं चरणोपधानं तस्य कृष्णचरणस्य गर्भे अंतर्भागे यासिं

॥पद्यं॥ हेतुं सुभद्राहरणे तदीयां यतिलबुद्धिं हृदि कुर्वतीनां गवाक्षमार्गैः कृतवीक्षकाणां स्त्रीणां मुखेंदोः स्मितचंद्रिकाभूत्॥ ६॥ दौवारिकैस्तत्र स दत्तमार्गो निद्रायमाणस्य निकेतमध्ये शौरेरुपायाच्चरणोपधानं तद्गर्भ सिंधुच्युतकूर्मशोभं॥ ७॥ यस्याधिमौलिसविधे प्रथमं समेत्य तिष्ठन्कुरूद्वहसुतो युधिसाह्वमर्थी रेजे परीक्षितुमिवोत्सुकतां दधानस्तत्कुंतले निजमनस्यपि वक्रिमाणं॥ ८॥ ॥ ॥ ॥ ॥

धुः गंगानदी तस्याः सकाशात् च्युतः भ्रष्टः यः कूर्मः तद्वत् शोभते तत्॥ ७॥ युधिसाह्वं अर्थयते सो अर्थी कुरूद्वहसुतः दुर्योधनः प्रथमं एत्य आगत्य यस्य श्रीकृष्णस्य सविधं अधिमौलि शिरोभागे तिष्ठन् सन् तस्य कुंतले शिरोरुहे निजमनस्यपि स्वमनसि च वक्रिमाणं वक्रत्वं निरीक्षितुं उभयोर्वक्रत्वं समानमथवा न्यूनाधिकं वर्तते इति द्रष्टुं उत्सुकतां दधान इव रेजे शुशुभे॥ ८॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

निमीलनेन आलिंगितं युक्तं नेत्रयुग्मं यस्य निष्पंददेहः यः श्रीकृष्णः स्वध्यानशैल्याः निजध्यानरीत्याः स्मरसमाश्रितानां प्रभुक्तां तपस्विनां संघं
मुकुर्वन् निरतरां अनेन गाढनिद्रां प्राप्तइवविभाव्यते ॥ ९ ॥ घुसृणेन काश्मीरजेन कुंकुमेन क्लृप्तः रचितः देव्याः रुक्मिण्याः कुचात् सकाशात् यदीये क
पोलफलके गल्लफलके सक्तः संलग्नः मकरः मीनध्वजस्य मदनस्य अरेः शिवस्य जयिनो विजयाय अर्जुनाय सिद्धिं युद्धे जयसिद्धिं वितरणपदेशे

निमीलनालिंगितनेत्रयुग्मो निष्पंददेहो नितरां बभौ यः स्वध्यानशैलीस्मरसमाश्रितानां तपस्विनां संघमि
वानुकुर्वन् ॥ ९ ॥ देवीकुचाद्धिसृष्टघुसृणेन क्लृप्तः सक्तः कपोलफलके मकरो यदीये मीनध्वजारिजयि
नो विजयस्य सिद्धिं विश्राणयेति निगदन्निव कर्णमूले १० पाश्चात्यपायोनिधिपार्श्वभागे संपूर्यकुक्षिं सलिलस्य
पूरैः स्वजातियूथाच्युतिमाश्रितस्य क्रमं दधौ यो घनशावकस्य ॥ ११ ॥ ॥ ॥

ति कर्णमूले कर्णोपांते निगदन्निव रेजे शुशुभे स्वप्रभोः मदनस्य शत्रोः शिवस्य जेतुरर्जुनस्य हि नाशासनं मकरस्य युक्तमेव ॥ १० ॥ यः श्रीकृष्णः
पाश्चात्यपायोनिधेः पश्चिमसमुद्रस्य पार्श्वभागे पार्श्वदेशे सलिलस्य पूरैः कुक्षिं संपूर्य स्वजातियूथात् स्वजातीयानां मेघानां समूहात् च्युतिं भ्रंशं
आश्रितस्य प्राप्तस्य घनशावकस्य मेघार्भकस्य क्रमं रीतिं दधौ श्यामवर्णत्वात् सजलमेघार्भकवत् बभौ इत्यर्थः ॥ ११ ॥ ॥ ९ ॥ ॥ ९ ॥

॥गद्यं॥ ततः उभयोः आगमनानंतरं प्रबुद्धेन गतनिद्रेण तेन देवेन श्रीकृष्णेन तयोः सुयोधनार्जुनयोः प्रथमागमदर्शनाभ्यां सुयोधनस्य प्रथमागमनं चरणदेशे स्थितस्य अर्जुनस्य स्वप्रबोधसमये प्रथमदर्शनं च ताभ्यां कृत्य साम्यं कर्तव्यसाम्यं हृदि हृत्स्यमनसि कृत्वा रणांगणे गृहीतहेतीनां गृहीतशस्त्राणां नवकोटिसंख्यावतां गोपकुमाराणां कदंबेन समूहेन केनचिदंशेन भागेन केवलं सन्निधानेन शस्त्ररहितकेवलं समीपस्थेन स्वेनापि क्रमेण परिपूरितो मनोरथो ययोस्तौ सुयोधनधनंजयौ स्वस्य आवासः स्थितिर्यस्यां तां कटकभुवं सेनावासभुवमासेदतुः॥ २॥ पद्यं॥ तौ शौरिः श्रीकृष्णः शक्रत

॥गद्यं॥ ततः प्रबुद्धेन तेन देवेन तयोः प्रथमागमनदर्शनाभ्यां कृत्यसाम्यं हृदि कृत्वा रणांगणे गृहीतहेतीनां नवकोटिसंख्यावतां गोपकुमाराणां कदंबेन केनचिदंशेन केवलसन्निधानेन स्वेनापि केनचिदंशेन परिपूरितमनोरथौ सुयोधनधनंजयौ स्वावासकटकभुवमासेदतुः २॥ प॰ सेनागजेंद्रमदसौरभवीचिवेगनिर्धूतगोग्रहणसंयुगपूतिगंधं संवीक्ष्य मत्स्यवसुधेंद्रपुरोपकंठं शौरिश्च शक्रतनयश्च ननंदतुस्तौ॥ १२॥ ॥ ॥

नयः अर्जुनश्च सेनागजेंद्राणां मदसौरभस्य दानोदकसुगंधस्य वीचीनां लहरीणां वेगेन निर्धूतः दूरीकृतः गोग्रहणयोः दक्षिणोत्तरगोग्रहणयोः यौ संयुगौ संग्रामौ तयोः पूतिगंधः मृतगजतुरंगमनुष्यादिदुर्गंधो यस्य तं मत्स्यवसुधेंद्रपुरस्य विराटनगरस्य उपकंठं समीपदेशं संवीक्ष्य ननंदतुः हृष्टवंतौ तत्कारणात् आगतौ कृष्णार्जुनौ युद्धायुक्तसेनां वीक्ष्य ननंदतुरितिभावः॥ १२॥ ॥७॥ ॥७॥ ॥७॥

अथ सेनासंनाहानंतरं पांडवानां युधि युद्धविषये उग्रं उत्साहं दृप्तानिवृत्य वदतः संजयतः निशम्य श्रुत्वा कुरुवंशकेतुः कुरुकुलश्रेष्ठो धृतरा ष्ट्रः मणिसौधतले रत्नमयसौधाधोभागे वसन्नपि वातैर्विनापि भृशं अत्यंतं अकंपत उग्रयुद्धोद्योगं श्रुत्वा स्वपुत्रादिमरणभयेन भृशमकंप तेति भावः वंशयष्टिध्वजस्तु वातेन कंपते अयं तु वातैर्विनापि गृहमध्यस्थितोपि अकंपतेत्याश्चर्यं वातकारणं विनापि कंपकार्यकथनात् वि-

दृप्तानिवृत्य वदतो युधि पांडवानामुत्साहमुग्रमथ संजयतो निशम्य वातैर्विनापि मणिसौधतले निवासं कुर्व न्नकंपत भृशं कुरुवंशकेतुः ॥ १३ ॥ पांडोः सुताय वसुधां प्रविभज्य दित्सोः प्रज्ञादृशो रहसि सांत्वपथोपदिष्टं दु र्योधनस्तु वचनं न चकार कर्णे कर्णे स्वमेव वचनं मधुरं चकार ॥ १४ ॥ ॥ ॥ ॥

भावनालंकारः विभावना विनापि स्यात्कारणं कार्यजन्म चेदिति ॥ १३ ॥ दुर्योधनस्तु वसुधां प्रविभज्य पांडोः सुताय दित्सोः दातुमिच्छोः प्रज्ञादृ शः अंधस्य धृतराष्ट्रस्य रहसि सांत्वपथेन साममार्गेण उपदिष्टं वचनं कर्णे न चकार जग्राह वचनं श्रुत्वा तदनुसरणं नैव कारेति भावः अपि तु कर्णेरा धेये स्वं स्वकीयमेव मधुरं वचनं चकार स्वमनोभिलषितं मंत्रं कर्णेन सह चकारेत्यर्थः ॥ १४ ॥ ॥ ॥ ॥ ॥ ॥

॥गद्यं॥ तदनु तदनंतरं दिनेदिने समुपचीयमानानां नानाविधानां अनेकप्रकाराणां नरपतिकुलचतुरंगबलानां कलकलान् अपि अभिभवद्भिः परा
जयमानैः कंकाः गृध्रविशेषाश्च काकाश्च सालावृकाः श्वानश्च जंबुकाश्च तेषां कदंबकानां समूहानां रटितैः विकृतशब्दैः कटूकृतौ भयंकरीकृतौ नि
कटौ ययोस्तयोः कुरुविराटपुटभेदनयोः हस्तिनापुरविराटनगरयोर्मध्ये कतिपयदिनैरेव अल्पदिनैरेवेत्यर्थः पंचवीराः खलु पौरवाणां साम्राज्य

॥गद्यं॥ तदनुदिनेदिने समुपचीयमान नानाविधनरपतिकुलचतुरंगबलकलकलानप्यभिभवद्भिः कं
कंकाकसालावृकजंबूककदंबकरटितैः कटूकृतनिकटयोः कुरुविराटपुटभेदनयोः कतिपयदिनैरेव
पंचखलुवीराः पौरवसाम्राज्यलक्ष्मीमभिवीक्ष्यस्यानुभवशिष्येरन्निति किंवदंत्यांप्रवहंत्यांसत्यांक्षिति
पतिः क्षीणधैर्यो दीनाक्षरः सहोदरसमक्षं सरोरुहाक्षमेवं व्याचचक्षे॥ ४॥ ॥ ॥

लक्ष्मीमभिवीक्ष्य भोग्यतयाभिवीक्ष्य अस्यानुभवशिष्येरन् अनुभविष्यन्ति इति किंवदंत्यां जनमुखतो वार्तायां प्रवहंत्यां अविच्छेदेन चलं
त्यां सत्यां क्षितिपतिः धर्मराजः क्षीणधैर्यः दीनाक्षरश्च सन् सहोदराणां भीमादीनां समक्षं यथा नया सरोरुहाक्षं श्रीकृष्णं एवं वक्ष्यमाणप्रका
रेणोक्तवान् ॥ ४॥ ॥श्रीकृष्ण॥ ॥[illegible]॥ ॥[illegible]॥ ॥[illegible]॥ ॥[illegible]॥ ॥[illegible]॥

हे पाल एतावतः पुरुषार्थैर्मिलितान्बहूनित्यर्थः बंधुजनान् भ्रात्रादिसंबंधिजनान्निहत्य लब्धया अनया भुवा मम किं भवेत् कंदमूलनिर्झरसहितानि तानि वि- सप्रसिद्धानि मम वनानि अद्यापि न संति किं कंदमूलफलपान सहितवनवासेन मम सखं यथा भवेत् तथा बंधुवधपूर्वकसाम्राज्योपभोगेनैव भवेत् मे सुखमहद्दुःखं स्यादिति भावः ॥१५॥ संतापकाले उष्णकाले सति घर्मे अंभः घर्मोदकं अधस्तादधोभागे पतति इति हि इत्येव प्रसिद्धिः अद्य जलं मे जि-

॥पद्यं॥ एतावतो बंधुजनान्निहत्य किं लब्धया कुष्णभुवाधुना मे सकंदमूलानि सनिर्झराणि न किं ममाद्यापि वनानि तानि ॥ १५ ॥ संतापकाले सति घर्ममंभः पतत्यधस्तादिति हि प्रसिद्धिः जिह्वां विहायाद्य जलं मुहुर्मे दृष्टिं समारोहति चित्रमेतत् ॥ १६ ॥ गलत्समीरैर्गजकर्णतालैर्नटत्पटेभ्यो नगरध्वजेभ्यः तनूरिदानीं मम तातकांति साकंपनाम्ना यमसावधीते ॥ १७॥

ह्वां विहाय दृष्टिं नेत्रं अधिरोहति इत्येतत् विचित्रं आश्चर्यं जलस्याधि- म्नगामित्वं स्वभावः तं त्यक्त्वोर्ध्वं गच्छतीत्याश्चर्यं भविष्यद्बंधुमरणशोकेन जिह्वा शुष्का जाता दुःखेन नेत्रे बाष्पपूर्णे भवत इति भावः ॥ १६ ॥ इ- दानीं तातकांतिः म्लानकांतिः असौ मम तनूः गलंतः निर्गच्छंतः समीराः येभ्यस्ते गजानां कर्णा एव तालाः कालक्रियामानसूचकवाद्यविशेषाः ते- भ्यः तथा नटंतः नृत्यंतः पटाः येषां तेभ्यः नगरध्वजेभ्यः सकाशात् आकंपनाम्नायं आकंपनवेदं अधीते मिलितपट्टसेनागजानां ध्वजैः मम शरीरे भ- येन कंप आविरासीदिति भावः ॥ १७॥ ॥श्रीकृष्ण॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

टी० भा०

५

अहमखिलस्य जंतोः प्राणिनः आनंदयित्रीं स्वां स्वकीयां अंतः क्षमां अंतः स्थापराधसहनरूपां मोहादज्ञानात् अपहाय त्यक्त्वा बंधूनां आप्तानां प्रणाशात् अतिदुःखदाय्यैव बहिः स्थितायै क्षमायै पृथिव्यै स्पृहयामि इच्छामि अतः मां धिक् यथा कश्चिदन्यो गृहस्थं समीचीनं पदार्थं त्यक्त्वा बहिः स्थितं तुच्छपदार्थं इच्छति तद्वदिति भावः ॥१८॥ हे गरुडध्वज अधुना त्वया विना अस्याः विपदः विपत्तेः विधूतये निराकरणाय मे अन्या गतिर्नास्ति एतद्दि

आनंदयित्रीमखिलस्य जंतोरंतः क्षमां स्वामपहाय मोहात् बंधुप्रणाशाद्भृदुःखदोग्ध्र्यै बहिः क्षमायै स्पृहयामि धिङ्मा ॥१८
गतिर्न मेऽन्या गरुडध्वज त्वया विनाधुनास्या विपदो विधूतये वनानलार्चिर्वलयावृतिस्थितेर्बलाहकात्किं शरणं मृगीशिशोः ॥१९
बहुभिः किमिहापरैः प्रलापैर्बहिरंतश्च वदामि तुल्यभावः कुकुराधिपबंधुभिर्मम स्वैः कुरुसंधिं कुरुवंशभूतये त्वं २०

दृष्टांतमाह वनेति वनान
लार्चिषां दावाग्निज्वालानां वलयेन आवृतो आवरणे स्थितिर्यस्य तस्य मृगीशिशोः बलाहकात् मेघं विहाय त्यक्त्वा लोपे पंचमी किं शरणं रक्षकं अस्ति यथा ए
तादृशस्य मृगबालस्य मेघो रक्षकस्तथा मम त्वमित्यर्थः ॥१९॥ इह एतादृशे अपरैः बहुभिः प्रलापैः भाषणैः किं बहिः आचरणे अंतः मनसि च तुल्यभावः अहं
प्रसिद्धं वचनमाह हे कुकुराणां यादवविशेषाणां अधिप कृष्ण त्वं कुरुवंशस्य भूतये कल्याणाय मे स्वैः स्वकीयैः बंधुभिः सह संधिं कुरु ॥२०॥ ५

योगिभिः विचिंत्यंनतुइत्थंवैभवंयस्यसः यदुनायकः इतिउक्तप्रकारेणब्रुवंतंयुधिष्ठिरं अब्रवीत् हेमहीपते भवतायत्समीरितंउक्तं इदंवचनं भवादृशां
भवादृशानां महात्मनांउदारमनसांयुक्तं॥२१॥सःकौरवःदुर्योधनःसरिदात्मजेनभीष्मेणाशासितःशिक्षितःसन्नपिदुरध्वंदुर्मार्गंनजहातिइतिचिंतयतःम
महृदिमनसिअधुनासिद्धिःसामसिद्धिःसंशयेशायाखलुसंशयेस्थितैव॥२२॥ हेनृपतथापिप्रयत्नेंद्रियेःजितेंद्रियेःपणायितस्य स्तुतस्यसंसिद्धयेप्रयत्नेप्र
यत्नंकरोमि मत्प्रयत्नेनापिसिद्धिर्भविष्यतिइतिनिश्चयोनास्तीत्याह फलतिइति क्रियासामादिप्रयोगःक्वचित्स्थलेफलति क्वचिन्न फलति प्रविधातुःकिं

इतिब्रुवंतंयदुनायकोब्रवीद्युधिष्ठिरंयोगिविचिंत्यवैभवः महीपतेयद्भवतासमीरितंमहात्मनांयुक्तमिदंभवादृशां २१ सरिदात्मजशा
सितोपिसन्सदुरध्वंनजहातिकौरवः इतिचिंतयतोममाधुनाहृदिसिद्धिःखलुसंशयेशया २२ प्रयतेतथापिनृपसंधिसिद्धयेप्रयतेंद्रियैर्बु
विपणायितस्यते फलतिक्वचिन्नफलतिक्वचित्क्रियाप्रविधातुरेषनहिदोषसीकरः २३ इत्थंनिगद्यमधुरस्मितमीक्ष्यमाणोभीमस्यवक्त्र
मपिदारुकनीतमग्रे आरुह्यरत्नरथमाश्रितरक्षलीलाकूलंकषोहरिरगात्कुरुराजधानीं २४ याप्रयोक्तुःपुरुषस्यएषःदोषस्यक्रियानैष्फल्यरूप

दोषस्यशीकरः लेशःनहिनास्त्येव अनेनस्वावतारस्यभूमिभारभूतदुष्टराजन्यसंहारकर्तृत्वात् स्वगमनेनप्रस्तुतविग्रहकृत्यावपिस्वस्यधर्मराजस्यचदोष
भावःसूचितः२३आश्रितरक्षणलीलयास्वभक्तरक्षणलीलयाकूलंकषःपरिपूर्णःहरिःइत्थंनिगद्यउक्त्वामधुरस्मितंभीमस्यवक्त्रमपिईक्षमाणःसन् मधुरम
धुरस्मितंइतिईक्षणक्रियाविशेषणंअग्रेदारुकेणनीतंमाणितंरत्नरथंआरुह्यकुरुराजधानीं हस्तिनापुरींप्रमात् अगमत् धार्तराष्ट्रपार्श्वं...[illegible]

तेषाम् भगवदवतारस्य दुष्टनिग्रहकलाकउभयसिद्धेर्विग्रहाधीनतान् साध्याकर्षं प्रेत्यतीविशीमप्रजे मिलाविर्भावः २४ तुरीसति सद्य एव सकला-
नितमसां अज्ञानानां अंधकाराणांच कुलानि शमयन् महतुमहः प्रतापः तेजश्च यस्य सः श्रीकृष्णः तत्र नगर्यां विदुरस्य मंदिरं निवेश अभीषुमान् सूर्योपिच
रमाद्रेः अस्ताचलस्य कंदरं गुहां विवेश। सूर्यास्तसमये विदुरगृहं जगामेत्यर्थः॥२५॥ क्षेपकटीका॥ अनिमेष पौरजनता स्तब्धदृष्टि पौरसमूहः तयानिरंत
रां पूर्णां प्रतोलिकां॥ १॥ कंसवैरिणि गेहं समेयुषि आगते सति क्षत्तुः विदुरस्य अतिशायितं मदेन हर्षजन्यानवधानेन नृत्तं नर्तनं पुरारेः शिवस्य साध्यः सं

तमसांकुलानिसकलानिदर्शनिसतिसद्य एवशमयन्महामहाः सविवेशातत्रविदुरस्यमंदिरंचरमाद्रिकंदरमभीषुमानपि २५॥ क्षेपकः॥
अवलोकयन्नथपुरप्रतोलिकामनिमेषपौरजनतानिरंतरां मृदुयाननेषु सदुरासदः पौर्यदुराजएषविदुरालयंययौ १ कंसवैरिणिसमेयु
षिगेहं क्षत्तुरातिशायितं मदनृत्तं संक्षिपांगमयतिस्मपुरारेः साध्यताडवविधेरवलेपं २६ विरतः कृत्वितांविशुद्धमङ्क्षविधिमाधायपितृष्व
सुः सकाशे वसतोस्य निशैववासा समाप्रोद्व सुदेवात्मभुवः कथानतास्ताः २७॥ ध्यायांभवोयः ताडवविधिः तस्य अवलेपं गर्वं संक्षिपां संक्षे
पं गमयतिस्म निनाय आतिशायितमित्यत्र स्वार्थेण्॥२६॥ अङ्क्षा विरते संध्याकालस्य उचितं विशुद्धं विधिं संध्यावंदनाद्यनुष्ठानं आधाय कृत्वा पितृष्व
सुः पृथायाः सकाशे वसतः निषण्णस्य वसुदेवभुवः कृष्णस्य सा निशैव समाप्नोत् समाप्ता नातास्ताः वसुदेवदेवक्यादि संबंधिन्यः कथाः नस
माप्ताः॥२७॥ ॥श्रीकृष्ण॥ ॥९॥ ॥९॥ ॥९॥ ॥९॥ ॥९॥

॥क्षेपकटीका॥ अथ पृथासूतकथायामिव रजन्यां विगतायां सत्यां अनेनैव क्रमेण पदद्वयं उपमानोपमेयभावेन संयोज्य अर्थेन तृतीयपदेन संबंध

॥क्षेपकमाद्यं॥ ॥अथविगतायांरजन्यामिवपृथासूतकथायांदीनद्युतिषुतारकाकलापेष्विवप्रदीपेषुजृंभि
तेषुशकुंतिभिरिवबंदिभिःकलकलेषुविकासितेषुनलिनेष्विवनयनेषूत्पलादिवमहोत्पलराजनगराद्वि
दुरमंदिरमागतेषुचंचरीकेष्विवसारिकेषुविरोचनइवकमलविलोचनःप्राचीनगिरेरिवपर्यंकादुत्तस्थौ
॥१॥ ॥श्रीगोपालकृष्णायनमः॥ ॥ ॥ ॥ ॥ ॥

[illegible]मानिलापनरीति [illegible] उत्पलानां चंद्रविकासिकमलानां दोषात् अलं सूर्यविकासि [illegible] कमलमिव चंचरीकेषु [illegible] ष्विव सारिकेषु [illegible] ॥१॥ ॥७॥

अन्येषुः परदिवसे मुकुंदः अखिलं अहरारंभकृत्यं प्रातःकालिकस्नानादिकृत्यं अवसाय्य समाप्तं कृत्वा महता राजपथेन सयोधनादिभिः चतुर्भिः दुर्यो

॥ गद्यं ॥ अन्येद्युरखिलमहरारंभकृत्यमवसाय्य बालातपेन बलाहकइव घुसृणमसृणितेन पटीरपंकेन चर्चितकलेवरः पंकेरुहग्राकिंनीभिरंचललिखितराजहंसराजिभिरवकृष्यमाणेनेव पीतांबरभागेन परिचुंबितप्रपदपल्लवो निजोदरांतरानवकाशतया बहिर्गतैर्जगदंडशिशुभिरिव मुक्ताफलैः प्रसुप्तमेखलामुखभागो वर्षाहेमंतसमयोरप्यविनश्वरं लक्ष्मीलीलाकमलमुपश्लोकयितुमागतेन चद्रिमणिबिंबेनेव कौस्तुभेन देदीप्यमानभुजांतरो दनुजपरिषदोत्पातिकरक्तपरिवेषेणेव पद्मरागकेयूरेण परिमंडितबाहुदंडो द्वारि निर्गत्य सयोधनदुर्वासितायाः नगरभुवः स्पर्शनं परिहर्तुमिव सविनयमुपागतेन दारुकेण संयोजितमणिपादुकः किंचिदवनमितपूर्वकायेण विदूरेणावितीर्यमाणहस्तावलंबो गुरुरूपमुखैर्ब्राह्मणैः प्रतिपद्यमानां जयाशिषं शिरसा प्रतिगृह्णानः कुशलप्रश्नप्रकारकितमोदाभ्यां कुरुराजदेवव्रताभ्यां सदनाभिगमनायसंप्रार्थ्यमानश्चिरमवसरं प्रतिपालयतामक्षौहिणीपतीनामंजलिवनजावलिमवलोकनेन संभावयमानो मुकुंदो [illegible] परिपठ्यमानकंसादिवधविरुदावलिप्रबंधबंधुरेण मंगलकुसुमगंधसंपदंधीकृतपुष्पंधयझंकारसहचरवादित्रघोषेण मेघवर्जमुन्मिषंती [illegible] भिरिव कनक [illegible] संकुलितेन महता राजपथेन सयोधनादिभिश्चतुर्भिरध्यासितपूर्वं सभामंडपं शनैः शनैरवजगाहे ॥ ५ ॥ ॥ ॥

[illegible] पुरुनिभिः अध्यासितपूर्वं पूर्वमधिष्ठितं सभामंडपं शनैः अवजगाहे प्रविवेश रूपं [illegible] पथेन वंदिवृंदेन [illegible] पठकसमूहेन

७

[illegible]विकदामलिमयंथा तैः बंधुरेण आकुलेन वयामं मल्लकुसुमानां [illegible] संपद्य अधीकृता [illegible]

[illegible] तेषां प्रकाराः तज्जातीयशब्दाः तेषां सहस्वरैः तैः सह वर्तमानः वादित्रघोषाभेर्यादिशब्दो यस्मिन् [illegible] घघर्जयाउन्मिषंतीभिः प्र

[illegible]भिः सौदामिनीभिरिव कनकवेत्रलताभिः सेवककरधृतसौवर्णयष्टिभिः आकुलितेन व्याप्तेन कथंभूतो मुकुंदः [illegible] अवकुव्यमाणे

नेव पीतांबरभागेन परिचुंबितः युक्तः मपद्पल्लवः पल्लवसदृशापादाग्रभागो यस्य सः अत्र सुकुमारत्वरक्तत्वधर्मसाम्येन पादस्योपरि [illegible]रोपः पुनः कथंभू॰

निजोदरांतरे अनवकाशितया अवकाशाभावेन बहिर्गतैः बहिःस्थितैः जगदंडानां ब्रह्मांडानां शिशुभिरिव मुक्ताफलैः मत्सुम [illegible] कटिसूत्र

[illegible]यस्य सः ॥पु॰ वर्षाहेमंतऋतुकालेपि अविनश्वरं लक्ष्म्याः करस्थितलीलाकमलं उपस्मेरयितुं तुल्यासंमानयितुं आगते न सुपा[illegible] कौस्तुभे न दे

दीप्यमान भुजांतरं यस्य सः पुनः कथं॰ दनुजपरिषदः दैत्यसभायाः उत्पातेन विनाशसूचकेन रक्तपरिवेषेणेव पद्मरागकेयूरेण माणिक्यखचितांगदेन परि

मंडितः परितः भूषितो बाहुदंडो यस्य सः पुनः कथंभू॰ सुयोधनस्य दुर्वासः दुष्टस्थितिः संजाता यस्यास्तस्या नगरभुवः स्पर्शनं परिहर्तुं वर्जयितुमिव द्वा

भिर्निर्गत्य अग्रतो गत्वा सविनयमुपागतेन दारुकेण संयोजिते मणिप्रचुरे पादुके यस्य सः पुनः कथं॰ किंचिदवनमितः पूर्वकायः शरीरपूर्वभागो येन तेन

विदुरेण वितीर्णबाधाः दीयमानः हस्तावलंबो यस्य सः पुनः कथं॰ गुरुरूपमुखैः ब्राह्मणैः प्रतिपाद्यमानां दत्तां जयेत्याशिषं शिरसा प्रतिगृह्णानः पुनः क॰

कुशलप्रश्नेन [illegible]कितमोदाभ्यां उदितहर्षाभ्यां कुरुराजदेवव्रताभ्यां धृतराष्ट्रभीष्माभ्यां सदनाभिगमनाय संप्रार्थ्यमानः पुनः क॰ चिरं अवसरं दर्शनव-

[illegible] कनेन संभावयन् [illegible] कुर्वाणः ॥५१॥ ॥[illegible]॥

चं·भा· पद्यं॥ तत्रसभामध्येतरसासंभ्रमेणउपनीतेअतितुंगेरत्नासनेरचितोपवेशः निषण्णः पुराणः पुरातनः पुमान् अयंकृष्णः पुरोहितैः अग्रसुविप्रदत्तां टी·स·

८ दत्तांपूजांगंधपुष्पादिपूजापदार्थानुउपादत्तस्वीचकार॥ २८॥ तत्रसभायाः अंतरेमध्येसमग्राकांतिः कमनीयतायस्यतंसरोरुहाक्षं कृष्णंसंवीक्ष्यसंवी

क्ष्यनगरीजनेषुनरेंद्रवर्ज्यंधृतराष्ट्रंविनाकस्यपुरुषस्यनयनयोःप्रमोदः आनंदोनाभूत् अपितुधृतराष्ट्रस्यांधत्वात्तंविनासर्वस्यापिनयनयोरानंदोभूदि

॥ पद्यं ॥ तत्रातितुंगेतरसोपनीतेरत्नासनेयंरचितोपवेशः पुरोहितैरग्रसुविप्रदत्तांपूजामुपादत्तपुमान्पुराणः
॥ २८ ॥ सभांतरेतत्रसमग्रकांतिंसंवीक्ष्यसंवीक्ष्यसरोरुहाक्षं नरेंद्रवर्ज्यंनगरीजनेषुनकस्यवाभून्नयनप्रमो
दः॥ २९॥ भद्रासनादवनतंपदपल्लवाग्रंसंवाहयत्युपगतेविदुरेदयार्द्रः सामाजिकेबुधजनेसतिदत्तकर्णेप्र
ज्ञादृशंगिरमभाषतपद्मनाभः॥ ३०॥ अल्पैरहोभिरधियुध्यमवेक्ष्यनंक्ष्यच्चांद्रंकुलंतवसतैः सहपांडवानां॥
संधिंविधातुमधुनासमयेविधेयंप्राप्तोहमस्मिभरतर्षभतेसकाशं॥ ३१॥ त्यर्थः॥ २९॥ दयार्द्रः दयालुः पद्मनाभः उपगते

विदुरे भद्रासनात् सिंहासनात् अवनतंअधस्तादागतंपदपल्लवाग्रंसंवाहयतिमर्दयतिसतिसामाजिकेसभास्थितेबुधजनेचदत्तकर्णेप्रज्ञादृशंभृपव

तिसति प्रज्ञाचक्षुंअंधंनृपंधृतराष्ट्रंअभाषत ३० हेभरतर्षभभरतवंशश्रेष्ठअल्पैः अहोभिः दिवसैः अधियुद्धंयुद्धमध्येनंक्ष्यत्नाशंप्राप्स्यत्चांद्रंकुलंयो ८

[illegible]ज्ञाता अहमधुनासमयेअस्मिन्कालेविधेयंकर्तव्यंपांडवानांवकसतैः सहसंधिंकर्तुंतेसकाशंसमीपमागतोस्मि॥ ३१॥ ॥ ७॥ ५

हे गेयकीर्ते कुशलोदयाय कल्याणप्राप्तये तनूभवानां पुत्राणां शतेन कुंतीकुमारान् संधत्स्व संधेहि कुरु केन कमिव कलिंदजायाः यमुनायाः कल्लोलजालेन महो
र्मिसमूहेन सह गंगां तरंगानिव ॥२२॥ नाहमेव विज्ञापयामि अपितु पंचापि कुंतीपुत्राः साष्टांगनतिपूर्वं विज्ञापयंतीत्याह पादारविंदे इति पांडोः कुमाराः भव
त पादारविंदे शिरोभिः शतंशतं प्रणतीः नमस्कारान् अर्पयंतः संतः एवं वक्ष्यमाणप्रकारेण भवंतं विनीतपूर्वं विनयपुरःसरं विज्ञापयंति स्मेत्यव्ययं वाक्यालंका
रेणातीतकालद्योतनार्थं अन्यथा विज्ञापनायाः परोक्षता स्यात् ॥२२॥ अमी वयं वने जाताः भवतः अंकभूमौ उत्संगस्थले संवर्धिताः इन्दिनीताः न

शतेन संधत्स्व तनूभवानां कुंतीकुमारान्कुशलोदयाय कल्लोलजालेन कलिंदजाया गंगां तरंगानिव गेयकीर्ते २१ पादारविं
दे प्रणतीः शिरोभिः शतंशतं सादरमर्पयंतः पांडोः कुमाराश्च भवंतमेनं विज्ञापयंति स्म विनीतपूर्वं २२ जाता वने च वयममी
भवदंकभूमौ संवर्धिताः शिरसि शासनमादधानाः निस्तीर्णसंगरपयोनिधयस्त्वयाद्य स्याप्याययथांशमवनेरवनेऽवने वा २४

वशासनं आज्ञां शिरसि आदधानाः धारयंतः निस्तीर्णः संगरपयोधिः द्वादशवर्षवनेवासः त्रयोदशे वर्षे अज्ञातवासः एतद्रूपः यैनिस्तीर्णसमुद्रो यै
स्तथाभूता स्मः अधुनैव यथांशं अवनेः अवनेरक्षणे स्थाप्याः अथवा वने स्थाप्याः दायादानामस्माकं पैतामहराज्यार्धं स्थापयितव्यमिति भावः
इत्येतत्पर्यायेनेष तत्त्वमित्याज्ञापनीयमित्यर्थः ॥ २४॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

इदानीं [illegible] नवर्[illegible] सनु[illegible] पांतेषां [illegible] पालनकर्मणि एकापि धात्री उपमाता पृथ्वी न [illegible]
प[illegible] इत्येवं इत्यमेव शोकं अनिशं हृदये अंतःकरणे दधान: त्वं संप्रतिसुतस्याधान्या: अर्धमपि न दित्ससि न दातुमिच्छसि शतशोधान्यैः पांडवानां रक्षणा-
र्हास्तत्र एकापि नासीदिति महद्दैन्यं तेषां जातं इति पूर्वं शोकमकार्षीः इदानीं धान्यार्धमपि दातुं नेच्छसीति महान् लोभस्तवसमुत्पन्न इति भावः २५ नृपतिः धृतरा-
ष्ट्रः दीर्घं निश्वस्य इत्यमुक्तप्रकारेण ब्रुवाणं एनं यदुवीरं बभाषे तदेव भाषणमाह व्यरंसिषमिति हे वत्स इमं व्यध्वं दायार्हाणां पांडवानां दायासमर्पणरू

बाल्येवनांतजनुषांममपांडवानामेकापिरक्षणविधौनबभूवधात्री इत्येवशोकमनिशंहृदयेदधानस्तस्यास्त्वनार्धमपिसंप्रतिदित्स
सितं॥२५॥ इत्थंब्रुवाणंयदुवीरमेनंनिश्वस्यदीर्घंनृपतिर्बभाषे व्यरंसिषंव्यध्वमुंविमुंचविमुंचवत्सेत्यनुशास्यशौरे॥२६॥
मधुमथननिमीलितामुनींद्रैममजननीखलुपुत्रवत्सलासा मुखमहमनवेक्ष्यमूर्खसूनोर्मुदमधिकामधुनायथादधामि॥२७॥

पं दुर्मार्गं विमुंच विमुंच त्यज त्यज इत्यनुशास्य अनुज्ञाप्य हे शौरे व्यरंसिषं क्रमेण तूष्णीमभूवं पुनस्य पुरतो मत्यम्भो न चलतीति भावः २६ हे मधुमथन मुनींद्रैर्व्या
सेन मीलिता पुत्रीकर्तव्य संगमसमये कृतनेत्रनिमीलना सा मम जननी पुत्रवत्सला पुत्रस्नेहवती खलु यथा हेतुभूतया जनन्या अहं मूर्खसूनोः मुखं अनवेक्ष्य अंध
[illegible] अधुना अधिकां मुदं दधामि धारयामि मृतभर्तृकायाः मम मातुरनपत्यत्वात् वंशनाशे प्राप्ते देवरात् सुतोत्पत्तिः कर्तव्येति शास्त्रमनुसृत्य पितामह्या
[illegible] व्यासनीदेवरेण व्यासेन सह संगमकाले नाहमंधः समुत्पन्नः येन दुष्टपुत्रमुखमनवेक्ष्य मुदं [illegible] इति भावः॥२७॥ ॥१०॥ ९

[illegible] अथ स तो दुर्योधनः स्वयमपि न विबुध्यते कर्तव्याकर्तव्यं न जानाति स्म मतिजनस्य [illegible] नापि वाचं शृणोति पुनर्व [illegible] तात्पर्यः कुरुकुलस्य यः कुशलांकुरः कुशलोदयः तस्याभिवृद्ध्यै गुणगणानां वारिनिधिः त्वमेव गतिः शरणं असि त्वयैव [illegible] स्मत्कुल
स्य रक्षणं [illegible] विष्यति नान्यथेति भावः॥ ३८॥ गद्यं॥ बद्धांजलौ कृतांजलौ राजनि इति त्वयैव अस्य वंशस्य रक्षणं कर्तव्यमित्युक्तप्रकारेण सिद्धांतित

स्वयमपि न विबुध्यते स्म तोयं स्म मतिजनस्य शृणोति नापि वाचं कुरुकुलकुशलांकुराभिवृद्ध्यै गुणगणवारिनिधे गति
स्त्वमेव ॥ ३८॥ गद्यं॥ इतिसिद्धांतितवति बद्धांजलौ राजनि निजासनार्धनिवेशितकरतलतया किंचिदुन्नमितवामभुजशिखरेण
गंडमंडलेनिमज्जितमकरकुंडलं कटितटचलनकंदलितकांचनपटमर्मरमीषत्कंधरां विनिवर्त्य ॥ ६॥ ॥ ॥

वति सिद्धांतं कुर्वति सति निजासनार्धे निवेशितं स्थापितं करतलं येन तस्य भावस्तत्ता तया किंचिदुन्नमितं उच्चीकृतं यत् वामभुजस्य शिखरं ऊर्ध्वभागः तेन
गंडमंडले कपोलमध्यभागे निमज्जितं मकराकारं कुंडलं यस्मिन् कर्मणि यथा तथा कटितटस्य चलनेन कंदलितः वलिमान् कृतः यः कांचनपटः सुवर्णतंतुमयदुकूल
[illegible] ॥ ६॥ [illegible] ॥६॥ [illegible] ॥७॥

चं·भा· टी·क्र·
१० ८

प॰कंसवैरीकुरूणांसंसदिसभायांकौरव्यंदुर्योधनंआह कथंभूतंकौरव्यं कूतंकृतंस्मितंहास्यंयेनतंरविभुवाकर्णेन कृतःहस्ततालःहर्षात्तस्यत्तोपरि हस्तताडनंयेनतंधुरिअग्रभागेदुःशासनेनदूषितःसंधिपक्षोयस्यतंकर्णोपकंठेश्रोत्रसमीपभागे वलितंअधरंउपांशुमंत्रकरणात्वलिताधरोष्ठंमातुला- स्यंशकुनिमुखंयस्यतं धृतराष्ट्रंप्रतिकथ्यमानवचनंहेलयाअशृण्वंतमाहेतिभावः॥३९॥ हेकौरवदुर्योधन पृथासुतेभ्यःतदीयांपृथिवींपुनर्दिशदेहि इतिब्रुवतःगुरोःपितुःगांवाणींअशृण्वतःतेतवएषासंभूतिःउत्पत्तिःशशिनःअन्ववायेवंशेकथंवाजातेतिशेषःगुरोर्वचनातिक्रमणकर्तात्वमस्मि

कूतस्मितंरविभुवाकृतहस्ततालंदुःशासनेनधुरिदूषितसंधिपक्षं कर्णोपकंठवलिताधरमातुलास्यंकौरव्यमाहकुरु संसदिकंसवैरी॥३९॥पृथासुतेभ्यःपृथिवींतदीयांपुनर्दिशेतिब्रुवतोगुरोर्गां अशृण्वतःकौरवतेकथंवासंभूतिरेषाशशि शिनोन्ववाये॥ ४०॥ तत्तादृशंशृणुमहत्तववंशवृत्तंपूरुर्ददौनववयःपितुरात्तजीर्णः त्यक्त्वाश्रमंपितृमुदेतृणवद्द्वितीयं यंदेवव्रतोयमिहतिष्ठतिधीरधीरः॥ ४१॥ ॥ ॥ ॥

वंशेकोपिनोत्पन्नइतिभावः॥४०॥तत्ता दृशंअनिर्वचनीयंमहत्तववंशस्यवृत्तंशृणु पितुःययातेःसकाशात्आत्तंगृहीतंजीर्णंवार्धक्यंयेनसःपूरुःत्वद्वंशोपूर्वजातोराजानववयःतारुण्यंतस्मै ददौ तथायंदेवव्रतःभीष्मःपितृकृतेजनकशांतनुकृतेद्वितीयंआश्रमंगृहस्थाश्रमंविवाहमित्यर्थःतृणवत्त्यक्त्वा इहलोकेधीरेभ्यःसकाशात्धीरःबुद्धि १०
मान्धैर्यवान्वासन्तिष्ठति पूर्वाद्योस्मिन्वंशेपितृवचनानुसरणंकृत्वाकीर्तिमंतोजाता इतिभावः॥ ४१॥ ॥[illegible]॥ ॥[illegible]॥

र्णयोः कितवोक्तिभिः धूर्तैरवलोक्तिभिः किसलितस्य संजातकिसलयस्य तदाकर्णनपरश्रवणस्य तव मनोरथः तदा सफलोऽभवेत् हरिनंदनेन अर्जुनेन युधि पातितं ताडनार्थं निक्षिप्तं धनुः गांडीवं हरमस्तकात् नोन्ममज्ज चेत् न बहिरागतमासीत् चेत् यतोऽर्जुनेन युद्धे हरप्रसादेन प्राप्तं गांडीवं धनुः क्षिप्तं नत्तव कितवैः सहमंत्रितमनोरथसिद्धिर्नैवभवेदिति भावः ॥ ५२ ॥ क्षेपकः ॥ ५३ ॥ अयं कुरूणां वंशः महितः पूज्योऽस्ति अस्मिन्वंशे कलंकं धर्तुं द्वौ स्थि

कितवोक्तिभिः किसलितस्य कर्णयोः सफलोऽभवेत्तव नदा मनोरथः हरिनंदनेन युधि पातितं धनुर्हरमस्तकान्न पुनरुन्ममज्ज
चेत् ॥ ५२ ॥ क्षेपकः ॥ बंधूपदिष्टं न शृणोषि वत्स संधानमस्मिन्न तवाद्य दोषः गंधर्वराजेन कृतं वनांते बंधं पुनर्मुक्तवतोऽहितेषां ५३ ॥ वंशः कुरूणां महितोऽयमस्मिन् धर्तुं कलंकं चतुरौ खलु द्वौ एकत्र कोटौ रजने रथीशः परत्र मन्ये पुरुषो भवांश्च ॥ ५४
॥ गद्यं ॥ इति भगदित वति भगवति क्रोधनः सुयोधनोऽपि गिरमिमामुज्जहार ॥ ७ ॥ ॥ ॥ ॥

तौ खलु तावद्वाह एकेति एकत्र कोटौ भागे रजनेरथीशः चंद्रः परत्र कोटौ भवान्पुरुषश्च अस्तीत्यहं मन्ये यथा गुरुकाष्ठादिकं एकेन वोढुं न शक्यते इति द्वाभ्यामुह्यते तथा अस्मिन्वंशे मन्ये तौ द्वावेव कलंकिनौ निश्चिताविति भावः ॥ ५४ ॥ गद्यं ॥ इति भगवति भगदितवति भगवति तथा ब्रुवति सति क्रोधनः सुयोधनः इमां वक्ष्यमाणां गिरं उज्जहार उवाच ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

गा· अयेनंदनंदन गोपालपुत्र अनेन राजकृत्याज्ञत्वं द्योतयति केवलं विराट तनयस्य उत्तरस्य आश्रयलाभेन आत्मानं कृतकृत्यं मन्यानां कुंतीसुवां बहुभिरक्षौहिणी सेनापतिभिः शल्यभगदत्तादिभिः अनुक्षणं प्रतिक्षणं आवेद्यमानां वेत्रधारिमुखैर्निवेद्यमानां अंजलिधोरणीं नम्रनार्थं संहृतहस्ततीतिं अवलोकयितुमपि दृग्विषयां कर्तुमपि कार्यबाहुल्यात् नतिबाहुल्याच्च नलब्धः अवसरः संमयो यैस्तेषां अस्माकंच किंवा संधानं संधिः किंवा तव दूतकृत्यं च किंवा मर्यादेयं च तेषामस्माकं च महदंतरं अतः संध्यादिवक्तुमप्यनर्ह इति भावः ईदृग्विधं मुधा निष्फलं आयासमवधूय त्यक्त्वा भवता यथागतं

॥गद्यं॥ अयेनंदनंदन केवलं विराटतनयाश्रयलाभेन कृतकृत्यंमन्यानां कुंतीसुवां च बहुभिरक्षौहिणीपतिभिरनुक्षणमावेद्यमानांजलिधोरणीमवलोकितुमप्यलब्धावसराणामस्माकं च किं वा संधानं किंवा तव दूतकृत्यं किंवा मर्यादेयमीदृग्विधं मुधायासमवधूय भवता यथागतं गंतव्यमिति॥ ८॥ पद्यं॥ आकर्ण्य तच्चकितचेतसि नम्रवक्त्रे कर्णौ पिधाय नृपतौ करसंपुटाभ्यां मत्वा तृणाय मधुवैरिणमप्यलंघ्यं गोष्ठ्या जवेन निरगात् कुरुराजसूनुः॥ ४५॥ ॥ ॥

गंतव्यमिति यथा आगतं तथैव गंतव्यं कार्यसिद्ध्यभिलाषं त्यक्त्वा रिक्तेनैव गंतव्यं इत्यर्थः॥ ८॥ पद्यं॥ नृपतौ धृतराष्ट्रे तत्पुत्रवचनं आकर्ण्य करसंपुटाभ्यां मुकुलीकृतकरतलाभ्यां कर्णौ पिधाय आच्छाद्य चकितं अनर्थात् भीतं चेतो यस्य तस्मिन्नम्रवक्त्रे अवनमितमुखे सति कुरुराजसूनुः दुर्योधनः अलंघ्यमपि धर्षयानर्हमपि मधुवैरिणं महादैत्यहंतारं कृष्णं तृणाय मत्वा तृणमिव तुच्छं मत्वा जवेन गोष्ठ्याः सभायाः सकाशात् निरगात् निर्जगाम॥ ४५॥ ॥

॥ग॥ अ तदनु तदनंतरं एषः दनुजारातिः कृष्णः रोषस्मितयोः स्वस्य अवमानेरोषः पुनरपोग्रहे एकेन अर्जुनेन सर्वेषां पराजये कृतेपि गर्वोक्ति श्रवणाद्रोष स्तज्जन्य हास्यं च तयोर्लेशाभ्यां तज्जन्य कंपदंतप्रभाभ्यां रूषितः युक्तः अधरोयस्य तथाभूतः सन् तादृशेन तस्य दुर्योधनस्य अवलेपवचनेन गर्वोक्त्या याभीः तयाविहस्तान्व्याकुलान् मुदा हर्षेण निरस्तान् त्यक्तान् समस्तानपि सभासदान् सभ्यान् भीष्मद्रोणादीन् पुरस्तान् निरीक्ष्य पुनरपि एवं वक्ष्यमाणां वाचं व्या जहार उवाच॥ १॥ पद्यं॥ शूरशिरवामणीनां पार्थानां याचयादापंदापयितुं अहं नागतः अपितु दुर्योधनाग्रेसर दुर्योधनस्य दंडार्हत्वं सर्वेषां पुरः प्रकटयितु

॥गद्यं॥ तदनु दनुजारातिरेषरोषस्मितलेशरूषिताधरस्तादृशेनतस्यावलेपवचनेनभियाविहस्तान्मुदानिरस्तान्
समस्तानपिसभास्तारानपुरः स्तान्निरीक्ष्यपुनरपिवाचमेवंव्याजहार॥ १॥ पद्यं॥ धराभुजाकिंतटिनीभुवाकिंमया
धुनाकिंवसतापिदूत्ये पार्थायदातुंप्रभवेत्धरित्रींगदेवसागंधवहस्यसूनोः॥ ४६॥ ॥ ॥

मागतवृत्तिद्योतयन्नाह धरेति धराभुजागुरुणाराज्ञाकिं एतस्मिन्कार्येनकिंचिन्प्रयोजनमित्यर्थः एवमग्रेपि तटिनीभुवाविचारशालिनाभीष्मेणाकिं अधुना दूत्येवसता दूतकर्मकुर्वतामयामित्रेणापिकिं एते पार्थायपृथिवींदातुंनसमर्थाअपितुगंधवहस्यवायोःसूनोःभीमस्यगदेवपार्थाय धर्मराजाय धरित्रींदा तुंसमर्थाभवेत् युद्धएको भीम एवगदाप्रहारेणदुर्योधनादीन्हत्वाधर्माय पृथिवीं दातुंसमर्थोस्तीतिभावः॥ ४६॥ ॥ ॥ ॥ ॥

शौरेः तां वाचं आकर्ण्य साध्वसेन भयेन आक्रांतं चेतो यासां ताः सभा सभ्याः श्रीमद्दोषाद्यः सभ्याः जोषं भावं तूष्णींभावमेकउत्तरं युगपत् एककालावच्छेदेनद धुः सर्वेपि तूष्णींभावं दधुः अनुत्तरं नदधुरित्यर्थः ॥ ५७ ॥ स भूमापुत्रसूनुः बलेन अवलिप्तैः गर्वितैः त्रिभिः कर्णदुःशासनशकुनिभिः सहायैः संमंत्र्य ग दाग्रजन्मानं श्रीकृष्णं गंधर्वराजेन कृतां सा स्वसंबंधिनीं दशारज्जुभिः बंधनावस्थां प्रतिनेतुमियेष पार्थानां सहायमेकाकिनमागतं कृष्णं बलमन्त्र्यादिरहितं ॥ ५८ ॥ तत् बंधनोद्योगकरणं श्रुत्वा कुपितः स्वयमसौ एकः सन्नपि सर्वात्मकः सर्वस्वरूपः हरिः ताराभिः नक्षत्रैर्नवभिर्ग्रहैः शैलैः वनैः सागरैश्च निबिडितां

शौरेस्तां वाचमाकर्ण्य साध्वसाक्रांतचेतसः जोषंभावं सभास्तारा युगपद्दधुरुत्तरं ॥ ५७ ॥ बहिः ससंमंत्र्य बलावलिप्तै
स्त्रिभिः सहायैर्धृतराष्ट्रसूनुः गंधर्वराजेन कृतां अवस्थां गदाग्रजन्मानमियेष नेतुं ॥ ५८ ॥ श्रुत्वा तत्कुपितो हरिः स्वयमसा
वेकोपि सर्वात्मकस्ताराभिर्भैर्नवभिर्ग्रहैर्निबिडितां शैलैर्वनैः सागरैः पेटीभूषणमंजरीमिव धृतां कुक्षौ जगन्मंडलीं जंघालाम
तनोत्सभाजिरजुषां दृक्पंक्तिघंटापथे ॥ ५९ ॥ ॥ ॥ ॥ ॥

पेट्यां मंजूषायां भूषणमंजरीमिव भूषणविशेषो यासंजसिता मिव कुक्षौ धृतां जगन्मंडलीं सभाजिरजुषां सभांगणस्थानां दृक्पंक्तेः नेत्रसमूहस्य घं टापथे राजमार्गे प्रसिद्धां जंघालां जवेन गमनकर्त्रीं अतनोत् हरिः मामेकाकिनं दृष्ट्वा मद्बंधनोद्योगं कुतुकिनां दुर्योधनादीनामुत्साहभंग [illegible] ॥ ५९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अंगुष्ठमात्रे अंगुष्ठप्रमाणेनवमुकुरे इव तस्मिन्कृष्णे सर्वप्रपंचं वस्तुजातंवीक्ष्यविस्मेराः विस्मयशीलाः सिद्धविद्याधराणां सदसः सभायाः स्त्रीनपुंसकयोः स दृत्यमरात् सदः शब्दस्यस्त्रीत्वं पुष्पाणांवर्षवृष्टिंव्यमुंचन् सकलमुनिजनः सांद्रंनिबिडंमोहरूपं अंधकारं व्यमुंचत् अयंभगवान् जगन्निर्माणकर्ताई श्वरइति ज्ञातवानित्यर्थः भीष्मः संमदाश्रूणि आनंदाश्रूणिव्यमुंचत् एतदैश्वररूपदर्शनेनममजन्मनः कृतार्थता जातेत्यानंदाविर्भावः क्षत्ताविदुरः अक्ष्णोः पक्ष्मपातं नेत्रनिमीलनं व्यमुंचत् आश्चर्येणनेत्रनिमीलनंविस्मृतवानित्यर्थः कुरुपुरसंबंधिनी जनताजनसमूहोपि दुर्योधनप्रेम व्यमुंचत् एतादृशोपि दो

तस्मिन्नंगुष्ठमात्रे नवइवमुकुरे वीक्ष्यसर्वप्रपंचंविस्मेराः सिद्धविद्याधरस्फारसदसः पुष्पवर्षंव्यमुंचन् सांद्रंमोहां
धकारंसकलमुनिजनः संमदाश्रूणिभीष्मः क्षत्ताक्ष्णोः पक्ष्मपातंकरि पुरजनताप्रेमदुर्योधनेपि ॥ ५० ॥ अस्या
ट्टहासध्वनिरादिपुंसो विशृंखलंव्योम्निविजृंभमाणः दिक्पालसौधावलिजालकानामध्यापकत्वंबिभरांब
भूव ॥ ५१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ष्यं करोति इति प्रेमत्यागः ॥ ५० ॥ अस्य आदिपुंसः श्रीकृष्णस्य अट्टहासस्य स शब्दहास्यस्य ध्वनिः विशृंखलं अप्रतिबंधं यथा तथा व्योम्नि विजृंभमा णः वर्धमानः सन् दिक्पालानां इंद्रादीनां सौधावलेः सदनपंक्तेः जालकानां गवाक्षाणां अध्यापकत्वं बिभरांबभूव दधार यथा अध्यापकोक्तां गिरं मुनिशिष्याः प ठंति तथाट्टहासध्वनिं तं स्वर्गस्थदिक्पालानां सौधानां गवाक्षेषु प्रतिध्वनयो बभूवुरित्यर्थः अट्टहासध्वनिः स्वर्गजगामेति भावः ॥ ५१ ॥ ॥ ॥ ५ ॥

स॰ भूमिपालः धृतराष्ट्रः जनैः संस्तूयमानचरितस्य त्रिलोक्यां साधारणीकृतकृपायेन तस्य हरेः प्रसादात् मुहूर्तं घटिकाद्वयपर्यंतं चक्षुष्मतां धुरं सम
धिरुह्य सम्यगारोहणं कृत्वा भूयः पुनरपि ततः पुरः अपततात् पूर्वावस्थां प्राप्येत्यर्थः यदा हरिणा विश्वरूपं प्रकटीकृतं तदा मम चक्षुष्मत्तां दास्यसि चे
त्तर्हि विश्वरूपदर्शनं करिष्यामीति धृतराष्ट्रप्रार्थितेन हरिणा कृपया दत्तचक्षुष्मत्तया रूपं दृष्ट्वा पुनः पूर्ववत् अंधो बभूवेति भारतीयेतिहासः ॥ ५२
हे माधव इदं तव ओजः ऐश्वरं सामर्थ्यं उपसंहर आच्छादय इति गुरुभीष्मपुरोगमेषु घुष्यत्सु आक्रोशत्सु सत्सु कुरोशयाक्षः कृष्णः निमिषेणनेत्र-

संस्तूयमानचरितस्य जनैस्त्रिलोकीसाधारणीकृतकृपस्य हरेः प्रसादात् चक्षुष्मतां समधिरुह्य धुरं मुहूर्तं भूयस्ततोप्यपतता
स भूमिपालः ॥ ५२ ॥ ओजस्तवेदमुपसंहर माधवेति घुष्यत्सु सत्सु गुरुभीष्मपुरोगमेषु घोरं विहाय निमिषेण कुशेशया
क्षो गोपीदृशां कुतुकहेतुमवाप रूपं ॥ ५३ ॥ गद्यं ॥ ततस्तादृशं निरुपमानं तस्य महिमानमनुभूय चरितार्थो मुनिसार्थः
समुपसृत्य शांतमूर्तिं तमेवमस्तोषीत् भगवन्महात्मभिरपि योगिभिरविदितप्रभावाय तस्मै प्रभवे भवते षड्गुणैश्वर्यपन्नाय नमः ॥ १० ॥ ॥

निमिषमात्रात्यल्पकालेन घोरं रूपं विहाय गोपीदृशां कुतुकहेतुं कौतुकदायि रूपं अवाप स्वीचकारेत्यर्थः ॥ ५३ ॥ ग॰ ततः तादृशं निरुपमानं अलौकिकं
तस्य हरेः माहात्म्यं अनुभूय चरितार्थः कृतार्थः मुनिसार्थः ऋषिसमूहः शांतमूर्तिं समुपसृत्य समीपं गत्वा एवं वक्ष्यमाणप्रकारेण अस्तावीत् हे भगवन्
महात्मभिः महामतिभिः योगिभिरपि अविदितप्रभावाय तस्मै भगवते षडैश्वर्यसंपन्नाय पनेनमोस्तु ॥ ११ ॥ ॥ ५ ॥ ॥ ५ ॥ १२

प-आदिसं [illegible] मार स तिं दुग्धांबुराशीत्यादिभिर्द्वाभिः पद्येराह यः भगवान् दुग्धांबुराशेः क्षीरसमुद्रस्यतनया लक्ष्मीः तस्याः नयनद्वयेन तुल्या आकृतिर्या
नीसकाशे [illegible] तस्य तेनयो महिमा तदेकदेशनयनसादृश्यलाभात् स्वस्मिन्महत्त्वं उपगंतु माप्तुमिव भुवि मत्स्यत्वं एत्य प्राप्य अंभ मध्ये समुद्रं समुद्रस्य
मध्ये स्मरवैरिणा शंकरस्करेणानीताः अनवीनाश्चताः गावश्च अनवीनगव्यः ताः अनादिवेदानित्यर्थः विचिक्ये अन्विवेष॥५४॥ यः कमठाकृतिः कूर्माकारः
हिमांशोः चंद्रस्य मार्गरुधं मार्गरोधकमपि मंथानशैलं मंथनसाधनीभूतं मंदरपर्वतं अंगविषक्तिं अंगसंगं भजंति येन तथाभूतैः वीचीकणैः समुद्रलहरीविंदु-

दुग्धांबुराशितनयानयनद्वयेनतुल्याकृतित्वमहिमानमिवोपगंतुं मत्स्यत्वमेत्यभुवियःस्मरवैरिनीतामध्येसमुद्रमनवीनगवीर्विचिक्ये ५४
मंथानशैलमपिमार्गरुधंहिमांशोर्वीचीकणैःसदृशमंगविषक्तिभाग्भिः कायेबभारचरमेकमठाकृतिर्योजीवातुमुद्गमयितुंजलधेःसुराणां ५५
दंष्ट्राग्रवर्तिकिटिवेषधरस्ययस्यक्ष्मामंडलंकुवलयाकरकोमलाभं ऊर्ध्वप्रसृत्वरबकावलिकावलीढशारद्पयोदवलयस्यबभारलीलां ५६

भिः सदृशं यथा तथा चरमे काये पृष्ठभागे बभार दधार महापर्वतमपि जलबिंदुवद्धारेतिभावः अनेन कमठाकृतेः परममहत्त्वं ध्वन्यते किमर्थं बभार तदाह-
जलधेः सकाशात् सुराणां जीवातुं जीवनौषधं अमृतं उद्गमयितुं॥५५॥ किटिवेषधरस्य वराहाकृतेः यस्य दंष्ट्राग्रवर्ति कुवलयाकरवत् उत्पलविशिष्टसरोवर
वत् कोमला मनोज्ञा आभा यस्य तत् क्ष्मामंडलं ऊर्ध्वप्रसृत्वरी ऊर्ध्वप्रसरणशीला या बकावलिका तया अवलीढं युक्तं यत् शारद्पयोदवलयं वर्षाकालिक
मेघमंडलं तस्य लीलां शोभां बभार अत्र वराहमेघयोः [illegible] क्ष्मामंडलबकावलिकयोश्चोपमानोपमेयभावः॥५६॥ ॥ ॥पृ०७॥ ॥७॥

धृतसिंहभावः धृतसिंहवेषः हिरण्यनाम्नः नामैकदेशन्यायेन हिरण्यकशिपुनाम्नः इंद्रद्विषन् दैत्य एव मदगजः मत्तहस्ती तस्य पिशितरक्तवकावलीनां मांसयो
ल्कसमूहानां रसस्य भेदं रुचिविशेषं जिज्ञासमान इव ज्ञातुमिच्छन्निव स्तंभादुपेत्य आविर्भूय नदैत्यं उरसि नखरैः अभांक्षीत् व्यदारयत् ५७ यः याञ्चया प-
दत्रयभूमियाञ्चयाप्रतारणवशात् वामनत्वं ह्रस्वत्वं अवलंब्य धृत्वा अधियज्ञवाटं यज्ञमंडपे बलिं निगृह्णन् स्वमिव स्वकीयवपुरिव सतां दुःखं खर्वतमं अत्यल्पं
आततान चकार स्वीयं पदक्रममिव पदन्यासमिव सतां स्फरवं उन्नतं महत् आततान ५८ यस्य आहवेषु युद्धेषु करे तांडवितः कुठारः पुरा सृष्टौ सृष्ट्यारंभे मुखं च भु

इंद्रद्विषन्मदगजस्य हिरण्यनाम्नो भेदं रसस्य पिशितरक्तवकावलीनां जिज्ञासमान इव यो धृतसिंहभावः स्तंभादुपेत्य नखैरस्त्र मुरस्य मांक्षी
त् ॥५७॥ याञ्चाप्रतारणवशादधियज्ञवाटं यो वामनत्वमवलंब्य बलिं निगृह्णन् दुःखं सतां स्वमिव खर्वतमं स्फरवं च स्वीयं पदक्रममिवो
न्नतमाततान ५८ सृष्टौ पुरा मुखभुजोरुपदे मुरारेरंगं द्वितीयमभजत् किमु वंध्यभावं इत्येव संशयमशेषजनस्य चक्रे यस्याहवेषु करतांडवितः कुठारः ५९

जश्च ऊरुश्च पदं च तस्मिन् प्राण्यंगत्वादेकवद्भावः त
न्मध्ये इत्यर्थः मुरारेः विराटरूपस्य विष्णोः द्वितीयं अंगं भुजः वंध्यभावं वंध्यत्वमभजत् किमु इत्येव संशयं अशेषजनस्य चक्रे सृष्ट्यारंभे विराड्रू
पस्य पुरुषस्य मुखभुजोरुपदावयवेभ्यो ब्राम्हणक्षत्रियवैश्यशूद्रवर्णा जाताः तथा च श्रुतिः ब्राम्हणोस्य मुखमासीदित्यादिः क्षत्रियकुलस्यापि बहु
नः मुख्येन परशुरामेण परशुना सर्वक्षत्रियहननादयं संशयः ॥ ५९॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

[illegible]भूकि सुते नौव[illegible] दाशरथिरामस्य पादरजसा गौतमभार्या हिल्येत्याख्यात् अहिल्यायाः धूलिजा[illegible] धूलेः [illegible]मूलं यत्र [illegible]धनुः [illegible] यस्य लक्ष्मणस्य हस्तद्विधाभवनरूपकार्य आप प्राप बाणमोचनानंतरं लक्ष्यो [illegible] पतितत्त्वं [illegible]मित्यर्थः [illegible] [illegible]रपि अंकंदुःखं पातीत्यकंपं दुःखदमित्यर्थः कंपं आगात् प्राप लंकागमनसमये स्वकृतमार्गप्रतिबंधेन [illegible] समुद्रः कंपमापे त्यर्थः यद्वा अकंपं कंपाभावं स्तब्धतामपि प्राप रहस्युषांसुशब्दश्रवणाय हस्तसंज्ञया घोषवारणात् स्तब्धीभावः विभीषणएव यस्य पत्रिणः बाणस्य विघसः

स्वयमुर्निरजनि [illegible] धूलिर्यत्कष्टमीशाधनुरापशरव्यतुल्यं यस्माद्भियाब्धिरपिकंपमकंपमाप [illegible] विघस एव विभीषणोभू
त् ६० हन्यामहंयुधिरिपून् हमेव हन्यामित्येव यन्मुसललांगलयोर्विवादः यस्यांबरं निजरुचिप्रतिमल्लवर्णं यत् षष्ठसंस्करणमासवपान
माहुः ६१

भोज्यावशेषो भून् यस्य बाणेन सर्वराक्षसा हताः विभीषणएव शरणागमनात् अवशिष्ट इति भावः अमृते विघसो यज्ञशे
षभोजनशेषयोरित्यमरः ॥ ६० ॥ अहं युधि रिपून् हन्यां अहमेव रिपून् हन्यां त्वं न इत्येव एतादृशएव यस्य भगवतः मुसललांगलयोः आयुधयोः वि
वादः वाकूलहः आसीत् यस्य अंबरं वस्त्रं निजरुचेः स्वशरीरस्य शुभ्रकांतेः प्रतिमल्लः प्रतिभटः वर्णो यस्य तथाभूतमासीत् नीलवर्णमासीदित्यर्थः
[illegible] कृष्णवर्ण [illegible] यस्य आसवपानं मधुपानं षष्ठ संस्करणं षष्ठसंस्कारं अन्नप्राशनमाहुः यस्य बालप्रभृति [illegible]
[illegible]मित्यर्थः [illegible] प्रायेणोपभुक्तिः ॥ ६१ ॥ ॥५॥ ॥५॥ ॥५॥

यः पूतनायाः स्तनपानसमयेसति प्राणानपिपरमोपदंशंभोजनक्रियायाः सौकर्यकारि परमंव्यंजनंप्रविदधे चक्रे स्तन्यपानसमयेशाका सुपदंशास्या
नेनकः प्राणान् चक्रेइत्यर्थः प्राणैः सहस्तन्यंपपाविरतिभावः येनभगवता हेतुभूतेन नारीमुदे सत्यभामाप्रीत्यैनाकाधिपस्य इंद्रस्यवनभूरपिसद्यःपद्न
खं पचापद्नखपाककर्त्री अतितप्ता आसीत् नरकासुरवधानंतरं अदित्यैकुंडलार्पणाय सत्यभामयासहस्वर्गं गतेकृष्णे सत्यभामाप्रार्थनयाकल्प
वृक्षपारिजातापहरणात् छायाभावेन नंदनवनभूः सूर्यतापेनतप्ताभवत् इतिभावः पुराणांतरोक्त्याकृष्णस्यैवबौद्धावतारत्वंस्वीकृत्योक्तिः ॥ ६२

यस्तन्यपानसमयेसतिपूतनायाः प्राणानपिप्रविदधेपरमोपदंशं नाकाधिपस्यवनभूरपियेनसद्योनारीमुदेपद
नखंपचधूलिरासीत् ॥ ६२ ॥ वार्यस्तपोधनवरेण्यमनःस्वलीनैस्तृण्यांमुहुःकवलयन्जगदार्तिरूपां नीचान्वि
धातुमसुरान्निजशृंगतुल्यान्कोपादुदेष्यतिचयःकुहनातुरंगः ॥ ६३ ॥ ॥ ॥

यः कुहनया कपटेन तुरंगः नीचान् पवनरूपान् असुरान् निजशृंगेणतुल्यान् वधेनाभावरूपान् विधातुंकर्तुं कोपादुदेष्यति अवतरिष्यतिअ
श्वस्य यथाशृंगाभावः तथा वधेन असुराणामभावः तंकर्तुंउदेष्यतीतिभावः कीदृशस्तुरंगः तपोधनेषु वरेण्यानांश्रेष्ठानांमनोरूपैःस्वलीनैःमुख
रज्जुभिः वार्यः स्वाधीनः करणीयः पुनः कीदृशः जगदार्तिरूपांजगत्संबंधिनीयाआर्तिः असुरादिकृतपीडातद्रूपां तृण्यांतृणसमूहंमुहुःकव १५
लयन् ग्रसन् दूरीकुर्वन्नित्यर्थः अत्राश्वारोहापेक्षयाश्वस्यप्राधान्यविवक्षयेयमुक्तिः ॥ ६३ ॥ ॥ इतिदशावतारस्तुतिः ॥ ७ ॥

अभ्रम प्राप्यैर्अर्थयन्नीतिक्रम्यवर्तमाने ऐते स्तवे हृष्टमनाः मंदस्मितं तस्य श्रिया शोभया मधुरः सुंदरः अधरोष्ठो यस्य सः पीते वाससी वस्त्रे यस्य सः कृष्णः पीठात् तुंगासनकात् उदस्थात् उत्तस्थौ कस्मात्क इव मेघस्य शावः शिशुः मेरोः नितंबादिव कटकादिव ॥ ६४ ॥ कैटभरिपुः कृष्णः आस्थानात् सभायाः बहिः एत्य तं गांगेयं भीष्मं आलिंग्य भूपं धृतराष्ट्रं पश्चात्ये पृष्ठभागे परिमृश्य हस्तस्पर्शं कृत्वा इतरान् सर्वान् कुरून् आपृच्छ्य स्वगमनप्रश्नं कृत्वा विदुरं मूर्ध्नि अतिचिरेण प्रेमातिरेकात् बहुकालं आघ्राय च हयैः युक्तं शातांगं रथं आरूढः अंतः अंतःकरणे पांडवान् स्मरन् सन् विराटनगरीम्

ऐते स्तवे हृष्टमना यथार्थैर्मंदस्मितश्रीमधुराधरोष्ठः पीठादुदस्थादथ पीतवासा मेरोर्नितंबादिव मेघशावः ६४ आस्थानाद्बहिरेत्य कैटभरिपुर्गांगेयमालिंग्य तं पश्चात्ये परिमृश्य भूपमितरानापृच्छ्य सर्वान् कुरून् आघ्रायातिचिरेण मूर्ध्नि विदुरं युक्तं शातांगं हयै रथारूढोऽभिययौ विराटनगरीमंतः स्मरन्पांडवान् ६५ श्रुत्वा ततः परमतं पुरुषोत्तमात्ते फेनायमानरणसन्नहनाब्धिपूराः आराधयन्विधिवदस्त्रगणं श्मशाने पीतां वमंतमिव कांतिमिषेण धूम्यां ॥ ६६ ॥ ॥ ६७ ॥ ॥ ६७ ॥ ॥ ६७

अभिययौ अभिमुखं जगाम ॥ ६५ ॥ ततः पुरुषोत्तमात् कृष्णात्परेषां दुर्योधनादिशत्रूणां मतं दायानर्पणपूर्वकयुद्धकरणलक्षणं श्रुत्वा फेनायमानः फेनमुद्गमन् रणसन्नहनमेव युद्धसन्नद्धतैव अब्धिपूरो येषां ते तथाभूताः संक्षुभितसेनासमुद्रा इत्यर्थः ते पांडवाः अस्त्रगणं पाशुपतब्रह्मास्त्रादिसमूहं विधिवदाराधयन् आराधितवंतः कीदृशमस्त्रगणं श्मशाने पीतां धूम्यां धूमसमूहं कांतिमिषेण वमंतमिव कांत्या देदीप्यमानमित्यर्थः ॥ ६६ ॥ ॥ ६७ ॥

अत्रांतरे॥ कुन्तीनिश्चये उग्रयसेनासमतस्य आगासमयेततः परं कृत्यविदां यस्मिन्समये यत्कर्तव्यंतज्ज्ञानतांमध्ये पुरोगा अग्रेसरा पृथाजड्डुकुमारिकायाः जाह्नव्याः तटीवनेतपस्यंतंकर्णं अवाप प्राप अस्याः पृथायाः प्रवृत्तिः आगमनंतु तस्यकर्णश्रोत्रेकिंचिदपिन अवाप तस्यसमाध्यवस्थायां सत्यां कर्णेनास्याः आगमनं नज्ञातमित्यर्थः॥ ६७॥ कवचस्यसहजकवचस्य उत्कर्तनेन द्वैधयदातुच्छेदनेन झर्झरितानि निम्नोन्नतयाकृशीभूतानि अंगानि अवयवाः यस्यसः कवचोत्कर्तनझर्झरितांगः ततः अनुकंपायांकप्रत्ययः तस्मिन्नपि कमनीयः शोभाभरो यस्य तस्मिन्ननुजेपुत्रे कर्णेनालि

अत्रांतरे॥ ततः परंजड्डुकुमारिकायास्तटीवनेकृत्यविदांपुरोगा पृथातपस्यंतमवापकर्णंकर्णेप्रवृत्तिस्तुनकिंचिदस्याः ६७

कमनीयशोभरेतनूजेकवचोत्कर्तनझर्झरांगकेपि नलिनान्मृदुलंनरेंद्रपत्न्यानयनंतत्रचिरेणसंचचार ६८ ॥ तत्रपूतः

सवनाभिषेकैस्तपोवसानेतपनस्यसूनुः श्रोत्रेधितेनेशुचिमक्षमालांनेत्रेचराज्ञीभिरुत्प्रपन्नाम् ॥ ६९ ॥

नालकमलात् मृदुलं नरेंद्रपत्न्याः पृथायाः नयनं चिरेण संचचार जन्मसमये दृष्टंपुत्रं पुनरिदानीं सादरमवलोकयामासेत्यर्थः ॥ ६८ ॥ तत्रव नेसवनाभिषेकैः त्रिकालस्नानैः पूतः सः तपनस्सूनुः कर्णः तपसः अवसानेशुचिं अक्षमालां रुद्राक्षमालां श्रोत्रे कर्णे वितेने स्थापयामास नि क्षिप्तांपुत्रप्रसन्नांराज्ञीपृथाक्षितेनेत्रेनाददर्शेत्यर्थः॥ ६९॥

पदयोः विनतेः प्रणामात् अनंतरं विहिताशीः दत्ताशीर्वादः तं स्फुटं व्यक्तं परिरभ्य आलिंग्य धर्मसुतादिषु युधिष्ठिरादिषु उभयीं द्विविधां पंचतां पंचत्वसंख्यां मरणं च परिहर्तुं निराकर्तुं उवाच कर्णस्य पुत्रेषु गणनात् षट्त्व संख्यया पंचत्वसंख्यापरिहारः तथा धर्मादिषु बंधुत्वज्ञानेन नतसंग्रामविघ्नस्य तद्धननपरिहारश्चेति भावः ॥७०॥ अयीति कोमलामंत्रणे अयि वत्स अर्थिनां याचकानां भाग्यं त्वं रवेरनुग्रहात् मयि अजनिष्ठाः जातः मत्पुत्रोसीत्यर्थः सुतजातीयौ रा

विनतेः पदयोरनंतरं विहिताशीः परिरभ्य तं स्फुटं परिहर्तुमुवाच पंचतामुभयीं धर्मसुतादिसूनुषु ७० अयि व
त्स रवेरनुग्रहादजनिष्ठा मयि भाग्यमर्थिनां तनुरक्षणमात्रकारिणौ तव राधाधिरथौ न जन्मभूः ७१ जहीहि
राधातनयत्वबुद्धिं सहैव दुर्योधनसौहृदेन गृहाण वाण्या सह धर्म्यया मे सहोदरान्धर्मतनूजमुख्यान् ७२ ॥

धाधिरथौ तु तव तनोः रक्षणमात्रकारिणौ त्वत्पोषकौ मातापितरावित्यर्थः जन्मभूः जन्मस्थानं जन्महेतू न भवतः ॥७१॥ मत्पुत्रत्वात् मद्वचनानुसरणं कुर्वित्याह जहीहीति दुर्योधनस्य सौहृदेन मित्रत्वेन सहैव राधातनयत्वं स्वस्मिन् राधापुत्रत्वमिति बुद्धिः तां जहीहि त्यज धर्म्यया धर्मादनपेतया मे वाण्या सह धर्मतनूजमुख्यान् युधिष्ठिरप्रमुखान् सहोदरान् सोदर्यबंधून् गृहाण आत्मीयत्वेन स्वीकुरुष्व ॥७२॥ ॥७॥ ॥७॥

चं·भा· मद्वचनानुस्मरणं अवश्यं कर्तव्यमन्यथा तव पापकीर्तिः स्यादित्याह यस्मादृति त्वं यस्मै कस्मैचन पुरुषाय प्रार्थनातुल्यकालं यथा तथा सहजकवचं ददातितस्मा भी·स·
१८ यामृतोसि अतः सकरत्वमे अतिशयेन कर्तुं शक्ये मातुः मम साक्षात् निदेशो आज्ञा विषये मंदभावं आलस्यं मा कृथाः यस्य पुरुषस्य चेतः गुरुजनवचनस्य ८
अनुष्ठितो कर्तव्यतायां पराङ्मुख्यं पराङ्मुखत्वं विधत्ते वचनानुसरणं न करोतीत्यर्थः तस्मै पुरुषाय इदं अखिलं जगत् मुखेन धिक् शब्दस्याभिधेयं अर्थमिदा
मित्यर्थः दोग्धि ददाति वदतीत्यर्थः ॥७२॥ ग॰ कर्णः इति भाषणसमये मुखविवरेण दशनकिरणानां व्याजात्कपटात् अंतःशरीरमध्ये चिरं रक्षितं तस्य कर्णस्य-

यस्मै कस्मैचन त्वं सहजकवचदः प्रार्थनातुल्यकालं मातुः साक्षान्निदेशो मम सकरत्वमे मा कृथा मंदभावं पाराङ्मुख्यं विधत्ते गुरुजनवच
नानुष्ठितो यस्य चेतो धिक् शब्दस्याभिधेयं जगदिदमखिलं दोग्धि तस्मै मुखेन ॥७३॥ ग॰ इति दशनकिरणव्याजाद्दंतश्चिरं रक्षितं तत
दंशास्तन्यं प्रकाशयंत्या इव कुंत्या निदेशं कर्णः कर्णदेशे ध्वनीतं विधाय साकमंजलिना समुचितमुत्तरं बबंध ॥११॥ पद्यं ॥ भोजान्ववा
यो भुवने प्रतीतः कुलं कुरूणां च तथा द्वयेऽस्मिन् तवाब्जजन्मोपयमोत्सवो न्वेत्त्वय्येव जागर्तु चितज्ञभावः ॥७४॥ अंशं भागं स्तन्यं स्तनसंबं
धि क्षीरं प्रकाशयंत्या इव प्रकटयंत्या इव कुंत्याः निदेशं कर्णदेशे श्रोत्रदेशे ध्वनीतं पार्यं विधाय श्रुत्वेत्यर्थः अंजलिना साकं समुचितं योग्यं उत्तरं बबंध ददा
वित्यर्थः ॥ [illegible] ॥ ग॰ हे [illegible] भोजान्वयः यादववंशः भुवने प्रतीतः प्रसिद्धः तथा कुरूणां कुलं च प्रतीतं अस्मिन् द्वये तवाब्जजन्मोपयमोत्सवो [illegible] १७
[illegible] जागर्तु [illegible] आगर्ति [illegible] ॥ ७४ ॥ [illegible] ॥ ७ ॥

[illegible] इत्याह अंगेति हे कर्णशूर [illegible] अंगपो [illegible] पालनीयं त्वया [illegible] कर्तव्यं एवमुक्ताय दुर्योधनः तत् [illegible] अधीनतायां विततां [illegible] तस्यापि [illegible] पेक्षणीयं [illegible]
[illegible] र्थः ॥ ७७ ॥ [illegible] मतां तु महादोष इत्याह परस्येति संतः सदसद्विचारशीलाः कृतघ्नतामेव परस्य [illegible] स्वर्गादि गतेः प्राप्तेः विघ्नं [illegible]

अंगप्रदस्यापि पालनीयं कर्णत्वयाशूरजनाग्रगेण एवं वशेमे विततान यत्तत्तस्यापि [illegible] किमुपेक्षणीयं ७७

परस्य [illegible] गतेर्हि विघ्नं कृतघ्नतामेव वदंति संतः सा नस्पृशेन्मामधुनायथात्वं तथाप्रसीदं बकृपार्द्रचित्ता ७८

इति वादिनोर [illegible] स्य मानसं न निवर्तते स्म धृतराष्ट्रनंदनात् अपितु स्वकीयतनयान्महाभुजादनवाप्य काममियमेवकेवलं ७९ ॥ ८ ॥

इति भारतचंपौ अष्टमः स्तबकः समाप्तः ॥ ८ ॥ ॥ ८

[illegible] इदं हे अंब अधुना मा कृतघ्नतां यथा न स्पृशेत् तथा त्वं दयार्द्रचित्ता प्रसीद ॥ ७८ ॥ इति वादिनः उक्तवतः रविसुतस्य कर्णस्य मानसं धृतराष्ट्रनंदनात् [illegible] न निवर्तते स्म अपितु महाभुजात् स्वकीयतनयात् कर्णात् कामं मनोरथं अनवाप्य केवलं [illegible] निवर्तते स्म ॥ ७९ ॥ ॥ इति श्रीपद [illegible] भारतचंपू [illegible] टीकायां [illegible] बाजीराव [illegible] नारायणसूरिविरचितायां अष्टमस्तबकः समाप्तिमगमत् ॥ ८ ॥ ॥ [illegible] ॥ ॥ ८ ॥

इति अष्टमः स्तबकः समाप्तः ॥ श्रीकृष्णायनमः

॥ अथचंपूभारतेनवमस्तबकःप्रारभ्यते ॥

श्रीगणेशायनमः॥ ॥अथचंपुभारतसटीकनवमस्तबकःप्रारभ्यते॥ ॥अथयुद्धनिश्चयानंतरंरथगजाश्वपदातिभिः संरुद्धपार्श्वभागाःते उभयेद्विविधाइत्यर्थः कुरवः कुरुवंशोद्भवाः युधिष्ठिरादयोदुर्योधनादयश्चरणायरणंकर्तुंस्वस्ययत्नामधेयंकुरुइतिनामतदेवउपपदंपूर्वपदंय स्यतत्प्रसिद्धंक्षेत्रंकुरुक्षेत्रमित्यर्थः व्यगाहंतजग्मुः॥१॥ तत्रकुरुक्षेत्रेदेवस्तुतायाःहिरण्वत्याः नद्याःतीरवृक्षसंबंधिपुष्पाणांसुगंधैः मथितः नाशितःपथिखेदःमार्गश्रमोयासांताः गजघटाः गजसमूहाः स्वयमपिकृतज्ञत्वेनैवतस्यैहिरण्वत्यैमदांभसांदानोदकानांलहरीभिःकृत्वाअनिश

अथोभयेतेकुरवोरणायस्वनामधेयोपपदंप्रसिद्धं॥क्षेत्रंव्यगाहंतनिरुद्धपार्श्वाःशतांगमातंगतुरंगयोधैः॥१॥ हिरण्वत्यास्तत्र
त्रिदशविनुतायास्तटतरुप्रसूनानांगंधैर्मथितपथिखेदाःकरिघटाः॥कृतज्ञत्वेनैवस्वयमपिमदांभोलहरिभिर्ददुस्तस्यैबह्वीर
तिसुरभिगंधीःप्रियसुरवीः॥२॥अस्मज्जन्मभुवःसमानभिधयासप्तापिसिंधूनिमान्नेष्यामोवयमद्यशोषणमितिस्फीताभ्यसूया
इव॥सेनासैंधवपंक्तयःखुरपुटैर्दीप्तक्षुरप्रोपमैर्भूमेरुल्लिखितात्स्थलादजनयन्भूयोरजोमंडलं॥३॥ येनस्तुरभिःसौगंध्यविशिष्टःगं

धोयासांताः बह्वीःप्रियसरवीःनदीनांनद्यएवसरव्योभवंतिताःददुः अनयादानोदकनदीप्रकटनोक्त्यामत्तगजानांबाहुल्यंद्योत्यते॥२॥सेनायाःसैं
धवपंक्तयःसिंधुदेशोद्भवाश्वसमूहाःवयंअस्माकंजन्मभुवःअभिधयानाम्नासमानान्सप्तापिसिंधून्समुद्रान्शोषणंनयामः इतिमनसिकृत्वास्फीताभि
भ्याभ्यसूयाईर्ष्यायेषांतथाभूताःसंतइवक्षुरप्रोपमैः अतितीक्ष्णक्षुरप्रबाणसदृशैः दीप्तैः खुरपुटैः उल्लिखितात्उत्खातात् भूमेःस्थलात् भूयःअति

शयेनबहुरजोमंडलंधूलिसमूहं अजनयत् लोकेहिअसज्जनकस्य यन्नामतदेवैनेषांअपिवर्ततेइदमसमीचीनमितिमत्सरः केषांचिदुत्पद्यते ॥ ३ ॥
तेषांकुरूणांकलहोदयात्माक्सुद्वारंभात् माक् अशेषांआशांदिशांस्ववशेस्वाधीनतयाविधातुंकर्तुंस्यस्वनानांकरिसंहितानांहस्तियुद्धानां
अन्योन्यंमहीयान् अतिशयेनमहान्कलहः आसीत् सकलदिग्व्यापीनिरयध्वनिगजगर्जितानिबभूवुरित्यर्थः सकलदिक्स्थदेशान्स्वाधी

तेषांकुरूणांकलहोदयात्माग्रथस्वनानांकरिसंहितानां ॥ आशामशेषांस्ववशेविधातुमन्योन्यमासीत्कलहोमहीयान् ॥ ४ ॥
नाम्नावानवमग्रहस्यसमतांसोदास्महेमीवयंतुंगत्वंनसहेमहीत्यतिरुषासन्नाहधुर्याइव ॥ उद्दंडाअपिकेतवोददृशिरेस्था
नंग्रहाणामतिक्रम्यस्यंदनवृंदमौलिकलितामध्येनभस्वसदं ॥ ५ ॥

नान्कर्तुंमुख्यकलहात्सागयंकलहोभूदित्युक्तिचातुर्यं ॥ ४ ॥ अ-
मीवयंनवमग्रहस्यनाम्नाकेतुरितिनाम्नासमत्वंसोढास्महेसहिष्यामहेतुंगत्वंउच्चत्वंनसहेमहिनसहामहेइत्यर्थः इतिमनसिआनीयसन्नाहेस
न्नद्धतायांधुर्याः धुरंधराइवस्यंदनवृंदानांमौलिषुअग्रभागेषुस्थापिताः उद्दंडाः उन्नतदंडाउद्यतदंडाश्चकेतवः ध्वजाः अपिमध्येनभस्वसदंआकाश
मध्येग्रहाणांस्थानंस्थितिप्रदेशंअतिक्रम्यस्थिताः ददृशिरेदृष्टाः लोकैरितिशेषः अनयातिशयोक्त्याध्वजानांअत्युच्चत्वंफलति ॥ ५ ॥ ॥ ७ ॥

[illegible]नांपटमंदिराणिवस्यगृहाणिशिरोभिः अग्रभागैः सुराणांमार्गआकाशंलिलिहुःपस्पृशुः गगनमार्गदृक्शिखरैः गगनमार्गधूनोहेतुंसु
लेभते वयंदूष्याणिदूष्यशब्दवाच्यानिदोषयुक्तानिवअतश्चुचीभवेमसुहृानिमवामइतिमनस्यानीयअभ्रापगायाः आकाशगंगायाः वारिषु
भिमंक्षयेवमज्जनेच्छयेव अन्योपिदोषनिराकरणायगंगास्नानार्थंगच्छति ॥ ८॥ ॥गद्यं॥ ततःक्षणादेवतत्कुरुक्षेत्रंकुरुनगरमित्रंहास्तिनास्य
दर्शंबभूव कीदृशंकुरुक्षेत्रं विशालंयथातथाविनिर्मितंयत्वीथीनांपटमंडपपंक्तीनांसहस्रंतेनविराजमानं पुनः॰ विशंकटासुमहतीषुवि

महीपतीनांपटमंदिराणिमार्गस्फुराणांलिलिहुःशिरोभिः॥ वयंहिदूष्याणिशुचीभवेमेत्यभ्रापगावारिभिमंक्षयेव ॥ ८॥ ॥
गद्यं॥ ततःक्षणादेवविशालविनिर्मितवीथीसहस्रविराजमानंविशंकटविपणिविस्तारितविविधपण्याहरणविमर्दसहक्रयिकलो
कंविटकुलानुसार्यमाणविलासिनीजननिबिडितवेशवाटंविशिखकृपाणकुंतशक्तिप्रमुखविविधायुधसंस्कारपरवशयोधसं
बाधंतत्कुरुक्षेत्रंकुरुनगरमित्रंबभूव॥१॥ पणिषुपण्यवीथिकासुविस्तारितानियानिविविधपण्यानिनानाक्रेयधान्यादिवस्तूनितेषांआहरणो
त्थितत्वाग्रहणेनयोविमर्दः परस्परांगसंघर्षःतंसहंतेतथाभूताः क्रयिकलोकाः केतृलोकाः यस्मिन्तत् पुनः॰ विटकुलैर्जारसमूहैरनुसार्यमाणः अनुगम्य
मानः यः विलासिनीजनः जारिणीसमूहः तेननिबिडितः व्याप्तः वेशवाटः जारिणीगृहसमूहो यस्मिन्तत् पुनः॰ विशिखादीनांनानायुधानां
[illegible] संबाधंनिबिडितं ॥१॥ २

तत्रसेनाधिवेशस्थाने दुःशासनाग्रजः दुर्योधनः हे भगवन् अस्मिन् नृपतस्थपिसान्निध्यं प्रामे वीरभुजानां विनोदकाले कौशल्यदर्शनसमये त्वं वि
वाहविमुखोपि पितुरग्रे विवाहं न करिष्यामीति प्रतिज्ञानत्वात् विवाहपराङ्मुखोपि मदर्थं प्रत्यर्थिपार्थिवान् वैरिनृपान् विनिहंतुं पृतनाधिपत्यस्य
सेनाधिपत्यलक्ष्मीं उपयमस्व वृणु सेनाधिपत्यं स्वीकुर्वित्यर्थः इति विज्ञाप्य पितामहस्य भीष्मस्य चरणकमलयोः प्रणिपपात साष्टांगं प्रणनाम ॥

तत्र दुःशासनाग्रजो भगवन्नस्मिन् नृपतस्थुषि वीरभुजविनोदकाले त्वं विवाहविमुखोपि मदर्थं प्रत्यर्थिपार्थिवान् विनिहंतुं पृतना
धिपत्यलक्ष्मीमुपयमस्वेति विज्ञाप्य पितामहस्य चरणनलिनयोः प्रणिपपात ॥ २ ॥ ॥ पद्यं ॥ दुर्योधने विशति मौलिभुवा
पदं स्वं शूराग्रणीः प्रचरमः सुरसिंधुसूनुः ॥ अर्धक्षणाद्रिपुभटांस्त्रिदिवे विधास्यन्नध्यक्षतापदमविक्षदनीकिनीनां ॥ ७ ॥

॥ २ ॥ पद्यं ॥ शूराग्रणीषु शूरश्रेष्ठेषु अचरमः प्रथमः सुरसिंधुसूनुः
भीष्मः दुर्योधने मौलौ शिरसि भुवा विद्यमानेन किरीटेन यद्वा मौलेः किरीटस्य भुवा स्थिति देशेन शिरसा स्वपदं विशति सति शिरसा पदस्पर्शं
न विकुर्वति सतीत्यर्थः रिपुभटान् अर्धक्षणात् त्रिदिवे स्वर्गे विधास्यन् करिष्यन् अनीकिनीनां सेनानां अध्यक्षतापदं आधिपत्यपदं अविक्षत् प्रवि
वेश सेनाधिपत्यं स्वीचकारेत्यर्थः दुर्योधनेन स्वपदं प्रविशति सोप्यन्यपदमविक्षदित्युक्तिचातुर्यं ॥ ७ ॥

तेषां पार्थानां द्रुपदनंदनं धृष्टद्युम्नं सेनान्यं सेनापतिं आसुचक्रुः कीदृशं द्रुपदनंदनं यः उद्धतानां बलिनां विरोधिनां वनानि दग्धुं निजजन्मकाले अग्निकुंडादुत्पत्तिकाले सक्तं संलग्नं सततं ज्वलंतं वन्हिं प्रतापकपटान् भुजे वहति सततामिति वहनक्रियाविशेषणं वा वनदहने ज्वलद्वन्हिः प्रभवतीति प्रतापे प्रतापत्वं निन्हुत्य ज्वलद्वह्नित्वारोपः ॥८॥ गद्यं ॥ अथ सदसि भूरसमाजे महारथानां परिगणनकथायां अस्मत्सेनायां कति महारथाः कति अर्धरथाः संतीति परिगणनप्रस्तावे अयं कर्णः अर्धरथः इत्युक्त्या निकृतं पौरुषं यस्य तस्य भावस्तत्ता नया रोषेण चिन्हितं वदनं रोचिः वदनकां

पार्थास्तु तं द्रुपदनंदनमासुचक्रुः सेनान्यमुद्धतविरोधिवनानि दग्धुं ॥ वन्हिं प्रतापकपटान्निजजन्मकाले सक्तं भुजे वहति यः सततं ज्वलंतं ॥८॥ म॰ अथ सदसि महारथपरिगणनकथायामर्धरथोयमिति जान्हवेयेन निकृतपौरुषतया रोषचिन्हितवदनरोचिरन्हां पतिकुमारेण आयुधितस्यावधिमेव निजहेतेरसाधारणस्यापि साधारणं प्रतिजज्ञे इदं प्रतिपद्य अखिलयमानं मानधनं सुयोधनं वत्सं मा भैषीर्महाभुजानपि रिपुमहीभुजः संख्ये खरतरविशिखैरवसुरेव नरवादिष्यामीति पितामहः प्रसादयामास ॥३॥ निर्यस्य सः अहःपति सूनुः कर्णः तस्य भीष्मस्य अवधिं मरणतुल्यदशायां सैनापत्यसमाप्तिं असाधारणस्यापि हेतेः कालपृष्ठधनुः शरस्यस्य साधारणं यथा तथा प्रतिजज्ञे प्रतिज्ञां चक्रे अयं भावः देवप्रसादलब्धकालपृष्ठनामकधनुष इतरधनुर्भिः साधारण्यं यदायं भीष्मो निःसत्वो भूत्वा सैनापत्यं त्यजेत् तदैवाहं युधि कालपृष्ठधनुर्धारी भविष्यामीति प्रतिजज्ञे अतः तत्कालपृष्ठधनुषः एकस्य यावत् ग्रहणकालः इत्यवधिः शरस्ययोः साधारण्यमिति इदं प्रतिपद्य ज्ञात्वा अखिलयमानं मानधनं सुयो

२

धनंमतिहेवत्समाभैषीः बद्धिन ःसंमियानामपिसंरव्येसुहृदेववरतवाःनीहजनवःयेविभिश्विताःनदेवसुखंनेनरवादिष्याभिद्त्युक्त्याभीष्मःप्रसादयामासर्व
सोषयामास ॥२॥ ननतंनरं॥पद्यं॥ ॥धृतकार्मुकाभ्यांअभ्यापगाननयपार्थवनंदनाभ्यांमंगासुतहृपदसुताभ्यांअग्रावनीभ्रेनाग्रभूमिःतिलकिता
संजातनिलकेवभूषिता उभयेपिद्वयेपिकुरुवीराःउच्चावचंउच्चनीचंविरुद्दंसुकुटावतंसछत्रचामरादिकंपराक्रमसूचकराजलक्षणपदार्थंवहंतः

नदनंतरं॥पद्यं॥अभ्रापगातनयपार्षतनंदनाभ्यामग्रावनीतिलकिताधृतकार्मुकाभ्यां॥उच्चावचंनिजनिजंबिरुदंवहंतोयुद्धायनस्थु
रुभयेपिकुरुपवीराः॥९॥जेतापुराभिवतदाजलजातयोनिंपत्रीश्वराग्रजमिवप्रथमोग्रहाणां॥अग्रेनिधाययदुनायकमात्ततोत्रंपार्थो
रथीप्रधनभूमिमवापवीरः॥१०॥संचिंत्यभीष्मसुखबंधुजनस्यहानिंसंतापिनःसमरसीमनिशक्रसूनोः॥बाष्पांबुचक्षुरधिकंश्वसितं
सुखेंदुर्धैर्यमनःकरतलंचमुमोचचापं॥११॥ ५ ५ ५ ५

धारयंतः संतः युद्धाय युद्धं कर्तुं नस्थुः ॥९॥ नदायुद्धारंभेवीरः रथीपार्थः अर्जुनः पुरांजेनारुद्रः जलजातयोनिं ब्रह्माणमिव ग्रहाणांप्रथमः सूर्यः प-
त्रीश्वराग्रजमिवगरुडाग्रजमिव आत्ततोत्रंअश्वताडनार्थं गृहीतकशं यदुनायकं अग्रेरथाग्रे सूतस्थाने विधाय प्रधनभूमिं रणभूमिं अवाप ॥१०॥ सम
रसीमनिभीष्मसुखबंधुजनस्यहानिंमृत्युंसंचिंत्यसंतापिनः पश्चात्तापयुतस्यशक्रसूनोःचक्षुः दुःखात् बाष्पांबुसुमोच तथासुखेंदुः अधिकं-
श्वसितंमुमोच मनश्चधैर्यंमुमोच करतलंचापंमुमोच तत्याज ॥११॥ ५ ५ ५ ५ ५

वसुदेवसूनुः बलारिसूनुं अर्जुनं तैस्तैः गीतात्मकैः वचोभिः चिरेण आश्वास्य ज्ञानोपदेशेन संतापं दूरीकृत्येत्यर्थः तत्र युद्धप्रसंगे पावकस्य जाठ
राग्नेः [illegible]कारस्य असासहिं भृशम् सहनकर्त्तारं खांडववनदाहे पावकस्य क्षुधाशामकमित्यर्थः शरासं चापं पुनः अग्राहयत् ग्राहयामास युद्धे
प्रवर्त्तयामासेत्यर्थः धनुश्चापौ धन्व शरासनकोदंडकार्मुकं इष्वासोपीत्यमरात् शरासशब्दस्य पुंस्त्वं ॥१२॥ दूरदीर्घा अतिदीर्घा देवव्र

बलारिसूनुंवसुदेवसूनुर्वचोभिराश्वास्यचिरेणतैस्तैः॥ असासहिंपावकजाठराग्नेरग्राहयत्तत्पुनः शरासं ॥१२॥ दे
वव्रतस्यजयकेतनचिन्हतालश्यामप्रभावलिरदृश्यतदूरदीर्घा ॥ सख्याःकृतस्यसमरेभुजवीर्यलक्ष्मींसंवीक्षितुंरवि
सुतेवनभोधिरूढा ॥ १३॥

तस्यभीष्मस्यजयकृत् यः केतने ध्वजे चिन्हं तालः अयं भीष्मस्य इति
ज्ञापकः तालवृक्षः तस्य श्यामायाः प्रभावलिः कांतिपरंपरा अदृश्यत दृष्टा लोकैः इति शेषः तामुक्ते[illegible] समरे सख्याः भागीरथ्याः सुतस्य भी
ष्मस्य भुजवीर्यलक्ष्मीं संवीक्षितुं नभोधिरूढा व्योमदेशं नभस्थलं अधिरूढा रविसुतेव यमुनेव ॥१३॥

[illegible]भेरीप्रिंडानाद्यादिभेडानस्याः पिशुनयंत्संसूचयंतां उद्दाममयं[illegible] निर्धूनानि दूरीकृतानि अंतर्हितानि कृतानीति यावत् [illegible]ये तेनिःसाणादिशब्दा[illegible]यं भेरीप्रहारेण जैत्रवाद्यानां जिगीषुराजवाद्यानां निनदाः ध्वनयः शब्दाः [illegible] संपादितां प्रापितां नियम सेतुमिव नाशयितुमिव धाराधरैः वर्षुकमेघैः व्याप्ताः अंबुधेः वेलाशैलानां तीरस्थपर्वता[illegible]महागुहासु विविक्षुः युद्धारंभे भेरीप

युद्धारंभभटार्भटीपिशुननासुद्दाममयंतस्तदानिःसाणादिमजैत्रवाद्यनिनदानिर्धूनशब्दांनराः॥ श्रांतिंसेतुमिवानिदूरपदवींसं
पादितामंबुधेर्वेलाशैलमहागुहासुविविक्षुर्व्याप्ताःस्फधाराधरैः॥१४॥ संग्रामदुंदुभिरवश्रवणेनदेवाःसर्वेकपाटघटितानिगृ
हाणिकृत्वा॥आदायनंदनवनादभिषेक्तुमाजौवीरान्प्रसूनचयमप्यभजन्विहायः॥१५॥

इहादिशब्दाजातास्तेसमुद्रपर्यं
तदूरंगताइत्यर्थः अन्योपिदूरमार्गगमनेनजातश्रमपरिहारायशीतलस्थलमाश्रयति॥१४॥ सशब्दःस्वर्गंगतइत्याह संग्रामेति सर्वेदेवाअ
पिसंग्रामस्यदुंदुभिरवाणांश्रवणेनगृहाणिकपाटैःघटितानिपिहितानिकृत्वा आजौसंग्रामेवीरान्[illegible]पराक्रमशूरान्अभिषेक्तुं वर्षितुंनंदनवना
[illegible]आदायविहायः आकाशंअभजन् देवाअपि[illegible]अलंकारंइवप्रशंसा[illegible]इत्यर्थः॥१५॥

मघवत्प्रमुखाः इन्द्रादयो देवाः मिथः परस्परं विमर्दात् अंगसंगात् घर्मजललेशसनि सकलं तत् घर्मजलं अंगकेभ्यः व्यपनेतुं नाशयितुं स्वयं मरुतोपि वा
युवः संतोपि आतवाऊहृताः वायूत्पादनार्थं गृहीतव्यजनाः बभूवुः इदमाश्चर्यं मरुतो देवा इत्यर्थांतरं ॥१६॥ तत्र रणांगणे सायुधौ सर्सिंहमा
दौ रिपुगणौ उभयसैनिकसमुदायौ पुष्करे आकाशे पूर्वपश्चिममरुद्भ्यां पूर्वपश्चिमदिग्वाताभ्यां प्रचोदितौ उन्नौ नवौ यौ घनाघनौ वर्षुकमेघौ
ताविव शनैः शनैः मंदगमनेन संगतौ मिलितौ ॥१७॥ सामान्येन युद्धं विशेषं विवक्षुस्तावदादौ गजयुद्धं नवभिराह धावदिति धावतां स्यंदना

सति घर्मजलेऽमिथो विमर्दसकलं तद्व्यपनेतुमंगकेभ्यः ॥ मघवत्प्रमुखाः स्वयं बभूवुर्मरुतोपि स्वयमात्तनालवृंताः ॥१६॥ तत्र
तौ रिपुगणौ शनैः शनैः संगतौ सधनुष्पौ सगर्जितौ ॥ पूर्वपश्चिममरुत्प्रचोदितौ पुष्करे नवघनाघनाविव ॥१७॥ धावत्स्यंदनकेत
नांशुकमरुद्भ्राधूतमंदाकिनीविद्रुतामपि सैन्यकुंजरघटाशुंडासमुत्थायिनां ॥ दानांभःपृषतामपि स्फुटशरत्तारारुचिस्पर्धि
नां भेदं याहयितुं [illegible] नभोगमने मृगानुरोधकमं ॥१८॥ नांयानिकेतनानि [illegible] पातेषां मरुद्भिः वायुभिः व्याधूताया कंपिता
या मंदाकिन्याः [illegible] विद्रुतामपि सैन्यकुंजरघटानां सैन्यगजसमूहानां शुंडाभिः [illegible] समुत्थायिनां [illegible]
[illegible] स्फुटशरत्तारारुचिस्पर्धिनां [illegible] भेदं [illegible] मृगाणां अनुरोधकमं [illegible]
[illegible] मृगानुगमनवत् तेतमदाविंदवः [illegible] मंदाकिनीविंदव इति ज्ञातानीत्यर्थः कथं भूतानां हितेषु

५

निरूढा स्फुरा भाकल्पाः प्रतापारुजयः शरक्षाकिंकनसखाकराः तान् स्पर्धितेन मंमू [illegible] तान्। कंचुकेनेषु [illegible] नामितत्वे भक्ता
नामसः शुण्मलान् तस्य खुडाग्रो काम मिमा भाविनस्तु जनतां त्रिवक्षिमिनिहृपे ॥१८॥ पादति कुरो दृप्तो आसाद्यमाप्त्वरव येन दत्तमारोण आर
सातोऽस्त्रेन असिनारक्तं नयंतारं हस्तिपकं निपात्य हत्वा साट्टहासितेन सशब्दहास्येन [illegible] पयात यास्कंधे गजस्कंधे स्थितिं विधाय कलश कुंभयोः आ
स्फालनकारिणं गजपानां कलयनिवारणाय कोणा आस्फालनकर्तारं रिपुभटं दृष्ट्वा कस्याश्चिद् वीकस्त्रियाः स्वर्वेश्यायाः कठिनयोः कुचकुंभयोः अपवं-

आसाद्य दृप्तमाहवे रुधेनारुचनीऽस्त्रेणासिनायंतारं विनिपात्य साट्टहासितं स्कंधे विधाय स्थितिं ॥ कुंभास्फालनकारिणं रिपु
भटं दृष्ट्वादिवौकस्त्रियाः कस्याश्चित्कुचकुंभयोः कठिनयोः कंडूररवंडाभवत् ॥१९॥ कश्चिद्गजः प्रतिभटेन करे विलूनेप्यामूलमा
गमसिनानमिताग्रकायः ॥ क्षिप्रं प्रगृह्य रदनेन निषादिहस्तात्वस्तां सृणिं पुनरदात्कुशलायतस्मै ॥२०॥ डानिरंतराकंडूः अभवत्
गजकुंभास्फालनकर्तारं तन्नादृशां वीरं दृष्ट्वायं स्वर्गगामी भवेन्नेन तथैनं दृष्ट्वा तत्कंठनाहं कुच कुंभास्फालनं कारयिष्यामीत्युत्कंठा समुत्पन्नेति
भावः ॥१९॥ कश्चिद्गजः प्रतिभटेन शत्रुवीरेण असिना आमूलं मूलभागपर्यंतं यथा तथा करे शुंडादंडे विलूने छिन्ने सत्यपि नमितः नम्रीकृत
अग्रकायः शरीरस्य पूर्वभागो येन तथाभूतः सन् निषादिनः हस्तिपकस्य हस्तात् स्त्रस्तां गलितां सृणिं अंकुशं रदनेन दंतेन क्षिप्रं शीघ्रं प्रगृह्य कुशलाय
कल्याणाय तस्मै निषादिने पुनः अदात् दत्तवान् स्वामि [illegible] भक्तिवशात् करे छिन्नेऽपि निषादिने सृणिं ददौ किं पुनस्तस्य [illegible] मानाः

चं·भा· ६ [illegible] उभौ करिणौ युधि मुखे परस्परं दन्तरदौ अन्योन्यप्रहारार्थं आरोपितदंतौ उभौ करिणौ अवेक्ष्य हरिः इंद्रः वाहने ऐरावतगजे वहत्यपि स्वस्य वहनं कुर्वत्यपि तस्मिन् सकलाः सहस्रसंख्याकाः दृशः सरभसं ससंभ्रमं निदधे स्थापयामास शुभ्रत्वेन चतुर्दंतत्वेन च मम गजो [illegible] गतः किमिति शंकया संभ्रमेण स्वगजं सहस्रदृग्भिरपश्यदिति भावः ॥२१॥ प्रतिदंतिनः युद्धार्थमागतस्य शत्रुगजस्य घातात् प्रहारात् भग्नः टी·क· ९

असितलेपसितौ करिणावुभौ युधि परस्परदन्तरदौ मुखे ॥ हरिरवेक्ष्य वहत्यपि वाहने सरभसं निदधे सकला दृशः ॥२१॥ भग्नैकदंतमुसलः प्रतिदंतिघातात्कुंभाग्रलक्ष्यकुटिलांकुशचंद्रलेखः ॥ कश्चिद्गिरीशसमतां कलयन्करींद्रः सारूप्यभागिव गणाधिपतेर्विरेजे ॥२२॥ ॥

एकः दंतमुसलो यस्य सः कुंभाग्रे गंडोपरिभागे लक्ष्या दृश्या कुटिलांकुश एव चंद्रलेखा यस्य सः कश्चित् करींद्रः गिरीशसमतां शिवसादृश्यं कलयन् स्वीकुर्वन् सन् गणाधिपतेः श्रीगजाननस्य सारूप्यभागिव एकदंतत्वेन भालचंद्रत्वेन च सरूपतां प्राप्त इव विरेजे शुशुभे इदमत्र [illegible] [illegible] स्थूलत्वेन महापर्वतसाम्यमित्यर्थांतरेण परिहारः ॥२२॥ ६

कश्चित्करिणः कलभः शावकः वेगेननिर्गत्य अग्रतोगत्वा अरिनृपतिबले शत्रुराजसैन्ये स्वं स्वकीयं स्वामिनं स्वोपरिस्थितं प्रभुं पातयन् तत्र शत्रुसैन्ये स्कंधे अधिरूढं कृताधिरोहणं विमतमपि शत्रुनिषादिनमपि स्वसैन्यं नीत्वा तथा स्वप्रभुवत् अधत्त दधार इत्थं युधि दुःसाध्यः रोषो निरोधो यस्य कः दूरं अत्यंतं धूतः अगणितः अंकुशो येन तथाभूतः सन् विज्ञंमन्यं आत्मानं निषादिकर्मणि कुशलमानिनं निषादिद्वयमपि जनानां हास्यपात्रं उपहासास्पदं विदधे अयं दुर्दान्तस्य गजस्य स्वभावः ॥२३॥ द्वौ वारणौ गजौ हस्तेन हस्तं शुंडया शुंडां अभिहत्य इति क्रियायाः उत्तरत्रापि संबंधः दंतयुगेन दंतौ क

कश्चिन्निर्गत्य वेगादरिनृपतिबले पातयन्स्वामिनं स्वं तत्र स्कंधाधिरूढं विमतमपि तथाधत्त नीत्वा स्वसैन्यं ॥ इत्थं दुःसाध्यरोधो युधि करिकलभो दूरधूतांकुशः सन्विज्ञंमन्यं निषादिद्वयमपि विदधे हास्यपात्रं जनानां ॥२३॥ हस्तेन हस्तमथ दंतयुगेन दंतौ कर्णौ च कर्णयुगलेन पदे च पद्भ्यां ॥ वालेन वालमभिहत्य च वारणौ द्वौ तुल्यांगयुद्धमतिशिक्षितमादधाते ॥२४॥ निषादिनो दंतिशिरस्यधोमुखं निपातितांगा लगुडस्य ताडनैः ॥ व्यथापनोदाय मदस्य सौरभं विनम्य जिघ्रंत इवावलोकिरे ॥२५॥

र्णयुगेन कर्णौ पद्भ्यां पदे पादौ वालेन वालं पुच्छेन पुच्छं च अभिहत्य अतिशयेन शिक्षितं अभ्यस्तं तुल्याभ्यां अंगाभ्यां अवयवाभ्यां युद्धं आदधाते कुर्वाते २४ लगुडस्य यष्टेः ताडनैः कर्णभिः दंतिशिरसि गजमस्तके अधोमुखं यथा तथा निपातितांगाः पातितदेहाः निषादिनः व्यथायाः यष्टिप्रहारस्य व्यथायाः अपनोदनाय विनम्य नम्रीभूय मदगन्धं सौरभं जिघ्रंत इव आघ्राणं कुर्वन्त इव आलुलोकिरे विलोकिताः ॥२५॥

तीक्ष्णैः प्रत्यर्थिमल्लैः शत्रुबाणैः अपहृतशिरसां छिन्नमस्तकानां हस्तिपानां निषादिनां शरीरात् उत्क्रांताः बहिरूर्ध्वदेशं निष्क्रांताः करिमदपय सां गजदानोदकानां सौरभीं सौगंध्यं उद्वहंतः धारयंतः प्राणवाताः दिवि आकाशे संमर्दभाजां परस्परांगसंघर्षवतीनां स्फुरत्स्फुटदृशां देवांगनानां कपोलस्थलकुचकलशयोः स्वेदवारिणां घर्मोदकानां प्रवाहं पायंपायं पीत्वापीत्वा पुनःपुनः शोषयित्वेत्यर्थः तालवृंतस्य व्यजनस्य कृत्यं वायु-

तीक्ष्णैः प्रत्यर्थिमल्लैरपहृतशिरसां हस्तिपानां शरीरादुत्क्रांताः प्राणवाताः करिमदपयसां सौरभीमुद्वहंतः ॥ पायंपायं कपोल
स्थलकुचकलशस्वेदवारिप्रवाहं चक्रुः संमर्दभाजां दिवि स्फुरत्स्फुटदृशां तालवृंतस्य कृत्यं ॥ २६ ॥ अश्वावुत्पौ तस्य तुरगपादा
वुत्क्षिप्य युद्धाभिमुखी भवंतौ ॥ परस्परस्योपरि हेतिनिपातात्स्वसादिनौ त्रातुमिवोर्ध्वकायौ ॥ २७ ॥ ७ ७

सुखाय घर्मशोषणकृतिरूपं कर्तव्यं चक्रुः अनया तिशयोक्त्या भटैः असंख्याता निषादिनो हता इति व्यज्यते २६ अथ चतुर्भिरश्वयुद्धमाह अश्वाविति युद्धा
भिमुखी भवंतौ युद्धार्थमभिमुखौ भवंतौ उभौ अश्वौ परस्परस्य उपरि हेतिनिपातात् परस्परकृतशस्त्रपातात् स्वसादिनौ स्वस्मिन् आरोहणकर्तारौ भटौ त्रातुमिव अग्र ७
पादौ उत्क्षिप्य ऊर्ध्वगतः कायः पूर्वकायो ययोस्तथाभूतौ संतौ न स्थितुः अन्योपि शत्रुकृतशस्त्रप्रहारात् स्वस्वामिनं त्रातुं मध्ये स्वशरीरं करोति ॥ २७ ॥ ७ ॥

वैरिभटस्यय: खड्गधर: तस्यएकैवधारापंचकधारकसतीष्वपिअश्वेविद्यमानास्वपिकंचिद्अश्वंस्कंधेविभिद्यछित्वाइतरैःदुरापान् अकल्प्यान्तस्यअश्वस्यअसून् प्राणान्जग्राह अल्पमपिसूक्ष्ममपितस्यअश्वस्यक्षतजांबुनःरक्तोदकस्यलेशंनजग्राह समयेपंचधाराअपिअनुपयुक्ताजाताइतिभावःपंचधाराश्रुतमप्यश्वंविभिद्यगताधारात्वमप्यंबुलेशंनजग्राहेत्याश्चर्यं खड्गधारायाअतितीक्ष्णतयाछिदिक्रियांकृत्वारक्तोत्पत्तेः प्राक्अतिशीघ्रंबहिर्निर्गमनाद्रक्तांबुलेशस्वीकाराभावइतिभावः आस्कंदितंधौरितकंरेचितंवल्गितंप्लुतं गतयोमूःपंचधाराअश्वस्य इच्छयासमागतिः पूर्वतोधिकाचतुरागतिः

एकैववैरिभटखड्गवरस्यधाराधाराकपंचकसतीष्वपिकंचिदश्वं ॥ स्कंधेविभिद्यनदसूनितरैर्दुरापान्जग्राहनाल्पमपिनक्षतजांबुलेशं ॥२८॥ समरभुविबभासेसादिनोभूषणानांमरकतमणिभासांमध्यगःकश्चिदश्वः ॥ सकलभटविमर्देश्चंचलाद्विबभेदेनिपतितइवरथ्योनेतुरन्हांशतांगात् ॥२९॥

मंडलिकंयागतिः वेगेनगतिः त्वरयाकंपेनगतिः इतिक्रमेणपंचानांधाराणामर्थाः ॥२८॥ समरभुविसादिनःअश्वारोहस्यभूषणानांभूषासंबंधिनांमरकतमणीनांहरितरत्नानांयाःभासःहरित्कांतयः तासांमध्यगःमध्यस्थःकश्चित्अश्वःअन्हांनेतुःसूर्यस्यबिंबभेदेविषयेसकलभटानामभिमुखहतसकलयोधानांविमर्देःप्रवेशेअहंपूर्विकयासंमर्देः चंचलात् शतांगात्रथात्निपतितःरथ्यश्वःसूर्यरथाश्वइवबभासेशुशुभे सूर्याश्वानांहरितत्वादियमुत्प्रेक्षा ॥२९॥

आयोधनांगणजुषां युद्धांगणस्थितानां असृगापगानां रक्तनदीनां आवर्तगर्भे जलभ्रममध्ये पतिताः हयानां कुणपाः शवाः मंडलचंक्रमेषु मंडलाकारभ्रमिषु पूर्वं विहितः कृतः विहितपूर्वस्तं शिक्षाविशेषं अभ्यासविशेषं आददाना इव स्वीकुर्वाणा इव संबभ्रमुः अनेन चतुरंगसेनावधबाहुल्यं द्योत्यते ॥ ३० ॥ अथैकेन पदानि द्वंद्वयुद्धमाह धन्वीति अथ स्वस्य स्वस्य चास्त्राणां प्रयोगे दृढपरिचितयः दृढाभ्यासाः द्वंद्वयोधेषु अग्रगण्याः मुख्याः धन्वी धनुर्धारी ध-

आयोधनांगणजुषामसृगापगानामावर्तगर्भपतिता कुणपा हयानां ॥ संबभ्रमुर्विहितपूर्वमुपाददानाः शिक्षाविशेषमिव मंडल चंक्रमेषु ॥ ३० ॥ धन्वी धानुष्कमारादसिघ्नमसिमान् कुंतिनं कुंतधारी चक्रास्त्रं चक्रहेतिर्गदिनमपि गदापाणिरन्योन्यमेत्य ॥ स्वस्वास्त्राणां प्रयोगे दृढपरिचितयो हंतृवध्यत्वशौंडीसाधारण्ये प्रतिष्ठामथ विदधुरमी द्वंद्वयोधाग्रगण्याः ॥ ३१ ॥ ततः ॥ धृष्टद्युम्नोत्कृत्तवर्माणमग्रे दृष्ट्वा हाहाशब्ददीनां स्वसेनां ॥ कोदंडज्यामास्पृशन्घोरघोषां कोपाद्भीष्मः प्राविशत्पार्थसैन्यं ॥ ३२ ॥

नुः महस्त्रं यस्य तं धानुष्कं एत्य इति क्रियया अत्रोत्तरत्रापि संबंधः चक्रहेतिः चक्रायुधः इति अन्योन्यं स्वस्व मानशास्त्रिणं परस्परं एत्य अभिगम्य हंतृत्वव-ध्यत्वयोः शौंड्याः अर्हतायाः साधारण्ये समानभावे प्रतिष्ठां स्थितिं दधुः तस्मिन्द्वंद्वयुद्धे अयमिमं हन्यादिति निश्चयेनैव बभूवेति भावः ॥ ३१ ॥ ततः धृष्टद्यु-म्नेन [illegible] तां अत एव हाहाशब्देः दीनां स्वसेनां अग्रे दृष्ट्वा भीष्मः घोरघोषां कोदंडज्यां धनुर्मौर्वीं आस्पृशन् वा [illegible] नार्थं आस्फालयन् पार्थसैन्यं प्राविशत् ॥ ३२ ॥ ५ ८

सिंहनादेन देवदत्ताख्येन शंखेन सहिते सरितः गंगायाः कुमारे भीष्मे चापं समाकृष्य विमुक्तैः शरैः परान् शत्रून् परेतुं प्रेतान् कर्तुं हंतुमित्यर्थः प्रवृत्ते सति अप्सरोभिः वरान् वरीतुं ववले सज्जीबभूवे अत्र परीतुमिति पाठस्तु न सम्यक् अभिमुखं हतानां स्वर्गगामित्वात्तद्वरणस्पृहयाप्सरोभिर्ववले इति भावः ॥२३॥ तस्य भीष्मस्य पृषत्कवर्याः बाणश्रेष्ठाः पांडवानां सेनामध्ये पृथक् पृथक् सहस्रं द्विपान् गजान् पतितान् च भूत्वा पतितान् अकार्षुः एवं तुरगान् भ

ससिंहनादे सरितः कुमारे चापं समाकृष्य शरैर्विमुक्तैः ॥ परान्परेतुं प्रयमं प्रवृत्ते वरान्वरीतुं ववलेप्सरोभिः ॥२३॥ पृथक्पृ
तनानां तरालेपृथक्पृथक् तस्यपृषत्कवर्याः ॥ द्विपान्सहस्रं तुरगान्सहस्रं भटान्सहस्रं पतितानकार्षुः ॥२४॥ सिंधोः सु
तस्य विशिखैर्जमदग्निसूनोः प्राणान्विलिख्याधिगितिप्रविमुक्तवद्भिः ॥ कृत्तान्यसुंचनविरोधिकुलानिकस्मिंश्चित्क्षणे जगृहे
युधि भूतवर्गः ॥२५॥

यांश्च अकार्षुः २४ जमदग्निसूनोः परशुरामस्य प्राणान् विलिख्य आस्वाद्य धिगित्युक्त्वा प्रविमुक्तवद्भिः त्यजद्भिः एतत्प्राणापहरणेन हत्याप्राप्त्या ऐतत्कर्मनिंद्यमिति मत्वा त्यजद्भिरिति भावः सिंधोः गंगायाः सुतस्य भीष्मस्य विशिखैः युधि कृत्तानि छिन्नानि विरोधिकुलानि शत्रुवृंदानि कस्मिंश्चित् क्षणे भूतानां वर्गः समूहः जगृहे भूतवर्गः आदत्त इदं किंचित् न तु पंचमहाभूतानां गगनपवनाद्यबादि समूहः भवगृहेन बाणपिशाचानां वर्गो भक्षितुं जगृहे नीचकरेणार्थात् परिहारः २५

दाळितवैरिणिहतशत्रौदेवव्रतेभीष्मेदृष्टमात्रेदृष्टेएवसारथ्यमात्रकरणे अर्जुनस्यसारथिकर्ममात्रकरणेकृतसंगरोपिकृतप्रतिज्ञोपिमुरजित्श्रीकृष्णःस्वपदमूलेकेवलंचक्रंनभ्रमयांचकाररथस्यमध्येपिचक्रंभ्रमयांचकार यदाभीष्मप्रतापस्यपुरोर्जुनसामर्थ्यंनचलतिस्मतदाकृष्णःसारथ्यकर्मणाकेव

देवव्रतेदलितवैरिणिदृष्टमात्रेसारथ्यमात्रकरणेकृतसंगरोपि ॥ मूलेनकेवलमहोमुरजिद्रथस्यमध्येपिचक्रमतिविभ्रमयांचकार ॥ ३६ ॥ अरिमंडलखंडकैःपृषत्कैरवदीर्णारुधिरापगावलीनां ॥ अवनीपतयोरुषानिजानामधिविन्नांजननीमसुष्यचक्रुः ॥ ३७ ॥

लंचक्रंनभ्रमयांबभूवअपितुभीष्मवधार्थंरथमध्येहस्तेचक्रंधृत्वाभ्रामयामासेत्यर्थः ॥ ३६ ॥ अरिमंडलानांखंडकैःछेत्तृभिःपृषत्कैःबाणैःअवदीर्णाभिन्नाःअवनीपतयःराजानःरुषाक्रोधेनअमुष्यभीष्मस्यजननींभागीरथींनिजानांरुधिरापगावलीनांरक्तनदीपरंपराणांअधिविन्नांसपत्नींचक्रुः अन्योपिवैरीस्वशत्रुमपकर्तुमशक्तस्तन्मातुरप्रियंकरोति स्त्रीणांसपत्नीदुःखंपरमप्रियं ॥ ३७ ॥ ९

टी॰ तदनुकल्पांतरुद्रस्यबंधुः संहारकारित्वेनतत्तुल्यः स्फारसिंधुसूनुः भीष्मः अयुतेनराज्ञांशिरोभिः दशसहस्रसंख्याकैः क्षत्रियाणांमस्तकैः वसुंधरांबं
धुरयांचक्रे नतोन्नतांचक्रे कथंभूतैःशिरोभिः समरेसंमुखीनाः युद्धार्थमभिमुखाः येवैरिभटाः तेषांप्राणानांपरिमोषणे अपहारविषये उन्मुखानां उत्क
ण्ठितानांशिलीमुखानांबाणानांप्रस्थानसमयस्ययत् समाप्रच्छनंसंप्रश्नः तस्यपात्रीकृताः कर्णपुटाः यैः तैः येषांकर्णपुटपर्यंतंज्यामाकृष्यपरप्राणहरणार्थं
बाणाः प्रमुक्तास्तैरित्यर्थः पुनः॰ बलवैरिनगरेअमरावत्यांवास्तव्यावासकर्त्रीयावारवनिताजननाअप्सरसांसंहतिःतस्याःपाणिपंकेरुहेभ्यः करकमलेभ्यः

गं॰ तदनुसमरसंमुखीनवैरिभटप्राणपरिमोषणोन्मुखशिलीमुखप्रस्थानसमयसमाप्रच्छनपात्रीकृतकर्णपुटैर्बलवैरिनगरवास्त
व्यवारवनिताजननापाणिपंकेरुहपरिगलितपारिजातप्रसवसहपतितचंचरीकपुंजमंजुगुंजितव्यंजितभेदचिकुरबंधैर्वेगापतितविशि
खविघट्टनविपर्यस्तविकटमुकुटविटंकविप्रकीर्णमुक्ताफलशंकावदान्यरणश्रमवारिशीकरनिकरकोरकितनिटिलभागैरोषानिरेकव्य
तिकरिनदशनालिदंशनपुनरुक्तरक्तिमाधरैरयुतेनराज्ञांशिरोभिःकल्पांतरुद्रबंधुःस्फारसिंधुसूनुर्वसुंधरांबंधुरयांचक्रे ॥ ५ ॥

परिगलितानियानिपारिजातप्रसूनानिकल्पवृक्षपुष्पाणितैःसहपतिताःयेचंचरीकपुंजाः भ्रमरसमूहाः तेषांमंजुगुंजितैः व्यंजितःप्रकटीकृतः भेदोयेषांतेचिकु
रबंधाःकेशबंधाःयेषांतैःपराक्रमिणामभिमुखहतानांसंबंधित्वाद्देवीकृतपुष्पवृष्टिविशिष्टैरित्यर्थः॥ पु॰॥ वेगेनआपतितानांविशिखानांविघट्टनेताडनेनवि
पर्यस्तापतिताः येविकटाःमहांतःमुकुटाःतेषांविटंकेभ्यःकपोतपालिकाभ्यःविप्रकीर्णानांसमंततःपतितानांमुक्ताफलानांशंकायाःवदान्याःदातारः

चं·भा [illegible]

टी·का ९

[illegible]रिशी[illegible]संबंधिष्वपजन्यघर्मबिंदवः तैः कोप[illegible]विशिष्टः [illegible] येषांते [illegible]
त्वं ॥ पु॰॥ रोषातिरेकेण रोषातिशयेन व्यतिकरितानि आरक्तानि यानि दशनावलीनां दंतावलीनां दंशनानि तैः पुनरुक्तः द्विगुणीकृतः रक्तिमा येषां ते अध
रोष्ठा येषां तैः दृष्टपूर्वा निरक्ताधरैरित्यर्थः ॥४॥ पद्यं ॥ नयाः कृतेन भीष्मे ण जनितैः भूरान्हवाउत्सादितैः देववर्गैः स्वधाम्नि स्वस्थाने स्वर्गे सांद्रे संबाधे सति

नयाःकृतेनजनितैर्नवदेववर्गैः सांद्रेस्वधाम्निसतिसंकुचितस्थितीनां ॥ स्वर्गौकसामजनिसास्वयमेवकाम्याकूलंकषाकुशिकनंदनकोपमुद्रा ॥३८॥ भीष्मस्यकन्याजनपाणिपीडांपितुर्मुदेत्यक्तवतोपितस्य ॥ संघात्कराणांसतिपुण्यवर्षेसंतानलाभोजनितद्धिचित्रं ॥३९॥

संकुचितास्थितिर्येषां तेषां स्वर्गौकसां सा प्रसिद्धा कूलंकषा पूर्णा कुशिकनंदनस्य विश्वामित्रस्य कोपमुद्रा त्रिशंकुराजार्थं नूतनस्वर्गनिर्माणविषये कोपाकृ
तिः स्वयमेवात्मनैव काम्या एषणीया अजनि जाता यदि तदानीं कुशिकनंदनेन द्वितीयसर्गः कृतः स्यात्तर्हि इदानीं स्थिति संकोचो [illegible] इदानीमस्मत्कस्ताय
[illegible] ॥३८॥ पितुः शंतनोः मुदे हर्षाय कन्याजनानां पाणिपीडां विवाहं त्यक्तवतो पि तस्य भीष्मस्य [illegible] पुण्यवर्षे सति सं
[illegible] संतानस्य कल्पवृक्षविशेष[illegible] संतानानि तेषां लाभ [illegible] ॥३९॥ १०

असौभीष्मः इत्थंएकदिनंसमीकंयुद्धंविधायकलापद्यबंधौसूर्येपाश्चात्यभूधरंअस्ताचलंउपेयुषिप्राप्तवतिसतिनिचापस्यशिखरात्अग्रात्अवरोपिताअ
धःकृताज्यायेनतथाभूतःसन्स्वस्यापिबलापहारंसामर्थ्यापहारंसेनानिवर्तनंचचकार केषामिवप्रत्यर्थिनामिवशत्रूणामिवयथाशत्रूणांबलापहा
रःकृतःतथास्वस्यापिबलापहारःकृतइत्यर्थःस्वीकारेणचमत्कारः अर्थांतरंतुउक्तं ॥४०॥ ॥गद्यं॥ ॥इतिनवदिनानिनवनवानिनिजभुजोद्भूत
नानिभुजविलसितानिभुजक्रीडाःप्रकाश्यदशमेहनिपुनरप्यसौशांतमनाःस्वांतेनिहितोरमाकांतोयेनसः शांतनवःभीष्मःक्ष्मभटलोकानधामि

इत्थंविधायदिनमेकमसौसमीकंपाश्चात्यभूधरमुपेयुषिपद्मबंधौ॥ प्रत्यर्थिनामिवचकारबलापहारंस्वस्यापिचापशिखरादव
रोपितज्यः॥४०॥ ॥गद्यं॥ इतिनवदिनानिनवनवानिभुजविलासितानिप्रकाश्यदशमेहनिपुनरसौनिजध्वजचिन्हमात्रंविय
दारोहतिसतिभगवतिविवस्वतिसमरवर्षासमयशिखंडिनागांडीवधन्वनापुरस्कृतंशिखंडिनंविलोक्यस्त्रीपूर्वोयमनुनासह
नयोत्स्यइतिनिषिध्यहस्ततलान्निरस्तधनुर्लेखकःप्रथमंस्वदूरापसारकुपितयेवसिंजिन्यापश्चाद्दूरनिष्कासितैर्विजयविपाठैरादिव
सावसानमवदारितकलेवरतयानितांतंनतांतःशांतनवःशांतमनाःस्वांतनिहितरमाकांतःक्ष्मभटलोकसमुचितांशरशय्यांक्रमादधिशिश्ये॥५॥

क्ष्मभटलोकानांसमुचितांशरशय्यांक्रमादधिशिश्ये शरतल्पेशयितवानित्यर्थः कथंभूतःभीष्मः भगवतिविवस्वतिसूर्येनिजध्वजस्यचिन्हंतावन्मा
त्रमात्रंतत्प्रमाणंयथातथावियत्आकाशंआरोहतिसतितस्मिन्समयेसमरएववर्षासमयःवर्षाऋतुःतत्रशिखंडिनामयूरेणतत्सादृश्येनसपरविपक्षी

निपुणेनगांडीवधन्वना अर्जुनेनपुरस्कृतंस्वाग्रतः स्थापितंशिखंडिनंज्येष्ठंद्रुपदपुत्रंविलोक्य अयंपूर्वस्त्रीस्त्रीपूर्वः जन्मकालेजन्मांतरेचस्त्रीसन्नूत
नःपुरुषोजातइत्यर्थः अमुनासहनयोत्स्यामितिनिषिध्यहस्ततलात्निरस्तः त्यक्तः धनुर्लस्तकः धनुर्मध्योयेनसः त्यक्तचापइत्यर्थः पुनः॰ म
थमंस्वस्यदूरं अपसारः अपसरणंतेनकुपितयेवशिंजिन्यागुणेनपश्चात्दूरंनिष्कासितैः अपसारितैः आकर्णज्यामाकृष्य मुक्तैरित्यर्थः विजय

॥ पद्यं ॥ पार्थेनक्षितिविनिखातपुंखकानांबाणानामुपरिपितामहः शयानः ॥ बभ्राजेव्रणबिलवांतरक्तबिंदु
धाराणांघनइवशक्रकोपवर्षी ॥ ४१ ॥ ५ ५ ५ ५

विपाटैः अर्जुनबाणैः आदिवसावसानं सूर्यास्तपर्यंतंअवदारितंविभिन्नंकलेवरंयस्यतस्यभावस्तत्तातयानितांततांतः अत्यंतव्याकुलः ॥ ५ ॥ पद्यं ॥
पार्थेन अर्जुनेनक्षितौविनिखाताः आरोपिताः पुंखाः पश्चाद्भागाः येषांतेषांबाणानामुपरिशयानः व्रणबिलैः क्षतछिद्रैः वांताः त्यक्ताः रक्तबिंदवोयस्य
सः यद्वावमतेरकर्मकत्वंस्वीकृत्यकर्तरिक्तः तथाचव्रणबिलेभ्यः वांताः पतंतः रक्तबिंदवोयस्यसः पितामहः भीष्मः बभ्राजेशुशुभे कइवशक्रको
पवर्षी इंद्रकोपेरक्तवृष्टिकर्ताधाराणां घनइवमेघइव शक्रगोपवर्षीतिपाठे इंद्रगोपसंज्ञकरक्तकीटवर्षीमेघइवेत्युत्प्रेक्षा ॥ ४१ ॥ ५ ५

तत्र रणांगणे तं द्वसं भीष्मं शरेषु शायिनं वीक्ष्य सांक्रामिकं संसर्गजन्यं गुणं प्रतिपद्यमान इव भास्वानपि स्वयं उपात्ता स्वीकृता करोष्मणः किरणोष्मणः ह
स्तपराक्रमस्य च शांतिर्येन सः भास्वानपि तेजस्वी सूर्योपि पाश्चात्यसागरस्य पश्चिमदिक्स्थसमुद्रस्य शरेषु बाणेषु जलेषु च शयालुः निद्राणः आसी
त् म्लानं शरतल्पस्थं भीष्मं दृष्ट्वा सूर्यः स्वयमपि शांतः सन् समुद्रशरेषु शायितवानित्यर्थः तत्समये सूर्योस्तं जगामेति भावः ॥४२॥ जगति विश्रुता विशे
षेण स्तुता कीर्तिर्यस्य तस्मिन्कवलितः नाशितः रिपुवर्गो येन तस्मिन्जामदग्न्यस्य शिष्ये भीष्मे कालधर्मं मुमूर्षतां प्रपन्ने प्राप्ते सति बहूनां स्मरवराणां

संवीक्ष्य तत्र तमिमं शयितं शरेषु सांक्रामिकं गुणमिव प्रतिपद्यमानः ॥ भास्वानपि स्वयमुपात्तकरोष्मशांतिः पश्चात्यसागरशरे
षु शयालुरासीत् ॥४२॥ जगति विश्रुतकीर्तौ जामदग्न्यस्य शिष्ये कवलितरिपुवर्गे कालधर्मं प्रपन्ने ॥ बहुस्मरवरलाभाद्दृढका-
मोत्सवानां श्वशुरमरणदुःखं स्वर्वधूनां बभूव ॥४३॥ पतितवति युधि वाहिनीकृते पतदस्रुर्द्विविधापि वाहिनी ॥ प्रथमा परितापमुच्छ्रितं
पटवेश्मानि ययौ ततः परा ॥४४॥

नूतनदेवानां लाभात् बद्धः आरब्धः कामोत्सवः स्मरतोत्सवो याभिस्तासां स्वर्वधूनां अप्सरसां श्वशुरम
रणस्य इदानींतनस्वपतिदेवनिर्मातृत्वेन श्वशुरो भीष्मः तस्य मरणदुःखं बभूव हितकृच्छ्वशुरमरणदुःखं बभूवेति भावः ॥४३॥ युधि वाहिनीकृते भीष्मे
पतिते सति द्विविधापि द्विप्रकारापि वाहिनी भागीरथी सेना च पतंति अश्रूणि यस्यास्तथाभूता अभूत् तत्र प्रथमा भागीरथी उच्छ्रितं महांतं परितापं शो
कजन्यसंतापं ययौ तत्परा द्वितीया सेना पटवेश्मानि ययौ ॥४४॥

अपरेअहनिभीष्मपतनदिनात्द्वितीयेहनिकौरवः दुर्योधनःचमूनांअधिपत्वेआधिपत्येकुंभयोनिंद्रोणंपरिकल्प्यकृत्वाभीष्मपाताखेतोःरुदितेन
रोदनेनउच्छूनाःशोथयुताः दृशोयेषांतेषांनराधिपानांराज्ञांपुरतःनिजगादउवाच॥ ४५॥ कुंभोत्पत्याजन्मनाप्रसिद्धः मुनिषुऋषभःश्रेष्ठःअगस्त्यः
विंध्यसंज्ञंक्ष्माधरंपर्वतमिवलोकेनादृग्विधःकुंभोत्पत्यादिनानसदृशःत्वंयुधिनिजमहसास्वप्रतापेनभूभृतःभूपालानूपर्वतान्वास्तंभयित्वालसपकम-

अपरेहनिकौरवश्चमूनामधिपत्वेपरिकल्प्यकुंभयोनिं॥ पुरतोनिजगादभीष्मपातादुदिनोच्छूनदृशांनराधिपानां॥ ४५॥ कुंभो
त्पत्याप्रसिद्धोमुनिऋषभइवक्ष्माधरंविंध्यसंज्ञंलोकेनादृग्विधस्त्वंयुधिनिजमहसाभूभृतंस्तंभयित्वा॥ जीवग्राहंगृहीत्वाविन
मितवदनंलज्जयाधर्मसूनुंपद्भ्यामेवप्रचारंविदधतमधुनालीलयामेर्पयेति॥ ४६॥ उदितंतदिदंनिशम्यगोष्ठ्यामुचितज्ञःकरमु
न्नमय्यकिंचित्॥ गुहसन्निभविक्रमस्तदानींगुरुरेषोपिकुरूद्वहंबभाषे॥ ४७॥

स्तंभनंकृत्वालज्जयाविनमितंअवाक्कृतं-
वदनंयेनतंपद्भ्यामेवचरणाभ्यामेवप्रचारंगमनंविदधतंकुर्वंतंधर्मसूनुंधर्मराजंलीलयाजीवग्राहंगृहीत्वाजीवंतंधृत्वेत्यर्थः अधुनामेमह्यंअर्पयदेहि
इतिउवाचेतिपूर्वेणान्वयः जन्मनाप्रतापेनचागस्त्यसदृशस्त्वंभूभृत्स्तंभनंकृत्वाधर्मराजंधृत्वामेर्पयेत्यर्थः॥ ४६॥ गोष्ठ्यांसभायांतत् इदंउदितंभाषितंनि १२
शम्यश्रुत्वाउचितज्ञःसम्यक्ज्ञातागुहेनकार्तिकेयेनतुल्यःपराक्रमोयस्यसःएषःगुरुरपिद्रोणोपितदानींकिंचित्करमुन्नमय्य[illegible]

हे नृप धर्मात्मजे धराधिनाथैः वीरभूपालैः परिवृते सत्यपि ते अखिलं अशेषं कांक्षितं इच्छाविषयं कर्तुं संपादितुं शक्यं हि [illegible]
[illegible] प्रगुणाः शोभिताः ये हयाः तेषां हेषितशब्दैः अश्वजातीयशब्दैः मिश्रितः नरस्य अर्जुनस्य शरासघोषः गांडीव [illegible]
लकांक्षितं कर्तुं शक्यमित्यर्थः अर्जुनाश्वधनुः शब्दश्रवणाय यानस्यावृत्ता वहद्दूरमर्जुनो नो नश्चेचर्हि वल्लकांक्षितं कुर्यामिति भावः ॥४८॥ [illegible] सा
अस्मा विद्यानां सहवाससौख्यं एकत्रवाससौख्यं तस्य संकेतभूमेः अस्मिन्नृस्थले सर्वाभिगमत्य सहवाससौख्यमनुभवाम इति समाप्य [illegible]

कर्तुं हि शक्यमखिलं नृप कांक्षितं ते धर्मात्मजे परिवृतेपि धराधिनाथैः ॥ शोभिप्रगुणन्नहयहेषितशब्दमिश्रोन श्रूयते यदि नर
स्य शरासघोषः ॥४८॥ सर्वास्त्वविद्यासहवाससौख्यसंकेतभूमेरपि तस्य वाचं ॥ प्रत्यक्षयोरेतां परिषद्गतानां विर्ये कृप्रचारः .
शिरस्सो नृपाणां ॥४९॥ अथद्रुपदजद्रोणौ रथद्विपहयावृतौ ॥ बद्धायतसमुत्साहौ युद्धायनिरगच्छताम् ॥५०॥ ॥ ॥
श्रीराधादामोदरायनमः ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

लितासौख्यमनुभवंति सा संकेतभूमिः नद्रूपस्य महावीरस्यापि तस्य द्रोणस्य तां वाचं परिषदि सभायां सतानां विद्यमानानां नृपाणां शिरसः श्रियं
कृप्रचारः वक्राचारः प्रत्यक्षयोः संमुखयोः ययाविस्मयै आश्चर्यं अनुमोदनार्थं शिरस्चालनार्थेन परिहारः ॥४९॥ अथ [illegible]
आयतः दीर्घः समुत्साहो याभ्यां तौ द्रुपदजद्रोणौ सेनापती युद्धाय युद्धं कर्तुं निरगच्छताम् ॥५०॥ ॥७॥ ॥७॥

[illegible] पितौ राजवर्यौ नाम्नः भीष्मनाम्नः अक्षरैः लिखिताः शरैः अंकिताः चिन्हिताः येन दीक्षितवाणाः भीष्मबाणाः तैः कीर्णे व्याप्ते रंगे युद्धसभायां अवनेरस्तु आजग्मतुः कीदृशौ राजवर्यौ सक्ष्वेडितौ ससिंहनादौ विरुदैः स्वशौर्यप्रख्यापनाय धृतचिन्हैः सिंहव्याघ्राद्यंकितध्वजादिभिः सहितौ सदजन्याट्टहासेन सशब्दहास्येन सहितौ संस्फालितं आस्फालितं अंसशिखरं स्कंधाग्रं याभ्यां तौ नथा सह वल्गितौ त्वं हतो सीत्यादि गर्वोक्त्या सहितौ ॥५१॥ एकत्र एकस्मिन् स्थले गाढं सांद्रं यथा तथा मिलिताः अवनिवल्लभानां भूपानां याः वाहिन्यः सेनाः तासां अक्षौहिणीः एतन्नामकसंख्यासु

नामाक्षरांकितनदीक्षितवाणकीर्णे रंगे वनेरतु रुभाववपि राजवर्यौ ॥ सक्ष्वेडितौ सविरुदौ समदाट्टहासौ संस्फालितांसशिखरौ सह वल्गितौ तौ ॥५१॥ अक्षौहिणीरवनिवल्लभवाहिनीनामेकत्र गाढमिलिताः कृतरामसोढा ॥ सायुद्धभूमिरुपरीव समुत्सर्पंती सांद्ररजःपटलिका समदृश्यताभ्रे ॥५२॥ भेरीरवे गगनवाहिनि बाहुलीलां द्रोणस्य वीक्षितुमनोभिरदृष्टपूर्वां ॥ मध्ये विसृज्य दिवि जंभभिदेवकाशं नस्थेभिनस्त्रिदशकिंनरयक्षसिद्धैः ॥५३॥

नरां अत्यंतं असोढा असहिष्णुः सायुद्धभूमिः उपरि ऊर्ध्वं [illegible] समुत्सर्पंती वर्द्धमानं कुर्वती वा अभ्रे आकाशे सांद्रानि बिडारजःसां पटलिकासंहतिः समदृश्यत दृष्टा यदोभयसेने रणांगणमागते तदा बहुरजः भूतलं आकाशमुत्पपातेत्यर्थः ॥५२॥ भेरीणां रवे गगनशायिनि गगनं प्रति गते सति पूर्वं अदृष्टा अदृष्टपूर्वा तां द्रोणस्य बाहुलीलां वीक्षितुमनोभिः द्युलोके [illegible] किंनरयक्षसिद्धैः दिवि आकाशे मध्ये मध्यभागे जंभभिदे इंद्राय अवकाशं विसृज्य विसृज्य स्थितं उभयभागे [illegible]

येषां ... शत्रुसमुदायेन ... उ[illegible] स्थिरचिररनिरीतिरिरेव॥५३॥ ॥गद्यं॥ ततः वक्षः स्थानले निहितः स्थापितः वामजानुभागो यैस्ते सर्वे पितरें[illegible]ः सन्तानः [illegible]याहि[illegible]क्ष्वेडितमंत्रं सिंहनादात्मकमंत्रं उदीर्य उच्चार्य तूणीरा एव पेटकाः तेभ्यः समुत्थापितान् प्रकटीकृतान् जीवाकर्षणेनाविर्भावे कर्षणेन प्राणहरणेन समुपजातालराः मेषांतान् पुरुषान् कठिनान् क्रूरांश्च भीषणान् भयंकरान् विषैर्दिग्धान् लिप्तांश्च विनतातनयेन गरुडेन सह गमन विषये जाति वैरेण च निबद्धः स्पर्धाभरो यैस्तान् तक्षकं छेदकं मुखं अग्रभागो येषां तान् पन्नगपक्षे तक्षकादीन् बाणपन्नगान् नभोभुवि आकाशस्थले

॥गद्यं॥ ततस्ते सर्वे पितरें[illegible]वक्षःस्थानले निहितवामजानुभागाः क्ष्वेडितमंत्रमुदीर्य तूणीरपेटकसमुत्थापितान् जीवाकर्षणसमुपजातलरान् परुषभीषणविषदिग्धान् विनतातनयनिबद्धस्पर्धाभरान् तक्षकमुखान् बाणपन्नगान् नभोभुवि चिरं नर्तयंतः परस्परं परिपंथिनां प्राणपवमानमपीप्यन्॥ ६॥ ॥पद्यं॥ कलशीतनये थ कार्मुकं स्वं वलयीकुर्वति वैरिधन्विषूनां॥ युधि केवलमेव चापदंडा धृतजीवा जनदृश्यथे व्यतिष्ठन्॥५४॥ चिरं नर्तयंतः गमयंतः संतः स्वेलयंतः संतश्च परस्परं परिपंथिनां शत्रूणां प्राणपवमानं प्राणवायुं अपीप्यनूपाययामासुः॥ ६॥ ॥पद्यं॥ अथ कलशीतनये द्रोणाचार्ये स्वं कार्मुकं धनुः वलयीकुर्वति बाणसंधानं कृत्वा आकर्षति सति वैरिणः ये धन्विषु वानःधानुष्कतरुणाः तेषां चापदंडाः युधि केवलं जनानां दृश्यथेषु दृष्टिमार्गेषु धृतजीवाः धृतमौर्विकाः धृतप्राणाश्च अतिष्ठन् आसन् द्रोणाचार्यपुरतः कैरपि धानुष्कैः स्वधनुः सज्जं न कृतमित्यर्थः॥५५॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

विधातुः ब्रह्मणः सृष्टिं विपरीतरूपां विधातुं कर्तुं उद्युक्त एव एष वीरः [illegible] शराभिवर्षेण [illegible] मूर्ध्नि [illegible] कबंधानि [illegible] शिरोधो भागाः ऊर्ध्वं उपरि चकार शिरांसि अधस्तात् अधोभागे चकार विधातृसृष्टौ उपरि शिरः अधः कबंधं [illegible] शिरांसि छित्वा भुवि पातितानीति केवलं कबंधाद्दतस्ततो गच्छत्याकाशेऽसतं विज्ञातो विपरीता सृष्टिः कृता किमित्युत्प्रेक्षा ॥ ५५ ॥ यावत्तेनामर्दनं चक्रिनंतावत् [illegible]

विधातृसृष्टिं विपरीतरूपां विधातुमुद्युक्त इवैष वीरः ॥ शराभिवर्षेण चकार राज्ञां मूर्ध्नि कबंधानि शिरांस्यधस्तात् ॥ ५५ ॥
तावद् घोटैर्बलसैर्बलाधिनस विधेतस्थिवांसं शतांगे भारद्वाजो जिघृक्षुर्नृपतिमभिययौ मल्लवर्षं विमुंचन् ॥ दंष्ट्राग्रोत्थैः
शलाकास्तमुलमवकिरन्दिक्षु सर्वासु घोरः शीतांशुं मध्यसीम्निस्थितमिव परिधेः सिंहिकायाः कुमारः ॥ ५६ ॥

घोटैः बलयितः सविधः समीपस्थ [illegible] यस्य तस्मिन् शतांगे रथे तस्थिवांसं स्थितं नृपतिं [illegible] जिघृक्षुः [illegible] भारद्वाजः [illegible] वर्षाण्[illegible] विमुंचन् [illegible] अभिययौ संमुखो जगाम कः कमिव परिधेः परिवेषस्य मध्यसीम्नि [illegible] स्थितं [illegible] जिघृक्षुः [illegible] सिंहिकायाः कु- 14
मारः [illegible] सर्वासु दिक्षु [illegible] शलाकाः शलाकाकारसूक्ष्मदंष्ट्राग्रोत्थैः [illegible] सांद्र [illegible] ॥ ५६ ॥

ग० ॥ ततः नदीयानां द्रोणीयानां मार्गणगणानां बाणसमूहानां अभिघातैः प्रहारैः निवर्तितानि पश्चात्कृतानि मुखानि येषां तैः निजशिलीमुखैः -
स्वबाणैः सह दूरं उपयातान् गतान् मातरिश्वा वायुः वैश्वानरः अग्निः आश्विनेयौ च तेषां तनयाः पुत्राः भीमसेनधृष्टद्युम्ननकुलसहदेवाः प्रभृत
यो येषां तान् प्रवीरान् महावीरान् क्षितिपतिरथं रक्षंति तान् अभितः वीक्ष्य माणेन माधवेन धाव्यमानाः त्वरयागम्यमानाः तुरगाः यस्य तेन शतां

ततः॥ग०॥ नदीयमार्गणगणाभिघातनिवर्तितमुखैर्निजशिलीमुखैः सहदूरमुपयातान्मातरिश्ववैश्वानराश्विनेयतनयप्रभृती
न्क्षितिपतिरथरक्षिणः प्रवीरानभिवीक्ष्य माणेन माधवेन धाव्यमानतुरंगेण शतांगेन प्लवंगकेतनो नगेंद्रो नदीप्रवाहमिव निर्नि
रोधरथचर्यतमाचार्यमुपरुरोध॥७॥ ॥पद्यं॥ शिवयुद्धकृतस्तस्य द्रोणयुद्धेप्यभून्मनः॥ सर्वापि जनता श्रेयः कांक्षते ह्युत्त
रोत्तरं॥५७॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

गेन रथेन प्लवंगकेतनः अर्जुनः नगेंद्रः महापर्वतः नदीप्र
वाहमिव निर्निरोधा निरोधरहिता रथचर्या रथगमनं यस्य तं आचार्यं द्रोणं उपरुरोध द्रोणधर्मराजयोर्मध्ये बभूवेत्यर्थः॥ ॥पद्यं॥ शिवेन सदाशिवे
न अल्पमानेन च युद्धकृतः तस्य अर्जुनस्य द्रोणाचार्येण शिवापेक्षया द्रोणसंज्ञकाधिकमानेन च युद्धेपि मनो मनोरथः अभूत् म्लेषेणोक्त
र्थसामान्येन समर्थयति सर्वेति तथाहि सर्वापि जनता जनसंमूहः उत्तरोत्तरं अधिकाद्धिकं श्रेयः कल्याणं कांक्षते इच्छति॥५७॥

अम्यर्जुनयोः धनंजयशब्दवाच्यत्वात् यस्य धनुषः दानाग्रहीतामतिग्रहीनापिधनंजयाविति उद्दामशब्दौ प्रोद्दशब्दौ भुवनेषु स्वर्गमृत्युपातालेषु
स्थितौ अस्य गांडीवनाम्नः धनुषः विस्फारघोषः ज्याशब्दः विजृंभते स्म ववृधे कथंभूतः शब्दः द्विषतां शत्रूणां असह्यः तथाभूयान् महान् ५८
मात्स्यपुर्यां विराटनगर्यां पुण्यकीर्तेः मेज्यायसः ज्येष्ठबंधोः धर्मस्य एषां पक्षिणां नाम कंक इति संज्ञा इष्टं प्रियं आसीत् इतीव अस्मात् हेतोरिव एष
षः अर्जुनः गांडीवात् उज्झितैः बाणैः हतानां द्विषतां क्रव्यैर्मांसैः कंकान् एतत्संज्ञकपक्षिणः पर्यतार्प्सीत् तृप्तान् चकारेत्यर्थः ॥५९॥ ॥गद्यं

दानागृहीनाच धनंजयावित्युद्दामशब्दौ भुवनेषु यस्य ॥ विस्फारघोषो धनुषोस्य भूयान्विजृंभते स्म द्विषतामसह्यः ॥५८॥ नामैषां
मेज्यायसः पुण्यकीर्तेरासीदिष्टं मात्स्यपुर्यामितीव ॥ गांडीवोज्झितैरेष बाणैर्हतानां कंकान् क्रव्यैर्विद्विषां पर्यतार्प्सीत् ॥५९॥ ॥गद्यं॥
तदनु सव्यसाचिशरवीचिनीचीकृतभुजदंभविजृंभः कुंभसंभवः समराय परिगृहीतेषु संविधानेषु तूणीमात्रमेव प्रतिभटाभिमुखं
विदधानैर्योधैः साकं चंडभानुश्चरमगिरेरिव स्वयमपि कटकसीमानमासीदत् ॥८॥ तदनु अर्जुनागमनानंतरं सव्यसाचिनः अर्जुन-
स्य शरवीचिभिः बाणपरंपराभिः नीचीकृतः अल्पीकृतः भुजदंभविजृंभः बाहुगर्वविकासो यस्य सः कुंभसंभवः द्रोणः समराय युद्धार्थं प्रतिगृहीतेषु सं-
विधानेषु तत्तद्धनुरादिसाधनेषु मध्ये तूणीमात्रमेव इषुधिमात्रमेव प्रतिभटानां शत्रुभटानां अभिमुखं सन्मुखं विदधानैः कुर्वाणैः स्वपृष्ठं प्रदर्शयद्भिः पलायमा-
नैरित्यर्थः योधैः साकं चंडभानुः सूर्यः चरमगिरेः अस्ताचलस्य कटकसीमानं नितंबप्रदेशमिव स्वयमपि कटकसीमानं सेनानिवेशस्थानं आसीदत् प्राप ॥८ १५

पद्यं॥ अन्येद्युः द्रोणयुद्धस्य द्वितीयदिवसे कृष्णेन कृतः कृतः प्रसंगः सारथ्यार्थसंगतिर्यस्य तस्मिन्विजये अर्जुने द्रोणेन संचोदितः प्रेरितः यः नृपः दु-
र्योधनः तस्य वचनेन तस्थिवद्भिः राज्ञां कुर्वद्भिः त्रिगर्तैः त्रिगर्तदेशीय सुशर्मप्रभृतिभिः आहूते इतो युद्धाय एहीत्याकारिते अनस्तैः सहयोद्धुं अन्यत्र
गतवति सति कृष्णेन सह अर्जुने संशप्तकैः सह योद्धुमन्यत्र गतवति सतीत्यर्थः प्रातः प्रातःकाले एव ते धार्तराष्ट्राः दुर्योधनादयः वीताः गताः भीः भयं
येषां तैः अनीकैः सैन्यैः सह परबलं पांडवसैन्यं अभजन् प्रापुः केकैः किमिव यथा चमराः मृगविशेषाः बलावद्भिः सशब्दैः स्वयूथैः स्वजातीयसमूहैः

॥पद्यं॥ अन्येद्युर्द्रोणसंचोदितनृपवचनेनस्थिवद्भिस्त्रिगर्तैराहूतेन्यत्रयोद्धुंगतवतिविजये कृष्णाकृतप्रसंगे॥ प्रातस्ते धार्तराष्ट्राः प्र
बलमभजन्वीतभीकैरनीकैर्दावज्वालेन शून्यं वनमिव चमरा वल्गवद्भिः स्वयूथैः॥ ६०॥ भारद्वाजोपि तस्मिन्नहनि कुरुपतेर्वांछितार्थं वि
धास्यन्नंधान्वेषेकतानो रथमथ निकषास्थापिते धर्मसूनोः॥ कृष्णाभ्यां रक्षणाय प्रथित भुजमदे सत्यजित्कल्स्फुलिंगं दृष्ट्योर्युग्मं विधा
य प्रतिभटपृतनाकुक्षिमाविक्षदेकः॥ ६१॥

महदावस्य वनाग्नेः ज्वालेन ज्वालया शून्यं वनं भजंति तद्वत्॥ ६०॥ अथ तस्मिन्नहनि रंध्रान्वेषणे श
त्रोश्छिद्रदर्शने एकतानः अनन्यवृत्तिः तदेकलक्ष्य इत्यर्थः एकः एकाकी भारद्वाजोपि द्रोणोपि धर्मसूनोः रथं निकषा रथस्य समीपे कृष्णाभ्यां कृष्णार्जुना
भ्यां नृपरक्षणार्थं स्थापिते प्रथितः प्रसिद्धः भुजमदो यस्य तस्मिन्सत्यजिति एतत्संज्ञके राजनि उच्चरंतः स्फुलिंगाः क्रोधाग्निकणा यस्मात्तद् दृष्ट्योः नेत्र
योः युग्मं विधाय कृत्वा कुरुपतेः दुर्योधनस्य वांछितार्थं धर्मराजं धृत्वा प्रत्यर्पणरूपं विधास्यन् करिष्यन् सन् प्रतिभटपृतनायाः शत्रुसेनायाः कुक्षिं मध्यदेशं आवि

…शास्त्रविवेश ॥ ६१ ॥ अथ चिरेण बहुकालं युध्वा रथ्यान् द्रोणरथवाहान् अश्वान् युगमात्रं करचतुष्टयमात्रं अपास्य उच्चालय पश्चात् त्यक्ता निर्धूनि तेन सत्यजिता ति[illegible]कृतेन अत एव सरूषा गुरुणा द्रोणेन निकृत्तं छिन्नं तस्य सत्यजितः वरांगं मस्तकं रंगभुवि रणांगणे युधिष्ठिरस्य बाष्पांबुभिः दुःखजन्यबाष्पोदकैः सह पपात ॥ ६२ ॥ तस्मिन्द्रोणे उच्चया महत्या त्वरया उपकंठं समीपं आगते सति तं द्रोणं अग्रे पश्यतः पार्थस्य धर्मराजस्य प्राणा अ

युध्वा चिरेण युगमात्रमपास्य रथ्यान्निर्धूनितेन सरुषा गुरुणा निकृत्तं ॥ तस्याथ रंगभुवि सत्यजितो वरांगं बाष्पांबुभिः सह पपात युधिष्ठिरस्य ॥ ६२ ॥ उच्चया त्वरया तस्मिन्नुपकंठ समागते ॥ पार्थस्य पश्यतोग्रे तं प्राणा अपि तथाचरन् ॥ ६३ ॥ तस्याथ दृप्तसेनाजलधिकवलनात्कुंभयोनित्वकीर्तिस्पर्धीकर्तुं स्वकीयामिव कुतुकवतः पार्श्वमभ्येत्य कोपात् ॥ भीमो रथ्यानमथ्नात् द्रुपदतनुभवः सूदयामास सूतं कोदंडकेतुदंडद्वयमपि शकलीचक्रतुर्दस्रपुत्रौ ॥ ६४ ॥

पि तथा आचरन् उपकंठं आगताव भूवुः भयेन बहिर्निर्गमार्थं कंठसमीपमागताव भूवुरित्यर्थः ॥ ६३ ॥ अथ दृप्तानां शत्रूणां सेनाजलधेः कवलनात् नाशात् पानाच्च हेतोः स्वकीयां कुंभयोनित्वकीर्तिं कुंभसंभवत्वकीर्तिं स्पर्धीकर्तुमिव कुतुकवतः कौतुकिनः तस्य द्रोणाचार्यस्य पार्श्वं अभ्येत्य भीमः कोपात् रथ्यान् रथाश्वान् अमथ्नात् जघान द्रुपदतनुभवः धृष्टद्युम्नः सूतं सारथिं सूदयामास जघान दस्रपुत्रौ नकुलसहदेवौ कोदंडकेतुदंडद्वयमपि शकलीचक्रतुः छिन्नवंतौ ॥ ६४ ॥

पद्यं ॥ ततः समस्तीकं तन्नामकं वंशकुलसंभवं गजं अधिरूढः रणे युद्धकर्मणि मग्नः भगदत्तः राजा ईदृशं अतिशायिनं कुंभसंभवस्य द्रोण स्य अभिषंगं पराभवं वीक्ष्य क्रोधनतया क्रोधवत्तया समस्तानि हास्तिकानि हस्तिवृंदानि पुरस्तात् स्वाग्रभागे विस्तार्य प्रसार्य हठेन बलात्कारे णभीमं अभिदुद्राव संमुखो जगाम कीदृशानि हास्तिकानि कर्णतालानां ये समीरणाः वायवस्तेषां समृध्द्या परिणताः उत्पन्नाः ये चक्रवाताः

गद्यं ॥ ततस्तादृशं कुंभसंभवस्याभिषंगमभिवीक्ष्य क्रोधनतया कर्णतालसमीरणसमृद्धिपरिणतचक्रवातगर्भपरि भ्रमद्रथकेतुपताकापटसहस्रसंपादितसमरसागरावर्तवशंवदफेनकूटशोभानि सकलदिङ्मुखघंटापथजांघिकघंटाभर णरणितबधिरीकृताष्टलोकपालपुरजनानि निबिडस्फुरसमाजसमाक्रांतगगनमंडपसंधिबंधस्थिरीकरणाय दत्तानिंद्रनी लस्तंभानिव सुंडादंडानुन्नमयमानानि समस्तानि हास्तिकानि पुरस्ताद्विस्तार्य रणमत्तो भगदत्तः स्वप्रतीकमधिरूढो हठाद्भी ममभिदुद्राव ॥९॥

तेषां गर्भेषु मध्यभागेषु परिभ्रमत् रथकेतुपटानां सहस्रं तेन संपादिता समरसागरावर्तानां वशंवदा अवश्यप्रमा फेनकूटानां फेनराशीनां शोभा यैस्तानि पु॰ सकलेषु दिङ्मुखानां घंटापथेषु विस्तीर्णनिकरपुरोभागेषु जांघिकं जवेन गमनकर्तृ यत् घंटानां आभरणानां रणितं शब्दः तेन बधिरीकृताः अष्टलोकपालपुराणां जनाः यैस्तानि पुनः कथंभूतानि निबिडः स्फुरन् समाजः देवसमूहः तेन समाक्रांतं गगनमंडपस्य संधिबंधानां स्थिरीकरणाय दृढीकरणाय दत्तान् इंद्रनीलस्तंभानिव सुंडादंडान् ऊर्ध्वं उन्नमयमानानि उन्नतानि कुर्वाणानि ॥ ९॥

पर्वं ॥ द्विषतांबलौघः सेनासमूहः घोरेस्कप्रतीके गजेअभियातेसंमुखमायातेसति दूरंससर्प दूरंपलायनंचक्रेइत्यर्थः कस्मिन्सतिकइवपरश्वधः परशुः अस्यास्तीतिमत्वर्थेयच्परशुरामः तस्यास्त्रेबाणेपतितेसतिपश्चिमस्यनदीनांपत्युः समुद्रस्यअंबुपूरइव निःक्षत्रियांपृथ्वींब्राह्मणायदत्वा स्ववासार्थंस्थलंयाचितोपिसमुद्रः परशुरामायनददौनदानेनबाणक्षेपेणापसारितइतिपौराणिकाः ॥ ६५ ॥ भीमः केतून्ध्वजान्पातयनः रथान्श्लथयतः शिथिलसंधीन्कुर्वतः दंतावलान्गजान् कृंततः छिंदतः अश्वान्पाटयतः विदारयतः विद्विषांशत्रूणांद्विपान्गदयाविभिद्यतंस्कप्रतीकंक्षणात्

घोरेभियातेसतिस्कप्रतीकेदूरंससर्पद्विषतांबलौघः ॥ परश्वधास्त्रेपतितेंबुपूरः पत्युर्नदीनामिवपश्चिमस्य ॥ ६५ ॥ केतून्पा तयतोरथान्श्लथयतोदंतावलान्कृंततोघोटान्पाटयतोविभिद्यगदयाभीमोद्विपान्विद्विषां ॥ संग्रामांगणरक्तवारिलहरीसं लक्ष्यमाणस्वकच्छायामात्रसहायमेवविदधेतंस्कप्रतीकंक्षणात् ॥ ६६ ॥ पादाग्रहस्तरदनप्रतिघातलीलाभग्नारिरक्तमसृ णोभगदत्तदंती ॥ आलक्ष्यतक्षितिभृतस्तटवप्रकर्मण्यालिप्तगात्रइवगैरिककर्दमेन ॥ ६७ ॥

संग्रामांगणेरक्तवारिलहरीषुसं लक्ष्यमाणादृश्यमानास्वकच्छायास्वप्रतिबिंबंनदेवतन्मात्रंसहायः द्वितीयः यस्यतमेवविदधेचकार भीमः सर्वंहस्तिसैन्यंहत्वातमेकंस्कप्रतीकमेवाव शिष्टंचकारेत्यर्थः ॥ ६६ ॥ पादाग्राणांहस्तस्यशुंडायाश्चरदनयोश्चयाप्रतिघातलीलाप्रहारलीलातयाभग्नाः हताः येअरयः तेषांरक्तैः मसृणः क्लिन्नः भगदत्त दंतीक्षितिभृतः तटेषुवप्रकर्मदंतप्रहारक्रीडातस्मिन्गैरिककर्दमेनपीतरक्तादिमृत्तिकाकर्दमेनलिप्तगात्रइवलिप्तांगइवआलक्ष्यतअदृश्यत भयंकरत्वोरस्य १७

निश्चियाव ॥ ६७ ॥ तदनुतत्रर णांगणेदलितंपरबलंशत्रुसैन्यंयेननंदंतएवकुंतःतंवहंतंधारयंतंकरटिमल्लंगजश्रेष्ठंआपतंतंस्वोपरिआगच्छंतंवीक्ष्यसंग
रेयुद्धेचकिताभीताहृदयवृत्तिःअंतःकरणवृत्तिर्यस्यतस्यवायुसूनोःभीमस्यजंघयोःजनकगुणास्यस्वपितुःवायोःगुणस्यवेगगुणस्यसमृद्धिःआ
विरासीत् प्रकटीबभूव स्वोपरिआगच्छंतंगजंदृष्ट्वाभीमःपलायनंचकारेत्यर्थः ॥६९॥ ॥गद्यं॥ इतिएवंप्रकारेणरूक्मनीकेनक्षोभितायेनिज
ध्वजिनीचराःस्वसैनिकाःतेषांकोलाहलस्यकलकलशब्दस्यसमाकर्णनेनसमाकुलंससंभ्रमं मानसंयस्यसःवासवसूनुःअर्जुनः महद्भि

तदनुकरटिमल्लंतत्रवीक्ष्यापतंतंदलितपरबलंतंदंतकुंतंवहंतं ॥ चकितहृदयवृत्तेःसंगरेवायुसूनोर्जनकगुणसमृद्धिर्जं
घयोराविरासीत् ॥६९॥ गद्यं ॥ इतिरुक्मप्रतीकसंक्षोभितनिजध्वजिनीचरकोलाहलसमाकर्णनसमाकुलमानसोवा
सवसूनुर्महेषुनिषूदितावशेषसंशप्तकदूरनिरासप्रयुज्यमानवायव्यास्त्रवेगार्धंविभज्यनिजरथायवितीर्णवानिवतू
र्णमासाद्यनिर्बलभुजगर्वदुर्विलसितौकुंभजातकिरातराजौनिरुध्यचिरेणयोधयामास ॥१०॥ रिषुभिःनिषूदितानांहतानां
अशेषाणांसंशप्तकानांएतत्संज्ञकभटानांदूरनिवासेदूरापसरणविषयेप्रयुज्यमानस्यवायव्यास्त्रस्ययोवेगःतस्यअर्धंविभज्यविभागंकृत्वा
निजरथायवितीर्णवानिवदत्तवान्सन्निवतूर्णंशीघ्रंयथातथाआसाद्यवायुवेगेनरथेनतंदेशंप्राप्येत्यर्थःनिर्बलंअमर्षदंभुजगर्वस्यदुर्विलसितं
दुश्चेष्टितंययोस्तौकुंभजातकिरातराजौद्रोणभगदत्तौनिरुध्यचिरेणबहुकालंयोधयामास युद्धंकारयामास ॥१०॥ ॥छ॥ ॥छ॥

पद्यं ॥ ततः मदावलेंद्रस्य गजेंद्रस्य करे शुंडादंडे पार्थस्य अर्जुनस्य मनः मनोभिलषितं रथं हंतुं प्राप्य प्रवृत्ते सति शौरेः कृष्णस्य सारथ्ये सारथिकर्मणि यच्चातुर्यं कौशलं तद्दर्शनकहेतुना तस्यैव गजेंद्रस्यैव सः मनोरथः भग्नः अभूत् यतस्य लेगजेनप्रहारः कृतः ततोन्यत्र रथस्य नयनात् गजाभिलषितं नाभूदिति भावः ॥ ६९ ॥ तदनु तस्य पार्थस्य वधाय प्रहितामुक्ता भगदत्तस्य शक्तिः एतत्संज्ञकमस्त्रं कुंताकारमायुधं पथि मार्गे शरैः पार्थबाणैः भंगं ययौ प्राप शक्तेर्भंगे कारणमाह प्रस्थानेति यत् यतः प्रस्थानकर्मणः समये तस्याः भयदायि भीतिजनकं समीपे नागस्य गजस्य

पद्यं ॥ ततः ॥ मनश्च पार्थस्य रथं च हंतुं मदावलेंद्रस्य करे प्रवृत्ते ॥ सारथ्यचातुर्यवशेन शौरेर्भग्नः स तस्यैव मनोरथो भूत् ॥ ६९ ॥ पार्थस्य तस्य तदनु प्रहितावधाय भंगं ययौ पथि शरैर्भगदत्तशक्तिः ॥ प्रस्थानकर्मसमये भयदायि तस्या नागस्य दर्शनमजायत यत्समीपे ॥ ७० ॥ अथ तेन हरेः कृताय मुक्तं हृदि कृत्यस्त्वयमास्त्रदेवमस्त्रं ॥ तदिदं वनमालया मुकुंदः सह वास्तव्यकुटुंबिता मनैषीत् ॥ ७१ ॥

दर्शनं अजायत प्रस्थानवेलायां भयजनककर्माणि दर्शनं अपशकुन इति मौहूर्तिकाः ॥ ७० ॥ अथ मुकुंदः हरेः इंद्रस्य कृताय अर्जुनं हंतुमित्यर्थः तेन भगदत्तेन मुक्तं आत्मा स्वयं देवो देवताप स्वनतत्वैष्णवमित्यर्थः अस्त्रं स्वयं हृदि कृत्य वक्षस्थले गृहीत्वा तदिदं अस्त्रं वनमालया स्वकंठस्थमालया सह वास्तव्य [illegible] कुटुंबीन [illegible] वस्त्रतां [illegible] नैषीत् प्रापयामास कृष्णः उत्थाय तदस्त्रं स्वहृदये गृहीत्वा वनमालावत् धारयामासेत्यर्थः ॥ ७१ ॥ [illegible] ॥ [illegible] ॥ [illegible] ॥ १८

तत्र रणांगणे ऽस्मः फल्गुन्यां उ त्तराफल्गुन्यां जातः फाल्गुनः जातार्थप्रत्ययस्य प्रतिषेधेत्यादिना लुक् अर्जुनः अंत्याक्षरेणानकारेण वर्जितं रहितं
स्वकीयं फल्गुन इति नामतन् फल्गु इति चिकीर्षुः कर्तुमिच्छुः लक्षणया फल्गुशब्दार्थं तुच्छं कर्तुमिच्छुः क्रौंचान्तस्य पक्षिणः समीपस्य च अत एव पर्वतादपि पी
वरपुष्टं अरातेः शत्रोः करेणुं स्कभगतीकं गजं बाणैः आद्येन अक्षरेण ककारेण योयोगः संबंधः तेन शून्यं रहितं चकार करेणुशब्दस्य ककारेण
तेसानिरेणुरित्यवशिष्टं लक्षणया तदर्थौ रजः चूर्णीचकारेत्यर्थः ॥७२॥ तदा असौ मघवत्सूनुः अर्जुनः मदपंकस्य ललामं पुंड्रं तस्य गंधः

सफल्गुनस्तत्र चकार बाणैश्चिकीर्षुमंत्याक्षरवर्जितं स्वं ॥ क्रौंचाचलात्पीवरमप्यरातेः करेणुमाद्याक्षरयोगशून्यं ॥७२॥
मदपंकललामगंधिफालं मघवत्सूनुररेर्निपात्य शीर्षं ॥ पृथुलांमुदमादधात्ततोसौ पृथिवीगंधवतीति गौतमोक्तेः ॥७३॥
भगदत्तेवधं याते सहमत्तेन दंतिना ॥ सत्यजिन्नाशशोकार्तिमत्यजन्पार्थसैनिकाः ॥७४॥

सुगंधोस्यास्तीति तादृशं फालं
ललाटं यस्य तत् अरेः भगदत्तस्य शीर्षं मस्तकं निपात्य भूम्यां पातयित्वा गंधवती पृथ्वी इति पृथिव्याः लक्षणकर्त्री या गौतमस्य उक्तिः तस्याः
हेतोः तल्लक्षणसमन्वयात् असौ ततः पृथुलां मुदं आनंदं आदधात् दधार ॥७३॥ पार्थसैनिकाः मत्तेन दंतिना गजेन सह भगदत्ते वधं याते प्राप्ते सति सत्य-
जिन्नाशेन द्रोणकृतसत्यजिद्वधेन यः शोकः तस्य आर्तिं बाधां अत्यजन् महानदृष्टापेन पूर्वोत्पन्नशोको गच्छतीति सर्वानुभव ॥७४॥ ॥७॥

गद्य ॥ तदनुनाम्नाअरुणेनेजसिसूर्ये संध्ययापिसंध्यारागेणापिनादृशे अरुणेआरक्तेसतिस्वयनाम्नागुरुणापिव्यथयापिनादृग्विधःगुरुः
महाव्यथाविशिष्टः कलशयोनिः द्रोणःत्रिभिरेवअंगैः भीमेनसर्वगजसैन्यवधस्यकृतत्वात् अश्वरथपदातिभिः त्रिभिरेवसेनांगैः विरलिते
नविरलीकृतेनबलेनसैन्येनअनुगम्यमानः सन्तादात्विकंतदानींतनंस्वमनोरथमिवधर्मराजंधृत्वाप्रत्यर्पणरूपमनोरथमिवदूष्यतांदोषंपटवेश्म
वंचउपगतंप्राप्तंआवासंवसतिस्थानंशनैः शनैः आवृत्तेआजगाम मनोरथावासयोर्दूष्यताधर्मसाधर्म्याद्‌उपमानोपमेयभावः ॥११ ॥पद्यं॥

गद्यं ॥ तदनुनाम्नारुणेनेजसिसंध्ययापिताद‍ृशेकलशयोनिः स्वयंनाम्नागुरुरपिव्यथयापिताद‍ृग्विधस्त्रिभिरेवांगैर्विर
लितेनबलेनानुगम्यमानस्तादात्विकंस्वमनोरथमिवदूष्यतांमुपगतमावासंशनैः शनैरावृत्ते ॥११॥ ॥पद्यं॥ शिबिरमे
त्यतदैवसुयोधनःशितशरव्रणमोचितकंचुकं ॥ सदुःखंचगतंकलशोद्भवंविरचितांजलिरेवमभाषत ॥ ७५॥ महारथत्वं
ममवांछितद्रुफलेग्रहिंमभतनोषियस्मात् ॥ कृपेतिशब्दोपिबभूवनूनंह्रस्वस्त्वयिश्यालइवत्वदीये ॥७६॥ तदैवद्रोणागमन
समयेएवसुयोधनःशिबिरंद्रोणावासपटमंडपगृहंएत्यविरचितांजलिः सन्शितानशराणांतीक्ष्णाबाणानांयेव्रणाः क्षतानितेभ्यःमोचितःपृथ
क्कृतःकंचुकः कवचंयेनतंसदुःखंवेगतंविद्यमानंकलशोद्भवंद्रोणंएवंवक्ष्यमाणंअभाषत ॥७५॥ हेमहारथआचार्यत्वंयस्मात्कारणात्ममवांछि
तद्रुमस्यसफलेग्रहिंसफलंनप्रतनोषिनकरोषितस्मात्कृपाइतिशब्दः त्वदीयेश्यालेपत्न्याः भ्रातरिकृपाचार्येइवत्वय्यपिह्रस्वः नूनंबभूव १९

यथा कृपाशब्दः त्वदीये स्यालेकृपइति ह्रस्वः बभूव तथा वाच्यवाचकयोरभेदात् कृपा यो ह्रस्वः अल्पो जातः कामित्यर्थः ॥७६॥ गद्य ॥ हे भगव
न् सावधानेन एकाग्रेण चेतसा इदानीं इदं वक्ष्यमाणं वचनं स्मरणपथं अधिरोपय स्थापय ॥१२॥ ॥पद्यं॥ अथ पितामहोऽपि भीष्मोऽपि पृषत्कतल्पेऽवा
णशय्यायां निजं वपुः अंतरंगे अंतःकरणे माधवं कृष्णं त्वं वै वहस्व मम कार्यसिद्धिं च कृत्वा हि कृत्त्वैव स्वं धाम स्वर्गमोक्षं वा गंतुं इच्छेऽनुजानु ॥७७॥
अथ शोकसंपदा शोकातिशयेन समे त्वं तं एनं दुर्योधनं दयमानेन दया कर्त्रा नीचेतराणां महतां गुणानां अब्धिना समुद्रेण अनेन गुरुणा उक्तः ७८

ग॰ भगवन्निदमिदानीं स्मरणपथमधिरोपय चेतसा सावधानेन ॥१२॥ ॥प॰ ॥पितामहः सोऽपि पृषत्कतल्पे वपुर्निजं माधव
मंतरंगे ॥ त्वं वै वहस्व मम कार्यसिद्धिं कृत्वा हि धाम स्व[illegible]तु ॥ ७७॥ न मे तं दयमानेन समेन शोकसंपदा ॥ ऊचे स गुरुणा नीचेतरगुणाब्धिना ॥७८॥ बाष्पातिवृष्टावपि पांडवाना[illegible]रुह व्यूह वितीर्णमोदान् ॥ प्रातः स्म एवाखिल धार्त्तराष्ट्रान् प्रचारये यं युधि
वाहिनीषु ॥७९॥

पांडवानां बाष्पाणां दुःखाश्रूणां अतिवृष्टौ सत्यामपि पयोरुह व्यूहेन सेनायाः कमलाकाररचनेन कमलसमूहेन च वितीर्णः दत्तः मोदो हर्षो येषां तान् अखिलान् धार्तराष्ट्रान् दुर्योधनादीन् हंसान् श्वः परेऽह्नि प्रातरेव युधि वाहिनीषु सेनासु नदीषु च प्रचारयेयं गमयिष्यामि
अतिवृष्टौ सत्यां नदीषु कमलानां नाशः हंसानां संचाराभावश्च वर्णनेन दृप्तीनं करोमीति भावः ॥ ७९ ॥ ॥७॥ ॥७॥

गद्यं ॥ इतिगिरातंराजानंदुर्योधनं आश्वास्य सदनाय स्वावासंगंतुं विसृष्टवतः अनुज्ञां दत्तवतः मुहुर्मुहुः अर्जुनस्य सव्यसाचिनः वीर्यबलौ सव्यदक्षि
णाभ्यां हस्ताभ्यां बाणप्रक्षेपरीतिं अनुचिंत्य अनणीयसीं महतीं हृदिरणरणिकां भयेनउच्छ्वसनं विमुंचमानस्य द्रोणस्य सकाशात् निर्गतां निद्रां

॥ गद्यं ॥ इतिगिरानमाश्वास्यराजानंसदनायविसृष्टवतोमुहुर्मुहुरर्जुनस्य सव्यसाचित्वशौ
र्यीमनुचिंत्यहृदिरणरणिकामनणीयसींविमुंचमानस्यद्रोणस्यसकाशाद्विनिर्गतांनिद्रांसःखींक्लिन्ने
तुमिवसानिशापितरसानिरगात् ९२ प॰ अपरेद्युरसौवृतोबद्धौघैरथभेरीनिनदैर्नभोविभिंदन्॥कवची
विशिखवीरथीशरासीकलशीसूनुरवापयुद्धरंगं॥ ८०॥ ॥ ५॥ ॥ ६॥

सखीं क्लिन्नांखभिवअन्वेष्टुमिवसा निशापितरसावेगेननिरगात् ॥ १४॥ पद्यं ॥ अथअपरेद्युः उत्तरेहनि सेनासमूहैः युतः कवचादियुतः अत्युग्र
शरासनः द्रोणः भेरीशब्दैः नभः आकाशं विभिंदन् सन् युद्धरंगं अवाप ॥ ८०॥ ॥ ५॥ ॥ ६॥ ॥ ७॥

सदस्यांसांयुगीनेषुरणपटुषु अग्रगण्यः गुरुः प्रधनभुविरणांगणे अंतरिक्षेस्थितानांदिविषदांदेवानांआश्चर्यस्यस्थूलक्ष्यंदातारपूणांक्षोणी
भारीणांअसवएवप्राणाएवमृगाःतेषांहरणेविषयेकूटयंत्रायमाणंवागुरायंत्रवदाचरंतंकेसराढ्यैः ग्रीवागतकेशयुक्तैः गंधर्वैः अश्वैः मदेनमधु
भिः रुद्रैः इभैः गजैश्चकेतवःध्वजाएवपत्राणियेषांतैःशतांगैः रथैश्चपद्मव्यूहंपद्माकारसेनारचनांव्यतानीत् अकरोत् कमलेकेसरमधुपत्रा
णिसंतिअत्रकेसरस्थानेकेसरयुताश्वाः मधुस्थानेमदयुतगजाःपत्रस्थानेध्वजयुतशतांगाः कृताइत्यर्थः॥८१॥ अत्रअस्मिन्समयेतपसःसूनुः

आश्चर्यस्थूललक्ष्यंनदनुदिविषदामंतरिक्षेस्थितानांक्षोणीद्राणांरिपूणामसुमृगहरणेकूटयंत्रायमाणं॥ गंधर्वैः केसराढ्यैर्म
दमधुभिरिभैःकेतुपत्रैःशतांगैःपद्मव्यूहंव्यतानीत्प्रधनभुविगुरुःसांयुगीनाग्रगण्यः॥८१॥ समयेत्रनिर्वेद्यवैरिवृत्तंतपसः
सूनुरभाषताभिमन्युं॥अयिवत्सपितान्यतोधुनानेतवभारोजनिसर्वसैन्यरक्षा॥८२॥ कवचंप्रतिमुंचधत्स्वचापंभजधैर्यपरि
तोविधेहियोधान्॥अधिरोहशतांगमाविशत्वंकमलव्यूहमरीन्निषूदयस्व॥८३॥ धर्मराजःअभिमन्युंवैरिणांवृत्तंअस्मत्पराजया
र्थंसेनायाःपद्मव्यूहरचनयायुद्धार्थंस्थितिरूपंनिवेद्यअभाषत तदेवभाषणंसार्धेनाह अयिवत्सेति अयिवत्सअधुनाएतत्समयेतेपिताअर्जुनःअन्य
तःदेशांतरेसंशप्तकैःसहयुद्धार्थंगतोवर्तते अतःसर्वसैन्यरक्षातवभारःअजनिजातः सर्वसैन्यरक्षात्वदधीनेत्यर्थः॥८२॥ अतःत्वंकवचंप्रतिमुंचधारयचापं
धत्स्वहस्तेगृहाणधैर्यंभजत्वस्वीकुरुयोधान्परितःस्वरक्षणार्थंसमंताद्विधेहिस्थापयशतांगंरथंअधिरोहतस्मिन्आरोहणंकुरुकमलव्यूहंविशप्रविश्यअरीन्निषूद
यस्वजहि॥८३॥

चं॰ भा॰ २१ गद्य॥ इतिउक्तप्रकारेणराज्ञोधर्मस्यनिदेशंआज्ञांमौलिदेशेशिरसिनिवेश्यबहुमानेनगृहीत्वेत्यर्थः प्रतिष्ठमानेकृतप्रस्थानेशत्रुजयार्थंनिर्ग टी॰ अ॰ ९
मनसमयेवादनीयाःभेरीपटहपणवाःआद्याःयेषांतैःतत्रगजवाह्याभेरीअश्ववाह्यःपटहः मनुष्यवाह्यःपणवः वाद्यैः गगनशायिनेआकाशसं
बंधिनेगुणायशब्दायसौख्यशायनिकायमानेत्वयासुखशयनंकृतमितिप्रकृतितस्योद्बोधंकुर्वाणेइत्यर्थः बालेएकाकिनिसौभद्रेयेअभिम

ग॰ इतिराज्ञोनिदेशंमौलिदेशेनिवेश्ययोत्कं प्रतिष्ठमानेजयनिःस्वाणभेरीपटहपणवाद्यैर्गगनशायिनेगुणा
यसौखशायनिकायमानेलीलयाव्यूहगर्भमवगाह्यबालेपिस्वयमेकाकिनिनिजकोदंडदंडचंडिमसंपदाकौरव
चमूंसोभयमाणेसौभद्रेयेसिंधुपतिर्व्यूहमुखंपिधायस्मरहरवरलाभदर्पेणतदनुधाविनींपाडववाहिनींक्रुधारु
रुधे॥१५॥

न्यौत्स्वयंलीलयाव्यूहस्यगर्भंमध्यंअवगाह्यप्रविश्यनिजकोदंडदंडस्यचंडिमसंपदारौद्रकर्मातिशयेनकौरवचमूंक्षो
भयमाणेसतिसिंधुपतिःजयद्रथःव्यूहस्यमुखंद्वारंपिधाययत्नद्वारंकृत्वांतःप्रविष्टःतद्द्वारंनिरुध्यस्मरहरस्यशिवस्यवरलाभेनयोदर्पःतेनतद २१
नुधाविनींसौभद्रस्यानुगमनुधाविनींपांडवानांवाहिनींसेनांक्रुधाक्रोधेनरुरुधे सिंधुपतिःसमुद्रोपिवाहिनींनदींरुणद्धि॥१५॥ ॥७॥

पद्य ॥ मध्येंतरिक्षंआकाशमध्येस्थित्वाविजयस्यसुतस्यअभिमन्योः येभुजेनयोः गर्वस्यलीलायितानिविक्रीडितानि दद्दशुः खेचराणांदेवानां
नेत्राणांपक्ष्मणोः युग्मैयुद्धरंगात्रणांगणात् उद्यद्भिः ऊर्ध्वंगच्छद्भिः सुरवनितानांदेवानांपुष्पवर्षादपिपतद्भिः अधोदेशंआगच्छद्भिः वेगात्लग्नैः
संबद्धैः परागैः रेणुभिः पुष्परजोभिश्च दृढतरंयथातथाघटितेपरस्परंमेलितेसति तत्क्षणंतस्मिन्क्षणे अनिमिषतां भृशंभंगुराभग्नाआसीत् युद्ध

प० उद्यद्भिर्युद्धरंगादपिसुरवनितापुष्पवर्षात्पतद्भिर्वेगाल्लग्नैः परागैर्दृढतरघटितेचक्षुषांपक्ष्मयुग्मे ॥ स्थित्वामध्ये-
न्तरिक्षंविजयसुतभुजागर्वलीलायितानिदद्दृशुर्णांखेचराणांभृशमनिमिषतातत्क्षणंभंगुराभूत् ॥ ८४ ॥ शरशायितै
र्द्विरदशैलमंडलैर्विपुलैर्विधायविषमांवसुंधरां ॥ पृथुचक्रवर्तिपृथुयत्नवैभवंवितथंचकारविजयस्यनंदनः ॥ ८५ ॥

समयेबहुभूमिरजउद्धतंसौभद्रवीर्यातिशयंदृष्ट्वादेवैर्बह्वीपुष्पवृष्टिःकृतेतिभावः ॥ ८४ ॥ विजयस्यनंदनः अभिमन्युःशरैःशायितैःदीर्घनिद्रांप्रा
पितैः विपुलैः पृथुलैःद्विरदाएवशैलाःतेषांमंडलैःसमूहैः वसुंधरांविषमांनतोन्नतांविधायकृत्वापृथुचक्रवर्तिनः पृथुनामाआदिराजातस्यपृथुय
त्नानांमहायत्नानांवैभवंमाहात्म्यंवितथीचकार व्यर्थीचकार विष्णुवंशपृथुनापृथिवीपर्वतैर्नतोन्नतांदृष्ट्वाप्रजानिवासार्थंमियमसमाचीनेतिज्ञा
त्वाधनुष्कोट्यापर्वतान्चूर्णीकृत्यसमाकृतेतिपौराणिकाः ॥ ८५ ॥ ॥७॥ ॥७॥ ॥७॥

पार्थात्मजः अभिमन्युः पितामहोक्तां भल्लानां बाणानां वृष्ट्या भानुसुतस्य कर्णस्य शतांगं रथं सामि अर्धं यथा तथा छित्वा कुरुराजगोष्ठ्यां दुर्यो
धनसभायां पितामहेन भीष्मेण उक्तं अस्य कर्णस्य अर्धरथत्वं तथ्यं चकार अर्धं नु यच्छेदन अर्धः रथो यस्य तस्य भावस्तत्त्वं सिद्धं ॥८६॥ अथ धृ
तः भीमः उग्रः मन्युः क्रोधो येन सः अभिमन्युः उग्रैः शरैः द्रौणिं अश्वत्थामानं नदीर्ष्यया अभिमन्यूत्कर्षासहनेन यत् स्मितं हास्यं तस्य कांतिलक्ष्या

पार्थात्मजो भानुसुतस्य सामिच्छित्वा शतांगं शितभल्लवृष्ट्या ॥ पितामहोक्तं कुरुराजगोष्ठ्यां तथ्यं चकारार्धरथत्वमस्य ॥८६॥ अथाभिमन्युर्धृतभीममन्युर्द्रौणिं तदीर्ष्यास्मितकांतिलक्ष्यात् ॥ बाल्येनिपीतानिवपिष्टसारान्युग्रैः शरैरुद्वमयांचकार ॥८७॥ सुतस्य शौर्यात्सुरराजसूनोरुदीर्णदिग्भ्रांतिरुदारभीतिः ॥ ग्रस्तसुमंगलतंतुरेवसाकंचकंपे सगुरुर्मुहूर्तं ॥८८॥ ॥ ॥ ॥ ॥ ॥ ॥

नु शुभ्रकांतिकपटाधेनोः बाल्ये वयसि निपीतान् पिष्टसारान् चाव्यक्षीराभावात् पिष्टसारमिश्रितरसानि व उद्वमयांचकार वमनं कारयामास ने
मा स्मितकांत्या अपि तु पिष्टसारा इति केनवापकृतिः ॥८७॥ सुरराजसूनोः अर्जुनस्य सुतस्य पुत्रस्य अभिमन्योः शौर्यात् उदीर्णा दिग्भ्रांतिः रि
गवांतिर्यस्य सः उदारा महती भीतिर्यस्य सः प्रसिद्धः गुरुः द्रोणाचार्यः कृपस्वसुः कृपाचार्यभगिन्याः कृप्याः ... ग्रस्तसुमंगलतंतुमंग
लसूत्रेण साकमेव सह तं जकपे कंपं भेजे पतिमरणे पत्न्या मंगलसूत्रनाशात् तस्यापि भयेन कंपोत्पत्तिः ॥८८॥ ॥ ॥ ॥ ॥

अथ जनानां रणांगणे गौतमात्मजे कृपाचार्ये विशिखसमूहं मोक्तुमिच्छुं भीषणं भयंकरं विबुधेंद्रपौत्रं अभिमन्युं अभिवीक्ष्य जनस्य कस्य जनने उत्पत्तौ अ-
पराधिप्रमया प्रपि शर एव हेतुः कारणं जात इति मेनिरे गौतमर्षेः रेतः शरस्तंबे पपात तस्मात् कृपः कृपी च जज्ञे इति पुराणं अत्र तु तन्मिमीते मारते निहतो प्रं ॥८९॥
तदा अभिमन्यु युद्ध समये आश्चर्यकारकेषु कर्मसु कृतेषु अपि हर्षभरात् अमुष्य अभिमन्योः शिरोजबंधे केशबंधे मुहुर्मुहुर्मोक्तुं दिवि आकाशे क-
र्तृभूता मोचनक्रियाकर्मत्वं प्राप्ताः सुमनसः दृष्टाः परंतु नाकेंद्रस्य नंदने वने कर्मभूताः मोचनक्रियाकर्मत्वं प्राप्ताः सुमनसः न दृष्टाः अभिमन्योः प्राप्य

विशिखसंसुमुक्षमथ गौतमात्मजे विबुधेंद्रपौत्रमभिवीक्ष्य भीषणं ॥ जननेविपर्यपि जनारणांगणे शर एव हेतुरिति तस्य मेनि-
रे ॥ ८९ ॥ आश्चर्यकर्मसु कृतेष्वपि हर्षभारान्मोक्तुं मुहुर्मुहुरमुष्य शिरोजबंधे ॥ दृष्टास्तदा सुमनसो दिवि कर्तृभूता नाकेंद्रनं-
दनवने न तु कर्मभूताः ॥ ९० ॥ अमुष्य कोदंडमखंडयद् द्रवेः सुतो रथाश्वान् ममाथ कुंभजः ॥ कृपः कृणत्ति स्म शरैश्च सारथिं व्य-
पाटयत्केतुपटान् गुरोः सुतः ॥ ९१ ॥

र्यकारकाणि युद्धकौशलानि दृष्ट्वा तस्मिन् मुहुर्मुहुः पुष्पवर्षं कुर्वंतः दृष्टिकर्तारः सुमनसो देवा-
अवबोधात् दृष्टाः सुमनसः पुष्पाणि दृष्टिक्रियायाः कर्माणि सर्वपुष्पाणां व्ययात् न दृष्टानीत्यर्थः ॥ ९० ॥ एकैकस्य द्रोणाचार्यादेरपि असह्यत्वात्
अभिमन्युः सर्वैर्मिलित्वा हत इत्याह अमुष्येत्याभिः पंचभिः रवेः सुतः कर्णः अमुष्य अभिमन्योः कोदंडं अखंडयत् कुंभजः द्रोणः रथाश्वान् ममा-
थ चूर्णयामास कृपः शरैः सारथिं कृणत्ति स्म चिच्छेद गुरोः सुतः अश्वत्थामा केतुपटान् व्यपाटयत् चिच्छेद ॥ ९१ ॥ ॥ ७ ॥ ॥ ६ ॥

निखिलोपिनिर्लिंपवर्गः एकाकिनः असहायस्याभिमन्योः परिभवाय प्रवृत्तान् बहून् द्रोणादीन् अवेक्ष्य यथाभिमन्योर्मंदारशाखिकुसुमानि कल्प
वृक्षपुष्पाणि अभ्यवर्षन् तथा रिपुषु द्रोणादिषु निंदारवं निंदाशब्दं अभ्यवर्षन् तदा द्रोणादीन् निनिंदुरित्यर्थः ॥ ९२ ॥ तदा बाल अभिजयात्मसंभवः अ
भिमन्युः गदायाः सखा सहायः गदाधरः सन् रथात् अवप्लुत्य उड्डीय युधि अमीषां द्रोणादीनां रथान् विदार्य विस्फोट्य क्षणात् केवलं मंदाक्षान् वि-

एकाकिनः परिभवाय बहून्प्रवृत्तानेतानवेक्ष्य निखिलोपिनिर्लिंपवर्गः ॥ मंदारशाखिकुसुमानि यथाभिमन्यौ निंदारवं रि
पुषु तस्य तथाभ्यवर्षत् ॥ ९२ ॥ रथादवप्लुत्य गदासखस्तदा विदार्य बालो विजयात्मसंभवः ॥ चकार मंदाक्षमथामिकेवलं र
थानमीषां युधि तानपि क्षणात् ॥ ९३ ॥ बालौ ततः कृतरणौ धृतराष्ट्रपौत्रौ भीरू पृथग्गमनकर्मणि मन्यमानौ ॥ पार्थात्मजः स
ह परस्परसाह्यवंतौ चक्रे कृतांतपुरवर्त्मनिर्गतुमग्रे ॥ ९४ ॥

शीर्णाक्षान् विक्रान्ति तेषां मंदाक्षमंतः तान्न चकार अपितु तानपि द्रोणा
दीन् अपि स्वेन बालेन बहूनां रथस्फोटनात् मंदाक्षं लज्जां विक्रान्ति तेषां तथा विधान् चकार ॥ ९३ ॥ ततः स पार्थात्मजः अभिमन्युः कृतरणौ बालौ भु
जयाख्यस्यापि दुर्योधनदुःशासनपुत्रौ पृथग्गमनकर्मणि एकाकिनः गमनकर्मणि भीरू मन्यमानः सन् उभयोर्मध्ये कृतांतपुरस्य यमनगरस्य वर्त्मनि
निर्गतुं परस्परस्य साह्यवंतौ साहाय्यवंतौ चक्रे अर्थात् अपि मार्गे भीरू मत्वा साहाय्यं ददाति उभावपि सह न्यघातीत्यर्थः ॥ ९४ ॥ ॥ ७ ॥ ॥ २३

अथतेप्रसिद्धाः कर्णमुख्याः महारथाः मीनाः मिलिताः सर्वे मिलित्वाहंतव्य इत्येकमत्यमाप्ताः सन्तः कैतवं छद्म अधर्मं पयस्तौ कृत्येत्यर्थः। यौगप-
द्यात् एककालावच्छेदेन अस्त्रैः मंत्रैः छन्नैः एनं करनायकपौत्रं अभिमन्युं स्वयशोभिः सहपातयांबभूवुः हतवंतः। आपातयामासुः एकबाल-
स्य युद्धे बहुभिर्मद्दहि हिंसनत्वात् लोकनिंदया यशःपतनं ॥ ९५॥ ॥गद्यं॥ तदनु कारणागणेतयोः सेनयोः क्ष्वेडितरुदिते अपि कौरवसेनासिंह
नाद पांडुसेनारोदनशब्दावपि परस्परस्पर्धया जनितया उत्पादितया परस्परविजिगीषयैव जेतुमिच्छयेव व्योमसीमानं उदलंघयतां द्वावपि श-

अथकर्णमुख्यामहारथास्तेमिलिताःकैतवमेत्ययौगपद्यात्॥ करनायकपौत्रमेनमस्त्रैः स्वयशोभिः सहपातयांबभूवुः॥९५॥
गद्यं॥ ॥तदनु तयोः सेनयोः क्ष्वेडितरुदिते अपि स्पर्धजनितया परस्परविजिगीषयेव व्योमसीमानमुदलंघयतां॥१५॥
तदानींजगतिनियमवृत्तपरिषदूर्ध्वविक्षिप्तकरपुटजलांजलिक्षालनादिव व्यपयातमहोमहोष्मणि पूषणितौ द्वावपि बलौघौ
निजनिजस्कंधावारानुसंधानायनिरगच्छतां॥१६॥

ब्दौमहांतौउद्भूवतुरित्यर्थः॥१५॥ तदानींजगति पूषणि सूर्येनियमवृ-
त्तानांत्रिकालसंध्योपासनादिनियमकर्तृषु ये प्रगतांपरिषदा समूहेन ऊर्ध्वविक्षिप्ताः त्यक्ताः येकरपुटजलांजलयः अर्घ्यजलांजलयः तैः क्षाल-
नादिव व्यपयातः गतः महसः तेजसः संबंधी महोष्मायस्य सः तस्मिन् सति मंदोष्णे सति इति यावत् अस्तं गच्छति सति इत्यर्थः द्वावपि बलौघौ सेनास
मूहौ निजनिजान् स्कंधावारान् शिबिराणि अनुसंधातुं विश्रांत्यर्थं संबंधं कर्तुं निरगच्छतां॥१६॥ ॥२७॥ ॥७॥

पदं॥ अथअभिमन्युवधानंतरंविडौजसः इंद्रस्यकुमारः अर्जुनोपितान्पूर्वोक्तान्त्रिगर्तान् ... निगर्तसंज्ञकान्संशप्तकानपि
क्षुरप्रैः बाणविशेषैः गात्रेशरीरे सहस्त्रगर्तान् सहस्त्रक्षतयुतान् विरचय्यकृत्वाहेतुंकारणंविनैवव्यथमानंचेतोयस्यतथाभूतः सन्न्यवर्त
तनिवर्तत कारणंविनाद्भ्रितलमपशकुनंमत्वानिवृत्तइतिभावः ॥९६॥ अपशकुनांतराणिवजानन्निवृत्तइत्याह बाष्पायनइति

प॰॥अथत्रिगर्तानपितान्क्षुरप्रैःसहस्त्रगर्तान्विरचय्यगात्रे ॥ विनैवहेतुंव्यथमानचेताविडौज
सोपिन्यवृतत्कुमारः॥ ९६॥ बाष्पायनेदृष्टियुगंकराग्राच्चापोगलत्यंतरुदेतितापः॥ फलंकिमेत
स्यभविष्यतीतिविचिंतयन्धामविवेशराज्ञः॥ ९७॥ ॥ध॥ ॥ध॥ ॥ध॥

दृष्टियुगंनेत्रयुगंबाष्पायतेबाष्पंत्यजतिकराग्रात्चापंगलति अंतः अंतःकरणेतापःउदेतिउत्पद्यते अत्रापिकारणंविनेतिसंबध्यते एतस्यफ
लंकिंभविष्यतीतिनज्ञायतेइतिविचिंतयन् राज्ञः धामशिबिरंविवेश ॥९७॥ ॥ध॥ ॥ध॥ ॥ध॥ ॥ध॥

[illegible]

[illegible]अग्निः सर्वबंधून् अश्रुनेत्रान् निशाम्य दृष्ट्वा सूनोः अभिमन्योः वार्तां निशम्य श्रुत्वा धनंजयस्य अर्जुनस्य चितां पतिनापस्य अपदेशेन कपटेन
स्वेन समानं धनंजय इति नाम्ना समानं तेजः अग्निः प्रविवेशेत्यर्थः पुत्रशोकेन मनसि तापो बभूवेति भावः ॥ ९८ ॥ वसुधाधिपेन धर्मराजेन संयुतः विश्वं

तत्राश्रुनेत्रानथसर्वबंधून्निशाम्यसूनोश्चनिशाम्यवार्तां ॥ नापापदेशेनधनंजयस्यचितांचुचुंब
स्वसमानतेजः ॥ ९८ ॥ वीरंतनूजमनुचिंत्यविलापभाजंधारालदृष्टियुगलंधरणौलुठंतं ॥ वाग्भि
श्चिरेणवसुधाधिपसंयुतस्तंविश्वंभरोर्जुनमपिव्यदधादशोकं ॥ ९९ ॥ ॥ श्री ॥ ॥

[illegible] कृष्णः वीरं तनूजं पुत्रं अनुचिंत्य विलापभाजं आक्रोशंतं धारालं बाष्पधारायुक्तं दृष्टियुगं यस्य तं धरण्यां लुठंतं अर्जुनमपि वाग्भिः [illegible]
[illegible] चिरेण बहुकालेन अशोकं शोकरहितं व्यदधात् अकार्षीत् किंच अर्जुनः स्वसमीपं [illegible]

तदनु शोकापनयनानंतरं इंद्रात्मजः अर्जुनः कोपात् बाहुं उदस्य ऊर्ध्वं कृत्वा समरे द्विषतां शत्रूणां द्रोणकर्णादीनां समक्षं तस्य पुत्ररक्षक सेनामार्गरोधक
स्य सिंधूद्वहस्य जयद्रथस्य शिरः हेत्यां शस्त्रे यदि न कुर्यां तर्हि अहं तस्यां हेत्यां अग्नि ज्वालामय्यां विशेयं प्रवेशं कुर्यां इति प्रतिज्ञां अकरोत् ॥ १०० ॥ अथ

इंद्रात्मजस्तदनु बाहुमुदस्य कोपात्सिंधूद्वहस्य समरे द्विषतां समक्षं ॥ हेत्यां स्व एव यदि तस्य शिरो न कुर्यां तस्यां विशेयमहमित्य
करोत्प्रतिज्ञां ॥ १०० ॥ अथ वृत्तमेतदवकर्ण्य भीरवे वितताननसिंधुपतये प्रतिश्रवं ॥ नवगुप्तियुग्ममपि मे भरोर्जुनात्समरे स्वभीरिति ग
भीरधीर्गुरुः ॥ १०१ ॥ इत्यनंतभट्टकृतौ श्रीमति चंपूभारते नवमस्तबकः समाप्तिमगमत् ॥ ॥ ७ ॥ ॥ ७ ॥

अर्जुनप्रतिज्ञानंतरं एतद्वृत्तं अर्जुनप्रतिज्ञावृत्तांतं अवकर्ण्य दूतमुखात् श्रुत्वा भीरवे सिंधुपतये जयद्रथाय समरे अर्जुनात् नवगुप्त्योः रक्षणाभ्युदययोः युग्म
मपि मे भरः भारः अस्ति अभीः भीतिवर्जितः तिष्ठेति गभीरा धैर्ययुता धीः बुद्धिर्यस्य सः गुरुः द्रोणाचार्यः प्रतिश्रवं प्रतिज्ञां अकरोत् ॥ १०१ ॥ इति श्रीसकलोपाध्याय
नारायणसूरिविरचितायां श्रीमच्चंपूभारतटीकायां नवमस्तबकः समाप्तिमगमत् ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

अथभारतचंपौदशमस्तबकः प्रारभ्यते॥राम॥

श्रीगणेशाय नमः॥ अथ सटीकचंपूभारतद्वादशस्तबकः प्रारभ्यते॥ गद्यं॥ अन्येद्युः अभिमन्युवधात् द्वितीयदिवसे भानौ अवलंबितः प्रथमशिखरि
णः उदयाचलस्य सानुर्येन तस्मिन् सति सिंधुराजयोः अपद्वयसमुद्रयोः युगले स्कंधावारयोः शिबिरयोः युगस्ययोः स्कंधराधिपती धर्मराजदुर्योधनयोः
सुहृत्सन्नाहस्य युद्धविषयकसन्नत्वंनाम्नः पैशुन्यं सूचकत्वं तस्मिन् लंपटः तत्स्वभावः योपटहध्वानः तेन तरले भीरौ चंचले सति शरणागतस्य भरणे पालने

॥गद्यं॥ अन्येद्युरवलंबितप्रथमशिखरिसानौ भानौ स्कंधावारयुगवसुंधराधिपतिसुहृत्सन्नाहपैशुन्यलंपटपटहध्वानतरलेऽभु
राजयुगले शरणागतभरणालंकर्मीणेन भगवता पाणिमित्रतोत्रेण पद्मनेत्रेण सौभद्रवधशोकातिरेकपरिगलितभूरिजन
बाष्पपूरपंकिले हृत्तले समानीतं सौवीरनायकगोपनस्थलदिदृक्षयेव तुंगतरकेतुशृंगमधिरूढेन कपिपरिवृढेन परिमंडितं
मानसगरुडगंधवहमार्गणवांधवैः सैंधवैराहितबंधनं स्यंदनमधिरुह्य संक्रंदननंदनः समरोचितवेषसंपदविकलेन निजबलेन
सह प्रतिष्ठमानो निरुत्थवियत्पथैर्मंदबंधुरैः सिंधुरैर्विविधगतिनाटकैर्घोटकैः रुतरणासक्तिभिः पत्तिभिश्च विरचितपरिपंथिजन
मोहस्य व्यूहस्य पृष्ठभागे जयद्रथं प्रतिष्ठाप्य स्वयमपि पुरोभागं परिष्कुर्वाणस्य द्रोणस्य चरणयोर्बाणाभ्यां प्रणीतप्रणिपातस्तेन दी
यमानमार्गो वैकाशमंडमारुत इव घनमंडलं तमेव व्यूहं क्षणाद्वेवस्क्षोभयामास॥१॥ अलंकर्मीणेन समर्थेन पाणिमित्रं पाणौ विद्यमानं तोत्रं
यावरवेनत्र प्रयथापद्मनेत्रेण सौभद्रवधेनयः शोकातिरेकः शोकातिशयः तेन परिगलितानां भूरिजनबाष्पाणां पूरेण पंकिले पंकयुक्ते हृत्तले आनीतं

सौभीक्न[illegible]यत्नेपनस्यसंरक्षणमवलंतस्यादिवृक्षपेवप्रसुमिन्द्रपेवतुंगतनं उच्चतरं पलकेतुम्भूंम भवायंतत् [illegible] क्रतासेकृ[illegible]

पिपरिवृढेनहनुमतापरिमंडितं शोभितं मानसंमन:मार्गण:बाणश्च गरुडश्च गंधवह:वायुश्च तेषां बांधवै:आशुगत्वासदृशौ:सैंधवै:अश्वै:आहितंभिद्दिनं

धनं यस्मिंस्तंस्यंदनंरथं अधिरुह्य संक्रंदननंदन:अर्जुन:समरोचितवेषाणांसंपदा अविकलेनयुक्तेननिजबलेन स्वसैन्येनसहप्रतिष्ठमान:निरुद्ध:उच्चत-

पावियत्पयोयैस्तै:रथै:मदेन बंधुरैर्व्याप्तै:सिंधुरै:गजै:विविधगतिभि:नानागतिभि:नटंतिनृत्यंति तै:घोटकै:कृतारणे आसत्ति:सान्निध्यं यैस्तै:पत्ति

भि:पदैश्चविरचित:कृत:परिपंथिजनानां शत्रुजनानां मोह:अंत:प्रवेशादिभ्रांतिर्यस्य तस्य व्यूहस्य पृष्ठभागे जयद्रथं प्रतिष्ठाप्य स्वयमपि पुरोभागंभू

॥तदनंतरं॥ पद्यं॥ संशप्तकास्फुरपलायनवेगभंगीं तत्तादृशीमभिनयन्निव शौरिनुन्नः वेगेनविस्म

यकरेणविरोधिसैन्येविष्वक्चचारविजयस्य शताङ्गवर्यः॥१॥

शाग्रभागं परिष्कुर्वाणस्य अलंकुर्वाणस्य द्रोण

स्य चरणयो:बाणाभ्यां प्रणीत:कृत:प्रणिपात:नमस्कारो येन स:अत एव तेन द्रोणेन दीयमान:व्यूहांतर्गमनाय मार्गो येन [illegible] कातर्योपस्थितयाभूत:सन् चंडमा

रुत:मेघमंडलमिवतमेवव्यूहं क्षणात् क्षोभयामास॥१॥प॰ शौरिनुन्न:कृष्णप्रेरित:विजयस्य शताङ्गवर्य:रथश्रेष्ठ:सा[illegible]तादृशीं च तत्तादृशीं तां

संशप्तका:संग्रामादनिवर्तिन:ये अस्फुरा:[illegible]भटा:तेषां पलायनवेगस्य भंगीं रीतिं अभिनयन्निव एतादृश[illegible]पनवेगइति अभिनयेन द

र्शयन्निवविस्मयकरेणवेगेनविरोधिसैन्ये शत्रुसैन्येविष्वक् [illegible]मंतात् [illegible] अन्योपिनरस्यरथं [illegible] पति॥१॥ [illegible]॥

ऽम्बरणांगणे धूलिमिषेण धूलिकपटेन निह्नुतः आच्छादितः दिनेश्वरस्य दीपो येन तस्मिन् तमसि जृंभिते वृद्धिं गते सति सैन्यकज्योतिः सूर्याच्छादनाद्
धकारे समुद्भूते सतीत्यर्थः युधि पांडवसेना सहसा अकस्मात् खिद्यते स्म कुरुसेना हृष्यते स्म उभयत्रापि हेतुः सूर्यास्तमतत्वा इदानीं कृतप्रतिज्ञस्य अर्जुन-
स्यात्मेत्प्रवेशसंभावना ॥ २॥ युद्धे एतेन अर्जुनेन मुहुः पुनः पुनः विकृष्टं बाणमोचनार्थं आकर्णमाकृष्टं गांडीवधनुः स्वस्य यत् नामधेयं गांडीवेति नाम तस्मि-

तत्र निह्नुतदिनेश्वरदीपे जृंभिते तमसि धूलिमिषेण खिद्यते स्म युधि पांडवसेना हृष्यते स्म सहसा कुरुसेना २
गांडीवमेतेन मुहुर्विकृष्टं ह्रस्वं च दीर्घं च बभूव युद्धे तुलामिवर्णेन सहाधिरोढुं स्वनामधेयस्थितिशालिनेव ३ अस्तंग
तश्चेदरविंदबंधुर्वध्यामवेत्सापि मदीयसंधा इतीवसंक्रंदननंदनोसौ तदीयमार्गं रुरुधे शरौघैः ४

न् स्थितिशालिना वासकर्त्रा इवर्णेन सह तुलां सादृश्यं अ
धिरोढुं आप्नुमिव ह्रस्वं दीर्घं च बभूव धनुः आकर्षणसमये ह्रस्वं भवति बाणप्रक्षेपानंतरं ज्यामोचनात् दीर्घं भवति कपिध्वजस्य गांडीवगांडिवौ पुंनपुंस-
कावित्यमरात् गांडीवशब्दे इकारस्य ह्रस्वत्वं दीर्घत्वं च ॥ ३॥ अरविंदबंधुः सूर्यः अस्तंगतः स्याच्चेत्तर्हि सापि मदीया संधा प्रतिज्ञा वध्या नयद्रथवधाभावात्
निष्फला भवेत् इति हेतोरिव असौ संक्रंदननंदनः अर्जुनः तदीयमार्गं सूर्यस्य गम्यमार्गं आकाशं शरौघैः रुरुधे ॥ ४॥ ॥ ७॥ ॥ ८॥ २

[illegible] चिरो [illegible] प्रभुभव [illegible] पतिपालयति [illegible]

[illegible] पार्योऽधिप [illegible] बेत्यर्थः शिरोभिः धात्रीभूमि [illegible] मुनिः [illegible] गदाह्व चक्रमिति [illegible]

[illegible] पुत्रोऽर्जुनः [illegible] राजानं कंककुलस्य आमिषं [illegible] कुर्वन्निति [illegible] पुनः ततः कलिंगम

पुत्रं प्राप्ते नो [illegible] मुमुक्ष संबधितां स्पृष्टमिव [illegible] बाणैः धनंजयोऽसौ शित भल्ल कृत्तैः शिरोभिराच्छादयति स्म धात्रीं ॥ ५ ॥ [illegible] कलिंग पुनर्भोजं [illegible] मागध चोलं दुःख [illegible] चोलं [illegible] कुर्वन् [illegible] दिनावसानसमये रुषेस्म सिंधु [illegible] ॥ ५ ॥ ॥ ॥

आनं धृतं विपलिंगं मरणचिह्नं

येन तं भोजं नृपं आपदां मरणदुःखानां [illegible] मागधं मगधदेशीयं राजानं यमपुरी [illegible] चोलं चोलदेशीयं नृपं दुःख [illegible] तथाविधं [illegible] यस्य तं दुःखं [illegible] इत्यर्थः कुर्वन् सन् दिनावसानसमये सिंधु [illegible] अर्जुनो [illegible] ॥ ६ ॥ [illegible] ॥ ७ ॥

बं॰भा॰ तत्रांतरे [illegible] भयमरान [illegible] उत्कंठ दुःखयुताधीर्यसमः भूपः [illegible] वार्तां अर्जुनवार्तां जिज्ञासुः सन् सात्यकिः मारुतिः भीमश्च टीका
३ तौ रिपुचमूव्यूहं भेत्तुं आदिदेशान् प्रेषयामास तौ सात्यकिमारुती रिपुं द्रोणं जित्वा धर्मराजाय स्वजयसूचनार्थं आत्त सिंहनादौ कृतसिंहनादौ संतौ कुरून् कु १०
रुसैनिकान् क्षोभयंतौ संवीक्ष्य भूरिश्रवाः राधेयः कर्णश्च उभौ हृतान् बलात् रुरुधतुः बाणप्रक्षेपेण निवारयामासतुः ॥ ७ ॥ अथानंतरं सोमदत्ततनुजः भू

॥ तत्रांतरे ॥ भूपस्तूत्तपमानधीर्भयभराज्जिज्ञासुरिद्धात्मभूवार्तां सात्यकिमारुती रिपुचमूव्यूहं मतिमादिशत् जित्वा तौ
रिपुमात्तसिंहनिनदौ संवीक्ष्य भूरिश्रवा राधेयश्च हृतावुभौ रुरुधतुः संक्षोभयंतौ कुरून् ॥ ७ ॥ अथ सोमदत्ततनुजो रमापते
रनुजश्च [illegible] कार्मुकौ परिगृह्य पट्टिशलतां परस्परं प्रधनं भयानकमुभौ वितेनतुः ॥ ८ ॥ अथ शिनितनयं निपात्य
भूमावुरसि धृतासिरसौ तु सोमदत्तिः गलयितुमिव गर्वसारमंतर्निजचरणेन निपीडयांबभूव ॥ ९ ॥

रिश्रवाः रमापतेः कृष्णस्य अनुजः
[illegible] उभौ [illegible] कार्मुकाणि ययोस्तथाभूतौ संतौ पट्टिशलतां [illegible] परिगृह्य परस्परं भयान- ३
कं प्रधनं युद्धं [illegible] ॥ ८ ॥ अथ [illegible] सोमदत्तिः सोमदत्तपुत्रः [illegible] शिनितनयं [illegible] सात्यकिं भूमौ निपात्य उरसि धृता-
सिः [illegible] निजचरणेन निपीडयामास [illegible] ॥ ९ ॥ ॥ १४ ॥

[illegible] सिद्ध [illegible] भूरिश्रवसः [illegible] प्रहरणेन [illegible] तस्मिन् [illegible] यामास [illegible] किं-
तु [illegible] भूरिश्रवसः [illegible] अर्जुनस्य [illegible] मार्गणेन [illegible] हरिः [illegible]
[illegible] त्यर्थः ॥१०॥ [illegible] प्रेरितस्य किरीटिनः अर्जुनस्य मार्गणेन
बाणेन हृत हस्तपल्लवः छिन्नहस्तः सोमदत्ततनयः भूरिश्रवाः केवलं वियतः हस्तो यस्य तस्य भावः तत्ता तां विहस्ततां न ययौ किंतु कौरवाः दुर्योधनप

तदा [illegible] तोपि [illegible] पारयामास रयेऽर्जुनस्य निजानुजातोरसि दत्तपादे भूरिश्रवस्येव प्रहारयेस्मिन् ॥१०॥ चोदित
स्य हरिणा किरीटिनो मार्गणेन हृतहस्तपल्लवः सोमदत्ततनुजो न केवलं कौरवा अपि विहस्ततां ययुः ॥११॥ भूरिश्रवास्तदनु
पुत्रममुं बलारेर्भूयो विगर्ह्य पुरुषोत्तमसन्निधाने आचम्य पावनमसौ कुशमेकमन्यमास्तीर्य युद्धभुवि तत्र शयालुरासीत् ॥१२॥

[illegible] अपि विहस्ततां ययुः विहस्ततां व्याकुलतामित्यर्थः ॥११॥ तदनु भूरिश्रवाः पुरुषोत्तमस्य कृष्णस्य सन्निधाने सामीप्ये सति बलारेः पुत्रं अर्जुनं भू
यः बहु [illegible] अन्यासक्तस्य मम हस्तः अलक्षितेन त्वया छिन्नः [illegible] धिगिति [illegible] तत्र युद्धभुवि असौ भूरिश्रवाः [illegible]
[illegible] एकं कुशं [illegible] दुर्भान् आस्तीर्य [illegible] निषण्णः अभूत् ॥१२॥ ॥६॥

[illegible] यकानां निकायं समुद्गिरन्ति [illegible]
॥गद्य॥ तदनु हिडिम्बवैरी भीमः दिननायकसुतस्य कर्णस्य साहाय्यके [illegible] विदलितः [illegible] विमतमद [illegible]
[illegible] दर्पेण गरीयसां गुरुतराणां दुःशासनस्य यवीयसां कनिष्ठबन्धूनां [illegible] तुमित्यर्थः
गर्वीयमानां निजगदां अष्टाभिः काष्ठाभिः समं दिग्भिः सह भ्रामयामास गदायाः स्वस्मिन् प्रहारवञ्चनाय दिवस्य [illegible] तदेव दिक्भ्रमणं
अथवा विलोकयतां भयेन नेत्रभ्रमणात् दिशो भ्रमन्तीति प्रतीयते॥२॥प॰ युधि पवमानसूनोः गदा पुरा बाल्यवयसि अश्मने शिलायै दत्तां दशां चूर्णता

॥गद्य॥ तदनु हिडिम्बवैरी दिननायकसुतसाहाय्यकेन भयानकसायकनिकायवर्षिणाम् अमर्षिणां दर्पेण गरीयसां दुःशासनय
वीयसां [illegible] विमतमद्यां निजगदाम् अष्टाभिः काष्ठाभिः समं भ्रामयामास॥२॥प॰ [illegible]
तां दत्त्वा [illegible] युधि गदा पवमानसूनोः दुःशासनानुजकुलाय [illegible] मियो [illegible] नवतीर्विदशीस्तयावत्॥१२॥ ॥

[illegible]
[illegible]
[illegible]
[illegible] ॥५॥

[illegible] ॥१४॥ अथपर्ण

क्षणेन [illegible] पूर्वप्रथमं गुणेन धनुषः [illegible] पश्चात् अ

न्यान् धनुषाग्रेण अपरं अन्यं [illegible] कर्णेन कुंतीसमक्षतो भर्जुनं [illegible]

विहायं विस्यंविसारथिं विभिन्नदासंविपनाकिक्कापटं विशिखेनविवस्वतःसुतंविदधातिस्मवृकोदरःक्षणात् १४ अथान्यमासा
द्यरथंक्षणेनकर्णःकुरूणांधुरिकार्मुकस्य पूर्वगुणेनाशुगजातमेकंपश्चादन्यान्यपरंनिरास्यत् १५ मारुतिस्तदनुसोमदत्तभूपा
दपांसुपरिधूसरोरसा कंसमर्दनकनीयसासमंशक्रनंदनसमीपमापसः १६ ग० तदनुतदनुजपरिपंथिनिशरपुंजेनकुरुकुंजरा
न्भंजयंतंधनंजयंतस्कृतवधेनकृतमंतुरिपुंनिहंतुमादिश्यदलितदैत्यचक्रेणनिजचक्रेणचंडकरमंडलंपिधानेगभस्तिमालि
रूमहास्तेतिसमस्तनिजबलकोलाहलमाकर्ण्यदुःशलाजानिर्मुदासनिजवदनमुदास ॥२॥

पुत्रंनहनिष्यामीतिप्रतिज्ञातत्वात्स्वव
शंप्राप्तोपिभीमोविसृष्टइति ॥१५॥ तदनुसःकर्णेनमुक्तःमारुतिःभीमःसोमदत्तभुवःभूरिश्रवसःपादपांसुभिःपरितःधूसरंईषत्पांडुरंउरोयस्य
तेनकंसमर्दनकनीयसासात्यकिनासमंअर्जुनसमीपंप्राप ॥१६॥ ग० तदनुदनुजपरिपंथिनिदैत्यशत्रौश्रीकृष्णेशरपुंजेनबाणसमूहेनकुरुकुंजरान्
कौरवपक्षीयमुख्यान्भंजयंतंनिघ्नंतंधनंजयंअर्जुनंसुतवधेनकृतमंतुं [illegible] निहंतुंआदिश्य [illegible]

चं०भा० दैत्यसमूहो येन तेन निजचक्रेण चंडकरमंडलं सूर्यमंडलं पिदधाने सति आच्छादयति सति गभस्तिमान् सूर्यः अस्तं अयासीत् अगमत् इति समस्तानां- टी०स०
५ निजबलानां निजसैनिकानां कोलाहलं आकर्ण्य सः दुःखजाया यस्य सः जयद्रथः मुदा हर्षेण वदनं उदास इदानीमर्जुनस्य कोऽप्युपायो नास्ति अस्मात्तु कर्म- १०
येऊर्ध्वं चकार भारते तु कृष्णेन मायया तमउत्पादितं तेन सूर्याच्छादनं अत्र तु चक्रेणोक्तं तत्तु पुराणांतरानुरोधेन॥१६॥तदा प्रकाशस्य प्रसिद्धस्यापि दिवाकरस्य-
तिरोहितस्य अतिगुप्तस्यापि जयद्रथस्य चक्रमेण अदर्शनाय रवेः आच्छादनाय दर्शनाय जयद्रथस्य दर्शनायापि मुरारेः कृष्णस्य सदर्शनं चक्रं हेतुः कारणं

तदा प्रकाशप्रसादिवाकरस्याति तिरोहितस्यापि जयद्रथस्य अदर्शनायापि च दर्शनायस्य सुदर्शनं हेतुरभून्मुरारेः॥१७ सकलमपि जगति चक्र
यूथं सवितुरदर्शनतः सवेदमाहुः समरभुवि कथं नु शौरिचक्रं तपनतिरोभवनं तदा चकांक्षे१८ तावत्किरीटी तरुणेंदुमौलेर्लब्धान्यनाकी
र्निवदावदेन शरेण शत्रोरलुनीत शीर्षं साकं प्रमोदेन सकौरवाणां॥१९॥

अभूत् सूर्योऽस्तंगत इत्यतो निर्भयतया स्वयं द्रष्टुमागतं जयद्रथं ददर्शेत्य
र्थः॥१७॥जगति सकलमपि चक्रयूथं चक्रसमूहः सवितुः अदर्शनतः अदर्शनेन सखेदं सदुःखं आहुः तत्र समरभुवि शौरिचक्रं सूर्याच्छादनं कथं नु आच
कांक्षे इच्छतिस्मेत्यन्वयोक्तिः चक्रयूथं चक्रवाकपक्षिसमूहः इत्यर्थांतरेण परिहारः॥१८॥यावज्जयद्रथः पश्यति तावत् सः किरीटी अर्जुनः तरुणेंदुमौ-
लेः शिवस्य पदान्यनाकी औदार्यसंकीर्तिः वदावदेन वरदानशीलेन प्रसादलब्धेनेत्यर्थः शरेण शत्रोः जयद्रथस्य शीर्षं कौरवाणां प्रमोदेन सह अलुनीत अच्छि
नत् जयद्रथमस्तकच्छेदे सूर्यवर्शनात् सूर्यादर्शनेन आनंदस्य हर्षस्य नाशात् कौरवा दुःखमापुरिति भावः॥१९॥ ॥७॥ ५

वृद्धक्षत्रस्य सुतस्तु नामकम् अथ वृद्धक्षत्रः पित्रा सायं संध्यासमये अर्घ्याय सूर्याय अर्घ्यं दातुं अञ्जलौ करे धृतं नालं न पर्याप्तं इतीव इति मत्वेव जिष्णुः अर्जुनः सिंधु-
राजस्य जयद्रथस्य कर्तितं शिरः तु अञ्जलौ न्यपातयत् पातयामास केनचित् गृहीतं पदार्थं अल्पं मत्वा स्वनिकटस्थं तमेव पदार्थं ददाति कश्चित् स्नानार्थं यो वृद्ध-
शिरः सारकपदबाधकत्वात् अध्यवसायोक्तिः अत्रेत्थमितिहासः यस्तु मत्पुत्रमस्तकं भुवि पातयेत् सः भग्नशिराः सद्यः पतेत् इति जातशिववरस्य वृद्धक्षत्रस्य स्यमन्तपञ्चके
तीर्थे तपस्यतः तत्पितुः अञ्जलौ छिन्नं तत्पुत्रजयद्रथमस्तकं पातयेति श्रीकृष्णेनोक्तोऽर्जुनो बाणपरंपरया तथैव चकारेति ॥ २० ॥ अथ पंचत्वमस्य एतत्

वृद्धक्षत्राञ्जलौ सायं नालमर्घ्याय कं धृतं इतीव सिंधुराजस्य जिष्णुस्तस्मिन्न्यपातयत् ॥ २० ॥ एतत्कि-
मित्यपमपास्य क्षतस्य शीर्षं शीर्यन्स्वमूर्धनि वरेण शशांकमौलेः क्षोण्यामवाङ्मुखतया निपपात वे-
गादाघ्रातुकामइवनत्क्षतवत्सलत्वात् ॥ २१ ॥ ॥ ॥ ॥

अञ्जलौ पतितं किं इत्युक्त्वा क्षतस्य शीर्षं अपास्य भुवि त्यक्त्वा शशांकमौलेः वरेण स्वस्य मूर्धनि शीर्यन् भंगं प्राप्नुवन् सन् क्षतवत्सलत्वात् क्षतस्नेहात्
तत्क्षतमस्तकं आघ्रातुकाम इव अवघ्राणेच्छुरिव अवाङ्मुखतया अधोमुखत्वेन वेगात् निपपात तत्पुत्रशिरो भूम्यां यः पातयेत् स भग्नशिरा भूमौ पते-
दिति शिववरानुरोधेन पितुर्हस्तात् पुत्रशिरो भूमौ पतितमिति पिता भग्नशिराः भूमौ पपातेत्यर्थः इति भावः ॥ २१ ॥ ॥ ५ ॥

॥ग॰अथवासरविरामेसूर्यास्तमयेतस्मिन्वासवसूनो अर्जुनेशिबिरं एत्य [illegible] यथावृत्तंयथापूर्वंविज्ञाप्यनिवेद्यहृष्टरोमाणं उद्गतरोमांचंराजानं उपतिष्ठमानेआनंदयतिसतिसुयोधनस्तु क्रोधनतयाक्रोधेनभगिनीजानेः शल्यकस्यजयद्रथस्यनिधनंमरणंनिदानंआदिकारणंयस्यनियोद्धुकामस्यदुर्योधनस्य तस्यभावस्तत्तानयासर्वामपिशार्वरींनियोद्धुकामःसन्गंभीरयुद्धारंभसूचकभेरीनिध्वानंउज्जृंभयामास प्रकटीकारयामास दुर्यो

॥ग॰अथतस्मिन्वासवसूनौवासरविरामेशिबिरमेत्ययथावृत्तंरणकथांविज्ञाप्यहृष्टरोमाणंराजानमुपतिष्ठमानेसुयोधनस्तु क्रोधनतयाभगिनीजानिनिधननिदानतयासर्वामपिशार्वरींनियोद्धुकामःसन्गंभीरयुद्धारंभभेरीनिध्वानमुज्जृंभयामास ४

॥गद्यं॥ एतेतदाकर्ण्यसमयवेज्ञानिकाःस्मरणमात्रकृतसंधानंनिशिदशगुणितभुजबलावलंबहिडिंबभागिनेयंपृथक्प्रस्थाप्यस्वयमपिनिजबलानिसंनाह्यसंयुगायसंयुगापतबाहवःशक्रसुतादयोनिश्चक्रमुः॥५॥

॥श्रीकृष्णायनमः॥ ॥ ॥

धनोजयद्रथवधेनरात्रौयुद्धंकर्तुमत्र [illegible] आकर्ण्य एते समये वैज्ञानिका कुशलाः संयुगं समीचीनयुगं बहुत आयतो दीर्घौबाहू येषां ते शक्रसुतादय [illegible] निशिरात्रौ दशगुणितं भुजबलं आलंबते [illegible] हिडिंबस्य भागिनेयं घटोत्कचं पृथक् [illegible] निश्चक्रमुः ॥५॥ [illegible]

६

[illegible]

शे भ्रनिर्वाच्ये तमसामुज्जृम्भणेपि मागस्त्ये सत्यपि अह्नीव अद्भुततरं आह्वयशिल्पं युद्धचातुर्यं चक्रुः प्रकाशयामास [illegible] तमसामुज्जृम्भणे [illegible]

प्रथीयां यातां [illegible] इति [illegible] सर्वाङ्गे [illegible]
रुरोध ॥ २३ ॥ शार्वर्यां चिकुरे मनोजशिखिनो धूमे नभोरण्यभूजन्तुभृशा [illegible]
नै चेले कालहलायुधस्य तमसामुज्जृम्भणे तादृशेप्यह्नीवाह्वयशिल्पमद्भुततरं चक्रुर्द्वये सैनिकाः ॥ २४ ॥

राशिभुवत्याः निकुरे केशरूपे पुनः कीदृशे मनोजशिखिनः मदनाग्नेः धूमे पुनः कीदृशे नभ एव अरण्यं [illegible] दृशे [illegible] आलोकस्य दर्शनस्य [illegible] कालः संहारकालः [illegible] बलभद्रः [illegible] अत्र [illegible] तमसि निकुरत्वारोप ॥ २४ ॥ [illegible]

निशि अद्भुते प्रधने युद्धे सत्यपि नारदस्य दृष्टेः नेत्रस्य उदग्रा महती प्रथमेतरा अतिवृष्टिरनावृष्टिरिति श्लोकोक्ता द्वितीया ईतिः अनावृष्टिः व्यलसत्
विललास यदीदं यु॰ दिवास्यात्तर्हि नारददृष्टेः आनंदाश्रूणामतिवृष्टिः स्यादिति भावः त्रिदशनाथस्य इंद्रस्य नगर्यां वनिताः स्त्रियोऽप्सरसोऽपि वर
णस्रजं चिकुरे एव स्वर्गतनवीनवीरजन्यदेवके शेषेव बबंधुः आसंजयामासुः उभयत्रापि तमसा दर्शनाभावो हेतुः रात्रावागतनवीनवीरजन्यदे
वानामवयव॰ दर्शनाभावादुत्सुकतया वरणस्रजं चिकुरे व बबंधुरिति भावः ॥ २४ ॥ अमीषु अद्यावधि चतुर्दशसु युद्धदिवसेषु अयमेव अद्यतन

प्रधनेऽद्भुतेऽपि निशि नारददृष्टेः प्रथमेतरा व्यलसदीतिरुदग्रा वनिता अपि त्रिदशनाथनगर्यां वरणस्रजं चिकुर एव बबंधुः ॥ २४ ॥
अमीषु युद्धदिवसेष्वयमेव हि कामुकः रणोत्सवे विभज्यार्धं रात्रये पि ददौ यतः ॥ २५ ॥ ततः क्षणादेव घटोत्कचोऽसौ संग्रा
मसीमापरिजृंभमाणः तमीमिमां सांद्रतमां तमोभिर्दंष्ट्राप्रभाभिर्दिवसं वितेने ॥ २६ ॥ ॥ ॥

एव दिवसः कामुकः स्त्रीरक्तः यतः रणोत्सवे अर्धं विभज्य रात्रये पि ददौ अन्योऽपि कामुको लब्धं पदार्थं प्रियायै विभज्य ददाति ॥ २५ ॥ ततः असौ
घटोत्कचः क्षणादेव संग्रामसीमायाः उपरि ऊर्ध्वभागे जृंभमाणः बृहद्वपुः दधानः सन् तमोभिः सांद्रतमां अतिशयेन निबिडां इमां तमीं रात्रिं दंष्ट्रा
प्रभाभिः धवलकांतिभिः दिवसं वितेने चकार ॥ २६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

तस्यातिरोद्दत्वमाह तिष्ठेति हेद्रोणतिष्ठ मापलायस्व हेसुयोधन द्रुततरं अतिशीघ्रं धावस्व जीवरक्षणार्थं पलायनं कुरु हेदुःशासन त्वांमुंचामि किं पलायनंमाकुरुत्वांनैवमुंचामीत्यर्थः भो आर्यकृपत्वत्कृतेममकृपायाःलेशोपिनास्ति हेगांधाराधिप शकुने रणेतवकाकथा मत्पुरस्तिष्ठसीति वार्तापि गगनकुसुमायमानात्दुर्मेधसां दुर्बुद्धीनां अग्रणीःमुख्यःमूढतमःकर्णःक्वास्ति इतिकटुरवःक्रूरभाषणःसन् अभ्यांतरे आकाशमध्ये व्यभ्राम्यत्विशेषेणभ्रमणंचकार ॥ २७॥ निजैःस्वकीयैःअट्टहसितैःसशब्दहास्यैःक्षुभ्यंति दृशाशामुखानि दशदिक्प्रारंभाःयस्य यत्संबंधीनिआशामुखा-

तिष्ठद्रोणसुयोधनद्रुततरंधावस्वदुःशासनत्वांमुंचामिकिमार्यभोकृपकृपालेशोपिनत्वत्कृते गांधाराधिपकाकथातवरणे दुर्मेधसामग्रणीःकर्णःक्वेतिघटोत्कचःकटुरवोव्यभ्राम्यदभ्यांतरे ॥ २७॥ हैडंबेयममुंनिजाट्टहसितक्षुभ्यद्दशाशामुखंदंष्ट्रांकूरकरालमात्तपरशुंदृष्ट्वैवकेचिद्भटाः बिभ्युश्चक्षुरमी मिमीलुरवनौपेतुर्मुमूर्छुर्जहुःप्राणानारुरुहुर्विमानममरीःप्रापुःप्रमोदंदधुः २८

नि अट्टहासेन क्षुब्धानि बभूवुः तं दंष्ट्राणां अंकुरैःअग्रैःकरालं भयंकरं आत्त परशुं गृहीतपरशुं अमुं हैडंबेयं घटोत्कचं दृष्ट्वैव केचिद्भटाः योद्धारःबिभ्युःभयंप्रापुःततःअमी चक्षुःनेत्रं मिमीलुःपक्ष्मणोर्मेलनंचक्रुःततःअवनौ पेतुःततःमुमूर्छुःततःप्राणान्जहुःतत्यजुःततःविमानं आरुरुहुः ततःअमरीः अप्सरसः प्रापुःलेभिरे ततःप्रमोदं आनंदं दधुः अनयोक्त्या तस्यशब्दे नैवबहवोमृताइतिभावः ॥

॥ २८॥ ॥श्रीकृष्णायनमः॥ ॥ ७॥ ॥ ७॥ ॥ ७॥ ॥ ७॥

तत्ररणांगणे नभसि घोररूपं तं घटोत्कचं अभिवीक्ष्य नृपौघे राजसमूहे दिशि दिशि पलायिते सति मरणसमये मुष्टेः लग्नं शस्त्रं यस्य सः कबंध एव छि
न्नशिराः सजीवो भट एव तस्य घटोत्कचस्य अभिमुखः प्रययौ कबंधस्य चक्षुः श्रोत्राद्यभावात् दर्शनश्रवणाद्यभावेन शिरश्छेदात् पूर्वपुरोगमनक्रियया
पुर एव जगामेत्यर्थः॥२९॥ वेदवाक्ये पितुः पुत्रस्य च ऐकात्म्यं ऐक्यं उक्तमस्ति हि प्रसिद्धं इदं ऐकात्म्यं दृष्टं तथाहि यदा युद्धे भीमात्मजः घटोत्कचः अरिसैन्या
नां स्वयमेव भीमः अभूत् भीमः भयंकरः इत्यर्थांतरक्रोडीकरणात् वाचोयुक्तिः॥३०॥ सः घटोत्कचः व्योम्नि स्थित्वा क्वापि कुत्रचिद्देशे दृष्टः क्वापि अदृष्टः सन् भिं

नभसितमभिवीक्ष्य घोररूपं दिशि दिशि तत्र पलायिते नृपौघे मरणसमयमुष्टिलग्नशस्त्रस्तदभिमुखः प्रययौ कबंध एव २९ पितुश्च
पुत्रस्य च वेदवाक्ये यदुक्तमैकात्म्यमिदं हि दृष्टं भीमात्मजो हि स्वयमेव युद्धे भीमो यदासीदरिसैनिकानां ३० भिंदीपालैस्तोमरैः शूलजालैर्व
र्षैरुग्रैश्चोभयेषां नगानां दृष्टः क्वापि क्वाप्यदृष्टोरिसैन्यं व्योम्नि स्थित्वा निःशेषं स चक्रे ३१ स्वस्वक्षयं नागमदद्य रात्रौ दुर्योधनस्य ध्वजिनी
तिमत्वा पितृव्यभक्त्यैव स भीमसूनुस्तत्रैव तस्याः क्षयमाततान ३२ दीपालैः रज्जुमयपाषाणक्षेपणीभिः तोमरैः अस्त्रकुंताकारबृहत्फालैरायुधैः शूला
नां जालैः समूहैश्च उभयेषां द्विविधानां नगानां पर्वतानां वृक्षाणां च उग्रैः वर्षैः वृष्टिभिश्च अरिसैन्यं निःशेषं चक्रे नाम अवशिष्टं तदर्धः सैन्यं तु नष्टं चक्रे इत्यर्थः ३१
अद्य रात्रौ दुर्योधनस्य ध्वजिनी सेना स्वस्य स्वस्य क्षयं निवासस्थानं नागमत् इति मत्वा सः भीमसूनुः घटोत्कचः पितृव्ये पितुर्बंधौ दुर्योधने या भक्तिः अनुरागः तयैव
तस्याः ध्वजिन्याः क्षयं निवासस्थानं नाशं च आततान ददावित्यर्थः अन्योपि रात्रौ आगताय आप्तजनसंबंधिजनाय निवासस्थानं ददाति॥ ३२॥ ॥ ८॥

तत्रांतरे तस्मिन्समये सुयोधनः एषः घटोत्कचः क्षणंयुध्येतचेत्तर्हि मेममवाहिन्याः एव अर्धनंनंक्ष्यतिननाशंप्राप्स्यतिकिंतुमेदिन्याः पृथिव्याः अ पिअर्धंनंक्ष्यति इतिमेने अयंमुहूर्तमात्रमितः परंयुध्येतचेत्तर्हिमांपराभूय मत्पृथिव्या अर्धमपिपांडवेभ्योदास्यतीतिमेने इतिभावः ॥ २२ ॥ गद्यं ॥ इ त्थंनितांतानांतीव्राणांचिंतानांसंतानात् परंपरायाः सकाशात् आर्तस्यपीडितस्य धार्तराष्ट्रस्यदुर्योधनस्यसंप्रार्थनस्यगुणनिकयापुनःपुनःकरणेन- संभृतःसिद्धः कृतःसर्वाभिसारः सर्वसैन्यसन्नाहोयेनसः मिहिरकुमारः कर्णः महेंद्रः वज्रधारया महीध्रं पर्वतमिव तेन इंद्रेणकवचकुंडलदानसम-

॥ तत्रांतरे ॥ वाहिन्याएवमेनार्धंमेदिन्या अपिनंक्ष्यति क्षणंयुध्येतचेदेषइतिमेनेसुयोधनः २२ ग० इत्थंनितांतचिंता संतानादार्तस्यसंप्रार्थनगुणनिकयासंभृतसर्वाभिसारोमिहिरकुमारोवज्रधारयामहेंद्रोमहीध्रमिवतेनदत्तयावलक्षाश्वक्षपण दक्षेयमितिचिररक्षितयामहत्याशक्त्यावक्षसिनिर्भिद्यक्षणेनतंक्षणदाचरंक्षितौपातयामास ॥ ५ ॥ प० पौत्रस्यतस्यप्रबलप्र सिद्धेः प्रहारपीडांप्रतियोधिदत्तां अपारयन्द्रष्टुमिवातिघोरामंतःस्थितोवायुरगाद्बहिष्टात् ॥ २४ ॥ ॥ ॥

येदत्तायाइयंशक्तिः वलक्षाश्वस्य अर्जुनस्यक्षपणेवधेदक्षाइतिहेतुनाचिरंरक्षितयामहत्याशक्त्यावक्षसिनिर्भिद्यक्षणेनतंक्षणदाचरंघटो त्कचंराक्षसंक्षितौनिक्षेपयामास पातयामास ॥ ५ ॥ प० प्रबलइतिप्रसिद्धिर्यस्यतस्यपौत्रस्यस्वस्यनप्तुः घटोत्कचस्यप्रतियोधिभिः दत्तांअतिघोरांप्र हारस्यशक्तिप्रहारस्यपीडांद्रष्टुंअपारयन्निवअसमर्थःसन्निवअंतःशरीरमध्येस्थितःप्राणवायुः बहिष्टात्बहिर्भागेअगात् अगमत् ॥ २४ ॥ ॥

साशक्तिरपि सांयुगीनाः रणेनिपुणाःयेजनाःतैः सन्नुतं संस्कृतं शौर्यंयस्यतं नराशं राक्षसं अभिहत्य वायुसूनोः भीमस्यपरिघात् गदायाः भीतेव सावासवस्य सविधं समीपभागं प्रतिपेदे जगाम ॥ ३५॥ गद्यं ॥ तदानीं घटोत्कचमरणसमये तत्ररणांगणेतेषांकौंतेयस्य कुरुकुलोत्पन्नस्य धर्मराजस्य सैन्यानां बाष्पलहरीं नेत्रयोः अश्रुलहरीं निष्पादयितुं मोदविषादयोः आनंदशोकयोः अहमहमिकया इदंकार्यंमयाकर्तुंशक्यमिति

सापिशक्तिरभिहत्यनराशंसांयुगीनजनसन्नुतशौर्यं वायुसूनुपरिघादिवभीतावासवस्यसविधंप्रतिपेदे ३५.
॥गद्यं॥तदानींतेषांकौंतेयकौरवसैन्यानांबाष्पलहरीमुत्पादयितुंमोदविषादयोरहमहमिकयास्पर्धासमवर्धत ६.

परस्परस्याहंकारोत्पत्त्यास्पर्धासमवर्धत अयंभावः अर्जुनवधार्थं रक्षितया शक्त्या कर्णेन राक्षसो हतः अतोर्जुनस्य जीवनात् आनंदाश्रूणां प्रादुर्भावः महावीरस्य स्वपक्षीय घटोत्कचस्य मरणात् दुःखाश्रूणां प्रादुर्भावइतिभावः ॥ ६॥ ॥श्रीकृष्णायनमः॥ ॥छ॥ ॥छ

अथजयद्रथघटोत्कचयोः निधनशोकातिशयाभ्यां गुरून् गुरुत्वयुक्तान् द्वयानपि कुरून् दुर्योधनादीन् युधिष्ठिरादींश्च आश्वासयितुमिवसमा धानंकर्तुमिव कुरूणांकूटस्थेन मूलपुरुषेण कुमुदबांधवेन चंद्रेणकुलिशायुधस्य इंद्रस्यदिशं प्राचीं एत्य उदयं प्राप्येत्यर्थः काशनी काशैः काश तृणमंजरीतुल्यैः शुभ्रैः अभीषुभिः किरणैः आकाशदिशानां अवकाशं मध्यभागं व्याकोचायमानेसति प्रफुल्लमिवकुर्वाणेसति कोपेन कुटिली

अथजयद्रथघटोत्कचनिधनशोकातिशयगुरून्द्वयानपिकुरूनाश्वासयितुमिवकुरुकूटस्थेकुमुदबांधवेकुलिशा युधदिशामेत्यकाशनीकाशैरभीषुभिराकाशदिशावकाशंव्याकोचयमानेसतिकोपेनकुटिलीकृतचापोद्रुपदविराटभूपौ द्रुतमनीचैर्नाराचैराचार्यशलल्लैःशल्यमृगमिवनिबद्धतनुमातेनतुः ॥७॥ प० तस्यार्धमग्नानाराचास्तन्वांतद्विक्रमश्रि यः रोचंतेस्मप्रहृष्यंत्यारोमांचानामिवांकुराः ॥ २६ ॥ ॥ · ॥ ॥

कृतौ बाणानुसंधाय आकर्षणवक्रीकृतौ चापौयाभ्यांतौ द्रुपदविराटौ द्रुतं अनीचैः महद्भिः नाराचैः आचार्यं शल्यमृगंश्वावित्पशुंशलल्लैः तदंग रोमभिरिव बद्धतनुं व्याप्तशरीरं आतेनतुः चक्रतुः ॥७॥ प० तस्यद्रोणस्य तन्वांशरीरे अर्धमग्नाः नाराचाः प्रहर्षत्याः प्रकर्षेणहर्षप्राप्नुवत्याः तस्यविक्रमश्रियः पराक्रमलक्ष्म्याः रोमांचानां अंकुराइवरोचंतेस्म शुशुभिरे ॥ २६ ॥ ॥७॥ ॥७॥ ॥

अथ उभौ द्रोणद्रुपदौ अग्निवेश्येन ऋषिणा निक्षिप्तं स्वस्मिन् स्थापितं कोदंडविद्यायाः धनुर्वेदस्य सर्वस्वं सर्वरहस्यं प्रकाशितं प्रकटितं कुर्वाते स्म चक्रतुः उभयोर्गुरुबंधुत्वात् स्वस्मिन् गुरुणाक्षिप्तं रणकौशलं अस्त्रमंत्ररहस्यं च प्रकटीचक्रतुरित्यर्थः ॥ ३७ ॥ गद्यं ॥ ततः शरसंभवस्य कृपाचार्यस्य भगिनी कृपी जाया यस्य तस्य द्रोणस्य चाप एव चतुर्मुखः ब्रह्मा समृद्धं विपुलं यथा स्यात्तथा विश्राणितौ दत्तौ विकृतवेषौ विकृताकारौ ययोस्तयोरपि विशिखविमोचनरूपेण सृष्टिशिल्पेन अप्सरसां विलोभनीयौ विग्रहौ देहौ ययोस्तौ विलोभनीयविग्रहौ अतथा तथा संपद्यमानौ कृतौ तयोः द्रुपदविराट्योरि

अग्निवेश्येन निक्षिप्तमथोभौ द्रोणपार्षतौ कोदंडविद्यासर्वस्वं कुर्वाते स्म प्रकाशितं ॥ ३७ ॥ गद्यं ॥ ततः शरसंभवभगिनीजानेश्चापचतुर्मुखः समृद्धविश्राणितविकृतवेषयोरपि विशिखमोचनसृष्टिशिल्पेन विलोभनीयविग्रहीकृतयोर्विराट्पांचालयोरहंपूर्विकया वरणोत्सवयौगपद्ये सति विबुधपुरविलासिनीनां बिडौजः कुटुंबिन्या अपि दुःसमाधं विवादमापादयामास ॥ ८ ॥ ॥ ॥ ॥ ॥

त्यर्थः अहं पूर्वमहं पूर्वमिति भाषणरूपया अहंपूर्विकया वरणोत्सवस्य यौगपद्ये एककालत्वे सति विबुधपुरस्य विलासिनीनां अप्सरसां बिडौजसः इंद्रस्य कुटुंबिन्याः इंद्राण्याः अपि दुःसमाधं दुःखेन समाधातुमशक्यं विवादकलहं आपादयामास उत्पादयामास द्रोणशरैः मृतयोः प्राप्तदिव्यदेहयोः विराटद्रुपदयोः वरणविषये ऽप्सरसां महाकलहोऽभूदिति भावः ॥ ८ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७

अथविराटद्रुपदवधानंतरं तत्रशर्वरीचरस्य घटोत्कचस्यभुजगर्वेणनिर्वर्तिताः त्यक्ताःयेपर्वताः तेषांशृंगशिलानांविभंगैःविभंगजन्यप्रहारैःपाटितंवि
दीर्णंशरीरंयस्यास्तथाभूतेवसंध्यायाःरागमिषेणरुधिरधारांउत्सृजंतीसानिशापिविनाशदशांआशुसमाविवेशप्रापनिशागता प्रातःकालोजात
इत्यर्थः॥ ९॥ तदनुकोककुटुंबिनीनांचक्रवाकस्त्रीणांनग्नंकरणेकोकेन कोकीनग्नाक्रियतेअनेनेत्यर्थात् वस्तुत्पादके इत्यर्थः महसिसूर्यरूपेते-

अथतत्रशर्वरीचरभुजगर्वनिर्वर्तितपर्वतशृंगशिलाविभंगपाटितशरीरे वसंध्यारागमिषेणरुधिरधारामुत्सृजंती सानिशा
पिविनाशदशामाशुसमाविवेश॥ ९॥ तदनुकोककुटुंबिनीनांनग्नंकरणेमहसिसमारूढविहायसिक्रोधनिद्रानिरोध
साधारणीभवदरुणिमदृक्प्रतिफलनैरायोधनधरणीरुधिरधुनीषुपंकेरुहाण्यंकुरयंतो घटोत्कचविराटपांचालपंच
ताप्रपंचंद्वैरभारतस्यगुरोरायुर्हेतुमलिकाक्षरं परिमार्ष्टुमलीकंवचनमेकंभवताप्रयुज्यतामितिधर्मजातमनुकूलयंतो
वसुदेववासवकुमारादयःप्रथमसम्भिकृष्टस्य धृष्टद्युम्नस्यवरूथिनीविमाथिनींवारणधोरणीमन्वेता इवपयोधरपरंप
रांपुरोधायभृशंरवस्यगुणंशरवस्यपरिपूरणेन दुर्वहं कुर्वंतंकौरवसेनापतिमभिजग्मुः॥ १०॥ जसिसमारूढंविहायःआकाशो

येनतस्मिन् सतिउदितेसतीत्यर्थः क्रोधश्चनिद्रानिरोधश्चतयोःसाधारणीभवन् अरुणिमायासांतासां दृशांप्रतिफलनैःप्रतिबिंबैः रणभूमिसंबं-
धिरुधिरनदीषुकमलानि अंकुरयंतःउत्पादयंतःघटोत्कचविराटद्रुपदानांपंचतयावधेनप्रपंचनविस्तीर्णोभवन् वैरभारोयेषांतेपांभावस्तत्तात

पागुरोः द्रोणस्य आयुषः हेतुं अलिकाक्षरं ब्रह्मणा लिखितं भालाक्षरं परिमार्ष्टुं नं हंतुमित्यर्थः भवता एकं अलीकं असत्यं वचनं प्रयुज्यतां उच्यतां इति भाषणेन धर्मराजं अनुकूलयंतः कृष्णाभीमार्जुनादयः प्रथमं सन्निकृष्टस्य समीपस्थस्य धृष्टद्युम्नस्य वरूथिन्याः सेनायाः ध्विमायिनीं संहर्त्रीं वारणधोरणीं गजपरंपरां प्रचेताः वरुणः पयोधराणां मेघानां परंपरामिव पुरोधाय अग्रतः कृत्वा शंखस्य पूरणेन मुखवायुना पूरणेन खस्य गुणं शब्दं दुर्वहं दुःखेनैव

॥पद्यं॥ कोपेन तावत्कुटिलः स भीमः कुंभानभांक्षीद्गदया द्विपानां नामैकदेशोपि च कुंभयोनेरेतैर्धृतो भूदिति मत्सरीव॥ ३८॥

वोढुमशक्यं अतिमहांतमित्यर्थः कुर्वंतं कौरवसेनापतिं द्रोणं अभिजग्मुः॥१०॥ प॰ यावत् जग्मुः तावत्कोपेन कुटिलः भयंकरः सः भीमः एतैः गजैः कुंभयोनेः अस्मच्छत्रुपक्षीय द्रोणस्य नामैकदेशः कुंभः तदर्थः कटः धृतः स एव वा कुंभशब्दः कुंभि नाम्नि धृतः अभूत् शत्रुपक्षीयत्वे सति इदमपि कृतमित्यपि शब्दार्थः इति हेतोः मत्सरी सन्निव गदया गजानां कुंभान भांक्षीत् अस्फाटयत्॥ ३८॥ ॥७॥ ॥७॥ ॥७॥ ११

ग॰ तत्र तांकरिघटांगजसमूहंपाटयताभीमेनद्रोणसुतस्य अश्वत्थाम्नःसनाम्निसमाननाम्निहस्तिनिअश्वत्थामसंज्ञकगजे प्रचुरः मदःगवेःदानंचयस्य सःस्वस्यवशांकरिणींस्ववशानुजनांश्चअनुवर्ततेतच्छीलःशुभतरैःमणिभिःरत्नैःशुभतरेणमणिनाचदेदीप्यमानंमस्तकंयस्यसः अयंअश्वत्थामाहतइ तिधर्मतनयेनधर्मराजेननिगदितंकर्णयोःअरुंतुदंमर्मस्पृक्अभ्यर्णसमीपंआकर्ण्यवैवर्ण्येनभरितंवदनंयस्यतंसुतनाशशोकमोहेन अश्वत्थाममरण शोकजन्यमोहेन परित्यक्तःचापोयेनसःशयःहस्तोयस्यतंस्थंडिलेशयंयोगधारणयाप्राणान्मोक्तुंशुद्धभूमौनिषण्णंभारद्वाजंद्रोणंआलोक्यहृष्टधीः

ग॰ तत्रतांकरिघटांपाटयताघटोत्कचजनकेनद्रोणसुतस्यसनाम्निहस्तिनिनिपातितेसतिप्रचुरमदःस्ववशानुवर्तीशुभतरम णिदेदीप्यमानमस्तकोयमश्वत्थामाहतइतिधर्मतनयनिगदितंकर्णारुंतुदमभ्यर्ण माकर्ण्यवैवर्ण्यभरितवदनंसुतशोक मोहेनपरित्यक्तचापशयंस्थंडिलेशयंभारद्वाजमालोक्यहृष्टधीर्धृष्टद्युम्नोनिजपितृबंधनस्मृतिजनुषारुषासत्वरमभिहंतु मुदयुंक्त॥११॥एकेनखड्गंद्रुपदस्यसूनुःकरेणचान्येनकचंगृहीत्वा निलूयशीर्षंगुरुमप्यमुंद्रागंतेवसंतंकलयांचकार॥३९

धृष्टद्युम्नःनिजपितुःद्रुपदस्यबंधनंअर्जुनेनकारितंतस्यस्मृतेःसकाशात्जनुःउत्पत्तिर्यस्याःतयारुषाक्रोधेन सत्वरंअभिहंतुंउदयुंक्त उद्युक्तोबभू व॥११॥प॰ द्रुपदस्यसूनुःधृष्टद्युम्नःएकेनकरेण खड्गंगृहीत्वाअन्येनकरेण कचंकचान्गृहीत्वाशीर्षंविलूयछित्वागुरुमपि अमुंद्रोणंद्राक् शीघ्रंअंतेवसंतंशिष्यंमृत्यौनिष्ठंतंचकलयांचकार संपादयामास द्रोणाचार्यंजघानेत्यर्थः॥३९॥ ॥७॥ ॥७॥

तदनुसखासौतादृशश्चतत्तादृशः तंतातस्यवधंत्यक्तशस्त्रसमाधिस्थतातस्यवधंनिशम्यश्रुत्वाकोपातिरेकेणकोपाधिक्येनकलुषः क्षुब्धः कृपस्य भागिनेयःअश्वत्थामाआग्नेयंअग्निदेवताकं अस्त्रंमंत्रितशरं अमुंचत् यस्मिन् आग्नेयास्त्रे शत्रुसैनिकानां अक्षौहिणी शलभतांपतंगत्वंलभतेस्म प्राप भस्मीबभूवेत्यर्थः ॥५०॥ ततःस्फुराधीश्वरसूनुनाअर्जुनेनमुक्तंयत् ब्रम्हास्त्रं तस्यभासातेजसा भृशाधिक्कृतेन पराभूतेन गुरुनंदनस्य अश्वत्थाम्नः अस्त्रेणसह भानुः मंदायमानाद्युतिः तेजोयस्यतथाभूतः आसबभूव तदासूर्यस्तसमयेजातइत्यर्थः गतिदीप्त्याद्यर्थकस्य भ्वादेरसतेः धातूनामने-

तत्तादृशंतदनुतातवधंनिशम्यकोपातिरेककलुषःकृपभागिनेयः आग्नेयमस्त्रममुचत्परसैनिकानामक्षौहिणीशलभतां लभतेस्मयस्मिन् ५० ततःस्फुराधीश्वरसूनुमुक्तब्रम्हास्त्रभासाभृशाधिक्कृतेन अस्त्रेणसार्धंगुरुनंदनस्यमंदायमानद्युतिरासभानुः ४१ धृतराष्ट्रसूतोपिगेहमागाद्दिनदीपांकुरदीनदीनदीप्तिः शकलीकृतबाहुकर्णनासैःसहयोधैःसघटोत्कचाश्मवर्षात् ४२

॥ ॥इत्यनंतभट्टकृतौश्रीमतिचंपूभारते दशमस्तबकः संपूर्णतामगमत् ॥ ॥७॥ ॥७॥ ॥७॥

कार्थत्वात् सत्तार्थेलिटिरूपं ॥४१॥ दिनेयःदीपांकुरः अल्पदीपः तद्वत् दीनात् दीनामंदेत्यर्थः दीप्तिर्मुखकांतिर्यस्यसः दुर्योधनः घटोत्कचस्य अश्मवर्षात् पाषाणवृष्टेः शकलीकृताः शकलीभूताः त्रुटिताइत्यर्थः बाहुकर्णनासाः येषांतैः सहगेहंशिबिरं अगमत् ॥ ४२॥ ॥ १२

इतिश्रीचंपूभारतटीकायांश्रीखंडोपाव्हबाजीरावात्मजनारायणसूरिविरचितायांदशमस्तबकःसमाप्तिमगमत् ॥ ॥७॥ ॥७॥

अथ भारतचंपौ एकादशस्तबकः प्रारभ्यते ॥ श्री ॥

श्रीगणेशायनमः॥ ॥अथचंपूभारतसटीकएकादशस्तबकोलिख्यते॥ ॥अन्येद्युःद्रोणवधात्द्वितीयदिवसे अब्धौमिलितैःमिश्रितैःअसृ
गापगानांरुधिरनदीनांपूरैरिव शोणितांगेरक्तमंडले पूषणिसूर्ये उदयतिसति दुर्योधनःकर्णंसेनाधिपत्यपदव्यांसुवर्णघटवारिभिःअभ्यषिंचत्
॥१॥ अभिषेककाले तस्यकर्णस्य उपरिष्टात् ऊर्ध्वभागे तपनीयकुंभःसुवर्णघटःआत्मप्रभवस्यपुत्रस्यकर्णस्यउत्तमांगंमस्तकंआघ्रातुंस्नेहादव
घ्राणंकर्तुंसमीपमागतस्य सरोजबंधोःसूर्यस्य आभां शोभां अतानीत् उत्पादयामास॥२॥ अथकर्णःदिङ्मूलेषुस्थितानां शैलानांकुहरेशयाःगुहा

अन्येद्युरब्धिमिलितैरसृगापगानांपूरैरिवोदयतिपूषणिशोणितांगे सेनाधिपत्यसरणौधृतराष्ट्रसूनुःकर्णंसुवर्णघ
टवारिभिरभ्यषिंचत् १ आभामतानीदभिषेककालेतस्योपरिष्टात्तपनीयकुंभः आघ्रातुमात्मप्रभवोत्तमांगंसमीपयात
स्यसरोजबंधोः २ दिङ्मूलशैलकुहरेशयकेसरींद्रसौख्यप्रसुप्तिकमहापटहारवेण कर्णोबलेनकरनर्तितकालपृष्ठोज
न्यस्थलीमभिरथेनजवाज्जगाहे ३ तावत्परेषांध्वजिनीश्वरोपिपदंव्यधत्तप्रधनप्रदेशे परिस्फुरत्पट्टिशखेटशक्तिशरास
तूणीरशूरैर्बलौघैः ४

स्थिताःयेकेसरींद्राःसिंहाःतेषांसौख्यप्रसुप्तिकःसुखप्रसुप्तंपृच्छतितथाभूतःदिगंतस्थितशैलगुहासुप्तसिंह
प्रबोधकारीत्यर्थःमहान्पटहारवोभेरीशब्दोयस्यतेन बलेनसैन्येनसहकरेनर्तितंकालपृष्ठंएतन्नामकंस्वधनुर्येनतथाभूतःसन्रथेनजवात्जन्य
स्थलींयुद्धभूमिंजगाहेप्रविवेश॥३॥ यावत्कर्णःप्रविशतितावत्परेषांपांडवानांसेनापतिर्धृष्टद्युम्नोपिपरिस्फुरंतःदेदीप्यमानाःपट्टिशादयःशस्त्राणि १

येषांतैः बलौघैःसेनासमूहैःसहप्रधनदेशेरणांगणेपदंचरणंव्यधत्तस्थापयामासतत्रजगामेत्यर्थः॥४॥तदनुप्रगल्भासाचम्वोःहूयीव्योम्निप्रसृत्वरैःप्रसरणशीलैःपांसुपुंजैःकृत्वाप्रागेवआदावेवशुध्यांनिष्यापामपिसिंधुसिंधुंमंदाकिनीं अप्रापांपापरहितांव्यतनोत् चकार एतत् चित्रं अप गताःआपोयस्याःसा अपापातामित्यर्थांतरेणोक्तिसंभवःअप् शब्दात् ऋक्पूरित्यनेनसमासांतःअप्रत्ययः ततश्चापू पांसुपुंजैःजलशोषणात् अपगतजलांचक्रे इतिभावः॥५॥ आदौतावत्सैन्यस्यसाधारणयुद्धमाह पादातमिति पादातं पत्तिवृंदं पादातंद्राक् अभिदुद्राव योद्धुंअभिमुखं

चमूहूयीसातदनुप्रगल्भाप्रसृत्वरैर्व्योमनिपांसुपुंजैः प्रागेवशुद्धामपिसिन्धुसिंधुर्विचित्रमेतद्व्यतनोदपापां॥५॥
पादातंपादातंरथ्यांरथ्यान्वहस्तिकंगजता आश्वंचाश्वीयंद्रागभिदुद्रावप्रकंपितमहीकं॥६॥विरोधिसेनाम
भिवीक्ष्यकोपाद्विस्फारिताज्ञानुस्कृतेनचापात् विजृंभमाणंतरसागुणंस्वंवियत्समस्तंनशशाकवोढुं॥७

जगाम एतत्क्रियायाउत्तरत्राप्यन्वयः रथ्यारथसंहतिःरथ्यां गजतागजसंहतिः हास्तिकं गजवृंदं आश्वं अश्ववृंदं आश्वीयं अभिदुद्रावप्रकं पितामहीयेनतत् इदंविशेषणं लिंगविपरिणामेन सर्वेषांयोज्यं ॥ ६॥ भानुस्कृतेनशत्रुसेनां अभिवीक्ष्य कोपात् विस्फूर्जितात् ज्यायाःआकर्षणमोचनाभ्यां शब्दीकृतात् चापात् तरसाबलेनविजृंभमाणं वृत्तिंप्राप्नुवंतंस्वगुणंशब्दंसमस्तं वियत् वोढुंस्वोपरि धर्तुं नशशाकनसमर्थं बभूव धनुषोगुणटणत्कारशब्देनातीवाकाशंव्याप्तमभूदितिभावः॥७॥ ॥५॥ ॥५॥ ॥५॥

कुरुचमूपतेः कर्णस्यबाणैः विदारितात्करिमस्तकात् मणयः मौक्तिकानिउदपतन् उदडीयंत तदुडु पनमुत्प्रेक्षते क्तेति क्तेनं कर्णेनविदारितं
विदीर्णं यन्निजास्पदं स्वस्थानंमस्तकं तस्यदुर्दशांतत्पित्रे द्युमणये सूर्यायविनिवेदयितुं किल कथयितुमिवेति फलोत्प्रेक्षा ॥ ८ ॥ अस्यक
र्णस्य बाणैःअनेकधाबहुधा दत्ताभिदाभेदोयस्याःसा अरातीनां शत्रूणांखेटावलिः शस्त्रप्रहाररक्षकचर्मावलिः भीव्रीडस्वेदानांभयलज्जा-

कुरुचमूपतिबाणविदारितादुदपतन्मणयःकरिमस्तकात् क्तवितीर्णनिजास्पददुर्दशांद्युमणयेविनिवेद
यितुंकिल ८अनेकधादत्तभिदास्यबाणैररातिखेटावलिराबभासे भीव्रीडखेदावकराद्गृहीतुंपृथक्कृतयासूम्यमचा
लनीव ९तदनुबाणगणैर्द्युमणेःक्तोधृतविपत्तिसपत्तिकदंबकं अतिविषादिनिषादिकुलंव्यधाद्यमपुरीपथिकान्रथिकानपि
१०

दुःखानां अवकरात् संकरात् पृथक्कृतया असून् गृहीतुं यमस्यचालिनीव बभासे अन्योपि धान्यसारांशं गृहीतुं चालिनीं उपादत्ते ॥ ९ ॥ तद
नुसः द्युमणेःक्तः कर्णः बाणगणैः पत्तिकदंबकं धृताविपत्तिर्येन तथाभूतं व्यधात् चकार निषादिनां हस्तिपकानां कुलंवृंदं अतिविषादि अ
तिदुःखितं व्यधात् रथिकानपियमपुर्याः पथिकान् पांथान् व्यधात् एतान्जघानेतिभावः ॥ १० ॥ ॥७॥ ॥७॥

कर्णेन हृतेषु भटेषु मध्ये अग्रेसरः अग्रगामी रविमंडलं भित्वा स्वर्गगमनसमये रविरंध्रमार्गं रविमंडलबिलमार्गं प्रविष्टः कश्चित् भटः निलिंपजातस्य देवसमूहस्य स्तुत्या पुष्टदेहः देवकृतस्तुतिजन्यपुष्टियुक्तदेहः सन् किंचिदपि उच्चैः ऊर्ध्वदेशे बहिर्निर्गंतुं नेष्टे न समर्थो बभूव अत्राद्भुतार्थवर्णनेनाद्भुतरसः ॥ ११ ॥ अमर्यः अप्सरसः पुष्पप्रदानेन सुरद्रुवर्गे कल्पवृक्षसमूहे श्रांते सति प्रथमं वृतानां अभिनवभटजन्यानां स्त्रीणां मालां कंठात् हृटेन बलात्कारेण अपहृत्य तन्मालया अभ्यग्रसुरान् नूतनसुरान् अवृण्वत अनयोक्त्या कर्णेन बहवो महावीराभटा हता इति व्यज्यते ॥ १२ ॥ सचासी-

अग्रेसरः कर्णहतेषु कश्चिद्भटः प्रविष्टो रविरंध्रमार्गं निलिंपचाटुस्तुतिपुष्टदेहो निर्गंतुमीष्टे न च किंचिदुच्चैः ११ पुष्पप्रदानेन सुरद्रुवर्गे श्रांते मराणां प्रथमं वृतानां हठेन कंठादपहृत्य मालामवृण्वताभ्यग्रसुरानमर्यः १२ ततादृशां तरणिभूभुजचंडिमानं संवीक्ष्य सर्ववैरिपुदृक्षु च भीतिभाक्षु आसीत् प्रमोदपरिमेदुरमेकमेव सव्येतरं रणतले वनमालिनेत्रं ॥ १२ ॥ ॥

तादृशाश्च ते तादृशः तं निरूपयितुमशक्यमित्यर्थः तरणिभुवः कर्णस्य भुजयोः चंडिमानं पराक्रमातिशयं संवीक्ष्य सर्ववैरिपूणां दृक्षु दृष्टिषु भीतिभाक्षु भयेन निर्मीलितासु सतीषु रणतले युद्धभूमौ एकमेव वामेतरत् दक्षिणं वनमालिनः कृष्णस्य नेत्रं प्रमोदेन हर्षेण परिमेदुरं सर्वतो व्याप्तं आसीत् कर्णपराक्रमं दृष्ट्वा पांडवपक्षीयाणां नेत्रेषु भयेन निमीलितेषु सत्सु कृष्णस्य दक्षिणं नेत्रं हर्षेण प्रफुल्लमासीत् इति चमत्कारः कृष्णस्य यद्यप्युत्वा दक्षिणनेत्रस्य सूर्यत्वात् कर्णस्य तत्सुतत्वान्तत्पराक्रमदर्शनजन्यहर्षेण कृष्णनेत्रस्य विकसत्वमिति भावः ॥ १२ ॥ ॥ ७ ॥ ॥ ७ ॥

वीरस्य तस्य कर्णस्य मूर्ध्नि मुक्तासुक्ता अर्थात् पुष्पाणीति कर्मज्ञेयं अभ्रे आकाशे सिद्धगंधर्वाः मुख्या यस्मिन् तस्मिन् द्योसदां देवानां गोष्ठिमध्ये स
भाव मध्ये पुष्पैरिक्तैः रहितेसति द्वावेव पूषाचंद्रौ सूर्यचंद्रमसौ पुष्पवंतौ अभूतां एकयोक्त्या पुष्पवंतौ दिवाकरनिशाकरावित्यमरः एकशब्देन सूर्यचं
द्रमसो ग्रहणे पुष्पवच्छब्दः प्रयोक्तव्य इत्यर्थः तस्यात्र श्लेषेण ग्रहणं॥१४॥ अब्जबंधुः सूर्यः कर्णस्य कठोरैः विशिखैः वियत्मदेशात् दूरं अस्ताचलं दु

रिक्तेपुष्पैः सिद्धगंधर्वमुख्ये मुक्तासुक्ता मूर्ध्नि वीरस्य तस्य द्वावेवाभ्रे द्योसदां गोष्ठिमध्ये पूषाचंद्रौ पुष्पवंतावभूतां १४
वियत्प्रदेशाद्विशिखैः कठोरैर्दुद्राव दूरं भुवमब्जबंधुः अमुष्य नोचेदचिराद्भजेरन्पादाः कथं पाटलिमातिरेकं॥ १५॥
तरणेः किरणैस्तदारुणानां पटलैर्व्योम्नि पयोमुचां बभासे चिरकालबुभुक्षितैः पिशाचैरधिकं मांसमिवाहवादुपात्तं॥१६॥

द्राव भुवमित्युत्प्रेक्षा इदमुक्तं नो चेदेवं न
हि अमुष्य सूर्यस्य पादाः चरणाः किरणाश्च अचिरात् शीघ्रं पाटलिम्नः अरुणतायाः अतिरेकं बाहुल्यं कथं भजेरन् प्राप्नुयुः अन्यस्यापि दूरदेशाधाव
नेन पादयोररुणिमोत्पद्यते तदानीं सूर्योस्तंगत इति भावः १५॥ तदा सूर्यास्तसमये व्योम्नि तरणेः अरुणानां आरक्तानां पयोमुचां पटलैः वृंदैः पिशा २
चैः चिरकालं या बुभुक्षा भोक्तुमिच्छा तया अधिकं आहवात् युद्धभूमेः सकाशात् उपात्तं मांसमिव बभासे भातिस्म॥ १६॥ ॥७॥ ॥७

अथदिनस्यविरतौ अवरोपितज्यं शिथिलीकृतगुणंकर्णस्यकार्मुकं हरिदंतरे दिगंतरे भयात् द्रवतां धावतां अराति धरणीभुजां शत्रुनृपाणां वि-
लोकनायेव विनम्रतां जिह्मोउन्नतं बभूवेत्यर्थः अन्योपि दूरस्थितजनदर्शनायोत्थायोन्नतो भवति ॥ १७॥ नम्रा आसानूतनशराणां क्षतिः व्रणोयेषांतैः-
स्वसैन्यैः असंदाभिः निमेषोन्मेषरहिताभिः दृष्टिभिः अनुक्षणं क्षणेक्षणे ईक्ष्यमाणः दृष्टः सः भानुसुतः दुर्योधनस्य अग्रकरेण कराग्रेण संवलि

अवरोपितज्यमथकर्णकार्मुकंविरतोदिनस्यविजिह्मोविनम्रतां अवलोकनायहरिदंतरेभया द्रवतामरातिधरणीभुजामिव १७ अथास
नूतनशरक्षतिभिःस्वसैन्यैरस्पंददृष्टिभिरनुक्षणमीक्ष्यमाणः दुर्योधनायकरसंवलितांगुलीकःप्राविक्षदात्मकटकंसतुभानुसूनुः १८ ग०
अपरेद्युर्विपरिस्फुरत्कमलचक्रव्यूहेप्रकाशमानपत्रिकुलसंचारप्रकटितधनंजयतेजोवर्धनेभाविनिप्रधनइवप्रभातसमयेप्रादुर्भवति
सतिमधुमथनसारथेर्मघवत्कुमारस्यवधकृतेशल्यसारथ्यमेवसाधनमवधारयताराधेयेनकृतबोधनःसुयोधनोमानधनमाजम
द्रराजमुपगम्यस्वागमननिदानपरिज्ञानेनविमनायमानमपितंतैस्तैर्मधुरस्वचनैर्वचनैःकोपगिरेरधित्यकाप्रदेशात्कथंचिदवरोप्यक
र्णरथनेपथ्यंसारथ्यमधिरोपयामास ॥१॥ नाः धृताः अंगुल्योयस्यतथाभूतःसन् आत्मनःकटकंसैन्यनिवासस्थानंप्राविक्षत् प्रविवेश कर्णस्त

दिने जयंप्राप्य स्ववासभूमिंजगामेतिभावः ॥१८॥ ग० अपरेद्युः कर्णस्यद्वितीयदिवसे परिस्फुरन् कमलचक्राकारः व्यूहः सेनारचनायस्मिन् अन्यत्रपरि
स्फुरंतोकमलानांचक्राणांचक्रवाकानां व्यूहः समूहो यस्मिन् प्रकाशमानः पत्रिकुलानां बाणसमूहानां अन्यत्र पक्षिसमूहानां संचारः गमनं यस्मिन्प्रक

टितं धनंजयस्य अर्जुनस्यतेजोवर्धनंपराक्रमवृद्धिर्यस्मिन् अन्यत्रमकटितं धनंजयस्य अग्नेः तेजोवर्धनं तेजोहानिर्यस्मिन् तस्मिन् मार्तंडनिप्रभेनेसंग्रा
मे इव प्रभातसमये प्रादुर्भवतिसतिमधुमथनः सारथिर्यस्यतस्य मघवत् कुमारस्य अर्जुनस्यवधकृते शल्यस्यसारथ्यमेवसाधनं अवधारयतानिश्चित्य
नामधेयेनकर्णेनकृतंबोधनंज्ञापनंयस्यसः सुयोधनः मानएवधनं मजतिरक्षति तंमद्रराजं शल्यंउपगम्य तदावासंगत्वा स्वस्य आत्मनः आगमनस्य
यत् निदानंकर्णसारथ्येप्रवर्तनरूपंआदिकारणंतस्यपरिज्ञानेन विमनायमानमपिअन्यस्यसारथ्यकरणंस्वस्यलघुत्वदायकमितिमनस्यानीयदुर्मनाय

॥पद्यं॥ अथमद्रनायकनिबद्धसैंधवंरथमारुरोहरविभूःपरा
क्रमी प्रमदस्फुरत्कौरवचमूवरान् क्षणा दतिसाध्वसंचपरयोधमंडलं १९

मानमपितंशल्यंतैस्तैः मधुरारचनायेषांतैःत्वयासारथ्यंकृतंचेत्तर्हि भीष्मद्रोणादिभिः यत्कार्यंनकृतंतत्त्वयैवकृतंभवेदित्यादिभिर्वचनैः कोपगिरेः स्वस्य
लघुकार्यकथनेनयः क्रोधपर्वतःप्राप्तः तस्य अधित्यकाप्रदेशात् ऊर्ध्वभागात् कथंचित् महायासेन अवरोप्य अधोभागमानीयगतक्रोधंकृतेत्यर्थः कर्णर
यस्येनपथ्यंसज्जीकरणंयस्मिन्तत् सारथ्यंप्रतिअधिरोपयामास सारथ्येप्रवर्तयामासेत्यर्थः ॥१॥ प॰ अथपराक्रमीकर्णः क्षणात् मद्रनायकेननिबद्धाःसैंधवाः अ ४
श्वायस्यतंआरुरोहप्रमदःहर्षःकौरवचमूवरान् आरुरोहप्रापेत्यर्थः अतिसाध्वसंअतिभयंपरयोधमंडलंपांडवसेनासमूहं आरुरोह ॥१९॥ ॥७॥

ततः एषः वीरः कर्णः तेन रथेन क्षणादेव संग्राम सीमान उपेत्य आगत्य शंखं तस्य शंखस्य अंत्याक्षरं खं तस्य वाच्यं अर्थं आकाशं च इत्येतत् द्वयं निनादैः अपुपूरत् पूर्णमकरोत् बहुलमेतन्निदर्शनमिति चुरादावुक्तत्वात् अदंत पूर् धातोर्णाव ग्लोपित्वात् सन्वद्भावाभावेनाभ्यासस्य दीर्घाभावः ॥२०॥ ग॰ तदनंतरं प्रचंडतरो अतिपराक्रमशालिनो दोर्दंडौ भुजदंडौ यस्य सः चंडकरसूनुः कर्णः निजयंतारं स्वसारथिं प्रति इत्थं वक्ष्यमाणं वचनं उत्थापयामास उवाचेत्यर्थः ॥१॥ अयि शल्य इदानीं तव सारथ्य कौशल्यं निशम्य दृष्ट्वा विजयसारथेः कृष्णस्य वदनं लज्जापयोधौ सह मज्जन कृतेनाभिकमलेवासस्य

ततः क्षणादेव रथेन तेन संग्राम सीमानमुपेत्य वीरः शंखं च तदंत्याक्षर वाच्यमेतद्द्वयं निनादैरपुपूरदेषः ॥ २० ॥

॥ गद्यं ॥ तदनंतरं ॥ प्रचंडतर दोर्दंडश्चंडकरसूनुर्निजयंतारं मद्रनेतारं प्रतिवचनमित्थमुत्थापयामास ॥ २ ॥

इदानीमयि शल्य तव सारथ्य कौशल्यं निशम्य विजयसारथेर्वदनं लज्जापयोधौ सह मज्जन कृतेनाभिकमल वास्तव्यस्य नयनायुध सारथेश्चत्वार्यपि मुखानि समाह्वयितुमिव भृशमवनतमास्ते ॥ ३ ॥ स्य वासकर्तुः नयनमेव नृतीयनेत्रमेव आयुधं स्मरादि शत्रुनाशकं यस्य तस्य शिवस्य सारथेः ब्रह्मणः चत्वार्यपि मुखानि समाह्वातुमिव आह्वानं कर्तुमिव भृशं अवनतं नम्रं आस्ते यत् लज्जा यानसंजातं मुखं तत् स्वनाभिकमलस्थित ब्रह्मणः मुखानि समाह्वातुं किमित्युत्प्रेक्षा अन्योपि भीरुः समुद्रमज्जनार्थमन्यं सहायमाह्वयति अत्र समाह्वयितुमिति पाठे आङ् पूर्वात् ह्वयतेर्भावे घञर्थे कविधानमिति कप्रत्यये आह्वानं आह्वः तं करोतीति णिजंतात्तुमुनि आह्वयितुमिति सिद्धं भवति ॥ ३ ॥

अपिन्नपद्यं॥ एषःभुजःमरुतां देवानां वायूनां च कदंबैः समूहैः उपलाल्यमानं सेव्यमानं दृप्तिं नीयमानं च तीव्रं अखिलं हेतीनां शस्त्राणां ज्वालानां च-
जालं समूहो यस्य तं धनंजयं अर्जुनं अग्निं च शराणां बाणानां जलानां च वर्षेण क्षणात् इंगालयेत् शांतांगार रूपं कुर्यात्॥ २१॥ गद्यं॥ ततः तां पूर्वोक्तां
श्रवणपुटयोः क्रकचं काष्ठकर्तनकारी करपत्रतुल्यां वाचं आकर्ण्य पार्थेन युधिष्ठिरेण पुरा युद्धस्यादौ पांडवसहायार्थमागमनसमये मार्गे आतिथ्य
करणात् दुर्योधनाय तव सहाय्यं करिष्यामीति दत्तवरं शल्यं प्रति कर्णसारथ्यं कुर्वीति दुर्योधनवचनानुरोधेन कर्णसारथ्यकृतत्वं निंदावचनैः तस्य तेजो

अपिच॥ पद्यं॥ मरुत्कदंबैरुपलाल्यमानं महेद्धदीप्ताखिलहेतिजालं शराभिवर्षेण धनंजयं तमिंगालयेदे-
षभुजः क्षणेन॥ २१॥ गद्यं॥ ततस्तां श्रवणपुटक्रकचं वाचमाकर्ण्य पार्थेन पुरा प्रार्थितमर्थं हृदि कृत्य समद्रभूपतिर
वार्यसूर्यस्कतधैर्यगगनकुसुमसोदर्यं विधातुमेवमुत्तरमुत्तरयामास॥ ४॥ पद्यं॥ पुरा विराटस्य पुरोपकंठे
रणांगणे सारथिनार्जुनस्य॥ उत्पाद्यमानेपि रयेण नेत्रे निद्रा कथं ते हृदयंगमासीत्॥ २२॥ हानिं कुर्विति प्रार्थितं अर्थ-

हृदि कृत्य मनसि कृत्वा सः मद्रभूपतिः अवार्यसत् सूर्यस्कतस्य धैर्यं गगनकुसुमस्य सोदर्यं विधातुं धैर्यध्वंसं कर्तुमित्यर्थः एवं वक्ष्यमाणं उत्तरं उत्तरयामास मु
खात् बहिर्निष्कासयामास उवाचेति यावत्॥ ४॥ पुरा उत्तरगोग्रहणसमये विराटस्य पुरोपकंठे पुरसमीपे रणांगणे अर्जुनस्य सारथिना उत्तरेण रयेण वेगेन नेत्रे वस्त्रेन
यनेच उत्पाद्यमानेपि आकृष्य गृह्यमाणेपि बहिर्निष्कास्यमानेपि च निद्रा प्रस्वापनास्त्रजन्यनिद्रा कथं केन प्रकारेण ते तव हृदयंगमना प्रिया आसीत्॥ २२॥ ॥६॥ ५

पूर्वंसुराणांवांशिकेनवेणुवादनशिल्पकृतागंधर्वेणवनसीम्निनेतवसुहृदिमित्रेदुर्योधनेआयासलेशेनरहितयथातयासंदानितबद्धेसतिकुत्रापिनिकुंज-
लतावेष्टितस्थानेगूढागुप्तावसतिःस्थितिर्यस्यसःत्वंसविधेसमीपेयःकीचकःवेणुविशेषःतस्यरंध्रंछिद्रंतस्यगानात्वायुपूरणजन्यनादात्नाबिभेःकिंनभीतोऽसिकिंअ
पितुभीतोभूरित्यर्थःवंशवादनात्अत्रापिगंधर्वआगतःकिमितिशंकयाभीतोभूरितिभावः॥२३॥पांचालिकायाःद्रौपद्याःपरिणीतिकालेविवाहसमयेसंघीभवद्भिःए
कत्रमिलद्भिःधार्तराष्ट्रैःदुर्योधनादिभिःसहभवान्त्वंकर्णोपिभूत्वापार्थशरप्रयोगात्आत्तःगृहीतःगंधोगंधगुणोयेनतथाभूतःकथमभूत्कर्णोद्रव्यस्यगंधग्रहणशक्तिर्नास्ति

आयासलेशरहितंवनसीम्निपूर्वंसंदानितेसुहृदितेसुर वांशिकेन कुत्रापिगूढवसतिस्त्वमहोनिकुंजेकिंनाबिभेःसवि
धकीचकरंध्रगानात् २३ पांचालिकायाःपरिणीतिकालेसंघीभवद्भिःसहधार्तराष्ट्रैः भवानभूत्पार्थशरप्रयोगात्कर्णोपि
भूत्वाकथमात्तगंधः॥२४॥ इंद्रात्मजातेनसतेनगंतुमीष्टेतुलामीश्वरएकएव तृणायमत्वानिजजीवितंयोयुत्था
ययेनस्पृहयन्नुदस्थात् ॥२५॥ ॥ ॥ ॥ ॥

नितत्कथंजातमितिप्रश्नःकर्णोपिसन्कर्णनामामहावीरोपिसन्त्वंअर्जुनात्आत्तगंधःपराभूतःकथंजातइत्यर्थांतरं॥२४॥एकएवसःईश्वरःशिवःते
नइंद्रात्मजातेनअर्जुनेनसहतुलांसाम्यंगंतुंप्राप्तुंईष्टेसमर्थोभवतियतःयःअर्जुनःनिजजीवितंतृणायमत्वातृणतुल्यंमत्वायेनशिवेनसहयुत्थाययुद्धंक
र्तुंउदस्थात्सन्नद्धोभूत्अनेनार्जुनपराक्रमस्याभयदत्वंद्योत्यते॥२५॥ ॥७॥ ॥७॥ ॥७॥

 ॥स॰॥इतिवचनेन तस्यशल्यस्यतादृक्षंतादृशं अभिशापितं रूमु क्षकुमारे अर्जुने पक्षपातंसमीक्ष्यज्ञात्वा कर्मसाक्षिनंदनोपिपूर्वपुरः कर्णोपिपरो
क्ष्येणपारुष्येण वर्ज्यरहितंपदविभागानांचमत्कृत्यारूमगंभावुकंकल्याणं वचनं एवं वक्ष्यमाणं अभाणीत्॥ ५॥पद्यं॥अयिभागिनेयानांपांडवानांया
नियशांसि तेषां अरूभगानि रूभगानि मनोहराणि क्रियंतेयेनसः रूभगंकरणः तत्संबुद्धौ हेमद्रपते अद्यभुविममभातुलकेनापिमातुलय हेमातुर्भ्रा-
तश्चइतिबहुधात्वांप्रतिवदताविजयेन अर्जुनेनशंभुमपि मातुलय मासमीकुरु अर्जुनस्यमादृशेनसादृश्यंनास्तिकुतःपुनः शंभुनेतिभावः॥२६॥ इतिउक्त

ग॰इतितस्यमद्राध्यक्षस्यतादृक्षमृमुक्षकुमारेपक्षपातंसमीक्ष्यकर्मसाक्षिनंदनोपिरोक्ष्यवर्ज्यपदविभागचमत्कृतिरूभगभा
वुकंवचनमेवमभाणीत्॥५॥प॰अयिभागिनेययशांसिरूभगंकरणत्वमद्यभुविमद्रपते ममभातुलेतिबहुधावदताविजये
नशंभुमपिमातुलय २६ इत्युक्तवतएतस्यसौरेर्दंतपटाविव जवादुभावनीकौतौजघटातेपरस्परं॥२७ सर्वतोपिभुविसैन्यपरा
गैःशोषितेषुसजलेषुसरस्सु केवलंगगनएवतदानीमप्सरःकुलमदृश्यतलोकैः॥ २८॥ ॥ ॥

वतः एतस्यसौरेः कर्णस्यदंतपटाविव तूष्णींभावधारणात् ओष्ठाविवउभौतौ अनीकौसैन्ये परस्परं जवात् जघटाते युद्धार्थंमिमिलतुः॥ २७॥भुवि
सर्वतोपिसर्वस्मिन्देशेपि सर्वशब्दात् सार्वविभक्तिकस्तसिः सजलेषु सरस्सु सैन्ययोः परागैः धूलिभिः शोषितेषुसत्सु तदानीं गगने एवकेवलं
अप्सरसां कुलं वरकपुष्पसरोवराणांवृंदं देवांगनानांसमूहश्च लोकैः अदृश्यत॥ २८॥ ॥७॥ ॥७॥

तदनु तत्र रणांगणे तयोः सेनयोः भयानकं भयंकरं समीकं युद्धं अभूत् कीदृशं युद्धं सकलसरजनानां यानि तनूरुहाणि लोमानि तेषां सरवशायन पृच्छति तत् सैसवशायनिकं तनूरुहाणां सरवशायन प्रश्नकर्तृस्फुराणां रोमांचोत्पादकमिति यावत् ये पदार्थैः समीकस्य भयानकत्वं तानाह परस्परेति परस्परं घाघ

॥गद्यं॥ तदनु तत्र तयोः सेनयोरुभयोरपि परस्परघट्टनजनितस्फुलिंगध्यानेननिपीनपूर्वानृरुधिरशीकरनिकरानजीर्ण शांकयावमंतीभिरिव पदृशावल्लरीभिश्च कबंधोत्पतन सृष्टिपाटवमपि संग्रामदेशिकसदेशादभ्यासितुमवनीनलमवतीर्णैः पयोधरपटलैरिव खेटकवलयैश्च युगपदेव बहुविधवीरयोधजनप्रवेशसौकर्याय तरणिरंध्रसरणिमतिविशालयितुमिव वियन्त लेदूरंदूरमुच्चलिताभिः शक्तिभिश्च प्रतिक्षणक्षपितविपक्षकुलवृत्तान मुहुर्मुहुरटनीमुखेन कथयितुमिव धानुष्ककर्णाभ्यर्णमभ्यागतैः कोदंडदंडैश्च विचित्र तरचक्रचंक्रमणमिषेण पदात्सदर्पापनगतव्यमितिविमतनिरोधकुंडलनामिव कुर्वद्भिरंघ्रिभिश्च यु द्धविलोकनबद्धकौतुकसिद्धयौवनकुचमंडलनिजकुंभतारतम्यपरीक्षिषयेव दूरंदूरं नभसि नक्तानभ्रविसारपाङ्गैः शुंडालमंडलै श्च वेगसंभ्रमसंविदार्यमाणधरणीरंध्रनिर्गत्वर फणीन्द्र फणासहस्रमणिकिरणधोरणीमसृणितैरिव शोणितपंकशोणैश्च स्कंधो डङ्गिः शतांगैश्च भयानकं सकलसरजनतनूरुहसैरवशायनिकं समीकमभूत् ॥९॥ घट्टनेन घर्षणेन जनिताः ये स्फुलिंगाः तेषां ध्यानेन निपी नपूर्वाः पूर्वनिपीताः ये रुधिराणां शीकरनिकराः बिंदुसमूहाः तान् अजीर्णशंकयावमंतीभिरिव पदृशावल्लरीभि

भपतोधाराः सरलाः खड्गाः तेषल्लर्यः लताइवताभिः कबंधानां छिन्नशिरस्कभटानां जलानां च उत्पतनस्य उड्डुयनस्य सृष्टिपाटवं सृष्टिकौशलंमपि
संग्राम एव देशिकः गुरुः तस्य संदेशात् सकाशात् अभ्यसितुं अवर्नानलं अवतीर्णैः पयोधरपटलैरिव मेघसमूहैरिव खेटकाभिधफलपानीवैतैश्च युगप
देव बहुविधाः येवीरयोधनाः तेषां प्रवेशस्य सौकर्याय सुकरत्वाय तरणेः सूर्यमंडलस्य रंध्रसरणिं बिलमार्गं अतिविशालयितुं अतिविशालं कर्तु-
मिव वियत्तले दूरात् दूरं अतिदूरं उच्चलिताभिः ऊर्ध्वीकृताभिः शक्तिभिः अल्पकुंताकारशस्त्रैश्च प्रतिक्षणं क्षपितानि यानि विपक्षकुलानि शत्रुवृं
दानि तेषां वृत्तांतं मुहुर्मुहुः अटनिः धनुष्कोटिरेव मुखं तेन कथयितुमिव धानुष्कस्य धनुर्धारिणः कर्णाभ्यर्णं कर्णसमीपभागं उपगतैः आकर्षणेन
सामीप्यं प्राप्तैः कोदंडदंडैश्च अतिविचित्रतराः ये चक्रचंक्रमाः मंडलाकारगतयः तेषां मिषेण पदात्पदमपि न गंतव्यमिति विमतान् शत्रून् प्रति निरोध
कुंडलनामिव रोधस्य कुंडलाकारमर्यादामिव कुर्वद्भिः अर्वद्भिः अश्वैश्च पुन्धस्य अवलोकने बद्धं धृतं कौतुकं येन तत् सित्थानां देवानां यौवतं युव
तीवृंदं तस्य कुचमंडलस्य निजकुंभयोश्च तारतम्यस्य पृथुत्वमनोहरत्वादिगुणानां न्यूनाधिकतायाः परिचिक्षिषयेव परीक्षितुमिच्छयेव दूरं दूरं अ
तिदूरं वियति करान् शुंडादंडान् प्रसारयद्भिः शुंडालमंडलैः गजवृंदैश्च वेगस्य संभ्रमेण त्वरया विदीर्णमाणायाः धरण्याः रंध्रेभ्यः छिद्रेभ्यः नि
र्गत्वरी बहिर्निर्गमनशीला फणिनां नागानां फणासहस्रस्य मणिकिरणानां धोरणीपरंपरा तया मसृणितैः व्याप्तैरिव शोणितपंकेन शोणैः र
क्तैः चक्रैः कृत्वा संक्रीडद्भिः इतस्ततो गच्छद्भिः शतांगैः रथैश्च एवं चोक्तविधैरनंतैः शस्त्रैः चतुरंगसैन्यैश्च भयानकमित्यर्थः ॥ ६ ॥ ॥

प० नयनयोः जृंभितः वृध्दः यः कोपवह्निः तस्माद्भीत्येव ऊर्ध्वउपरिभागं भालतलं उपाश्रिताभ्यां भ्रूभ्यां भयानकं मुखं यस्य सः यः दुःशासनः रिपवश्च ते भूमिपाः भूमिपानकर्तारः तानपि धर्षयितुं धयान् पानकर्तॄन् कारयितुं आरब्ध आरभत कृतपानानपि पुनः पानं कारयितुं आरभत यच्छब्दस्य सइत्युत्तरस्येन श्लोकेन संबंधः पिष्टस्य पुनः पेषणारंभ इव व्यर्थतया एतदतीव चित्रं रिपुभूमिपालानपि योधयितुं युद्धं कारयितुं आरभतेति चित्रपरिहारः २९ कुंतललालयति आदरेण गृह्णाति यः सः स्वस्य सिंहनादं कृत्वा अंबरं धूतो आकाशकंपने धुर्यः धुरंधरः दुरापः दुर्धर्षः सः दुःशासनः सोमकेषु धृष्ट

॥तदनंतरं॥ प० दुःशासनो नयनजृंभितकोपवह्निभीत्येव फालतलमूर्ध्वमुपाश्रिताभ्यां भ्रूभ्यां भयानकमुखो रिपुभूमिपान्प्यारब्ध योधयितुमेतदतीवचित्रं ॥ २९॥ सकुंतलाल्यंबरधूतिधुर्यः स्वसिंहनादैर्विदधे दुरापः परोभवं सोमकलास्यहेतौ पांचालिकायामिव पार्थचम्वां ॥ ३०॥ ॥ ॥

द्युम्नसैनिकेषु लास्यं नर्तनं यासां ताः हेतयः शस्त्राणि यस्यां तस्यां पार्थचम्वां पांचालिकायामिव द्रौपद्यामिव पराभवं विदधे चक्रे पांचालिकापक्षे कुंतलानां केशानां आलिः समूहः अंबराणि वस्त्राणि च तेषां धूतिः आकर्षणं तस्यां धुर्यः धुरंधरः सः सोमस्य चंद्रस्य कला आस्ये मुखे हेतुः कारणं यस्याः ब्रह्मणा चंद्रकलाभिर्यस्याः मुखं निर्मितमिति भावः तथा च नैषधः हृतसारमिवेंदुमंडलं दमयंतीवदनाय वेधसेति तस्यां पांचालिकायां यथा पराभवं चक्रे तथेत्यर्थः॥ ३०॥

॥गद्यं॥ ततः याज्ञसेन्याः द्रौपद्याः कटितटस्य पटानां वस्त्राणां हरणसमये यत् चक्रचंक्रमणं तस्याः परितः चक्राकारभ्रमणं तस्य वासनासंस्कारः तस्य अनुवर्तनवशात् विविधानि चक्रमंडलानि मंडलाकारभ्रमणानि वितन्वन् कुर्वन् निजं आस्पदं हृदयस्थानं तस्य भेदकः भीमः क्व वा कस्मिन्देशे समागच्छति इति इदं ईक्षितुं उन्नतप्रदेशं अधिरूढाभ्यां हृदंतः हृदयमध्यवर्तिनी यो रुधिरबुद्बुदौ ताभ्यां इव रोषेण लोहिताभ्यां लोचनाभ्यां सा

॥गद्यं॥ ततो याज्ञसेनीकटितटपटापहारसमयचक्रचंक्रमणवासनानुवृत्तिवशादिव विविधानि चक्रमंडलानि वितन्वन्निजास्पदभेदकः भीमः क्व वा समागच्छतीति वीक्षितुमुन्नतप्रदेशमधिरूढाभ्यां हृदंतररुधिरबुद्बुदाभ्यामिव रोष लोहिताभ्यां लोचनाभ्यां साध्वसदानशौंडः कलितबंभ्रम्यमाणघनतरगदाविघट्टनविपाटितभटघोटकराटिघटाक्षतजप्रवाहैः समरसीमां गुल्फद्वयसीं विदधानः सुयोधनानुजो वियदध्वनि विजृंभितध्वनिर्वृकोदरदृगध्वनीनोऽभूत् ॥ ७ ॥

ध्वसदाने भयदाने शौंडः प्रवीणः कलिता हस्ते गृहीता बंभ्रम्यमाणा भृशं भ्राम्यंती घनतरा दृढतरा या गदा तस्याः विघट्टनेन प्रहारेण पाटिताः विदारिताः याः भटघोटकराटिनां घटाः समूहाः तासां क्षतजानां रुधिराणां प्रवाहैः समरसीमां गुल्फद्वयसीं गुल्फप्रमाणरुधिरयुतां विदधानः कुर्वाणः वियदध्वनि आकाशदेशे विजृंभितः ध्वनिर्यस्य सः सुयोधनानुजः दुःशासनः वृकोदरस्य दृगध्वनीनः दृष्टिविषयः अभूत् ॥ ७ ॥ ॥ ६५ ॥ ॥

॥प॰ कंकण्ठावपि ब्रह्मचारिणावपि अभीकौ कामुकौ इति विरोधः पुन्नार्थे कंकण्ठाभ्यां तौ अभीकौ भयरहितौ इति विरोधपरिहारः तौ द्वौ भीमकौरवौ घोरं भयंकरं परस्परं गदया गदया प्रहृत्येदं युद्धं प्रवृत्तं गदागदि रणं कुर्वन्ति स्म चक्रतुः॥ ३१॥ सः भीमः कुरुभूपतीनां दुर्योधनादीनां अ क्ष्णां भूमौ निपातितस्य द्विषतः शत्रोः दुःशासनस्य गंडे कपोलस्थले कराभ्यां उदरे पादाभ्यां च संताडनं साधु सम्यक् अपराधानुरूपमिति याव नु समाचचार वर्तयामास॥ ३२॥ निजप्रियायाः द्रौपद्याः केशपंके शपाशाकर्षति यः तस्य शत्रोः दुःशासनस्य वक्षः विभिद्य खड्गेन विदार्य असृगंभः रक्तो

कंकण्ठावपि द्वौ तावभीकौ भीमकौरवौ गदागदि रणं घोरं कुर्वन्ति स्म परस्परं॥ ३१॥ निपातितस्य द्विषतः स भूमौ समक्ष मक्ष्णां कुरुभूपतीनां गंडे कराभ्यामुदरे पदाभ्यां संताडनं साधु समाचचार॥ ३२॥ निजप्रियाकेशकृषोऽस्य शत्रोर्निर्भिद्य वक्षः पिबतोऽसृगंभः समीरसूनोश्च पिशाचिकानां सपीतिकेल्यां कलहो बभूव॥ ३३॥ एणीदृशः स्वकीयाया वेणीं तैरेव शोणितैः क्षोणीभृतां द्विषामेष क्षोणीचक्रे सहाक्षिभिः॥ ३४॥

दकं पिबतः समीरसूनोः भीमस्य पिशाचिकानां च सपी तिकेल्यां तुल्यपानक्रियायां कलहः बभूव अन्येषामपि अहंपूर्विकया युगपत् एकपात्रस्थिते क्षीररसादि पानक्रियायां कलहो भवति॥ ३३॥ एणीदृशः मृगीनेत्रसदृशनेत्रायाः स्वप्रियायाः द्रौपद्याः वेणीं तैरेव दुःशासनहृदयनिष्कासितैरेव शोणितैः क्षोणीभृतां द्विषां कर्णदुर्योधनादीनां अक्षिभिः सहैव शोणीचक्रे अशोणां शोणां रक्तां चक्रे वेणीं रक्तलेपेन शोणीकृतां क्रोधेन चाक्षीणि शोणीकृतानि॥ ३४॥ ॥ ५९॥ ॥

तस्मात् भीमकृत दुःशासनवधात् अनंतरं किरीटी अर्जुनः गोपइवकिरीटिगोपः कुरुक्षेत्रतले कुरुक्षेत्रभूम्यां चरंतं संचरंतं परेषां शत्रूणां याः धेनुकाः करि
ण्यः यद्वा भामेति यत् नामैकदेशेन नामग्रहणात् असिधेनुकाः छुरिकाः तासां अंतो नाशो यस्मात्तं उग्रं रिपुं वृषसेनं एतनामकं कर्णपुत्रं तृणायवत्तृणायवत् मुद्ध
मत्वा कांडेः बाणैः यमलोकस्य गोष्ठीं सभां निनाय गोपस्तु क्षेत्रतले केदारभूम्यां तृणाय तृणार्थं चरंतं गच्छंतं भक्षयंतं वा अतः उग्रं रिपुं पश्चात् धेनूनां कांतं प
तिं वृषाः सेना यस्य तं वृषेंद्रमित्यर्थः कांडेः लगुडैः गोष्ठीं गोष्ठं नयति ॥ २५ ॥ रिपव एव रंकवः मृगाः तेषां तरक्षुः व्याघ्रविशेषः सः कर्णः अभिमन्योः

॥ तदनंतरं ॥ रिपुं कुरुक्षेत्रतले चरंतं तृणाय मत्वा वृषसेनमुग्रं किरीटिगोपोवर धेनुकांतं निनाय कांडैर्यमलोकगोष्ठीं ॥ २५
अथ कर्ण्य किरीटिभग्नमाजावभिमन्योरधिकं सुतं स कर्णः रिपुरंकुतरक्षुरष्टदिक्षु ज्वलयंश्च वक्षःस्भृदरीनदिधक्षुः
॥ २६ ॥ कुंडलीकृतकोदंडश्चंडभानुतनूभुवः तांडवं विदधे पाणिः पांडवानां बलांतरे ॥ २७ ॥ युद्धहतो योधसमूह
एष बिंबं पितुर्मे बत भेत्स्यतीति मत्वैव पत्युर्महसां कुमारः संच्छादयामास दिवं शरौघैः ॥ २८ ॥ ॥

अधिकं सुतं वृषसेनं आजौ संग्रामे किरीटिना अर्जुनेन भग्नं हतं आकर्ण्य क्रोधात् अष्टदिक्षु वक्षः ज्वलयन् सन् अरीन् दिधक्षुः दग्धुमिच्छुः अभूत्
॥ २६ ॥ कुंडलीकृतकोदंडयेन सः कर्णस्य हस्तः पांडवानां सैन्यमध्ये तांडवं नृत्यं विदधे बाणप्रक्षेप लाघवं चक्रे इत्यर्थः ॥ २७ ॥ महसां पत्युः कुमारः कर्णः
एषः युद्धहतः योधसमूहः पितुः सूर्यस्य बिंबं स्वर्गगमनार्थं भेत्स्यति इति मत्वेव दिवं आकाशं शरौघैः संच्छादयामास ॥ २८ ॥ ॥ ॥

कर्णमुक्ताः शरव्रजाः करींद्रसमूहे पेतुः तथाहि मार्गणाः बाणाः याचकाश्च दानांबुना मदोदकेन दानार्थोदकेन च सहितः करः शुंडादंडः हस्तश्च यस्य तं स्थूल-लक्ष्यं पृथुलक्ष्यं बहुलदातारं च यांति सामान्येन विशेषस्य श्लेषेण समर्थनादर्थांतरन्यासः ॥ ३९ ॥ भयंकरा आभा तेजो यस्य तस्मिन् प्रवीरे महावीरे कर्णे का-लपृष्ठं एतन्नामकं स्वधनुः प्रकाश्य प्रकटीकृत्य युधि चलति संचरति सति तदीयभल्लैः कर्णबाणैः दलिताः परेऽपि शत्रवोऽपि रक्तपृष्ठं रुधिरेण लोहितपृष्ठभागं प्र-काश्य चेरुः चरंतिस्म कर्णः कृष्णपृष्ठं प्रकाश्य चरति शत्रवोऽपि रक्तपृष्ठं प्रकाश्य चेरुरिति समानक्रियाभासात् आश्चर्यपरतः शब्दः ४० युधि शल्यसारथिमता रथेन त-

करींद्रमंडले पेतुः कर्णमुक्ताः शरव्रजाः सदानांबुकरं यांति स्थूललक्ष्यं हि मार्गणाः ॥ ३९ ॥ प्रकाश्य कर्णे युधि कालपृष्ठं भ-
यंकराभे चलति प्रवीरे तदीयभल्लैर्दलिताः परेऽपि प्रकाश्य चेलुर्बत रक्तपृष्ठं ॥ ४० ॥ तत्र तत्र युधि संचरमाणः शल्यसारथि-
मता सरथेन चूषितारिमदधारितयासौ सूर्यसूनुरपि चंडकरोऽभूत् ॥ ४१ ॥ रवेः कुमारस्य रथं निरीक्ष्य रमाप्रिय-
स्यापि तदा समीके धैर्यहृदः स्वेदजलं शरीरात् जगाल तोत्रं च जवेन हस्तात् ॥ ४२ ॥

तत्र तत्र स्थले संचरमाणः सः असौ कर्णः सूर्यसूनुः स-न्नपि चूषितारिमदधारितया चूषिताः अरीणां शत्रूणां मदा एव वारि तस्य भावस्तत्ता तया चंडकरः स्वयं सूर्य एव अभूत् चंडः प्रचंडः करो येयस्येत्यर्थांतरं ॥ ४१ ॥ त-दा समीके युद्धे कर्णस्य रथं निरीक्ष्य रमाप्रियस्य भगवतः कृष्णस्य हृदः अंतःकरणात् धैर्यवेगात् जगाल गलतिस्म तथा शरीरात् स्वेदजलं जगाल हस्तात् तोत्रं कशा च जगाल भगवतोऽपीयमवस्था किं पुनरन्यस्य वक्तव्यमिति द्योतयितुमपिशब्दः ॥ ४२ ॥ ॥ ४२ ॥ ॥ ७ ॥

प्र. २ पृ. २४८

॥गद्यं॥ तदनंतरममर्त्यचक्रवर्ती इंद्रः विकर्तनः सूर्यः तयोः तनयौ अर्जुनकर्णौ परस्परं समरं प्रवर्तयितुमारभेतां आरब्धवंतौ॥ ८ ॥ पद्यं॥ तत्रज्व
लंतौ देदीप्यमानौ चक्रीभूतौ आकर्षणेन मंडलाकारत्वं प्राप्तौ राधाकुंतीपुत्रयोः कर्णार्जुनयोः चापदंडौ मध्यस्थायाः उभयोः मध्यगतायाः रणां
गणभूदेवतायाः ताटंकाभ्यां ताटंकयोः शोभां आदधातेस्म धारयामासतुः ॥ ४२॥ तत्र रणांगणे सहस्रं दृष्टयो नेत्राणि घृष्टयः किरणाश्च ययोस्तयोः

॥गद्यं॥ तदनंतरममर्त्यचक्रवर्तिविकर्तनतनयौ परस्परं समरं प्रावर्तयितुमारभेतां ॥ ८॥ पद्यं॥ राधाकुं
तीपुत्रयोः शौर्यभाजोश्चक्रीभूतौ चापदंडौ ज्वलंतौ मध्यस्थाया रंगभूदेवतायास्ताटंकाभ्यामादधातेस्म
तत्र ॥ ४३॥ अवकर्ण्य शरासवल्लिघोषं कृतयोस्तत्र सहस्रदृष्टिघृष्ट्योः दिवि वैणिकतापसस्य चित्रं
महती प्रीतिरभूच्च नैव चाभूत् ॥ ४४॥ ॥ ॥ ॥ ॥

इंद्रसूर्ययोः कृतयोः अर्जुनकर्णयोः शरासवल्लीघोषं धनुर्लताशब्दं आकर्ण्य दिवि आकाशे वैणिकतापसस्य वीणावादनशिल्पिनः मुनेः नारदस्य
महती प्रीतिः अभूत् नैवाभूच्च भावाभावविरोधादिदं चित्रमाश्चर्यं शब्दश्रवणेन युद्धचमत्कारदर्शनं भविष्यतीति महाप्रीतिरभवत् अतः महत्याः
तन्नाम्न्यां स्ववीणायां प्रीतिः आदरः नाभूत् इत्याश्चर्यपरिहारः ॥ ४४॥ ॥ ७॥ ॥ ७॥ ॥ ७॥

उत्कृष्टाः लोलाः चंचलाः येकल्लोलाः महोर्मयः तेसंजाताः येषांतेउल्लोलकल्लोलिताः अतिशयेनवृद्धिंगताः दोषांभुजानांविलासाः क्रीडाः ययोस्तौउपेंद्रमद्रा
त्मजौ श्रीकृष्णशल्यौ सारथीययोस्तौ अर्जुनकर्णौ भल्लकुलैः बाणसमूहैः परस्परंरुषापिरोषेणापिलीढौव्याप्तौ अरुषापिरोषाभावेनापिलीढौ अभूतांभावा
भावयोः विरोधादिदमाश्चर्यं रुषा रोषेण अरुषा प्रेम्णानापिलीढौ अभूतामितिविरोधपरिहारः ॥ ४५॥ वैणिकमुनिः नारदऋषिः कर्णार्जुनयोः धनुर्लताभ्यां
वांतैः त्यक्तैः शरौघैः अंबरतले नीरंध्रं यथातथानिबिडेसांद्रेसति अमरभावंदेवत्वंउपेत्य अभ्यागतान् योधान् प्रधनस्य युद्धस्य प्रकारान् पप्रच्छ युद्धदर्शना-

उल्लोलकल्लोलितदोर्विलासावुपेंद्रमद्रेश्वरसारथीतौ परस्परंभल्लकुलैरभूतांरुषापिलीढावरुषापिलीढौ॥ ४५॥ कर्णाम
रेंद्रसूतकार्मुकवल्लिवांतैर्नीरंध्रमंबरतलेनिबिडेपृषत्कैः अभ्यागतानमरभावमुपेत्ययोधान्पप्रच्छवैणिकमुनिःप्रधनप्रका
रान् ॥४६॥ पाणिनातदनुभानुनंदनेपन्नगास्त्रमचिरेणगृह्णति पूर्वमेवनिखिलाप्सरःकुलात्सादधौवरणमाल्यमुर्वशी॥ ४७॥ ॥

भावादागतान्प्रतिप्रश्नः ॥ ४६॥ तदनुभानुनंदने अचिरेणपाणिनापन्नगास्त्रंगृह्णतिसतिसंपूर्णाप्सरसांसमुदायात् पूर्वमेव आदावेवसाप्रसिद्धापाशुप
तास्त्रलाभानंतरं स्वर्गवासेर्जुनेन पूर्वजस्यस्त्रियंत्वांनस्पृशामीति प्रत्याख्यातोर्वशीवरणमालांदधौ इदानींतन्मांनरंप्राप्स्यतोचरिष्यातीतिमत्वेत्यर्थः
खांडववनदाहे तक्षकपत्न्याः पुत्रंमुखेगृहीत्वाकाशमार्गेणगच्छंत्याः शिरसि अर्जुनेनबाणेनच्छिन्नेसति पुत्रस्यपुच्छंछिन्नं सचाकाशमार्गेणगतः ततः
पार्थजिघांसयाकर्णतूणीरे शरेस्थितः तंशरंगृहीत्वास्त्राभिमंत्रितंकृत्वामुमोचेतीतिहासोत्रानुसंधेयः ॥ ४७॥ ॥६७॥ ॥६९

कर्णेन सव्यसाचिनः अर्जुनस्य हननाय भुजगास्त्रे शरासे धनुषि संहिते सति कृतसंधाने सति इंद्रः कल्पकवनेन कल्पवृक्षवनेन सह स्वस्य नंदनद्वि
तीयमेवास्तीत्यमंस्त मन्यते स्म अद्यावधि जयंतार्जुनौ वनं चेति नंदनत्रितयमासीत् इदानीं अर्जुनवधे द्वयमेवावशिष्टमिति निश्चितवान् अनेनास्त्रस्या
परिहार्यत्वं द्योत्यते॥ ४८॥ रवितनयेन विमुक्तं एतत् अस्त्रं दिवि आकाशे रसनायुगलं जिह्वाद्वितयं बहिर्वितन्वत् प्रकटयत् सत् अहं अधुना अमुं
द्विधा करोमीति अभिनयस्य द्विधाकरणार्थसूचनस्य केलिं क्रीडां आदधत् कुर्वत् बभासे अन्योपि द्विधाकरणस्याभिनयमंगुलिद्वयप्रदर्शनादिनाक

सव्यसाचिहननाय शरासे संहिते रविभुवा भुजगास्त्रे नंदनद्वितयवत्वमंमंस्त स्वस्य कल्पकवनेन सहें
द्रः॥ ४८॥ रवितनयविमुक्तशस्त्रमेतद्दिवि रसनायुगलं बहिर्वितन्वत् अहमरिमधुना द्विधाकरोमीत्यभि
नयकेलिमिवादधद्बभासे॥ ४९॥ द्विधा विधातुं विजयं शिरोधावथापतंतं स सरीसृपं तं निरीक्ष्य भारेण
निजेन शार्ङ्गी निमज्जयामास रथांगमुर्व्यां॥ ५०॥ ॥ ॥ ॥

रोति॥ ४९॥ अथ सः शौरिः श्रीकृष्णः विजयं अर्जुनं शिरोधौ ग्री
वायां द्विधा विधातुं आपतंतं आयांतं तं सरीसृपं नागं निरीक्ष्य निजेन भारेण रथांगं चक्राणि उर्व्यां पृथिव्यां निमज्जयामास अंतः प्रवेशयामास ग्रीवा- ११
यां विभेत्तुं बद्धलक्ष्यमस्त्रं रथमज्जनात् किरीटे लग्नं भवत्वित्याशयेन रथं मज्जयामास॥ ५०॥ ॥ ६७॥ ॥ ६७॥

तदा हरेः कृष्णस्य उपायात् आनेमि धारामभिव्याप्य मग्नस्य इंद्रात्मजस्य रथस्य अवकाशं स्थित्यर्थं स्थानं शंभोः शतांगः रथः धरणिः बांधवेन बंधुत्वेन सा जात्येन किलेत्युत्प्रेक्षा गर्भे व्यतानीत् ददौ ॥ ५१ ॥ ततः पुष्करांते आकाशमध्ये कुरूणामिव निजां क्ष्वेडार्भटीं विषोत्सर्ग लीलां सिंहनाद लीलां च जृंभयता व र्धयता उग्राहिना भयंकरसर्पेण तस्य अर्जुनस्य किरीटस्य शृंगं अग्रं नाकेंद्रस्य इंद्रस्य भयेन साकं अग्राहि गृहीतं किरीटाग्रं छिन्नं इंद्रस्य पुत्रमरणभयं चापहृ तमित्यर्थः ॥ ५२ ॥ ततः स्नेहरसेन तैलादिना आर्द्रः अन्यत्र स्नेहरसेन पुत्रवत्सलतया आर्द्रः युक्तः पक्षैः पत्रैः पतति गच्छतीति तच्छील: अन्यत्र पुत्रसाहा

आनेमिमग्नस्य हरेरुपायात्तदा शतांगस्य किरीटिनोस्य गर्भेवकाशं किल बांधवेन शंभोः शतांगो धरणिर्व्यतानीत् ॥ ५१ ॥ ततः कुरूणा मिव पुष्करांते क्ष्वेडार्भटीं जृंभयता निजां च उग्राहिना तस्य किरीटशृंगमग्राहि नाकेंद्रभयेन साकं ॥ ५२ ॥ ततः स्नेहरसार्द्रस्तं पक्षपा तीभुजंगमं तक्षकः किल पार्थस्य वर्धयामास सायकः ॥ ५३ ॥ दंतींद्रपादातरथाश्वभेदी कुंतीकुमारः स हरेर्निदेशात् ॥ राधेयकाये विविधास्त्रजालमाधेयमेव व्यधित क्षणेन ॥ ५४ ॥ ॥ ॥ ॥

य्यकर्ता तक्षकः छेदकः अन्यत्र तक्षकनागः पार्थस्य अर्जुनस्य सायकः तं भुजंगमं सर्पं वर्धयामास चिच्छेद ... अन्यत्र वृद्धिं ... तवानित्यर्थः ॥ ५३ ॥ दंतीं द्राणां पादातस्य पत्तिवृंदस्य रथानां अश्वानां च हंता सः अर्जुनः हरेः कृष्णस्य निदेशात् राधेयकाये कर्णशरीरे विविधास्त्रजालं ... ग्नेय्याद्यस्त्रशस्त्रसमूहं क्षणेन आधेयमेव गुप्तस्थले निक्षेप्यं वस्त्वेव व्यधित कृतवान् सर्वाणि शस्त्राणि अस्त्राणि च शरीरे आरोपयामास ॥ ५४ ॥ ॥ छ ॥ ॥ छ ॥

अथसर्वेषुयाचकजनेषु बहुप्रददातिबहुप्रदः तस्य भावः तत्त्वं तस्माद्धेतोः खर्वेतरा महती उन्नतिः औन्नत्यं यस्य सः कर्णः शरीरे पतितं अन्यत्रशरीरायं आगतं पार्थस्य मार्गणगणं बाणसमूहं याचकवृंदं च अभिमतं इष्टं देहं वितीर्य दत्वा सार्थं सफलं वित्तसहितं च व्यधात् कृतवान् कर्णो देहत्यागं कृतवानित्यर्थः ॥ ५५ ॥ अथकर्णे कर्णेंद्रियमात्र पात्रं स्थितिस्थानं यस्य तथाभूते सति कथावशिष्टे सति मृते सति तावत् दुर्योधनः अनागतस्य भविष्यतः ह्रदे म

सर्वेषुयाचकजनेषुबहुप्रदत्वात्खर्वेतरोन्नतिरयंरवमणेःकुमारः पार्थस्यमार्गणगणंपतितंशरीरेसार्थंव्य
धादभिमतंसवितीर्यजीवं ॥५५॥ कर्णेऽपिकर्णेंद्रियमात्रपात्रेदुर्योधनःशोकरसेममज्ज अभ्यासभूमा
नमिवाधिरोढुमनागतस्यह्रदमज्जनस्य ॥५६॥ ततःस्वकीयस्यतनूभवस्यवधादपस्नातुमनाइवद्राक् मंदा
यमानद्युतिभारमालीमरीचिमालीवममज्जसिंधौ ॥५७॥ ॥इतिश्रीचंपूभारते एकादशस्तबकःसमाप्तिमगमत्

ज्जनस्य अभ्यासस्य भूमानं बाहुल्यं अधिरोढुमिव प्राप्तुमिव शोकरसे शोकोदकरसे ममज्ज ॥ ५६ ॥ ततः मंदायमानां द्युतिमालां कांतिपरंपरां बिभर्ति तथाभूतः मरीचिमाली सूर्यः स्वकीयस्य तनूभवस्य पुत्रस्य कर्णस्य वधात् अपस्नातुं मृताशौचनिमित्तं स्नानं कर्तुं मनो यस्य सः अपस्नातुमना इव द्राक् शीघ्रं सिंधौ समुद्रे निममज्ज अस्तं जगामेति भावः ॥ ५७ ॥ ॥ इतिश्री चंपूभारते टीकायां श्रीखडोपाह्वयाजीराबात्मज नारायणसूरिकृतायां एकादशस्तबकः समाप्तिमगमत् ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

अथभारतचंपोद्वादशस्तबकः प्रारभ्यते ॥ श्रीकृंष्ण ॥

श्रीगणेशायनमः॥ ॥अथचंपूभारतेसटीकद्वादशस्तबकोलिख्यते॥ ॥ततःपरंकुरूणांरमणःदुर्योधनःअरातिकुलस्यचित्तेशल्यंदुःखदंअयोमयंशरकुंताद्यग्रभागंदिशंतंस्थापयंतंरणेषुकल्पंकलहेसाधुनिपुणंशल्यंमद्रराजंपृतनाधिपतिंसेनाधिपतिंविधायकृत्वास्वयंआत्मनःत्रिविष्टपपतेःतुल्यंइंद्रसदृशंअमन्यतआत्मानंसर्वाधिकंअमन्यतेतिभावः॥१॥तदनुजातःशत्रुःशत्रुभावोयस्य यस्यक्वापिशत्रुत्वंनास्तितस्ययुधिष्ठिरस्यपाणिःहस्तःतत्तादृशंनिरुपमंबाह्वोर्मर्दनगर्वेणशत्रून्अमरावलीनांयुद्धप्रेक्षकश्लाघाकर्तृदेवावलीनांमस्तकेनसहआकंपयंतंशल्यंयुधिशक्त्यानिहत्य

शल्यंततःपरमरातिकुलस्यचित्तेशल्यंदिशंतमनिशंरमणःकुरूणां कल्यंरणेषुपृतनाधिपतिंविधायतुल्यंत्रिविष्टप
पतेःस्वममन्यतासौ॥१॥तत्तादृशंतदनुबाहुमर्दनशत्रूनाकंपयंतममरावलिमस्तकेन शक्त्यानिहत्ययुधिशल्यमजा
तशत्रोःपाणिर्दधौप्रथमतःपरहिंसकत्वं॥२॥अथतंस्फबलात्मजंक्षणादवगम्यप्रियंपाशकंमृधे यमदापितपा
शकंव्यधाद्यमयोःप्राथमिकःपराक्रमी॥३॥

प्रथमतः इदानीमेवपरहिंसकत्वंदधौ अद्यावध्यनेनकोपिनहतइतिभावःयुधिष्ठिरःशल्यंजघानेत्यर्थः॥२॥अथपराक्रमीयमयोःनकुलसहदेवयोःमध्येप्राथमिकःनकुलःतंस्फबलाया आत्मजंपुत्रंशकुनिंप्रियाःपाशकाःद्यूतसाधनपाशकाःयस्यतथाविधं अवगत्य ज्ञात्वामृधे युद्धेक्षणात्यमेनदापितःपाशःप्राणोत्क्रमणकारिपाशोयस्यतंतथाविधंव्यधात्चकार पाशकप्रियस्य पाशकदापनकरणमिष्टमेव नकुलःशकुनिंजघानेतिभावः॥३॥ ॥७॥ ॥७॥ १

अथयुद्धमेव तपर्तुः ग्रीष्मर्तुः तस्मिन् दुःसहा श्रीर्यस्य सः सहदेवस्य भुजप्रतापएव भानुः हरितां दिशां अंतरेषु धावन् आत्मघोषः स्वशब्दो यस्य अन्यत्र अ
भ्यंतरेभ्यः धावंतः आत्मघोषाः काकाः यस्मिन् तं कंचिदपि उलूकं एतन्नामकं शकुनिपितरं उलूकपक्षिणंच नसहते स्म नसेहे सहदेवः उलूकराजं जघानेत्य
र्थः ॥ ४ ॥ अथ पार्थे अर्जुने दानविधौ कृशानोः अग्नेः ज्वालाभिः अनुषक्तं संबद्धमिव शोणं रक्तं चमरवालं चमरमृग पुच्छकेशपुंजं दधत् चापं गांडीवधनुः

अथयुद्धतपर्तुदुःसहश्रीर्हरिदभ्यंतरधावदात्मघोषं सहते स्म न किंचिदप्युलूकं सहदेवस्य भुजप्रतापभानुः ॥ ४ ॥ ज्वाला
नुषक्तमिव दाहविधौ कृशानोः शोणं दधच्चमरवालमुदस्य चापं पार्थे निहंतरि रिपून् अथ कांदिशीकाद्रोणात्मभूकृपमुखाः सहसा
बभूवुः ॥ ५ ॥ ग० इत्थं सोदरदायादवरूथिनीनां रणक्षितौ परिक्षयमभिवीक्ष्य महीयसा साध्वसेन मनसि विरचितप्रथमप्रवेशः क्व
चन गूढावस्थितिरेव महती ममायुष्ट्योमार्गरित्यालोच्य झटिति घटितकवचावगुंठनः पन्नगकेतनः स्यमंतपंचकसामंतं सागरगांभी
र्यस्वरितनामानं कंचन महाह्रदमासाद्य मङ्गुजेन चिरधार्यमाणां क्षोणीं त्वय्येव समर्पयिष्यामीति पातालवासिनः पन्नगाधिपतेःस
हस्रलोचनेषु रहसि वचसा निवेदयितुमिव दूरं दूरं निमज्य स्वविद्यया सर्वमप्यंभस्तंभयामास ॥ १ ॥ उदस्य उच्चाल्य रिपून् निहंतरि सति
द्रोणात्मभूकृपमुखाः अश्वत्थामकृपादयः सहसा अकस्मात् कांदिशीकाः भयेन पलायिताः बभूवुः ॥ ५ ॥ ग० ॥ इत्थं सोदराणां बंधूनां दायादानां पु
त्राणां ज्ञातीनां वरूथिनीनां सेनानां च रणक्षितौ परिक्षयं अभिवीक्ष्य महीयसा साध्वसेन भयेन मनसि विरचितः कृतः प्रथमप्रवेशो यस्य सः क्वचन कु

न्नचित् गूढावस्थितिरेव मम महती आयुष्टोमेष्टिः आयुर्वृद्धिकारकोयागविशेषः इतिआलोच्यमनसिविचार्य झटिति शीघ्रंघटितंकृतं कवचावगु
ठनंशरीरस्यकवचवेष्टनंयेनसः पन्नगःसर्पःकेतने ध्वजेयस्यसः दुर्योधनः स्यमंतपंचकतीर्थस्यसामंतंसमीपभागेवर्तमानं सागरवत् गंभीरं अतलस्प
र्शं स्वरितइतिनामयस्यतं कंचनमहान्हदंमहाजलाशयं आसाद्यप्राप्यमज्जनेन चिरं धार्यमाणांक्षोणीं त्वय्येवसमर्पयिष्यामीति पातालवासिनः पन्नगा
धिपतेःशेषस्यद्विसहस्रलोचनेषु तेष्वेवश्रोत्रेंद्रियसत्वात् रहसिवचसानिवेदयितुमिवदूरंदूरं अतिदूरं निमज्ज्यस्वस्यविद्यया अंभः स्तंभविद्ययासर्व

॥ पद्यं॥ बकहंतापुराद्यासौधार्तराष्ट्रवधोद्यतः इतिभीतस्यराज्ञोऽस्ययुक्तंकासारमज्जनं॥६॥ दरीषुवाथसरिसरि
झ्झरीषुवापुरीषुवा घनवनवल्लरीषुवा तिरोभवेदयमितितंसमार्गितुं रणस्थलात्पवनसुतोथनिर्ययौ॥ ७॥ ॥

मपि अंभः स्तंभयामास॥१॥प॰अ
सोभीमः पुराबकस्यबकराक्षसस्यबकपक्षिणश्चहंता अद्य धार्तराष्ट्राणां धृतराष्ट्रपुत्राणांहंसानांच वधेउद्यतः सज्जोद्यमोस्ति इतिभीतस्य राज्ञः दुर्योध
नस्यकासारमज्जनं भयेननिमज्जनंयुक्तं॥६॥ अथपवनसुतःभीमः दरीषुगुहासु अथवासरिझ्झरीषु सरित्सु नदीषु झरीषु अल्पनदीषुवापुरीषु
वाघनाःनिबिडाःयाःवनवल्लर्यःवनलताःतासुवा अयंदुर्योधनःतिरोभवेत् तिरोहितोभवेत् इतिनिश्चित्यतंमार्गितुं अन्वेष्टुं रणस्थलात् निर्ययौ॥ ७॥

तदानीं अपरैरपिसोदरैः अर्जुनादिबंधुभिः अनुयातस्य अस्य भीमस्य जयार्थसिद्धये वनांते वनमध्ये कश्चनशबरः संन्यधात् सन्निधौबभूव दृष्टि-
विषयोबभूवेति यावत् इदंदिष्ट्याभद्रंजातं यथापुराशतमन्युभुवः अर्जुनस्यजयार्थसिद्धयेशबरः शबररूपधरः शिवः सन्निधौबभूवतद्वत्॥ ८॥ग०
अथकृतांजलिना तेनशबरेणसविनयंयथातथानिवेदितायांदर्शितायांसार्वभौमस्यलक्षणैः ध्वजांकुशोदकुंभकमलादिभिः उपेतायां युक्तायां

अपरैरपिसोदरैस्तदानीमनुजातस्यजयार्थसिद्धयेस्य शतमन्युभुवः पुरेवदिष्ट्याशबरः कश्चनसंन्यधाद्वनांते॥ ८॥
ग० अथतेन कृतांजलिनासविनयंनिवेदितायांसार्वभौमलक्षणोपेतायांपदपंक्तौलक्ष्यमाणेः सलिलमाहर्तुं वनदे
वताभिरानीतैरिवकलशैरंकितावतारपथात्संगररंगप्रयुक्तविविधायुधसविधाधीततैक्ष्ण्यानीवपरुषाणिसरो
षाणिमारुतिवचनानिनिशम्यविशालैः क्रोधनिश्वासैरुपरिकोरकितबुद्बुदकलकलोदयात्तस्माज्जलाशयादुत्तीर्यमा
निनामग्रणीः सुयोधनोधीरधीरमनास्ताद्दशेनभीमेनसहभयानकंगदागदिकलहायितुंसरभसमुपचक्रमे॥ २॥ ॥

पदपंक्तौलक्ष्यमाणेः दृश्यमानेः सलिलंपादप्रक्षालनार्थंउदकंआहर्तुं आनेतुंवनदेवताभिः आनी[illegible] इव कलशैरंकितः चि[illegible]ः अवतारपथः-
तस्मात्संगररंगेरणांगणेप्रयुक्तानियानिविविधायुधानि तेषांसविधात् सकाशात् अधीतंतैक्ष्ण्यंयैस्तानीवपरुषाणिक्रूराणि सरोषाणिमारुतेः भी
मस्यवचनानिनिशम्य श्रुत्वाविशालैः क्रोधनिश्वासैः उपरिजलोपरिकोरकितः उद्भूतः बुद्बुदानांकलकलोदयोयस्यतस्मात् जलाशयात् उत्तीर्य-

बहिर्निर्गत्यमानिनांमानवतां अग्रणीःमुख्यः सुयोधनःधीरान्धीरं मन्नोयस्यतथाभूतः सन् तादृशेनपरुषभाषणकारणाभीमेन सहभयानकं
याभद्यामहृत्यपुद्धंप्रवृत्तंगदागदिकलहायितुंयुद्धंकर्तुंसरभसं सवेगं यथातथाउपचक्रम प्रारेभे॥२॥प॰ तदाबलवान्बलः तीर्थयात्रायांसरस्व
तीनदीतटात् आजिसीम्नि रणांगणसमीपे आजगाम कोसौबलइत्यपेक्षायामाह आयतइति यस्य आख्ययाबलइतिनाम्ना अनिशंसदाभद्रदेव
पदयोः संबंधः जायते बलभद्रइति बलदेवइति पदाख्याभवति सबल आगतइत्यर्थः ॥९॥ तत्रविस्मयकरं गदायुद्धंपश्यतः अस्यबलभद्र

॥पद्यं॥ आजगामससरस्वतीतटाद्दाजिसीम्निबलवान्बलस्तदा जायतेखलुयदाख्ययानिशंभद्रदेवपदयोःसमा
गमः॥९॥तत्रविस्मयकरंगदाहवंपश्यतोस्यसहर्षसंमदाश्रुभिः पुष्पवृष्टिरुभयोरुपांतयोःपुष्करात्सुरभिगंधिरापतत् १०
प्रविवेदकुलालचक्रवद्भ्रमतोस्तत्रतयोर्द्वयोर्भिदां नबलोनहरिर्नपांडवानसुरानाश्वमुखानचारणाः॥ ११ ॥ ॥

स्यसंपदाश्रुभिः आनंदाश्रुभिःसह उभयोः भीमसुयोधनयोःउपांतयोः समीपभागयोः पुष्करात् आकाशात् सुरभिःगंधोयस्याःसापुष्पवृ
ष्टिः आपतत् ॥१०॥ तत्रकुलालचक्रवतूभ्रमतोः तयोः द्वयोः भीमसुयोधनयोः भिदांन्यूनाधिकभावंबलः बलभद्रः नप्रविवेद नजानातिस्म हरिः ३
कृष्णः नविवेद पांडवाः अर्जुनादयः नविविदुः सुराः इंद्रादयोदेवानविविदुः अश्वमुखाः गुह्यकविशेषाः चारणाः गंधर्वादयश्चनविविदुः॥११॥ ॥

अथ श्वसनस्यसूनुः भीमः मदुद्वहस्यकृष्णास्यनेत्रेणसूचितं अरेः दुर्योधनस्यसक्थियुग्मं ऊरुद्वयं गदयाचूर्णीचकार सक्थिद्वयेप्रहारकरणसूचनक
र्तृनेत्रेकारणमुत्प्रेक्षते मन्नामेति नामधारिमृदुलंवसनंवस्त्रंकर्मएतत्सक्थियुग्मंसदाविमृद्नाति चूर्णयतिइतिहेतोः अतिशयितारूढरोषोयस्यतेनैव
व ॥ १२॥ अथतत्रादिनांते असौपृथायाः तनुभुवांपुत्राणांवर्गः समूहः मधुभिदाकृष्णेनसमेतः युक्तः सन् अद्रिसुतायाः कुमारः कार्तिकेयः तारकमि

मन्नामधारिमृदुलंवसनंविमृद्नात्येतत्सदेत्यतिरुषेवयदूद्वहस्य नेत्रेणसूचितमरेरथसक्थियुग्मंचूर्णीचकारगद
याश्वसनस्यसूनुः ॥ १२॥ तत्रायतारकमिवाद्रिसुताकुमारोजित्वासुयोधनमसौशिबिरंदिनांते वर्गःपृथातनुभुवांमधुभि
त्समेतः षड्भिर्मुखैर्जनितशंखरवोजगाहे ॥ १३॥ भूयोपिसायमनलायमहःप्रदानेभासांप्रभोरिवकराद्दिशिविप्रकी
र्णैः धूमैरिवाक्षिपथरोधिभिरंधकारैःप्रापेकुरुक्षितिभृतांपटमंडपौघः ॥ १४॥ ॥ ॥

वतारकासुरमिव सुयोधनंजित्वाषड्भिर्मुखैः जनिताः उत्पादिताः शंखरवाः येनसः शिबिरं सेनानिवेशस्थानं जगाहे प्रविवेश ॥ १३॥ भूयोपिपुनर
पि सायं सायंकाले अनलाय अग्नये महः तेजः प्रदित्सोः दातुमिच्छोः भासांप्रभोः सूर्यस्यकरात् दिशिविप्रकीर्णैः गलितैः धूमैरिव अक्षिपथरोधि
भिः दृष्टिमार्गप्रतिबंधकैः अंधकारैः कुरुक्षितिभृतां दुर्योधनादीनां पटमंडपौघः प्रापे प्राप्तः ॥ १४ ॥ ॥ ६ ॥ ॥ ६ ॥

तस्मिन्काले प्रदोषकाले रंगे रणांगणे क्षितिपतिं दुर्योधनं अस्त्रभिः युक्तं विचिंत्य आसाद्य समीपंगत्वा च तैस्तैः माधुर्यादिगुणविशिष्टैःला
पैः भाषणैः आश्वास्य समरे निजं भाविकृत्यं निशीथे निद्रां गतानां धृष्टद्युम्नादीनां कर्तव्यं वधं निवेद्य च ततः तेन दुर्योधनेन मुक्तः गच्छेत्सु

तस्मिन्कालेविचिंत्यक्षितिपतिमस्त्रभिर्युक्तमासाद्यरंगे तैस्तैराश्वास्यलापैर्निजम
पिसमरेभाविकृत्यंनिवेद्य मुक्तस्तेनार्धमार्गेहरवरमुदितोद्रोणभूश्चापमौर्व्याधृष्टद्युम्नं
निकृत्यस्वस्त्ररापतनयानस्यचिच्छेदशूरान्॥ १५॥

क्तः अर्धमार्गे हरस्य वरेण मुदितः द्रोणभूः अश्वत्थामा चापस्य मौर्व्या गुणेन निद्राणं धृष्टद्युम्नं निकृत्य ग्रीवायां छित्वा अस्य धृष्टद्युम्न ४
स्य स्वस्त्रः भगिन्याः द्रौपद्याः शूरान् तनयान् प्रतिविंध्यादीनपिचिच्छेद॥ १५॥ ॥ ५ ॥श्रीगोपालकृष्णायनमः॥ ५॥ ॥५

॥गद्यं॥ इत्थंनिशीथे भयानकाःयेनिजसायकाःतैः शतधाशकलितंछिन्नंद्विषदनीकं शत्रुपांडवसैन्यं यस्मिन्तस्मात् कुरुनायकानांपांडवानांपटनिके
तनात् पटगृहात् स्वभुजाभ्यामिव प्रविष्टंकटकं सैन्यंप्रविष्टे कटके वलयेच याभ्यांताभ्यां कृपकृतवर्मभ्यांसह पुनरपि यत्र दुर्योधनःपतितः तत्सरस्तीरं
आगत्य दुष्करं स्ववृत्तांतं धृष्टद्युम्नादिवधात्मकं कथयंतं अश्वत्थामानं अयिसखे संप्रति ममप्रीतिःएतावती इति अभिनेतुमिव अभिनयेन दर्शयितुमि

॥गद्यं॥ इत्थंनिशीथेभयानकनिजसायकशतधाशकलितद्विषदनीकात्कुरुनायकपटनिकेतनात्स्वभुजाभ्यामिवप्र
विष्टकटकाभ्यांकृपकृतवर्मभ्यांसहपुनरपिसरस्तीरमागत्यदुष्करंस्ववृत्तांतंकथयंतमश्वत्थामानमयिसखेसंप्रतिमम
प्रीतिरेतावतीत्यभिनेतुमिवतिर्यक्प्रसारितेनबाहुयुगुलेनयत्नादाश्लिष्यत्वमेवखलुममप्राणोभवसीत्यौपचारिकवच
नंप्रयुंजानंतंराजानंकोपादिव तदीयाःप्राणास्तदानीमत्याक्षुः॥ ३॥ पद्यं॥ कृपस्ततःकुरुपुरींकृतवर्माकुशस्थ
लीं प्रययौद्रोणसूनुश्चपाराशर्यतपोवनीं॥ १६॥ ॥ ॥ ॥ ॥

वतिर्यक् प्रसारितेन बाहुयुगुलेन यत्नात् कष्टात् आश्लिष्य त्वमेवखलु ममप्राणोभवसि इति औपचारिकं अतिप्रीत्यास्पदनिरूपकं वचनंप्रयुंजानं रा
जानंदुर्योधनंकोपादिवस्वस्मिन् अनादरजन्यक्रोधादिव तदीयाः दुर्योधनीयाःप्राणाः तदानींतं अत्याक्षुः अमुंचन्॥ ३॥ ततःदुर्योधनमरणानंतरं कृ
पःकुरुपुरींहस्तिनापुरींप्रययौ कृतवर्माकुशस्थलीं द्वारकांप्रययौ द्रोणसूनुः पाराशर्यस्य व्यासस्य तपोवनींप्रययौ॥ १६॥ ॥ ७॥ ॥

अथसविता आत्मनः दीप्तिभिः विजेतुः विमतद्रोणेः शत्रुभूतस्य अश्वत्थाम्नः शिरोमणेः भाविनीं भविष्यंतीं सहजास्पदस्य सहजस्थानस्य अश्वत्थाम्नः भंगरूपमानहानिं द्रष्टुमिवउदयाद्रिं आगात् आजगाम ॥ १७ ॥ गद्यं ॥ ततः परं आत्मनः सोदरस्यबंधोः धृष्टद्युम्नस्य सूतमुखात् श्रवणयोः कालकूटविषवत् दुःसहं अपत्यानां पुत्राणां अत्ययं वधं अभिगम्य ज्ञात्वा निषीदंत्याः कुंत्याः दुःखं प्राप्नुवत्याः याज्ञसेन्याः द्रौपद्याः मूर्छात्मकं अं

अथदीप्तिभिरात्मनोविजेतुर्विमतद्रोणिशिरोमणेर्भाविनीं सहजास्पदभंगमानहानिंसविताद्रष्टुमिवोदयाद्रिमागात् ॥ १७ ॥ गद्यं ॥ ततःपरमात्मसोदरसूतमुखाच्छ्रवणकालकूटमपत्यात्ययमधिगम्यनिषीदंत्यायाज्ञसेन्यामूर्छांधकारंरत्नदीपालोकेनदूरमुत्सारयितुमुत्कंठकइवगुरुस्कंतचूडामणेराहरणायशतांगमधिरुह्यमौर्वींविस्फारयद्भिर्मघवत्कुमारादिभिर्मांसलितपार्श्वभागोमारुतिस्तपस्यतस्तस्यैवाश्रमपदंप्रतस्थे ॥ ४ ॥ ॥

धकारं रत्नदीपस्य आलोकेनप्रकाशेन दूरं उत्सारयितुं अपसारयितुं उत्कंठकइव गुरुस्कंतस्य चूडामणेः आहरणाय आनयनाय शतांगं रथं अधिरुह्य मौर्वीं विस्फारयद्भिः रणत्कारयुक्तां कुर्वद्भिः मघवत्कुमारादिभिः अर्जुनादिभिः मांसलितः पुष्टः पार्श्वभागोयस्यसः मारुतिः भीमः तपस्यतः तपः कुर्वतः तस्यैव अश्वत्थाम्न एव आश्रमपदं प्रतस्थे भीमादयश्वत्थाम्नोपिगताइतिभावः ॥ ४ ॥ ॥ ६७ ॥ ॥ ६७ ॥ ॥ ६७ ५

प० तत्र आगतेषु तेषु पांडवेषु युधिष्ठिरपूर्णां पर्षकेषु सत्सु एकोपि अयं तपोधनः धीरतरधीः सन् वसुधा निष्पांडवा अस्तु इति संकल्प्य निजेन व्रतेन द्वन्द्वः परपरहिंसां न करोमीति मुनिव्रतेन साकं जवात् इषीकां शलाकां अभिमंत्र्य व्यमुंचत् ॥ १८ ॥ अथ सा इषीका किरीटिना प्रहितस्य प्रयुक्तस्य ब्रह्मशिरोऽस्त्रस्य योगात् ह्रस्वभावं लघुत्वं जगाम शांता बभूवेत्यर्थः कस्येव तूलपदस्येव यथा तूलपदस्य योगात् इषीका पूर्वपदं इष्टकेषीकामालानामिति सूत्रेण इषीकतूलमिति ह्रस्वभावं प्राप्नोतीत्यर्थः ॥ १९ ॥ अथ मारुतिना भग्नस्य पराजितस्य गुरुनंदनस्य अश्वत्थाम्नः शीर्षात् हठेन बलात्कारेण आहृतः आनीतः दत्तः मणिः पा-

प० तत्रागतेषु युधिनेषु तपोधनोयमेकोपि धीरतरधीरिषुवर्षकेषु निष्पांडवास्तु वसुधेति निजव्रतेन साकं व्यमुंचदभिमंत्र्य ज
वादिषीकां ॥ १८ ॥ अथ ब्रह्मशिरोऽस्त्रस्य प्रहितस्य किरीटिना योगात्तूलपदस्येव ह्रस्वभावं जगाम सा ॥ १९ ॥ अथाहृतो मा
रुतिना हठेन भग्नस्य शीर्षाद्गुरुनंदनस्य दत्तो मणिः पार्षतनंदनायाः शोकाग्निदाहप्रतिबंधको भूत् ॥ २० ॥ ग० ततः संवर्तस
मयसरुछात्रे ताहृशी कुरूणामुभयेषामपि संप्रहारे कृष्णा वेणीबंधायुषा सह परिसमाप्ते ॥ ५ ॥ र्षतस्य द्रुपदस्य नंदनायाः द्रौपद्याः शो

काग्नेः दाहस्य प्रतिबंधकः अभूत् तेन शोकः शांतो भूदित्यर्थः ॥ २० ॥ गद्यं ॥ ततः संवर्तसमयस्य प्रलयकालस्य सरुछात्रे सच्छिष्ये तत्तुल्ये इत्यर्थः ताहृशि उभयेषां कुरूणां दुर्योधनादीनां युधिष्ठिरादीनामपि संप्रहारे युद्धे कृष्णायाः द्रौपद्याः वेणीबंधायुषा सह यदा कचग्राहिणं दुःशासनं वधिष्यसि तदा वेणीं मोक्ष्यामीति भीमं प्रति द्रौपद्याः प्रतिज्ञातत्वात् तथा जाते केशप्रसाधनार्थं वेणी मुक्ता अतः कारणात् वेणीबंधायुषा सह समाप्ते सतीत्यर्थः ॥ ५ ॥ ॥ ५ ॥

॥पद्यं॥स्वंस्वकीयंअपत्यवर्गंदुःशलैवशेषायस्मिन्तथाभूतंपांडोश्च अपत्य वर्गंसमस्ताःशेषाःयस्मिन्तथाभूतंविज्ञायजरठःवृद्धःमहीपतिः

प० स्वंदुःशलाशेषमपत्यवर्गंपांडोश्चविज्ञायसमस्तशेषं दृशासदांधोजरठोमहीपश्चिरंतदाचेननयापिजज्ञे २१

ग० तदानींविदुरसंजयाभ्यांव्यजनादिभिरुपचारैर्विश्राणितसंज्ञोहासुयोधनदुःशासनेतिबहुधाविलपन्नुत्थाय
रणनिहतस्वजनमुखदुस्मरणमात्रादुल्लोलकल्लोलितशोकसिंधुभिर्बंधुभिःसहनगरान्निर्गतोभवत्समेषुगतेष्व
पियूयमद्यापिननिर्गताइतिरोषेणप्राणान्बहिरुत्सारयितुमिवहृदिपुनःपुनर्विरचितकरास्फालनाभिःसविधमाग
म्यमज्जन्मभूसादर्यमातिभव्यामियमावरतीत्यसहिष्णुतयेवकपोलमकरिकामुन्मूलयंतंबाष्पप्रवाहंनयनैरुत्सृज
तीभिरनवरतमस्म कुसुमैरामोदभरितान्विदधानाःसुयोधनादयःक्वेतिगवेषयितुमिवभुविदूरमवतीर्णैश्चिकु
रहस्तैरुपलक्षिताभिः व्यनस्कृतपरिघोपालंभनपरिपूरितार्थैर्विलापैर्दिगंतरंनिरंतरयंतीभिःस्नुषाभिःपरिवार्य
माणयागांधारसुत याशनैःशनैरनुगम्यमानःसंग्रामभुवमवगाह्यपंक्तिभिःपरिशीलितदीर्घनिद्रेषुपाकशासनप
रिमुक्तपारिजातप्रसवपरिमलितकचबंधेषुवीरेषुतनयेषुनिपत्यपरितोलुठन्सकुरुभूपश्चिरमरोदीत्॥६॥ ॥

धृतराष्ट्रःदृशानेत्रेणसदाअंधःसन्चिरंचेतनयापिअंधःजज्ञेजातःदुःखेनमूर्छांप्रापेत्यर्थः॥२१॥ग० तदानींविदुरसंजयाभ्यांव्यजनादुपचारैःविश्रा

णितादत्तासंज्ञाचेतनायस्यसः हासुयोधन दुःशासनेति बहुधाविलपन् आक्रोशन् सन् उत्थाय रणेयेनिहताःस्वजनाः तेषांमुखेंदोः स्मरणमात्रात् उल्लोलाः अतिचंचलाः येकल्लोलाः महोर्मयः ते संजाताःयेषांतथाभूताः शोकसिंधवोयेषांतैः बंधुभिः सहनगरान्निर्गतः स्नुषाभिः परिवार्यमाणया गांधार्याशनैःशनैः अनुगम्यमानः सःकुरुभूपतिः धृतराष्ट्रः संग्रामभुवं अवगाह्यप्रविश्यपंक्तिभिः परिशीलितास्वीकृता दीर्घानिद्रायैस्तेषु पाकशासनेन इंद्रेण परिमुक्ताःयेपारिजातस्यप्रसवाःपुष्पाणि तैः मरिमलिताः सुगंधिताः कचबंधाःयेषांतेषुवीरेषुतनयेषु निपत्यपरितो लुठन्सन् चिरंअरोदीत् कथंभूताभिः स्नुषाभिः भवद्भिः समेषुपतिषुगतेषुसत्स्वपि यूयमद्यापिननिर्गताः इतिरोषेणप्राणान्बहिरुत्सार

कृष्टंपितृव्यमनुमागतमाजिभूमौद्रष्टुंभयाकुलधियायुधिष्ठिरेण अभ्यर्थितोहरिपराशरनंदनौद्रागागम्यतुस्तमपनीतरुषंविधातुं २२

यितुंनिष्का सयितुमिवहृदिपुनःपुनःविरचितंकराभ्यां स्फालनंयाभिस्ताभिः ॥पुनः कथं०सविधंसामीप्यमागम्ययमजन्मभूः अन्मस्थानंनयनंतस्ययंतस्तो दर्यनस्ययातिभस्य शत्रुत्वं इयं आचरती कुर्वती इतिमनसि आनीय असहिष्णुतयाकपोलसंबंधिनी मकरिकां उन्मूलयंतमार्जयंतं बाष्पप्रवाहं नयनेःउत्सृजंतीभिः ॥पुनःक०अनवरतंनिरंतरंअस्मात्कुसुमैः आमोदभरितान्विदधानाःकुर्वाणाःकयाधनादयःक्कसंतीतिगवेषयितुं मार्गितुमिवभुविदूरंअवतीर्णैर्मुक्तत्वादधोगतैः चिकुरहस्तैःकेशसमूहैः उपलक्षिताभिः मुक्ताभिः ॥पुनः०पवनसुतस्यपरिबोधालंभनेनगदानिदया परिपूरितैः अर्यायेषुतैः विलापैःदिगंतरंनिरंतरयंतीभिःपूरयंतीभिः ॥८॥प०अथकृष्टं आजिभूमौ आगतममुंपितृव्यंधृतराष्ट्रं द्रष्टुंभयेन आकुलाधीर्यस्यतेनयुधिष्ठिरेणअपनीत

श्राध्दं गतरां षं विधातुमभ्यर्थितौ हरिपराशरनंदनौ कृष्णाव्यासौ द्राकृ शीघ्रं आजग्मतुः ॥२२॥ व्यासकृष्णौ शोकेन अतितप्यमानं तं धृतराष्ट्रं सुतरां शांतं
व्यधत्तां अकुरुतां कोकमिव यथा नभोनभस्योः श्रावणभाद्रपदमासयोः दवपावकेन दावाग्निना दंदह्यमानं भृशं ज्वलंतं दाववृक्षं वनवृक्षं शांतं विधत्तः
तथा ॥२३॥ ग॰ अथ सहजैः बंधुभिः समं आहवभुवं रणभूमिं आगत्य स्वामिन् अनेकविधापराधकरणेन तव शापस्य पात्रं अयं जनः आगतः इत्यु
क्त्वा चरणयोः प्रणमंतं धर्मात्मजं प्रथमतः मृदुलं यथा तथा आलिंगितवंतं पश्चाद्गाढवज्ञेन अभिमायवेदिना मुकुंदेन पुरः अग्रभागे स्थापितो यो लोहस्य

तं व्यासकृष्णाववितप्यमानं शोकेन शांतं सुतरां व्यधत्तां नभोनभस्याविव दाववृक्षं दंदह्यमानं दवपावकेन २३ ग॰ अथ सहजैः सम
माहवभुवमागत्य स्वामिन्ननेकविधापराधकरणेन तव शापपात्रं जनो यमागत इति चरणयोः प्रणमंतं धर्मात्मजं प्रथमतो मृदुलमालिं
गितवंतं पश्चाद्गाढवज्ञेन मुकुंदेन पुरः स्थापितलोहभीमसेनेन सह निजवैरमपि चूर्णीकृतवंतं प्रज्ञाहशं तं पुरस्कृत्य स्मृतबहुलकरणी
यजातो युधिष्ठिरः पुरा भगीरथ इव प्रेतभूयं गताय सर्वस्मै ज्ञातिजनाय निर्मलैर्निलिंपनिम्नगासलिलैर्निवापांजलिनिर्वपणविधिवदेव
निर्वर्तयामास ॥७॥

भीमसेनः तेन सह निजवैरमपि चूर्णीकृतवंतं चूर्णतां प्राप्नुवंतं त्यजंतं च प्रज्ञादृशं अंधं तं धृतराष्ट्रं पुरस्कृ
त्य स्मृतं बहुलं करणीयजातं कर्तव्यसमूहो येन सः युधिष्ठिरः पुरा भगीरथ इव प्रेतभूयं गताय प्रेतत्वं प्राप्ताय सर्वस्मै ज्ञातिजनाय निर्मलैः पवित्रैः निलिं ७
पनिम्नगायाः सलिलैः निवापांजलीनां पितृभ्यो देयजलांजलीनां निर्वपणं दानं विधिवदेव यथाशास्त्रमेव निर्वर्तयामास कारयामास ॥७॥ ॥ ७

॥ पद्यं ॥ ततः युधिष्ठिरः हरिं पुरोधाय अग्रतः कृत्वा सोदरैः समं क्षीराब्धेः अमृतसमुद्रस्य वीचीरिव तोरणानां द्वारोपरि कौतुकेन बद्धानां आम्रपल्लवादीनां आवलीः यहंतीं ततवाद्यानां वीणादिवाद्यानां निस्वनाः शब्दाः यस्यां तां आत्मीयां स्वकीयां पुरीं हस्तिनापुरीं अविक्षत् प्राविक्षत् ॥ २४ ॥ सः पार्थः युधिष्ठिरः द्रुपदात्मजायाः वल्लभेन मध्यभागेन सूतैः प्रसूतैः चेलैः वस्त्रैः वितानिते संजातविताने तत्र तस्मिन् पितृव्यस्य धाम्नि तत् एकं दिनं स्थि

पद्यं ॥ क्षीराब्धिवीचीरिव तोरणावलीस्ततो यहंतीं ततवाद्यनिस्वनां हरिं पुरोधाय समं सहोदरैरविक्षदात्मीयपुरीं युधिष्ठिरः २४
वल्लभसूतैर्द्रुपदात्मजाया वितानिते धाम्नि स तत्र चेलैः स्थित्वा पितृव्यस्य दिनं तदेकं परेऽह्नि पार्थः प्रययौ स्वगेहं २५ ॥ ततः ॥ राज्याभिषेकसलिलादिव संगतं द्रागावर्तमुद्वहति मूर्धनि धर्मसूनोः कृष्णादयः शुभगुणे कृतिनो मुहूर्ते हैमं न्यधुर्मुकुटमुज्ज्वलरत्नजालं २६

त्वा परेऽह्नि स्वगेहं प्रययौ ॥ २५ ॥ ततः स्वनगरगमनादूर्ध्वं ॥ कृतिनः कुशलाः कृष्णादयः राज्याभिषेकसलिलात् सकाशादिव द्राक् संगतं आवर्तं अंभोभ्रमं उद्वहति धर्मसूनोः मूर्धनि मस्तके शुभगुणे मुहूर्ते उज्ज्वलं देदीप्यमानं रत्नानां जालं वृंदं यस्मिन् तं हैमं सौवर्णं मुकुटं न्यधुः स्थापयामासुः धर्मराजस्य यथाविधि राज्याभिषेकं चक्रुरित्यर्थः ॥ २६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

द्विजप्रणामेषु तदानीं ब्राम्हणनमस्कारेषु नृपस्य भुजसीम्नि लग्ना भूरेणुराजिः भूरेणुपंक्तिः एकाधिक द्वादश कत्रयोदशसु हायनेषु वनवासाज्ञातवासवर्षेषु अस्य धर्मराजस्य विरहात् कृशांगी क्षितिरिव स्युत्प्रेक्षा रेजे शुशुभे ॥ २७ ॥ ग० तदानीमेव व्यासविदुरसंजयैः सहभाषमाणं श्रीकृष्णं अग्र

द्विजप्रणामेषुनृपस्यलग्नाभूरेणुराजिर्भुजसीम्निरेजे एकाधिकद्वादशहायनेषुक्षितिःकृशांगीविरहादिवास्य २७

ग० तदानीमेवपराशरसुतविदुरसंजयैःसहसंभाषमाणंरमारमणमग्रतोविधायसविनयंबीभत्सुनादीयमानह

स्तावलंबोभूभारलघुकरणोपकारेणप्रीयमाणैर्दिग्वारणैःप्रेषितमिवमहांतंकंचिद्द्विपमुपवाह्यमधिरूढःशशिमंड

लेनशरद्राकाशर्वरीप्रथमयामइवधवलातपत्रेणपरिष्क्रियमाणोपरिभागोलालनवशेनपार्श्वयोरागम्यप्रमोदतरल

पक्षपुटाभ्यांमरालदंपतिभ्यांचतुर्मुखइवचामराभ्यामुपवीज्यमानोहर्म्यशिखरावलंबिनीनांनितंबिनीनांकपोलस्ख

लनदूरविप्रकीर्णैरानंदबाष्पबिंदुमुकुलैरिवलाजांजलिभिरवकीर्यमाणःपुरःसरविविधमंगलवाद्यगुरुजनशिष्यायमा

णगवाक्षपरंपरांतांपुरींप्रदक्षिणीकृत्यद्वारभुवमवतीर्णोनिजमणितिलकप्रतिबिंबानीवदीपांकुराणिकनकपात्रमध्ये

वहंतीभिर्वारसीमंतिनीभिर्विरचितार्तिक्यमंगलःपांडुसूनुर्निबिडवितानमाल्यधूपपरिमलसुरभितमंडपेकुरुकुलक्रमा

दागतंसर्वतोभद्रंनामसिंहासनमध्यवात्सीत् ॥ ९ ॥ तोविधाय सविनयं यथातथा बीभत्सुना अर्जुनेनदीयमानः हस्तावलंबो यस्य सः भू-

भारस्य लघुकरणरूपोय:उपकार:तेनप्रीयमाणे:संतुष्यद्भि:दिग्वारणे:दिग्गजे:प्रेषितमिवेत्युत्प्रेक्षा महांतंउच्चंस्थूलंचउपबाह्यंवाहनंद्विपंग जंअधिरूढ:शशिमंडलेनशरत्कालिकपौर्णमास्या:प्रथमयामइवधवलातपत्रेणपरिरक्षियमाण:शोभानीत:उपरिभागोयस्यस:लालनचपेनपा र्श्वयो:आगम्यप्रमोदेनतरलौचंचलौपक्षपुटौययोस्ताभ्यांमरालदंपतिभ्यांचतुर्मुखइवब्रह्मेवेत्युपमा चामराभ्यांवीज्यमान:हर्म्यशिखरेषुधनि कगृहाग्रभागेषुअवलंबिनीनां आरूढानांनितंबिनीनांसुंदरीणांकपोलयो:स्खलनेन दूरंविप्रकीर्णे:आनंदबाष्पबिंदव:मुकुलानीव आनंदबाष्प मुकुलानितैरिव लाजांजलिभि:विकीर्यमाण:पुर:सराणियानिविविधानिमंगलवाद्यानितान्येवगुरूजना:तेषांशिष्यायमाणाशिष्यवदाचरंतोयंग

प॰सोथंकदाचिदधिरुह्यसमंसुहृद्भिर्भूपश्चिराद्विरहितस्यपुरस्यतस्य वापीषुवीथिषुवनीषुचतुष्पथेषुनृत्यालयेषुचनिमज्जयतिस्म
दृष्टिं २८

लयाघनिनादोत्तरंप्रतिध्वनिनादंकुर्वती गवाक्षाणांपरंपरायस्यांतांपुरींहस्तिनानगरींप्रदक्षिणीकृत्यद्वारभुवंअवतीर्ण:निजा:येमणितिलका:मणि श्रेष्ठा:तेषांप्रतिबिंबानीवदीपांकुराणिकनकपात्रमध्येवर्तंतीभि:वारसीमंतिनीभि:वारवनिताभि:विरचितंकृतंआर्तिक्यमंगलंयस्यस:पांडुसूनु: धर्मराज:निबिडानिघनानिवितानानियस्मिन्तस्मिन्माल्यधूपानांपरिमलेनसुरभितेसुगंधितेमंडपे कुरुकुलक्रमादागतंसर्वतोभद्रंनामसिंहास नमध्यंअध्यवात्सीत्आरोहणंकृतवान्॥९॥प॰कदाचिन्भूप:धर्मराज:सुहृद्भि:समंसौधंराजगृहोपरिभागंअधिरुह्यचिरान्बहुकालंविरहित स्यस्वकीयविरहयुक्तस्यतस्यहस्तिनापुरस्यवापीषुवीथिषुगृहपरंपरासुवनीषुउपवनेषुचतुष्पथेषुचतुर्मार्गस्थसभासुनृत्यालयेषुदृष्टिंनिमज्जयति

स्म बहुकालंसादरमवलोकयामासेत्यर्थः॥२८॥ तदानींखलु॥ यःशकुनेःकरःपणमिषात् ग्लहकपटात् क्षोणींकोशगृहाणिगोधनततिंगवांसमु
दायंघोटान् अश्वान् रथान्कुंजरान् अन्यांसंपदमपि अस्माकमीशाय दुर्योधनराजाय अदात् तादृक्षःशकुनेःकरःविजयतांसर्वोत्कर्षेण वर्ततांइति
उद्यानेआलपंतीःशुकीःशुकपक्ष्यंगनाःनिशम्यदृष्ट्वा धर्मतनयःमंदंयथातथा अनुजैःसह जहास॥ २९॥ अनुजैःसह कृतज्ञःअसौपांडवःध

तदानींखलु॥ क्षोणींकोशगृहाणि गोधनततिंघोटान्रथान्कुंजरानन्यांसंपदमप्यदात्पणामिषादस्माकमीशाययः
तादृक्षःशकुनेःकरोविजयतामित्यालपंतीःशुकीरुद्यानेर्थनिशम्यधर्मतनयोमंदंजहासानुजैः॥२९॥ कृतज्ञःपांडवो
सौस्मृतशतविरहादंतरत्यंतमार्तंभक्त्यासाकंपितृव्यंप्रतिदिनमनुजैरग्रतःस्थापयित्वा कृत्वाधस्तात्कुशाग्रंविजि
तमिवधियाप्रांजलिःसर्वधर्मान्भीष्माद्वर्णाश्रमाणामविकलमशृणोत्स्वास्पदंगंतुमिच्छोः॥ ३०॥ ॥

र्मराजःस्मृतशतस्यविरहात् — अंतःअंतःकरणे अत्यंतं आर्तंपीडितंपितृव्यं धृतराष्ट्रं भक्त्यासाकं प्रतिदिनं अग्रतःस्थापयित्वा धियाविजितमिव
कुशाग्रं अधस्तात् कृत्वा कुशासने उपविश्येत्यर्थः प्रांजलिःकृतांजलिःसन् स्वस्यस्थानं वस्रुलोकं गंतुमिच्छोःभीष्मात् वर्णानां ब्राम्हणादीनां आ
श्रमाणां ब्रम्हचर्यादीनां सर्वधर्मान् अविकलंसमग्रं यथातथा अशृणोत्॥ ३०॥ ॥ ५॥ ॥ ५॥ ॥ ५

तदनु आलंकायाः लंकांमर्यादीकृत्य हिमाद्रेः हिमाचलं मर्यादीकृत्यच अनुजैः कृत्वाजिताश्रीःराज्ञांलक्ष्मीर्येनसः शौरेः कृष्णास्यदोष्णा बाहुना घ
टितःनिजदोःस्वबाहुर्येनसः कृष्णादोर्बलेनैतस्यदोर्बलमितिभावः भक्त्याकृष्णालिंगनसमयेच तथाभूदेवनियमपराधीर्यस्यसः धर्मभूः धर्मराजःवे
दिपार्श्वे यज्ञकुंडस्थले भूमिपार्श्वभागे साहस्रीणांसहस्रसंख्यावतांशतमखस्य इंद्रस्य दृशांअभ्यसूयांईर्ष्यांसंदधानः कुर्वाणः सन् अन्यादृक्षंलो
कविलक्षणंनिरुपमं अश्वमेधं आजहार चकार ॥ ३१ ॥ असौधर्मतनूभवः राजा आत्म नः चरणयोः राज्ञां मौलिपरंपरांनमनेनमस्तकसमूहंकुर्वन्

आलंकायास्तदनुसहजैराहिमाद्रेर्जितश्रीःशौरेर्दोष्णाघटितनिजदोर्धर्मभूर्वेदिपार्श्वे साहस्रीणांशत
मखदृशांसंदधानोभ्यसूयामन्यादृक्षंनियमपरधीराजहाराश्वमेधं॥३१॥ राज्ञांमौलिपरंपरांचरणयोःपा
णौप्रदानश्रियंबुद्धौराजनयोदयंहृदिकृपांसत्यंचजिह्वांचले बाहौसागरमेखलांवसुमतींमस्तेकिरीटं
मुदाकुर्वन्धर्मतनूभवश्चिरमसौगोपायतिस्मप्रजाः ॥३२॥ ॥ ॥

सन् पाणौहस्तेप्रदानस्य श्रियंकुर्वन् बुद्धौराजनयस्यराजनीतेःउदयंकुर्वन् हृदिकृपां कुर्वन् जिह्वांचलेजिह्वाग्रभागे वचसीत्यर्थः सत्यंकुर्वन् बा
हौ सागरमेखलां समुद्रवलयांवसुमतीं कुर्वन् स्वबाहुनातद्रक्षणं कुर्वन्नित्यर्थः मस्ते मस्तके किरीटं कुर्वन् राजचिह्नं धारयन् सन्नित्यर्थः चिरंबहु
कालं प्रजाःगोपायतिस्मररक्ष ॥ ३२ ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

इदानीं कविः स्वग्रंथस्य सौंदर्यं द्वाभ्यांवर्णयति दिगंतरेति दिगंतरे लुठंतीकीर्तिर्यस्यसः अनंतसंज्ञः कविकुंजरः कविश्रेष्ठः सरस्वत्याः दे व्याः प्राणैस्तुल्यं प्राणवदतिप्रियंचंपूभारतं गद्यपद्यात्मकं भारतेतिहासयुक्तंग्रंथं प्राणैषीत् रचयामास ॥ २३॥ उन्मीलयतां विकसतां अं बुजानां कदंबकस्य सौरभीवसौरभीयासां तासां अनेनस्वादुताप्रतिपाद्यते उच्चैः नृत्यन् यः ईशः शिवः तस्य मुकुटीतटिन्याः भागीरथ्याः सखी

दिगंतरलुठत्कीर्तिरनंतकविकुंजरः प्राणैस्तुल्यंसरस्वत्याःप्राणैषीच्चंपुभारतं ॥ २३॥ उन्मीलदंबुज कदंबकसौरभीणामुन्नृत्यदीशमुकुटीतटिनीसखीनां आचांतवैरियशसाममृतोर्मिलानांवाचामनंतसुक वेर्वसुधैवमौल्यं॥ २४॥ ॥इत्यनंतभट्टकविकृतौचंपूभारतेद्वादशस्तबकःसमाप्तिमगमत्॥१२॥ ॥छ॥

नां अनेन पावित्र्यं प्रतिपाद्यते आचांतं नाशितं वैरियशो याभिस्तासां अनेन स्वस्पर्धाकारिणामुपमर्दो द्योत्यते अमृतोर्मिलानां अमृतोर्मिसदृशी नां अनेनमाधुर्यं द्योत्यते अनंतसुकवेः वाचांवसुधैव संपूर्णापृथिव्येवमौल्यंभवेत् ॥ २४ ॥ ॥छ॥ ॥छ॥ ॥छ॥

॥ बल्लालसंज्ञः खलु धर्ममूर्तिरभूत्पुरा तत्कुलमध्यवर्ती श्रीखंडनीनाम्नि मथितेन्ववाये संबा... थः प्रबभूव येन १. श्रीमद्भवानीकमलेश्वरस्य
दाक्षमाध्वीलिहसत्स्वभावं संप्राप्य विद्यामधिगम्य राज्ञश्छत्राधिपेशः करवीरभोजः २, शिवाजिसंज्ञस्य कृपासमुद्रसंकोऽड्यवृत्तिं प्रतिपद्य दु-
र्गे मनोहरे भूधरनाम्नि चक्रे स्थितिः कुटुंबस्य जितेंद्रसौख्या ३ तस्यात्मजानां प्रथमः प्रतीतो बाबाजिनाम्नापि तु रामविद्यः नारायणाख्योपि-
सभारतेतिहाससाद्यचंपा अकरोत्स्फुटटीकां ४ बालावबोधार्थमविस्तरार्थमायोन कोशादिविलेखनानि रामेभवार्जां दुशकेनभस्ये ऽनंगेसिते-
सा परिपूर्तिमागादिति सर्वशिवं ॥५॥ ॥ इति श्रीखंडोपाह्वबाजीरायात्मजनारायणसूरिविरचितायां चंपूभारतटीकायां द्वादशस्तबकः सम-
प्तिमगमत् ॥१२॥ ॥ श्रीगोपीवल्लभायनमः ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥
ग्रंथसंख्या एकंदर मूळ २५०० टीका ६००० मिळून ८५०० ॥ ॥ श्रावणशुक्ल २ शके १७८६ ॥ ॥ ॥
हें पुस्तक मुंबईपेथें अनंतऋषीचेवाडींत काशिनाथवासुदेवखंडेकर व कालिदासनरोत्तमदास या उभयतांनीं आपल्या चंद्रप्रकाशछाप-
खान्यांत छापिलें ॥ ॥ श्रीगोपालकृष्णायनमः ॥ ॥ ॥ ॥

इतिश्रीभारतचंपूद्वादशस्तबकःसमाप्तः॥श्रीकृष्ण·